तुम्हारी यह शक्ति वानरोकी स्वाभाविक शक्ति तो नही दिखाई पड़ती ॥२५२॥ तदनन्तर विद्याधरोके राजा विद्युत्केशको विनयावनत देख कर महोदधिकुमारने यह वचन कहे ॥२५३॥ कि पशुजातिके स्वभावसे जो अत्यन्त चपल था तथा इसी चपलताके कारण जिसने तुम्हारी स्त्रीका अपराध किया था ऐसे जिस वानरको तूने मारा था वह मै ही हूँ । साधुओके प्रसादसे इस देवत्व पर्यायको प्राप्त हुआ हूँ । यह पर्याय महाशक्तिसे युक्त है तथा इच्छानुसार इसमे संपदाएँ प्राप्त होती है ॥२५४–२५५॥ तुम मेरी विभूतिको देखो यह कह कर उसने मनोदधि कुमारदेवके योग्य अपनी उत्कृष्ट लक्ष्मी उसके सामने प्रकट कर दी ॥२५६॥ यह देख भयसे विद्युत्केशका सर्व शरीर कॉपने लगा, उसका हृदय विदीर्ण हो गया, रोमाञ्च निकल आये और ऑखे घूमने लगी ॥२५७॥ तब महोदधिकुमारने कहा कि डरो मत । देवकी वाणी सुन, दु'खी होते हुए विद्युत्केशने गद्गद वाणीमे कहा कि मैं क्या करूँ ? जो आप आज्ञा करो सो करूँ ॥२५८॥ तदनन्तर वह देव राजा विद्युत्केशको जिन्होंने पञ्च नमस्कार मन्त्र दिया था उन गुरुके पास ले गया । वहॉ जाकर देव तथा राजा विद्युत्केश दोनोने प्रदक्षिणा दे कर गुरुके चरणोमे नमस्कार दिया ॥२५९॥ महोदधिकुमार देवने मुनिराजकी यह कह कर बार-बार स्तुति की कि मै यद्यपि वानर था तो भी समस्त प्राणियोसे स्नेह रखने वाले आप ऐसे गुरुको पा कर मैने यह देव पर्याय प्राप्त की है । यह कह कर उसने महामालाओसे मुनिराजकी पूजा की तथा चरणोमे नमस्कार किया ॥२६०–२६१॥ यह आश्चर्य देखकर विद्याधर विद्युत्केशने मुनिराजसे पूछा कि हे देव ! मै क्या करूँ ? मेरा क्या कर्तव्य है ? इसके उत्तरमें मुनिराजने निम्नांकित हितकारी वचन कहे कि चार ज्ञानके धारी हमारे गुरु पास ही विद्यमान हैं सो हम लोग उन्हीके समीप चले, यही सनातन धर्म है ॥२६२–२६३॥ आचार्यके समीप रहने पर भी जो उनके पास नहीं जाता है और स्वयं उपदेशादि देकर आचार्यका काम करता है वह मूर्ख शिष्य, शिष्यपनाको दूरसे ही छोड़ देता है । वह न तो शिष्य रहता है और न आचार्य ही कहलाता है, वह धर्मरहित है, कुमार्गगामी है, अपने समस्त आचारसे भ्रष्ट है और साधुजनोके द्वारा निन्दनीय है ॥२६४–२६५॥ मुनिराजके ऐसा कहनेपर देव और विद्याधर

---

१. अपराधः म०, ख० । २. महोदधिः सुरो-म० ।

अहो परममाहात्म्यं तपसो भुवनातिगम् । मुनेरेवंविधस्यापि यदन्यो विद्यते गुरुः ॥२६७॥
ततस्तस्योपकण्ठे ते साधुनाधिष्ठिता ययुः । देवाश्च व्योमयानाश्च धर्मोत्कण्ठितचेतसः ॥२६८॥
गत्वा प्रदक्षिणीकृत्य प्रणम्यादरतो मुनिम् । नातिदूरे न चात्यन्तसमीपे स्थितिमाश्रिताः ॥२६९॥
ततस्ताः परमां मूर्तिं तपोराशिसमुत्थया । प्रज्वलन्तीं मुनेर्दीप्त्या[1] दृष्ट्वा देवनभश्चराः ॥२७०॥
चिन्तां कामपि संप्राप्ता धर्माचारसमुद्भवाम् । प्रफुल्लनयनाम्भोजा महाविनयसंगताः ॥२७१॥
ततो देवनभोयानावञ्जलिं न्यस्य मस्तके । पप्रच्छतुर्मुनिं धर्मं फलं चास्य यथोचितम् ॥२७२॥
ततो जन्तुहितासङ्गनित्यप्रस्थितमानसः । संसारकारणासङ्गदूरीकृतसमीहितः ॥२७३॥
सजलाम्भोदगम्भीरधीरया श्रमणो गिरा । जगाद परमं धर्मं जगतोऽभ्युदयावहम् ॥२७४॥
तस्मिन् गदति तद्देशे लतामण्डपसंश्रिताः । ननृतुः शिखिसंघाता मेघनादविशङ्किनः[2] ॥२७५॥
समाधाय मनो धर्मः श्रूयतां सुरखेचरौ । यथा जिनैः समुद्दिष्टो भुवनानन्दकारिभिः ॥२७६॥
धर्मशब्दनमात्रेण बहवः प्राणिनोऽधमाः । अधर्ममेव सेवन्ते विचारजडचेतसः ॥२७७॥
मार्गोऽयमिति यो गच्छेत् दिशमज्ञाय मोहवान् । द्राघीयसापि कालेन नेष्टं स्थानं स गच्छति ॥२७८॥
कथाकल्पितधर्माख्यमधर्मं मन्दमानसाः[3] । प्राणिघातादिभिर्जातं सेवन्ते विषयाश्रिताः ॥२७९॥
ते[4] तं भावेन संसेव्य मिथ्यादर्शनदूषिताः । तिर्यग्नरकदुःखानां प्रपद्यन्ते निधानताम् ॥२८०॥
कुहेतुजालसंपूर्णग्रन्थार्थैर्गुरुदण्डकैः । धर्मोपलिप्सया मूढास्ताडयन्ति नभस्तलम् ॥२८१॥

दोनों ही परम आश्चर्यको प्राप्त हुए। अपने अपने परिवारके साथ उन्होंने मनमें विचार किया कि अहो तपका कैसा लोकोत्तर माहात्म्य है कि ऐसे सर्वगुणसम्पन्न मुनिराजके भी अन्य गुरु विद्यमान है ॥२६६-२६७॥ तदनन्तर धर्मके लिए जिनका चित्त उत्कण्ठित हो रहा था ऐसे देव और विद्याधर उक्त मुनिराजके साथ उनके गुरुके समीप गये ॥२६८॥ वहाँ जाकर उन्होंने बड़े आदरके साथ प्रदक्षिणा देकर गुरुको नमस्कार किया और नमस्कारके अनन्तर न तो अत्यन्त दूर और न अत्यन्त पास किन्तु कुछ दूर हट कर बैठ गये ॥२६९॥ तदनन्तर तपकी राशिसे उत्पन्न दीप्तिसे देदीप्यमान मुनिराजकी उस उत्कृष्ट मुद्राको देख कर देव और विद्याधर धर्माचारसे समुद्भूत किसी अद्भुत चिन्ताको प्राप्त हुए। उस समय हर्ष और आश्चर्यसे सबके नेत्र-कमल प्रफुल्लित हो रहे थे तथा सभी महाविनयसे युक्त थे ॥२७०-२७१॥ तत्पश्चात् देव और विद्याधर दोनोंने हाथ जोड़ मस्तकसे लगाकर मुनिराजसे धर्म तथा उसके यथायोग्य फलको पूछा ॥२७२॥ तदनन्तर जिनका मन सदा प्राणियोंके हितमें लगा रहता था तथा जिनकी समस्त चेष्टाएँ संसारके कारणोंके संपर्कसे सदा दूर रहती थी ऐसे मुनिराज सजल मेघकी गर्जनाके समान गम्भीर वाणीसे जगत्का कल्याण करनेवाले उत्कृष्ट धर्मका निरूपण करने लगे ॥२७३-२७४॥ जब मुनिराज बोल रहे थे तब लतामण्डपमें स्थित मयूरोंके समूह मेघ गर्जनाकी शंका कर हर्षसे नृत्य करने लगे थे ॥२७५॥ मुनिराजने कहा कि हे देव और विद्याधरो! संसारका कल्याण करनेवाले जिनेन्द्र भगवान्ने धर्मका जैसा स्वरूप कहा है वैसा ही मैं कहता हूँ आप-लोग मन स्थिर कर सुनो ॥२७६॥ जिनका चित्त विचार करनेमें जड़ है ऐसे बहुतसे अधम प्राणी धर्मके नाम पर अधर्मका ही सेवन करते हैं ॥२७७॥ जो मोही प्राणी गन्तव्य दिशाको जाने विना 'यही मार्ग है' ऐसा समझ विरुद्धदिशामें जाता है वह दीर्घकाल बीत जाने पर भी इष्ट स्थान पर नहीं पहुँच सकता है ॥२७८॥ विचार करनेकी क्षमतासे रहित विषयलम्पटी मनुष्य, कथा-कहानियों द्वारा जिसे धर्म संज्ञा दी गई है ऐसे जीवघात आदिसे उत्पन्न अधर्मका ही सेवन करते हैं ॥२७९॥ मिथ्यादर्शनसे दूषित मनुष्य ऐसे अधर्मका अभिप्रायपूर्वक सेवनकर तिर्यञ्च तथा नरकगतिके दुःखोंके पात्र होते हैं ॥२८०॥ कुयुक्तियोंके जालसे परिपूर्ण ग्रन्थोंके अर्थसे मोहित

१. दीप्ता म० । २. विशङ्किताः म० । ३. मदमानसाः म० । ४. ते ते म० ।

यद्यपि स्यात् क्वचित्किञ्चिद्धर्मं[1] प्रति कुशासने । हिंसादिरहिताचारे शरीरश्रमदेशिनि[2] ॥२८२॥
सम्यग्दर्शनहीनत्वान्मूलच्छिन्नं तथापि तत्[3] । [4]नाज्ञानं क्षुद्रचारित्रं तेषां भवति मुक्तये ॥२८३॥
पार्थिवो लोष्टलेशोऽपि वैडूर्यमपि पार्थिवम् । न पार्थिवत्वसामान्यात्तयोस्तुल्यं गुणादिकम् ॥२८४॥
लोष्टुलेशसमो धर्मो मिथ्यादृग्भिः प्रकीर्तितः । वैडूर्यसदृशो जैनो धर्मसंज्ञा तु सर्वगा ॥२८५॥
धर्मस्य हि दया मूलं तस्या मूलमहिंसनम् । परिग्रहवतां पुंसां हिंसनं सं[5]ततोद्भवम् ॥२८६॥
तथा सत्यवचो धर्मस्तच्च यन्न परासुखम् । अदत्तादानमुक्तिश्च परनार्याश्च वर्जनम् ॥२८७॥
द्रविणाप्तिषु संतोषो हृषीकाणां निवारणम् । तनूकृतिः कषायाणां विनयो ज्ञानसेविनाम् ॥२८८॥
व्रतमेतद् गृहस्थानां सम्यग्दर्शनचारिणाम् । आगाररहितानां तु शृणु धर्मं यथाविधि ॥२८९॥
पञ्चोदारव्रतोत्तुङ्गमातङ्गस्कन्धवर्तिनः । त्रिगुप्ति[6]दृढनीरन्ध्रकङ्कटच्छन्नविग्रहाः ॥२९०॥
पादातेन[7] समायुक्ताः समित्या पञ्चभेदया । नानातपोमहातीक्ष्ण[8]शस्त्रयुक्तमनस्कराः ॥२९१॥
वृतं कषायसामन्तैर्मोहवारणवर्तिनम् । भवारातिं विनिघ्नन्ति निरम्बरमहानृपाः ॥२९२॥
सर्वारम्भपरित्यागे सम्यग्दर्शनसंगते । धर्मं[9] स्थितोऽनगाराणामेष धर्मः समासतः ॥२९३॥
त्रिलोकश्रीपरिप्रा[10]प्तेर्धर्मोऽयं हेतुतां गतः । एष एव परः प्रोक्तो मङ्गलं पुरुषोत्तमैः ॥२९४॥
अन्यः कस्तस्य कथ्येत धर्मस्य परमो गुणः । त्रिलोकशिखरं येन प्राप्यते सुमहासुखम् ॥२९५॥

---

प्राणी धर्म प्राप्त करनेकी इच्छासे बड़े-बड़े दण्डोंके द्वारा आकाशको ताडित करते है अर्थात् जिन कार्योंमे धर्मकी गन्ध भी नहीं उन्हें धर्म समझकर करते है ॥२८१॥ जिसमे प्रतिपादित आचार, हिंसादि पापोंसे रहित है तथा जिसमे शरीर-श्रम—कायक्लेशका उपदेश दिया गया है ऐसे किसी मिथ्याशासनमे भी यद्यपि थोड़ा धर्मका अंश होता है तो भी सम्यग्दर्शनसे रहित होनेके कारण वह निर्मूल ही है। ऐसे जीवोंका ज्ञानरहित क्षुद्र चारित्र मुक्तिका कारण नहीं है ॥२८२–२८३॥ मिट्टीका ढेला भी पार्थिव है और वैडूर्य मणि भी पार्थिव है सो पार्थिवत्व सामान्यकी अपेक्षा दोनोंके गुण आदिक एक समान नहीं हो जाते ॥२८४॥ मिथ्यादृष्टियोंके द्वारा निरूपित धर्म मिट्टीके ढेलेके समान है और जिनेन्द्र भगवान्के द्वारा निरूपित धर्म वैडूर्य मणिके समान है जब कि धर्म संज्ञा दोनोंमे ही समान है ॥२८५॥ धर्मका मूल दया है और दयाका मूल अहिंसा रूप परिणाम है। परिग्रही मनुष्योंके हिंसा निरन्तर होती रहती है ॥२८६॥ दयाके सिवाय सत्य वचन भी धर्म है परन्तु सत्य वचन वह कहलाता है कि जिससे दूसरेको दुःख न हो। अदत्तादानका त्याग करना, परस्त्रीका छोड़ना, धनादिकमे संतोष रखना, इन्द्रियोंका निवारण करना, कषायोंको कृश करना और ज्ञानी मनुष्योंकी विनय करना, यह सम्यग्दृष्टि गृहस्थोंका व्रत अर्थात् धर्म है। अब गृहरहित मुनियोंके धर्मका विधिपूर्वक निरूपण करता हूँ सो सुनो ॥२८७–२८९॥ जो पञ्च महाव्रत रूपी उन्नत हाथीके स्कन्धपर सवार है, तीन गुप्ति रूपी मजबूत तथा निश्छिद्र कवचसे जिनका शरीर आच्छादित है, जो पञ्च समितिरूपी पैदल सिपाहियोंसे युक्त है, और जो नाना तपरूपी महातीक्ष्ण शस्त्रोंके समूहसे सहित है ऐसे दिगम्बर यति रूपी महाराजा, कषाय रूपी सामन्तोंसे परिवृत तथा मोह रूपी हाथीपर सवार संसार रूपी शत्रुको नष्ट करते हैं ॥२९०–२९२॥ जब सब प्रकारके आरम्भका त्याग किया जाता है और सम्यग्दर्शन धारण किया जाता है तभी मुनियोंका धर्म प्राप्त होता है। यह संक्षेपमे धर्मका स्वरूप समझो ॥२९३॥ यह धर्म ही त्रिलोक सम्बन्धी लक्ष्मीकी प्राप्तिका कारण है। उत्तम पुरुषोंने इस धर्मको ही उत्कृष्ट मङ्गलस्वरूप कहा है ॥२९४॥ जिस धर्मके द्वारा

---

१. धर्मस्य लेशः धर्मं प्रति ( अव्ययीभावसमासः ) । २. -देशिने म०, ख० । ३. च म० । ४. न ज्ञानं म० । ५. स तदोद्भवम् म० । ६. त्रिगुप्त म० । ७. पदातीनां समूहः पादातं तेन । ८. महीतीक्ष्ण म० । ९. धर्मस्थितानगाराणां -म० । १०. प्राप्ते धर्मोऽयं म० ।

सागारेण जन स्वर्गे भुङ्क्ते भोगान्महागुणान् । देवीनिवहमध्यस्थो मानसेन समाहृतान् ॥२९६॥
निर्वाससा तु धर्मेण मोक्ष प्राप्नोति मानव । अनोपम्यमनाबाध सुख यत्रान्तवर्जितम् ॥२९७॥
स्वर्गगास्तु पुनश्च्युत्वा प्राप्य दैगम्बरी क्रियाम् । द्वित्रैर्भवै प्रपद्यन्ते प्रकृष्टा परम पदम् ॥२९८॥
काकताल्लीययोगेन प्राप्ता अपि सुरालयम् । कुयोनिषु पुन पापा भ्रमन्त्येव कुतीर्थिन ॥२९९॥
जैनमेवोत्तमं वाक्य जैनमेवोत्तम तप । जैव एव परो धर्मो जैनमेव पर मतम् ॥३००॥
नगर व्रजत पुसो वृक्षमूलादिसगम । नान्तरीयकतामेति यथा खेदनिवारण[1] ॥३०१॥
प्रस्थितस्य तथा मोक्ष जिनशासनवर्त्मना । देवविद्याधरादिश्रीरनुषङ्गेण जायते ॥३०२॥
विबुधेन्द्रादिभोगाना हेतुत्व यत्प्रपद्यते । [2]जिनधर्मो न तच्चित्र ते ह्यस्मात् सुकृतादपि ॥३०३॥
विपरीत यदेतस्माद् गृहिश्रमणधर्मत । चरित तस्य सज्ज्ञान[3]मधर्मं इति कीर्तितम् ॥३०४॥
भ्रमन्ति येन तिर्यक्षु नानादु खप्रदायिषु । वाहनात्ताडनाच्छेदाद्भेदाच्छीतोष्णसगमात् ॥३०५॥
नित्यान्धकारयुक्तेषु नरकेषु च भूरिषु । तुषारपवनाघातकृतकम्पेषु केषुचित् ॥३०६॥
स्फुरत्स्फुलिङ्गरौद्राग्निज्वालालीढेषु केषुचित् । नानाकारमहारावयन्त्रव्याप्तेषु केषुचित् ॥३०७॥
सिहव्याघ्रवृकश्येनगृद्ध्ररुद्धेषु केषुचित् । चक्रक्रकचकुन्तासिमोचिवृक्षेषु केषुचित् ॥३०८॥

---

महासुखदायी त्रिलोकका शिखर अर्थात् मोक्ष प्राप्त हो जाता है उस धर्मका और दूसरा कौन उत्कृष्ट गुण कहा जावे ? अर्थात् धर्मका सर्वोपरि गुण यही है कि उससे मोक्ष प्राप्त हो जाता है ॥२९५॥ गृहस्थ धर्मके द्वारा यह मनुष्य स्वर्गमे देवीसमूहके मध्यमे स्थित हो संकल्प मात्रसे प्राप्त उत्तमोत्तम भोगोको भोगता है और मुनि धर्मके द्वारा उस मोक्षको प्राप्त होता है जहाँ कि इसे अनुपम, निर्बाध तथा अनन्त सुख मिलता है ॥२९६-२९७॥ स्वर्गगामी उत्कृष्ट मनुष्य स्वर्गसे च्युत होकर पुन मुनिदीक्षा धारण करते है और दो तीन भवोमे ही परम पद—मोक्ष प्राप्त कर लेते है ॥२९८॥ परन्तु जो पापी-मिथ्यादृष्टि जीव है वे काकतालीयन्यायसे यद्यपि स्वर्ग प्राप्त कर लेते है तो भी वहाँसे च्युत हो कुयोनियोमे ही भ्रमण करते रहते है ॥२९९॥ जिनेन्द्र भगवान्के द्वारा कथित वाक्य अर्थात् शास्त्र ही उत्तम वाक्य है, जिनेन्द्र भगवान्के द्वारा निरूपित तप ही उत्तम तप है, जिनेन्द्र भगवान्के द्वारा प्रोक्त धर्म ही परम धर्म है और जिनेन्द्र भगवान्के द्वारा उपदिष्ट मत ही परम मत है ॥३००॥ जिस प्रकार नगरकी ओर जानेवाले पुरुषको खेद निवारण करनेवाला जो वृक्षमूल आदिका सगम प्राप्त होता है वह अनायास ही प्राप्त होता है उसी प्रकार जिन शासन रूपी मार्गसे मोक्षकी ओर प्रस्थान करनेवाले पुरुषको जो देव तथा विद्याधर आदिकी लक्ष्मी प्राप्त होती है वह अनुषङ्गसे ही प्राप्त होती है—उसके लिए मनुष्यको प्रयत्न नहीं करना पड़ता है ॥३०१-३०२॥ 'जिनधर्म, इन्द्र आदिके भोगोंका कारण होता है' इसमे आश्चर्यकी बात नहीं है क्योकि इन्द्र आदिके भोग तो साधारण पुण्य मात्रसे भी प्राप्त हो जाते हैं ॥३०३॥ इस गृहस्थ और मुनिधर्मके विपरीत जो भी आचरण अथवा ज्ञान है वह अधर्म कहलाता है ॥३०४॥ इस अधर्मके कारण यह जीव वाहन, ताडन, छेदन, भेदन तथा शीत उष्णकी प्राप्ति आदि कारणोसे नाना दु ख देनेवाले तिर्यञ्चोमे भ्रमण करता है ॥३०५॥ इसी अधर्मके कारण यह जीव निरन्तर अन्धकारसे युक्त रहनेवाले अनेक नरकोमे भ्रमण करता है । इन नरकोमे कितने ही नरक तो ऐसे है जिनमे ठण्डी हवाके कारण निरन्तर शरीर काँपता रहता है । कितने ही ऐसे है जो निकलते हुए तिलगोसे भयंकर दिखनेवाली अग्निकी ज्वालाओंसे व्याप्त है। कितने ही ऐसे हैं जो नाना प्रकारके महाशब्द करनेवाले यन्त्रोसे व्याप्त हैं। कितने ही ऐसे है जो विक्रियानिर्मित सिंह, व्याघ्र, वृक, बाज तथा गीध आदि जीवोसे भरे हुए है।

---

१. निवारिणः म०, क० । २. जिनधर्मान्न ख० । ३. सज्ञा न धर्मं म० ।

विलीनत्रिपुसीसादिपानदायिषु केषुचित् । तीक्ष्णतुण्डस्फुरत्क्रूरमक्षिकादिषु केषुचित् ॥३०९॥
कृमिप्रकारसम्मिश्ररक्तपङ्केषु केषुचित् । परस्परसमुद्भूतबाधाहेतुषु केषुचित् ॥३१०॥
एवंविधेषु जीवाना सदा दुःखविधायिषु । दुःख यन्नरकेषु स्यात् क शक्तस्तत्प्रकीर्तितुम् ॥३११॥
यतो यथा पुरा भ्रान्तौ युवां दुःखासु योनिषु । तथा पर्यटन भूयः प्राप्स्यतो धर्मवर्जितौ ॥३१२॥
इत्युक्ताभ्यां परिपृष्टस्ताभ्यां श्रमणसत्तम । कथ कुयोनिषु भ्रान्तावावामिति मुने वद ॥३१३॥
जन्मान्तर ततोऽवोचत्तयोः सयममण्डन । मनो निधीयतां वत्सावित्युक्त्वा मधुरं वच ॥३१४॥
पर्यटन्तौ युवामत्र ससारे दुःखदायिनि । परस्परस्य कुर्वाणौ वध मोहपरायणौ ॥३१५॥
मानुष्यभवमायातौ कथंचित् कर्मयोगतः । अयं हि दुर्लभो लोके धर्मोपादानकारणम् ॥३१६॥
व्याधस्तयोरभूदेको विषये काशिनामनि । श्रावस्त्यामपरोऽमात्यपदे स्थैर्यमुपागत. ॥३१७॥
सुयशोदत्तनामासौ प्रव्रज्यामाश्रित क्षितौ । चचार तपसा युक्तो महताऽत्यन्तरूपवान् ॥३१८॥
ततस्त सुस्थित देशे काश्यां प्राणिविवर्जिते । पूजनार्थं समायाता सम्यग्दृष्टिकुलाङ्गना ॥३१९॥
स्त्रीभिस्तत परीत त व्याधोऽसौ वीक्ष्य योगिनम् । अतक्षणोद्वाग्भिरुग्राभि शस्त्रैः कुर्वन् विभीतिकाम् ॥३२०॥
निर्लज्जो वस्त्रमुक्तोऽय स्नानवर्जितविग्रह. । मृगयायां प्रवृत्तस्य जातो मेऽमङ्गल महत् ॥३२१॥
वदत्येव ततो व्याधे धनुर्भीषणकारिणि । मुने कलुषतां प्राप्त ध्यान दुःखेन सम्भृतम् ॥३२२॥
इति वाचिन्तयत् क्रोधान्मुष्टिघातेन पापिनम् । कणशश्चूर्णयाम्येन व्याध रूक्षवचोमुचम् ॥३२३॥

---

कितने ही ऐसे हैं जो चक्र, करोत, भाला, तलवार आदिकी वर्षा करनेवाले वृक्षोंसे युक्त हैं। कितने ही ऐसे हैं जिनमे पिघलाया हुआ रांगा सीसा आदि पिलाया जाता है। कितने ही ऐसे हैं जिनमे तीक्ष्णमुखवाली दुष्ट मक्खियाँ आदि विद्यमान हैं। कितने ही ऐसे हैं जिनमे रक्तकी कीचमे कृमिके समान अनेक छोटे-छोटे जीव बिलबिलाते रहते हैं और कितने ही ऐसे हैं जिनमे परस्पर--एक दूसरेके द्वारा दु.खके कारण उत्पन्न होते रहते हैं ॥३०६–३१०॥ इस प्रकारके सदा दुःखःदायी नरकोंमे जीवोंको जो दुःख प्राप्त होता है उसे कहनेके लिए कौन समर्थ है? ॥३११॥ जिस प्रकार तुम दोनोंने पहले दु.ख देनेवाली अनेक कुयोनियोंमे भ्रमण किया था यदि अब भी तुम धर्मसे वञ्चित रहते हो तो पुन. अनेक कुयोनियोंमे भ्रमण करना पडेगा ॥३१२॥ मुनिराजके यह कहनेपर देव तथा विद्याधरने उससे पूछा कि हे भगवन्! हम दोनोंने किस कारण कुयोनियोंमे भ्रमण किया है? सो कहिए ॥३११–३१३॥

तदनन्तर—'हे वत्सो! मन स्थिर करो' इस प्रकारके मधुर वचन कहकर सयमरूपी आभूषणसे विभूषित मुनिराज उन दोनोंके भवान्तर कहने लगे ॥३१४॥ इस दुःखदायी संसारमे मोहसे उन्मत्त हो तुम दोनों एक दूसरेका वध करते हुए चिरकाल तक भ्रमण करते रहे ॥३१५॥ तदनन्तर किसी प्रकार कर्मयोगसे मनुष्य भवको प्राप्त हुए। निश्चयसे संसारमे धर्मप्राप्तिका कारणभूत मनुष्यभवका मिलना अत्यन्त कठिन है ॥३१६॥ उनमेंसे एक तो काशी देशमे व्याध हुआ और दूसरा श्रावस्ती नगरीमे राजाका सुयशोदत्तनामा मन्त्री हुआ। सुयशोदत्त अत्यन्त रूपवान् था, कारण पाकर उसने दीक्षा ले ली और महातपश्चरणसे युक्त हो पृथ्वीपर विहार करने लगा ॥३१८॥ विहार करते हुए सुयशोदत्तमुनि काशी देशमे आकर किसी निर्जन्तु स्थानमे विराजमान हो गये। उनकी पूजाके लिए अनेक सम्यग्दृष्टि स्त्रियाँ आईं थीं सो पापी व्याध, स्त्रियोंसे घिरे उन मुनिको देख तीक्ष्ण वचनरूपी शस्त्रोंसे भय उत्पन्न करता हुआ बेधने लगा ॥३१९–३२०॥ यह निर्लज्ज नग्न, तथा स्नानरहित मलिन शरीरका धारक, शिकारके लिए प्रवृत्त हुए मुझको महा अमङ्गलरूप हुआ है ॥३२१॥ धनुषसे भय उत्पन्न करनेवाला व्याध जब उक्त प्रकारके वचन कह रहा था तब दुःखके कारण मुनिका ध्यान कुछ कलुषताको प्राप्त हो गया ॥३२२॥ क्रोधवश वे विचारने लगे कि रुक्ष वचन कहनेवाले इस पापी व्याधको मैं एक मुट्ठीके प्रहारसे कण-कणकर चूर्ण कर डालता

ततः कापिष्ठगमनं मुनिना यदुपार्जितम् । तदस्य क्रोधसंभारात् क्षणाद्[1] भ्रंशमुपागतम् ॥३२४॥
ततोऽसौ कालधर्मेण युक्तो ज्योतिः सुरोऽभवत् । ततः प्रच्युत्य जातस्त्वं विद्युत्केशो नभश्चरः ॥३२५॥
व्याधोऽपि सुचिरं भ्रान्त्वा भवद्रुममहावने । लङ्कायां प्रमदोद्याने शाखामृगगतिं गतः ॥३२६॥
ततोऽसौ निहतः स्त्र्यर्थं त्वया बाणेन चापलात् । प्राप्य पञ्चनमस्कारं जातोऽयं सागरामरः ॥३२७॥
एवं ज्ञात्वा पुनर्वैरं मुञ्चतं देवखेचरौ । मा भूद् भूयोऽपि संसारे भवतो परिहिण्डनम् ॥३२८॥
[2]वाञ्छतं नरमात्रेण शक्यं यन्न प्रशंसितुम् । सिद्धानां तत्सुखं भद्रौ भद्राचारपरायणौ ॥३२९॥
नमतं प्रणतं देवैराखण्डलपुरस्सरैः । भक्त्या परमया युक्तौ मुनिसुव्रतमीश्वरम् ॥३३०॥
शरणं प्राप्य तं नाथं निष्ठितात्मप्रतिक्रियम् । परकृत्यसमुद्युक्तं प्राप्स्यथः परमं सुखम् ॥३३१॥
ततो मुनिमुखादित्यान्निर्गतेन वचोंऽशुना । परं प्रबोधमानीतस्तडित्केशः सरोजवत् ॥३३२॥
सुकेशसंज्ञके पुत्रे सङ्क्रमय्य निजं पदम् । शिष्यतामगमद्धीरो[3] मुनेरम्बरचारिणः ॥३३३॥
सम्यग्दर्शनसज्ज्ञानसच्चारित्रत्रयं ततः । समाराध्यगतः कालं बभूवामरसत्तमः ॥३३४॥
ततः किष्कुपुरस्वामी महोदधिरवाभिधः । कान्ताभिः सहितस्तिष्ठन् विद्युत्सदृशदीप्तिभिः ॥३३५॥
चन्द्रपादाश्रये रम्ये महाप्रासादमूर्द्धनि । चारुगोष्ठीसुधास्वादं विन्दन् देवेन्द्रवत्सुखम् ॥३३६॥
वेगेन महतागत्य धवलाम्बरधारिणा । खेचरेणाग्रतो भूत्वा कृत्वा प्रणतिमादरात् ॥३३७॥
निवेदितस्तडित्केशः प्रव्रज्या कारणान्विताम् । प्राप्य भोगेषु निर्वेदं दीक्षणे मतिमादधे ॥३३८॥

हूँ ॥३२३॥ मुनिने तपश्चरणके प्रभावसे कापिष्ठ स्वर्गमे जाने योग्य जो पुण्य उपार्जन किया था वह क्रोधके कारण क्षणभरमे नष्ट हो गया ॥३२४॥ तदनन्तर कुछ समताभावसे मरकर वह ज्यौतिषीदेव हुआ । वहाँसे आकर तू विद्युत्केश नामक विद्याधर हुआ है ॥३२५॥ और व्याधका जीव चिरकाल तक संसाररूपी अटवीमे भ्रमणकर लङ्काके प्रमदवनमे वानर हुआ ॥३२६॥ सो चपलता करनेके कारण स्त्रीके निमित्त तूने इसे बाणसे मारा । वही अन्तमे पञ्चनमस्कार मन्त्र प्राप्तकर महोदधि नामका देव हुआ है ॥३२७॥ ऐसा विचारकर हे देव विद्याधरो ! तुम दोनो अब अपना वैर-भाव छोड़ दो जिससे फिर भी संसारमे भ्रमण नहीं करना पड़े ॥३२८॥ हे भद्र-पुरुषो ! तुम भद्र आचरण करनेमे तत्पर हो इसलिए सिद्धोंके उस सुखकी अभिलाषा करो जिसकी मनुष्यमात्र प्रशंसा नहीं कर सकता ॥३२९॥ इन्द्र आदि देव जिन्हें नमस्कार करते है ऐसे मुनिसुव्रत भगवान्‌को परमभक्तिसे युक्त हो नमस्कार करो ॥३३०॥ वे भगवान् आत्महितका कार्य पूर्ण कर चुके हैं । अब परहितकारी कार्य करनेमे ही संलग्न है सो तुम दोनो उनकी शरणमे जाकर परम सुखको प्राप्त करोगे ॥३३१॥

तदनन्तर मुनिराजके मुखरूपी सूर्यसे निर्गत वचनरूपी किरणोसे विद्युत्केश कमलके समान परम प्रबोधको प्राप्त हुआ ॥३३२॥ फलस्वरूप वह धीर वीर, सुकेश नामक पुत्रके लिए अपना पद सौंप कर चारण ऋद्धि धारी मुनिराजका शिष्य हो गया अर्थात् उनके समीप उसने दीक्षा धारण कर ली ॥३३३॥ तदनन्तर सम्यग्दर्शन सम्यग्ज्ञान और सम्यक्चारित्र इन तीनोंकी आराधना कर वह अन्तमे समाधिके प्रभावसे उत्तम देव हुआ ॥३३४॥

इधर किष्कपुरका स्वामी महोदधि, बिजलीके समान कान्तिको धारण करने वाली स्त्रियोंके साथ, जिस पर चन्द्रमाकी किरणे पड़ रहीं थीं ऐसे महामनोहर उत्तुङ्ग भवनके शिखरपर सुन्दर गोष्ठी रूपी अमृतका स्वाद लेता हुआ इन्द्रके समान सुखसे बैठा था ॥३३५-३३६॥ कि उसी समय शुक्ल वस्त्रको धारण करने वाले एक विद्याधरने बड़े वेगसे आकर तथा सामने खड़े होकर आदर पूर्वक प्रणाम किया और तदनन्तर विद्युत्केश विद्याधरके दीक्षा लेनेका समाचार कहा । समाचार सुनते ही महोदधिने भोगोंसे विरक्त होकर दीक्षा लेनेका विचार किया ॥३३७-३३८॥

१. क्षणाद्भस्मसमुपागतम् म० । २. वाञ्छित ख० । ३. -द्धीरो म० ।

प्रव्रजामीति चानेन गदितेऽन्त पुरान्महान् । उदतिष्ठद् गृहान्तेषु विलाप प्रतिनादवान् ॥३३९॥
तन्त्रीवशादिसन्मिश्रमृदङ्गध्वनितोपम । प्रविलाप सुनारीणा मुनेरप्यहरन्मन ॥३४०॥
तवार्पित परप्रीत्या तडित्केशेन बालक । सुकेशो नवराज्यस्थ पालनीय सुनोऽधुना ॥३४१॥
इति विज्ञाप्यमानोऽपि युवराजेन सादरम् । [1]नेत्रामेयजलस्थूलधारावर्षविधायिना ॥३४२॥
निष्कण्टकमिद राज्य भुङ्क्ष्व तावन्महागुणम् । पुरन्दर इवोदारैर्भोगैर्मानय यौवनम् ॥३४३॥
एव सचोद्यमानोऽपि मन्त्रिभिर्दूनमानसै । बहुभेदान्युदाहृत्य शास्त्राणि नयकोविदै ॥३४४॥
अनाथान्नाथ न कृत्वा त्वन्मन स्थितमानसान् । विहाय प्रस्थित क्वासि लता इव महातरु ॥३४५॥
इति प्रसाद्यमानोऽपि चरणानतमूर्द्धभि । [2]गुणोद्यत्प्रियकारीभिर्नारीभि क्षरदश्रुभि ॥३४६॥
गुणैर्नाथ तवोदारैर्बद्धा काल चिर सतीम् । प्रतिभज्य महालक्ष्मी योजिता ललिता सदा ॥३४७॥
व्रजसि क्वेति सामन्तैर्गण्डान्तैरश्रुधारिभि' । सम विज्ञाप्यमानोऽपि नृपाटोपविवर्जितै. ॥३४८॥
छित्वा स्नेहमयान् पाशान् त्यक्त्वा सर्वपरिग्रहम्। प्रतिचन्द्राभिधानाय दत्त्वा पुत्राय सम्पदम् ॥३४९॥
विग्रहेऽपि निरासङ्गो जग्राहोग्रा समग्रधी । धीरो दैगम्बरी लक्ष्मी क्ष्मातलस्थिरचन्द्रमा ॥३५०॥
ततो ध्यानगजारूढस्तपस्तीक्ष्णपतत्रिणा । शिरश्छित्वा भवाराते प्रविष्ट. सिद्धकाननम् ॥३५१॥
प्रतीन्दुरपि पुत्राय किष्किन्धाय ददौ श्रियम् । यौवराज्यं कनिष्ठाय तस्मै चान्ध्रकरूढये ॥३५२॥

---

महोदधिके यह कहते ही कि मै दीक्षा लेता हूँ अन्त'पुरसे विलापका बहुत भारी शब्द उठ खड़ा हुआ। उस विलापकी प्रतिध्वनि समस्त महलोमे गूँजने लगी ॥३३९॥ वीणा बाँसुरी आदिके शब्दोसे मिश्रित मृदङ्ग ध्वनिकी तुलना करनेवाला स्त्रियोका वह विलाप साधारण मनुष्यकी बात जाने दो मुनिके भी चित्तको हर रहा था अर्थात् करुणासे द्रवीभूत कर रहा था ॥३४०॥ उसी समय युवराज भी वहाँ आ गया। वह नेत्रोमे नही समाने वाले जलकी बड़ी मोटी धाराको बरसाता हुआ आदरपूर्वक बोला कि विद्युत्केश अपने पुत्र सुकेशको परमप्रीतिके कारण आपके लिए सौप गया है। वह नवीन राज्य पर आरूढ हुआ है इसलिए आपके द्वारा रक्षा करने योग्य है ॥३४१–३४२॥ जिनको हृदय दुखी हो रहा था ऐसे नीतिनिपुण मन्त्रियोने भी अनेक शास्त्रोके उदाहरण देकर प्रेरणा की कि इस महावैभवशाली निष्कण्टक राज्यका इन्द्रके समान उपभोग करो और उत्कृष्ट भोगोसे यौवनको सफल करो ॥३४३–३४४॥ जिनके मस्तक चरणोमे नम्रीभूत थे, जो अपने गुणोके द्वारा उत्कट प्रेम प्रकट कर रही थी तथा जिनकी आँखोंसे आँसू झर रहे थे ऐसी स्त्रियोंने भी यह कह कर उसे प्रसन्न करनेका प्रयत्न किया कि हे नाथ ! जिनके हृदय आपके हृदयमे स्थित है ऐसी हम सबको अनाथ बनाकर लताओको छोड वृक्षके समान आप कहाँ जा रहे हैं ? ॥३४५–३४६॥ हे नाथ ! यह मनोहर राज्यलक्ष्मी पतिव्रता स्त्रीके समान चिर कालसे आपके उत्कृष्ट गुणोसे बद्ध है— आपमे आरक्त है इसे छोड़कर आप कहाँ जा रहे है ? और जिनके कपोलोपर अश्रु बह रहे थे ऐसे सामन्तोने भी राजकीय आडम्बरसे रहित हो एक साथ प्रार्थना की पर सब मिलकर भी उसके मानसको नही बदल सके ॥३४७–३४८॥ अन्तमे उसने स्नेहरूपी पाशको छेदकर तथा समस्त परिग्रहका त्यागकर प्रतिचन्द्र नामक पुत्रके लिए राज्य सौप दिया और शरीरमे भी निःस्पृह होकर कठिन दैगम्बरी लक्ष्मी—मुनिदीक्षा धारण कर ली। वह पूर्ण बुद्धिको धारण करनेवाला अतिशय गम्भीर था और अपनी सौम्यताके कारण ऐसा जान पड़ता था मानो पृथिवी तलपर स्थिर रहनेवाला चन्द्रमा ही हो ॥३४९–३५०॥ तदनन्तर ध्यानरूपी हाथीपर बैठे हुए मुनिराज महोदधि तपरूपी तीक्ष्ण बाणसे ससार रूपी शत्रुका शिर छेदकर सिद्धवन अर्थात् मोक्षमें प्रविष्ट हुए ॥३५१॥ तदनन्तर प्रतिचन्द्र भी अपने ज्येष्ठ पुत्र किष्किन्धके लिए राज्यलक्ष्मी और अन्ध्रक-

---

१. नेत्रमेघ म० । २. गुणौघप्रिय म० ।

अन्येद्यु प्रतिपन्नश्च जैनमार्गं निरम्बरम् । सिद्धैरासेवित स्थान गतश्चामलयोगत· ॥३५३॥
ततस्तावुद्यतौ कृत्यं भ्रातरौ भुवि चक्रतु । अन्योन्याक्रान्ततेजस्कौ सूर्याचन्द्रमसाविव ॥३५४॥
अत्रान्तरे नभोगाना पर्वते दक्षिणस्थितौ[1] । रथनूपुरनामास्ति पुर सुरपुराकृति[2] ॥३५५॥
आसीत्तत्रोभयो श्रेण्यो स्वामी भूरिपराक्रम । दधावशनिवेगाख्या य· शत्रुत्रासकारिणीम् ॥३५६॥
पुत्रो विजयसिंहोऽस्य[3] नाम्नाऽऽदित्यपुर परम् । वाञ्छन् रूपावलेपेन प्रयातोऽथ स्वयवरम् ॥३५७॥
विद्यामन्दरसज्ञस्य सुतामम्बरचारिण । वेगवत्या समुत्पन्ना कान्तिदिग्धनभस्तलाम् ॥३५८॥
अथासौ यौवनप्राप्ता वीक्ष्य पुत्री मनोहराम् । स्वजनानुमतो मोहात् स्वयवरमरीरचत् ॥३५९॥
अपरेऽपि खगा सर्वे विमानैर्मणिशालिभि । पूरयन्तो नभ शीघ्र गता भूषितविग्रहा ॥३६०॥
ततो मञ्चेषु रम्येषु रत्नस्तम्भधृतात्मसु । तुङ्गासनसमृद्धेषु स्फुरन्मणिमरीचिषु ॥३६१॥
मितेन परिवारेण युक्ता देहोपयोगिना । उपविष्टा यथास्थान प्रधाना व्योमचारिण ॥३६२॥
श्रीमालायां ततस्तेषा सर्वेषा व्योमचारिणाम् । मध्यस्थाया सम पेतुर्दृष्टीन्दीवरपङ्क्तय·[4] ॥३६३॥
अथ स्वयवराशानां प्रवृत्ता व्योमचारिणाम् । मदनाश्लिष्टचित्तानामिति सुन्दरविभ्रमा ॥३६४॥
निष्कम्पमपि मूर्द्धस्थ मुकुट कश्चिदुन्नतम् । अकरोत् किल निष्कम्प रत्नांशुच्छन्नपाणिना ॥३६५॥
कश्चित् कूर्परमाधाय कटिपार्श्वे सजृम्भण । चक्र देहस्य वलन स्फुटत्सन्धिकृतस्वनम् ॥३६६॥
प्रदेशेऽपि स्थिता कश्चिदुज्ज्वलामसिपुत्रिकाम् । असारयत् कराग्रेण कटाक्षकृतवीक्षणाम् ॥३६७॥

रूढि नामक छोटे पुत्रके लिए युवराज पद देकर निर्ग्रन्थ दीक्षाको प्राप्त हुआ और निर्मल ध्यानके प्रभावसे सिद्धालयमे प्रविष्ट हो गया अर्थात् मोक्ष चला गया ॥३५२-३५३॥

तदनन्तर—जिनका तेज एक दूसरेमे आक्रान्त हो रहा था ऐसे सूर्य चन्द्रमाके समान तेजस्वी दोनो भाई किष्किन्ध और अन्ध्रकरूढि पृथिवी पर अपना कार्यभार फैलानेको उद्यत हुए ॥३५४॥ इसी समय विजयार्धपर्वतकी दक्षिणश्रेणीमे इन्द्रके समान रथनूपुर नामका नगर था। ॥३५५॥ उसमे दोनो श्रेणियोका स्वामी महापराक्रमी तथा शत्रुओको भय उत्पन्न करनेवाला राजा अशनिवेग रहता था ॥३५६॥ अशनिवेगका पुत्र विजयसिंह था। आदित्यपुरके राजा विद्यामन्दर विद्याधरकी वेगवती रानीसे समुत्पन्न एक श्रीमाला नामकी पुत्री थी। वह इतनी सुन्दरी थी कि अपनी कान्तिसे आकाशतलको लिप्त करती थी। विद्यामन्दरने पुत्रीको यौवनवती देख आत्मीयजनोकी अनुमतिसे स्वयवर रचवाया। अशनिवेगका पुत्र विजयसिंह श्रीमालाको चाहता था इसलिए रूपके गर्वसे प्रेरित हो स्वयवरमे गया ॥३५७-३५९॥ जिनके शरीर भूषित थे ऐसे अन्य समस्त विद्याधर भी मणियोसे सुशोभित विमानोके द्वारा आकाशको भरते हुए स्वयंवरमे पहुँचे ॥३६०॥ तदनन्तर जो रत्नमय खम्भोपर खड़े थे, ऊँचे-ऊँचे सिंहासनोसे युक्त थे तथा जिनमें खचित मणियोकी किरणे फैल रही थीं ऐसे मनोहर मञ्चोपर प्रमुख-प्रमुख विद्याधर यथास्थान आरूढ हुए। उन विद्याधरोके साथ उनकी शरीर-रक्षाके लिए उपयोगी परिमित परिवार भी था ॥३६१-३६२॥ तदनन्तर मध्यमे विराजमान श्रीमाला पुत्रीपर सब विद्याधरोके नेत्ररूपी नीलकमल एक साथ पड़े ॥३६३॥ तदनन्तर जिनकी आशा स्वयंवरमे लग रही थी और जिनका चित्त कामसे आलिङ्गित था ऐसे विद्याधरोमे निम्नाङ्कित सुन्दर चेष्टाएँ प्रकट हुईं ॥३६४॥ किसी विद्याधरके मस्तकपर स्थित उन्नत मुकुट, यद्यपि निश्चल था तो भी वह उसे रत्नोकी किरणोंसे आच्छादित हाथके द्वारा निश्चल कर रहा था ॥३६५॥ कोई विद्याधर कोहनी कमरके पास रख जमुहाई लेता हुआ शरीरको मोड़ रहा था—अँगड़ाई ले रहा था। उसकी इस क्रियासे शरीरके सन्धि स्थान चटककर शब्द कर रहे थे ॥३६६॥ कोई विद्याधर

१. दक्षिणे स्थितौ म० । २. कृतिः म०, ख० । ३. सिंहश्च म० । ४. दृष्टेन्दुवर म० ।

पार्श्वगे पुरुषे कश्चिच्चलयत्येव चामरम् । सलीलमंशुकान्तेन चक्रे वीजनमानने ॥३६८॥
सव्येन वक्त्रमाच्छाद्य कश्चिदुत्तलपाणिना । सकोच्य दक्षिण बाहु व्याक्षिपद् बद्धमुष्टिकम् ॥३६९॥
पादासनस्थित कश्चिदुद्यम्य चरण शनै । वामोरुफलके चक्रे दक्षिण रतिदक्षिण ॥३७०॥
पादाङ्गुष्ठेन कश्चिच्च नेत्रान्तेक्षितकन्यक । कृत्वा पाणितले गण्ड लिलेख चरणासनम् ॥३७१॥
गाढमप्यपरो बद्धमुन्मुच्य कटिसूत्रकम् । बबन्ध शनकैर्भूय शेषाणमपि चक्रकम् ॥३७२॥
स्फुटद्दन्योऽन्यसदष्टप्रोत्तानविकराङ्गुलि । वक्ष कश्चित्समुद्यम्य बहुतोरणमूर्द्ध्वयन् ॥३७३॥
पार्श्वस्थस्यापरो हस्त सख्युरास्फाल्य सस्मितम् । कथा चक्रे विना हेतो कन्याक्षिप्तचलेक्षणः ॥३७४॥
कृतचन्दनचर्चेऽन्य कुङ्कुमस्थासकाचिते । चक्षुर्वक्षसि चिक्षेप विशाले कृतहस्तके ॥३७५॥
कश्चित्कुन्तलभालस्था गृहीत्वा केशवल्लरीम् । कुटिलामपि वामाया प्रदेशिन्यामयोजयत् ॥३७६॥
अधर कश्चिदाकृष्य वामहस्तेन मन्थरम् । स्वच्छताम्बूलसच्छायमैक्षिष्ट भ्रुवमुन्नयन् ॥३७७॥
अपरोऽभ्रमयत् पद्म बद्धभ्रमरमण्डलम् । सव्येतरेण हस्तेन विसर्पन् कर्णिकारज ॥३७८॥
वीणाभिर्वेणुभि शङ्खैर्मृदङ्गै[1] र्झल्लरैस्तथा । जनितोऽथ महानाद काहलानक[3] मर्दकै ॥३७९॥
मङ्गलानि प्रयुक्तानि वन्दिभिर्वद्धवृन्दकै[4] । महापुरुषचेष्टाभिर्निबद्धानि प्रमोदिभि ॥३८०॥
महानादस्य तस्यान्ते धात्री नाम्ना सुमङ्गला । वामेतरकरोपात्तहेमवेत्रलता तत ॥३८१॥

बगलमे रक्खी हुई देदीप्यमान छुरीको हाथके अग्रभागसे चला रहा था तथा बार-बार उसकी ओर कटाक्षसे देखता था ॥३६७॥ यद्यपि पासमे खडा पुरुष चमर ढौर रहा था तो भी कोई विद्याधर वस्त्रके अञ्चलसे लीलापूर्वक मुखके ऊपर हवा कर रहा था ॥३६८॥ कोई एक विद्याधर, जिसकी हथेली ऊपरकी ओर थी ऐसे बाँये हाथसे मुँह ढँककर, जिसकी मुट्ठी बँधी थी ऐसी दाहिनी भुजाको संकुचित कर फैला रहा था ॥३६९॥ कोई एक रतिकुशल विद्याधर, पादासनपर रखे दाहिने पाँवको उठाकर धीरेसे बाँई जाँघपर रख रहा था ॥३७०॥ कन्याकी ओर कटाक्ष चलाता हुआ कोई एक युवा हथेलीपर कपोल रखकर पैरके अंगूठेसे पादासनको कुरेद रहा था ॥३७१॥ जिसमे लगा हुआ मणियोका समूह शेषनागके समान जान पड़ता था ऐसे कसकर बँधे हुए कटिसूत्रको खोलकर कोई युवा उसे फिरसे धीरे-धीरे बाध रहा था ॥३७२॥ कोई एक युवा दोनो हाथोकी चटचटाती अंगुलियोको एक दूसरेमें फँसाकर ऊपरकी ओर कर रहा था तथा सीना फुलाकर भुजाओका तोरण खड़ा कर रहा था ॥३७३॥ जिसकी चञ्चल आँखे कन्याकी ओर पड़ रही थीं ऐसा कोई एक युवा बगलमे बैठे हुए मित्रका हाथ अपने हाथमे ले मुसकराता हुआ निष्प्रयोजन कथा कर रहा था—गप-शप लड़ा रहा था ॥३७४॥ कोई एक युवा, जिसपर चन्द्रनका लेप लगानेके बाद केशरका तिलक लगाया गया था तथा जिसपर हाथ रक्खा था ऐसे विशाल वक्षस्थलपर दृष्टि डाल रहा था ॥३७५॥ कोई एक विद्याधर ललाटपर लटकते हुए घुँघराले बालोको बाँये हाथकी प्रदेशिनी अङ्गुलीमे फँसा रहा था ॥३७६॥ कोई एक युवा स्वच्छ ताम्बूल खानेसे लाल-लाल दिखनेवाले ओठको धीरे-धीरे बाँये हाथसे खीचकर भौंह ऊपर उठाता हुआ देख रहा था ॥३७७॥ और कोई एक युवा कर्णिकाकी परागको फैलाता हुआ दाहिने हाथसे जिसपर भौंरे मँडरा रहे थे ऐसा कमल घुमा रहा था ॥३७८॥ उस समय स्वयंवर मण्डपमे वीणा, बाँसुरी, शङ्ख, मृदङ्ग, झालर, काहल, भेरी और मर्दक नामक बाजोसे उत्पन्न महाशब्द हो रहा था ॥३७९॥ महापुरुषोकी चेष्टाएँ देख जो मन ही मन प्रसन्न हो रहे थे तथा जिन्होने अलग-अलग अपने झुण्ड बना रक्खे थे ऐसे बन्दीजनोके द्वारा मङ्गल पाठका उच्चारण हो रहा था ॥३८०॥ तदनन्तर महाशब्दके शान्त होनेके बाद दाहिने हाथमे स्वर्णमय

---

१. सदष्टः । २. मूर्द्धनि ख० । ३. मण्डलैः म०, मुड्डुकैः क० । ४ वृद्ध-म० ।

जगाद वचनं कन्यां विनयादानताननाम् । प्राप्तकल्पलताकारां मणिहेमविभूषणैः ॥३८२॥
सख्य सन्यस्तविस्रसिमृदुपाणिसरोरुहाम् । ऊर्ध्वस्थिता स्थितामूर्ध्वं मकरध्वजवर्णिनीम् ॥३८३॥
नभस्तिलकनाम्नोऽस्य नगरस्य पति सुते । उत्पन्नो विमलाया च चन्द्रकुण्डलभूपतेः ॥३८४॥
मार्तण्डकुण्डलो नाम्ना मार्तण्डविजयी रुचा । प्रकाण्डता परा प्राप्तो मण्डलाद्यो गुणात्मक ॥३८५॥
गुणचिन्ताप्रवृत्तासु गोष्ठीष्वस्यादितो बुधाः । नाम गृह्णन्ति रोमाञ्चकण्टकव्याप्तविग्रहा ॥३८६॥
साकमेतेन रन्तु चेदस्ति ते मनस स्पृहा । वृणीष्वैन ततो दृष्टसमस्तग्रन्थगर्भकम् ॥३८७॥
ततस्त यौवनादीषत्प्रच्युत खेचराधिपम् । आननानतिमात्रेण प्रत्याख्यातवती शुभा ॥३८८॥
भूयोऽवदत्ततो धात्री तनये यच्छ लोचने । पुरुषाणामधीशेऽस्मिन् कान्तिदीप्तिविभूतिभिः ॥३८९॥
अथ रत्नपुराधीशो लक्ष्मीविद्याङ्गयोः सुत । नाम्ना विद्यासमुद्घातो बहुविद्याधराधिप ॥३९०॥
अस्य नाम्नि गते कर्णजाह वीरप्रवर्तने[1] । शत्रवो गृह्णते वायुधूताश्वत्थदलस्थितम्[3] ॥३९१॥
अस्य वक्षसि विस्तीर्णे कृतहारोपधानके । कुनृपभ्रान्तिभि खिन्ना लक्ष्मीविश्रान्तमागता ॥३९२॥
अस्याङ्के यदि ते प्रीति स्थातुमस्ति मनोहरे । गृहाणैन तडिन्माला युज्यता मन्दराद्रिणा ॥३९३॥
तत प्रत्याचचक्षे त चक्षुषैवर्जुदर्शनात् । वाञ्छिते हि वरत्वेन दृष्टिश्चञ्चलता व्रजेत् ॥३९४॥
ततोऽसौ तदभिप्रायवेदिनी ता सुमङ्गला । अपर [4]दर्शन नित्ये नरेशमिति चावदत् ॥३९५॥

छड़ीको धारण करनेवाली सुमङ्गला धाय कन्यासे निम्न वचन बोली । उस समय कन्याका मुख विनयसे अवनत था तथा मणिमयी आभूषणोसे वह कल्पलताके समान जान पड़ती थी ॥३८१-३८२॥ वह अपना कोमल हस्त कमल यद्यपि सखीके कन्धेपर रक्खी थी तो भी वह नीचेकी ओर खिसक रहा था । वह पालकीपर सवार थी और कामको प्रकट करनेवाली थी ॥३८३॥ आगत राजकुमारोका परिचय देती हुई सुमङ्गला धाय बोली कि हे पुत्रि ! यह नभस्तिलक नगर का राजा, चन्द्रकुण्डल भूपालकी विमला नामक रानीसे उत्पन्न हुआ है ॥३८४॥ मार्तण्डकुण्डल इसका नाम है, अपनी कान्तिसे सूर्यको जीत रहा है, सन्धि विग्रह आदि गुणोसे युक्त है तथा इन्हीं सब कारणोसे यह अपने मण्डलमे परम प्रमुखताको प्राप्त हुआ है ॥३८५॥ जब गोष्ठियोमे राजाओके गुणोकी चर्चा शुरू होती है तब विद्वज्जन सबसे पहले इसीका नाम लेते है और हर्षातिरेकके कारण उस समय विद्वज्जनोके शरीर रोमाञ्चरूपी कण्टकोसे व्याप्त हो जाते है ॥३८६॥ हे पुत्रि ! यदि इसके साथ रमण करनेकी तेरे मनकी इच्छा है तो जिसने समस्त शास्त्रोका सार देखा है ऐसे इस मार्तण्डकुण्डलको स्वीकृत कर ॥३८७॥ तदनन्तर जिसका यौवन कुछ ढल चुका था ऐसे विद्याधरोके राजा मार्तण्डकुण्डलका श्रीमालाने मुख नीचा करने मात्रसे ही निराकरण कर दिया ॥३८८॥ तदनन्तर सुमङ्गला धाय बोली कि हे पुत्रि ! कान्ति, दीप्ति और विभूतिके द्वारा जो समस्त पुरुषोका अधीश्वर है ऐसे इस राजकुमारपर अपनी दृष्टि डालो ॥३८९॥ यह रत्नपुरका स्वामी है, राजा विद्याङ्ग और रानी लक्ष्मीका पुत्र है विद्यासमुद्घात इसका नाम है तथा समस्त विद्याधरोका स्वामी है ॥३९०॥ वीरोमे हलचल मचानेवाला इसका नाम सुनते ही शत्रु, भयसे वायुके द्वारा कम्पित पीपलके पत्तेकी दशाको प्राप्त होते है अर्थात् पीपलके पत्तेके समान काँपने लगते है ॥३९१॥ अनेक क्षुद्र राजाओके पास भ्रमण करनेसे जो थक गई थी ऐसी लक्ष्मी, हाररूपी तकियासे सुशोभित इसके विस्तृत वक्षःस्थलपर मानो विश्रामको प्राप्त हुई है ॥३९२॥ यदि इसकी गोदमे बैठनेकी तेरी अभिलाषा है तो इसे स्वीकार कर । बिजली सुमेरुपर्वतके साथ समागमको प्राप्त हो ॥३९३॥ श्रीमाला उसे अपने नेत्रोसे सरलतापूर्वक देखती रही इसीसे उसका निराकरण हो गया सो ठीक ही है क्योकि कन्या जिसे वररूपसे पसन्द करती है उसपर उसकी दृष्टि चञ्चल हो जाती है ॥३९४॥ तदनन्तर उसका अभिप्राय जाननेवाली सुमङ्गला उसे दूसरे

१. प्रकीर्तने म० । २. वात- म० । ३. स्थितम् ख० । ४. दर्शयन्ती न -रेश म० ।

वज्रायुधस्य पुत्रोऽयं वज्रशीलाङ्गसंभवः । वज्रपञ्जरनामानमधितिष्ठति पत्तनम् ॥३९६॥
अस्य बाहुद्वये लक्ष्मीदिनेशकरभासुरे । चञ्चलापि स्वभावेन संयतेवावतिष्ठते ॥३९७॥
सत्यमन्येऽपि विद्यन्ते नाममात्रेण खेचराः । तेषां खद्योततुल्यानामयं भास्करतां गतः ॥३९८॥
मानेन तुङ्गतामस्य प्राप्तस्य शिरसः पराम् । संप्राप्तं पुनरुत्कर्षं मुकुटं स्फुटरत्नकम् ॥३९९॥
[1]सुरूपे प्रतिपद्यस्व पतिं विद्याभृतामिमम् । विषयाञ्छेत्समान् शच्या भोक्तुं धीस्तव विद्यते ॥४००॥
ततः खेचरभानुं तं दृष्ट्वा कन्या कुमुद्वती । संकोचं परमं याता धाव्येति गदिता पुनः ॥४०१॥
चित्राम्बरस्य पुत्रोऽयं पद्मश्रीकुक्षिसंभवः । नित्यं चन्द्रपुराधीशो नाम्ना चन्द्राननो नृपः ॥४०२॥
पश्य वक्षोऽस्य विस्तीर्णं चारुचन्दनचर्चितम् । चन्द्ररश्मिपरिष्वक्तकैलासतटसन्निभम् ॥४०३॥
उच्छलत्करभारोऽस्य हारो वक्षसि राजते । उत्सर्पत्सीकरो दूरं कैलास इव निर्झरः ॥४०४॥
नामाक्षरकरैरस्य मनः श्लिष्टमरेरपि । प्रयाति परमं ह्लादं दुःखतापविवर्जितम् ॥४०५॥
याति चेदिह ते चेतः प्रसादं सौम्यदर्शने । रजनीव शशाङ्केन लभस्वैतेन सङ्गमम् ॥४०६॥
ततस्तस्मिन्नपि प्रीतिं न मनोऽस्याः समागतम् । कमलिन्या यथा चन्द्रे नयनानन्दकारिणि ॥४०७॥
पुनराह ततो धात्री कन्ये पश्य पुरन्दरम् । अवतीर्णं महीमेतं भवतीसंगलालसम् ॥४०८॥
सुतोऽयं मेरुकान्तस्य श्रीरम्भागर्भसंभवः । स्वामी मन्दरकुञ्जस्य पुरस्याम्भोधरध्वनिः ॥४०९॥

---

राजाके पास ले जाकर बोली ॥३९५॥ कि यह राजा वज्रायुध और रानी वज्रशीलाका पुत्र खेचरभानु वज्रपञ्जर नामक नगरमे रहता है ॥३९६॥ लक्ष्मी यद्यपि स्वभावसे चञ्चल है तो भी सूर्यकी किरणोंके समान देदीप्यमान इसकी दोनो भुजाओपर बँधी हुई के समान सदा स्थिर रहती है ॥३९७॥ यह सच है कि नाममात्रके अन्य विद्याधर भी है परन्तु वे सब जुगनूके समान है और यह उनके बीच सूर्यके समान देदीप्यमान है ॥३९८॥ यद्यपि इसका मस्तक स्वाभाविक प्रमाणसे ही परम ऊँचाईको प्राप्त है फिर भी इसपर जो जगमगाते रत्नोंसे सुशोभित मुकुट बाँधा गया है सो केवल उत्कर्ष प्राप्त करनेके लिए ही बाँधा गया है ॥३९९॥ हे सुन्दरि ! यदि इन्द्राणीके समान समस्त भोग भोगनेकी तेरी इच्छा है तो इस विद्याधरोंके अधिपतिको स्वीकृत कर ॥४००॥ तदनन्तर उस खेचरभानु रूपी सूर्यको देखकर कन्या रूपी कुमुदिनी परम सकोचको प्राप्त हो गई । यह देख सुमङ्गला धायने कुछ आगे बढ कर कहा ॥४०१॥ कि यह राजा चित्राम्बर और रानी पद्मश्रीका पुत्र चन्द्रानन है, चन्द्रपुर नगरका स्वामी है । देखो सुन्दर चन्दनसे चर्चित इसका वक्षःस्थल कितना चौड़ा है ? यह चन्द्रमाकी किरणोसे आलिङ्गित कैलास पर्वतके तटके समान कितना भला मालूम होता है ? ॥४०२–४०३॥ छलकती हुई किरणोसे सुशोभित हार इसके वक्षःस्थल पर ऐसा सुशोभित हो रहा है जैसा कि उठते हुए जलकणोसे सुशोभित निर्झर कैलासके तट पर सुशोभित होता है ॥४०४॥ इसके नामके अक्षर रूपी किरणोसे आलिङ्गित शत्रुका भी मन परम हर्षको प्राप्त होता है तथा उसका सब दुःख रूपी संताप छूट जाता है ॥४०५॥ हे सौम्यदर्शने ! यदि तेरा चित्त इस पर प्रसन्नताको प्राप्त है तो चन्द्रमाके साथ रात्रिके समान तू इसके साथ समागमको प्राप्त हो ॥४०६॥ तदनन्तर नेत्रोंको आनन्दित करने वाले चन्द्रमा पर जिस प्रकार कमलिनीका मन प्रीतिको प्राप्त नहीं होता उसी प्रकार राजा चन्द्रानन पर श्रीमालाका मन प्रीतिको प्राप्त नहीं हुआ ॥४०७॥ तब धाय बोली कि हे कन्ये ! इस राजा पुरन्दरको देखो । यह पुरन्दर क्या है मानो तुम्हारे संगमकी लालसासे पृथिवी पर अवतीर्ण हुआ साक्षात् पुरन्दर अर्थात् इन्द्र ही है ॥४०८॥ यह राजा मेरुकान्त और रानी श्रीरम्भाका पुत्र है, मन्दरकुञ्ज नगरका स्वामी है, मेघके समान इसकी जोरदार आवाज

---

१. स्वरूपे म० ।

शक्ता यस्य न सङ्ग्रामे दृष्टिं सम्मुखमागताम् । प्रतिपत्तुं कुतो बाणान् शत्रवो भयदारिताः ॥४१०॥
संभावयामि देवानां नाथोऽप्यस्माद् व्रजेद् भयम् । अभग्नप्रसरो ह्यस्य प्रतापो भ्रमति क्षितिम् ॥४११॥
उन्नतं चरणेनास्य शिरस्ताडय सुस्वने । प्रस्तावे प्रेमयुक्तेषु कलहेषु नितम्बिनि ॥४१२॥
असावपि ततस्तस्या न लेभे मानसे पदम्[1] । चित्रा हि चेतसो वृत्तिः प्रजानां कर्महेतुका ॥४१३॥
अभाषयदिमां बालां ततोऽन्यं व्योमचारिणम् । धात्री सद् सरस्यब्जं हंसीमुत्कलिका यथा ॥४१४॥
उवाच च सुते पश्य नृपमेतं महाबलम् । मनोजवेन वेगिन्यां संभूतं वायुरंहसम् ॥४१५॥
नाकार्द्धसञ्ज्ञकस्याय पुरस्य परिरक्षिता । अतिक्रम्य स्थिता यस्य गणना[2] विमला गुणाः ॥४१६॥
भ्रूसमुत्क्षेपमात्रेण सर्वं य क्षितिमण्डलम् । भ्राम्यति स्वाङ्गवेगोत्थवातपातितभूधरः ॥४१७॥
विद्याबलेन य कुर्याद् भूमिं गगनमध्यगाम् । दर्शयेद्वा ग्रहान् सर्वान् धरणीतलचारिणः ॥४१८॥
तुरीयं वा सृजेल्लोकं सूर्यं वा चन्द्रशीतलम् । चूर्णयेद्वा धराधीशं स्थापयेद्वानिलं स्थिरम् ॥४१९॥
शोषयेद् वाम्भसां नाथं मूर्त्तं कुर्वीत वा नभः । भाषितेनोरुणा किं वा भवेद्यस्य यथेप्सितम् ॥४२०॥
तत्रापि न मनस्तस्याश्चक्रे स्थानमयुक्तिकम् । वदत्येषेति चाज्ञासीत् सर्वशास्त्रकृतश्रमा ॥४२१॥
अन्यानपि बहूनेवं धात्रीदर्शितसंपदः । विद्याबलसमायुक्तान् कन्या तत्याज खेचरान् ॥४२२॥
ततोऽसौ चन्द्रलेखेव व्यतीता[3] यान्नभश्चरान् । पर्वता इव ते प्राप्ताः श्यामतां लोकवाहिनः ॥४२३॥

---

है ॥४०९॥ युद्धमे भयसे पीड़ित शत्रु, इसकी सम्मुखागत दृष्टिको सहन करनेमे असमर्थ रहते है फिर बाणोकी तो बात ही जुदी है ॥४१०॥ मुझे तो लगता है कि देवोंका अधिपति इन्द्र भी इससे भयभीत हो सकता है, वास्तवमे इसका अखण्डित प्रताप समस्त पृथ्वीमे भ्रमण करता है ॥४११॥ हे सुन्दर शब्दोवाली नितम्बिनि! प्रेमपूर्ण कलहके समय तू इसके उन्नत मस्तकको अपने चरणसे ताडित कर ॥४१२॥ राजा पुरन्दर भी उसके हृदयमे स्थान नही पा सका सो ठीक ही है क्योकि अपने-अपने कर्मोंके कारण लोगोकी चित्तवृत्ति विचित्र प्रकारकी होती है ॥४१३॥ जिस प्रकार सरोवरमे तरङ्ग हंसीको दूसरे कमलके पास ले जाती है उसी प्रकार धाय उस कन्याको सभारूपी सरोवरमे किसी दूसरे विद्याधरके पास ले जाकर बोली कि हे पुत्रि! इस राजा महाबलको देख। यह राजा मनोजवके द्वारा वेगिनी नामक रानीसे उत्पन्न हुआ है। वायुके समान इसका वेग है ॥४१४-४१५॥ नाकार्धपुरका स्वामी है, इसके निर्मल गुण गणनासे परे हैं ॥४१६॥ अपने शरीरके वेगसे उत्पन्न वायुके द्वारा पर्वतोको गिरा देनेवाला यह राजा भौंह उठाते ही समस्त पृथिवीमे चक्कर लगा देता है ॥४१७॥ यह विद्याके बलसे पृथिवीको आकाशगामिनी बना सकता है और समस्त ग्रहोको पृथिवी-तल-चारी दिखा सकता है ॥४१८॥ अथवा तीन लोकके सिवाय चतुर्थ लोककी रचना कर सकता है सूर्यको चन्द्रमाके समान शीतल बना सकता है, सुमेरु पर्वतका चूर्ण कर सकता है, वायुको स्थिर बना सकता है, समुद्रको सुखा सकता है और आकाशको मूर्तिक बना सकता है। अथवा अधिक कहनेसे क्या? इसकी जो इच्छा होती है वैसा ही कार्य हो जाता है ॥४१९-४२०॥ धायने यह सब कहा सही, पर कन्याका मन उसमे स्थान नही पा सका। कन्या सर्वशास्त्रोंको जाननेवाली थी इसलिए उसने जान लिया कि यह धाय अत्युक्तियुक्त कह रही है—इसके कहनेमे सत्यता नहीं है ॥४२१॥ इस तरह धायके द्वारा जिनके वैभवका वर्णन किया गया था ऐसे बहुतसे विद्याबलधारी विद्याधरोका परित्याग कर कन्या आगे बढ़ गई ॥४२२॥ तदनन्तर जिस प्रकार चन्द्रलेखा जिन पर्वतोको छोड़कर आगे बढ़ जाती है वे पर्वत अन्धकारसे मलिन हो जाते है उसी प्रकार कन्या श्रीमाली जिन विद्याधरोको छोड़कर आगे बढ़ गई थी वे शोकको

---

१. मानसंपदाम् क० । २. गणता म० । ३. व्यतीयाय नभश्चरान् म० ।

खेचराणां विलक्षाणां दृष्ट्वान्योन्य गतत्विषाम् । प्रवेष्टु धरणीमासीदभिप्रायस्त्रपावताम्[1] ॥४२४॥
अपकर्ण्य ततो धात्री खेचरद्युतिवर्णिनीम् । तस्या पपात किष्किन्धकुमारे दृष्टिरादरात् ॥४२५॥
ततो मालागुण कण्ठे दृष्ट[2] एवास्य सगत । अन्योऽन्य च समालाप स्निग्धया रचितोऽनयो ॥४२६॥
ततो विजयसिंहस्य किष्किन्धान्ध्रकयोर्गता । दृष्टिराहूय तावेव विद्यावीर्येण गर्वित[3] ॥४२७॥
विद्याधरसमाजोऽय क्व भवन्ताविहागतौ । विरूपदर्शनो क्षुद्रौ वानरौ विनयच्युतौ ॥४२८॥
नेह देशे वन रम्य फलैरस्ति कृतानति[4] । न वा निर्झरधारिण्य सुन्दरा गिरिकन्दरा ॥४२९॥
वृन्दानि वानरीणां वा कुर्वन्ति कुविचेष्टितम् । मांसलोहितवक्त्राणा प्रवृत्ताना यथेप्सितम् ॥४३०॥
आहूताविह केनैतौ पशू[5] कपिनिशाचरौ । दूतावमस्य तस्याद्य करोमि विनिपातनम् ॥४३१॥
निर्धाट्येतामिमावस्माद्देशा[6]च्छाखामृगौ खलौ । वृथा विद्याधरीश्रद्धा दूर नयत चानयोः ॥४३२॥
रुष्टौ ततो वचोभिस्तौ परुषैर्वानरध्वजौ । महान्त क्षोभमायातौ सिंहाविव गजान् प्रति ॥४३३॥
तत स्वामिपरीवादमहावाताहता सती । गता क्षोभ चमूवेला रौद्रचेष्टाविधायिनी ॥४३४॥
कश्चिदास्फालयद्वाममस दक्षिणपाणिना । वेगाघातसमुत्सर्पद्रक्तसीकरजालकम् ॥४३५॥
कश्चिद् दृष्टि विचिक्षेप क्षेपीय क्षुब्धमानस । कोपावेशारुणा भीमा प्रलयोल्कामिवारिषु ॥४३६॥
कश्चिद्दक्षिणहस्तेन वक्ष कम्प्रेण कोपत. । [7]अस्पृक्षत् सकल क्रूरकर्म वाञ्छन् महास्पदम् ॥४३७॥

धारण करते हुए मलिनमुख हो गये ॥४२३॥ एक दूसरेको देखनेसे जिनकी कान्ति नष्ट हो गई थी ऐसे लज्जायुक्त विद्याधरोके मनमे विचार उठ रहा था कि यदि पृथिवी फट जाय तो उसमे हम प्रविष्ट हो जावे ॥४२४॥ तदनन्तर विद्याधरोकी कान्तिका वर्णन करनेवाली धायकी उपेक्षाकर श्रीमालाकी दृष्टि बड़े आदरसे किष्किन्धकुमारके ऊपर पड़ी ॥४२५॥ उसने लोगोके देखते-देखते ही वरमाला किष्किन्धकुमारके गलेमे डाल दी और उसी समय स्नेहसे भरी श्रीमाला ने परस्पर वार्तालाप किया ॥४२६॥ तदनन्तर किष्किन्ध और अन्ध्रकरूढिपर विजयसिंह की दृष्टि पड़ी । विद्याके बलसे गर्वित विजयसिहने उन दोनोको बुलाकर कहा ॥४२७॥ कि अरे ! यह तो विद्याधरोका समूह है, यहाँ आप लोग कहाँ आ गये ? तुम दोनोका दर्शन अत्यन्त विरूप है । तुम क्षुद्र हो, वानर हो और विनयसे रहित हो ॥४२८॥ न तो यहाँ फलोसे नम्रीभूत मनोहर वन है और न निर्झरोको धारण करनेवाली पहाड़की गुफाएँ ही है ॥४२९॥ तथा जिनके मुख मास के समान लाल-लाल है ऐसी इच्छानुसार प्रवृत्ति करनेवाली वानरियोके झुण्ड भी यहाँ कुचेष्टाएँ नहीं कर रहे है ॥४३०॥ इन पशु रूप वानर निशाचरोको यहाँ कौन बुलाकर लाया है ? मै आज उस नीच दूतका निपात–घात करूँ ॥४३१॥ यह कह उसने अपने सैनिकोसे कहा कि इन दुष्ट वानरोको इस स्थानसे निकाल दो तथा इन्हें वृथा ही जो विद्याधरी प्राप्त करनेकी श्रद्धा हुई है उसे दूर कर दो ॥४३२॥ तदनन्तर विजयसिहके कठोर शब्दोसे रुष्ट हो किष्किन्ध और अन्ध्रकरूढि दोनो वानरवशी उस तरह महाक्षोभको प्राप्त हुए जिस तरह कि हाथियोके प्रति सिह महाक्षोभको प्राप्त होते हैं ॥४३३॥ तदनन्तर स्वामीकी निन्दा रूपी महावायुसे ताड़ित विद्याधरोकी सेनारूपी वेला रुद्र–भयङ्कर चेष्टा करती हुई परम क्षोभको प्राप्त हुई ॥४३४॥ कोई सामन्त दाहिने हाथसे बाये कन्धेको पीटने लगा । उस समय उसके वेगपूर्ण आघातके कारण बाये कन्धेसे रक्तके छींटोका समूह उछटने लगा था ॥४३५॥ जिसका चित्त अत्यन्त क्षुभित हो रहा था ऐसा कोई एक सामन्त शत्रुओपर क्रोधके आवेशसे लाल-लाल भयङ्कर दृष्टि डाल रहा था । उसकी वह लाल दृष्टि ऐसी जान पड़ती थी मानो प्रलय कालकी उल्का ही हो ॥४३६॥ कोई सैनिक क्रोधसे काँपते हुए दाहिने हाथसे वक्षःस्थलका स्पर्श कर रहा था और उससे ऐसा जान

१. त्रपावतः म० । २ दृष्टिरेवास्य म० । ३. गर्विता ख० । ४. कृतानति. म० । ५. पशुकपि म० । ६. स्वद्वारणाकृतौ क०, ख० । ७. अधृक्षत् क० ।

कर करेण कश्चिच्च स्मितयुक्तमताडयत । तथा यथा गत पान्थ श्रुतैर्वधिरता चिरम् ॥४३८॥
मूलजालदृढाबद्धमहापीठस्य शाखिन. । कश्चिदुन्मूलन चक्रे चलत्पल्लवधारिण ॥४३९॥
मञ्चस्य स्तम्भमादाय बभञ्जासे पर कपि । क्षुद्रभगैर्नभस्तस्य व्याप्तमन्तरवर्जितै ४४०॥
गात्र वलितमेकेन स्फुटद्दृढव्रणाङ्कितम् । शोणितोदारधाराभिरुत्पातघनसन्निभम् ॥४४१॥
कृताट्टहासमन्येन हसित विवृताननम् । शब्दात्मकमिवाशेष कुर्वता भुवनान्तरम् ॥४४२॥
धूतोऽन्येन जटाभारश्छन्नाशेषदिगानन । छायया तस्य सजाता शर्वरीव तदा चिरम् ॥४४३॥
[1]सकोचिना भुजे कश्चिद्वामे दक्षिणपाणिना । चकार ताडन घोर निर्घातापातभीषणम् ॥४४४॥
सहध्व [2] ध्वसन वाच परुषाया फल खला । दु खेगा[3] इति तारेण ध्वनिना मुखरानन[4] ॥४४५॥
अपूर्वाया पराभूतेस्ततस्ते सहसा[5] भृशम् । कपयोऽभिमुखीभूता हन्तु खेचरवाहिनीम् ॥४४६॥
गजा गजैस्तथा सार्द्ध रथारूढा रथस्थितै । पदातयश्च पादातैश्चक्रुर्युद्ध सुदारुणम् ॥४४७॥
सेनयोरुभयोर्जातस्ततस्तत्र रणो महान् । दूरस्थितामरव्रातजनितोदारविस्मय ॥४४८॥
श्रुत्वा च तत्क्षण युद्ध सुकेशो राक्षसाधिप । मनोरथ इवायात किष्किन्धान्धकयो सुहृत् ॥४४९॥
अकम्पनसुताहेतोर्यथा युद्धमभूत् परम् । तथेदमपि सवृत्त बीज युद्धस्य योषित ॥४५०॥

---

पड़ता था मानो समस्त क्रूर कर्म करनेके लिए किसी बड़े स्थानकी खोज ही कर रहा हो ॥४३७॥ किसीने मुसकराते हुए अपने एक हाथसे दूसरे हाथको इतने जोरसे पीटा कि उसका शब्द सुनकर पथिक चिरकालके लिए बहरा हो गया ॥४३८॥ जिसका महापीठ जड़ोंके समूहसे पृथ्वीपर मजबूत बँधा था और जो चञ्चल पल्लव धारण कर रहा था ऐसे किसी वृक्षको कोई सैनिक जड़से उखाड़ने लगा ॥४३९॥ किसी वानरने मञ्चका खम्भा लेकर कन्धेपर इतने जोरसे तोड़ा कि उसके निरन्तर बिखरे हुए छोटे-छोटे टुकड़ोंसे आकाश व्याप्त हो गया ॥४४०॥ किसीने अपने शरीरको इतने जोरसे मोड़ा कि उसके पुरे हुए घाव फिरसे फट गये तथा खूनकी बड़ी मोटी धाराओंसे उसका शरीर उत्पात-कालके मेघके समान जान पड़ने लगा ॥४४१॥ किसीने मुँह फाड़कर इतने जोरसे अट्टहास किया कि मानो वह समस्त ससारके अन्तरालको शब्दमय ही करना चाहता था ॥४४२॥ किसीने अपनी जटाओंका समूह इतनी जोरसे हिलाया कि उससे समस्त दिशाएँ व्याप्त हो गईं और उससे ऐसा जान पड़ने लगा मानो चिरकालके लिए रात्रि ही हो गई हो ॥४४३॥ कोई सैनिक दाहिने हाथको संकुचित कर उससे बाईं भुजाको इतनी जोरसे पीट रहा था कि उससे वज्रपातके समान भयङ्कर घोर शब्द हो रहा था ॥४४४॥ 'अरे दुष्ट विद्याधरो ! तुमने जो कठोर वचन कहे हैं उसके फलस्वरूप इस विध्वंसको सहन करो' इस प्रकारके उच्च शब्दोंसे किसीका मुख शब्दायमान हो रहा था अर्थात् कोई चिल्ला-चिल्लाकर उक्त शब्द कह रहा था ॥४४५॥ तदनन्तर उस अपूर्व तिरस्कारके कारण वानरवंशी, विद्याधरोंकी सेनाको नष्ट करनेके लिए सम्मुख आये ॥४४६॥ तत्पश्चात् हाथी हाथियोंसे, रथोंके सवार रथके सवारोंसे और पैदल सिपाही पैदल सिपाहियोंके साथ भयङ्कर युद्ध करने लगे ॥४४७॥ इस प्रकार दोनों सेनाओंमें वहाँ महायुद्ध हुआ। ऐसा महायुद्ध कि जो दूर खड़े देवोंके समूहको महान् आश्चर्य उत्पन्न कर रहा था ॥४४८॥ किष्किन्ध और अन्धकका मित्र जो सुकेश नामका राक्षसोंका राजा था वह युद्धका समाचार सुन तत्काल ही मनोरथके समान वहाँ आ पहुँचा ॥४४९॥ पहले अकम्पनकी पुत्री सुलोचनाके निमित्त जैसा महायुद्ध हुआ था वैसा ही युद्ध उस समय हुआ सो ठीक ही है क्योंकि युद्धका कारण स्त्रियाँ ही हैं ॥४५०॥

---

१. सकोचिते म० । २. साम्प्रतम् म० । ३. दुष्टविद्याधराः । ४. मुखराननाः म० । ५. सहनात् म० ।

यावच्च तुमुल तेषा वर्तते खगरक्षसाम् । तावदादाय ता कन्यां किष्किन्ध कृतितां[1] गत ॥४५१॥
आहूय चाभियातस्य तावदन्ध्रकभूभृता[2] । कृपाणेन शिरस्तुङ्ग जयसिहस्य पातितम् ॥४५२॥
तेनैकेन विना सैन्यमितश्चेतश्च तद्‌गतम् । आत्मनेव विना देहे हृषीकाणा कुल [3]घनम् ॥४५३॥
तत सुतवध श्रुत्वा वज्रेणेव समाहत । शोकेनाशनिवेगोऽभून्मूर्च्छान्धतमसावृत ॥४५४॥
तत स्वदारनेत्राम्बुसिक्तवक्ष स्थलश्चिरात् । गत प्रबोधमाकार बभार क्रोधभीषणम् ॥४५५॥
ततस्तस्य समाकार परिवर्गोऽपि नेक्षितुम् । शशाक प्रलयोत्पातभास्कराकारसन्निभम् ॥४५६॥
सर्वविद्याधरै साद्धं ततोऽसौ शस्त्रभासुरै' । गत्वा किष्कुपुरस्याभूत्तुङ्गशाल इवापर' ॥४५७॥
विदित्वा नगर रुद्ध ततस्तौ वानरध्वजौ । तडित्केशिसमायुक्तौ निष्क्रान्तौ रणलालसौ ॥४५८॥
गदाभि शक्तिभिर्बाणै पाशै प्रासैर्महासिभि । ततो दानवसैन्य तद्ध्वस्त वानरराक्षसै ॥४५९॥
दिशा ययान्ध्रको यात किष्किन्धो वा महाहवे । सुकेशो वा तया याता मार्गाश्चूर्णितखेचराः ॥४६०॥
तत्र पुत्रवधक्रोधवह्निज्वालाप्रदीपितः । अन्ध्रकाभिमुखो जातो वज्रवेगः[4] कृतध्वनि ॥४६१॥
बालोऽयमन्धक पापोऽशनिवेगोऽयमुद्धत । इति ज्ञात्वोत्थितो योद्धु किष्किन्धोऽशनिरहसा[5] ॥४६२॥
विद्युद्वाहननाम्नासौ तत्सुतेन पुरस्कृत । अभवच्च तयोर्युद्ध दारजात पराभवम् ॥४६३॥
यावच्च तत्तयोर्युद्ध वर्ततेऽ यन्तभीषणम् । निहतोऽशनिवेगेन तावदन्ध्रकवानर ॥४६४॥

---

इधर जब तक विद्याधर और राक्षसोके बीच भयङ्कर युद्ध होता है उधर तब तक कन्याको लेकर किष्किन्ध कृतकृत्य हो गया अर्थात् उसे लेकर युद्धसे भाग गया ॥४५१॥ विद्याधरोका राजा विजयसिह ज्यो ही सामने आया त्यो ही अन्ध्रकरूढिने ललकारकर उसका उन्नत मस्तक तलवारसे नीचे गिरा दिया ॥४५२॥ जिस प्रकार एक आत्माके विना शरीरमे इन्द्रियो का समूह जहाँ-तहाँ बिखर जाता है उसी प्रकार एक विजयसिहके विना समस्त सेना इधर-उधर बिखर गई ॥४५३॥ जब अशनिवेगने पुत्रके वधका समाचार सुना तो वह शोकके कारण वज्रसे ताड़ित हुएके समान परम दुखी हो मूर्छा रूपी गाढ़ अन्धकारसे आवृत हो गया ॥४५४॥ तदनन्तर अपनी स्त्रियोके नयन जलसे जिसका वक्ष'स्थल भीग रहा था ऐसा अशनिवेग, जब प्रबोधको प्राप्त हुआ तब उसने क्रोधसे भयङ्कर आकार धारण किया ॥४५५॥ तदनन्तर प्रलयकालके उत्पात सूचक भयङ्कर सूर्यके समान उसके आकारको परिकरके लोग देखनेमे भी समर्थ नहीं हो सके ॥५५६॥ तदनन्तर उसने शस्त्रोसे देदीप्यमान समस्त विद्याधरोके साथ जाकर किसी दूसरे ऊँचे कोटके समान किष्कुपुरको घेर लिया ॥५५७॥ तदनन्तर नगरको घिरा जान दोनो भाई युद्धकी लालसा रखते हुए सुकेशके साथ बाहर निकले ॥४५८॥ फिर वानर और राक्षसोकी सेनाने गदा, शक्ति, बाण, पाश, भाले तथा बड़ी-बडी तलवारोसे विद्याधरोकी सेनाको विध्वस्त कर दिया ॥४५९॥ उस महायुद्धमे अन्ध्रक, किष्किन्ध और सुकेश जिस दिशामे निकल जाते थे उसी दिशाके मार्ग चूर्णीकृत वानरोंसे भर जाते थे ॥४६०॥ तदनन्तर पुत्रवधसे उत्पन्न क्रोध रूपी अग्निकी ज्वालाओंसे प्रदीप्त हुआ अशनिवेग जोरका शब्द करता हुआ अन्ध्रकके सामने गया ॥४६१॥ तब किष्किन्ध ने विचारा कि अन्ध्रक अभी बालक है और यह पापी अशनिवेग महा उद्धत है, ऐसा विचारकर वह अशनिवेगके साथ युद्ध करनेके लिए स्वयं उठा ॥४६२॥ सो अशनिवेगके पुत्र विद्युद्वाहनने उसका सामना किया और फल स्वरूप दोनोमे घोर युद्ध हुआ सो ठीक ही है क्योंकि संसारमे जितना पराभव होता है वह स्त्रीके निमित्त ही होता है ॥४६३॥ इधर जब तक किष्किन्ध और विद्युद्वाहनमें भयङ्कर युद्ध चलता है उधर तब तक अशनिवेगने अन्ध्रकको

---

१. कृतिनो भावः कृतिता ताम् । कृत्यता म० । २. भूतिना क० । ३. बलम् म० । ४. अशनिवेगः । ५. अशनिवेगेन ।

ततोऽसौ पतितो बाल क्षितौ तेजोविवर्जित. । प्रत्यूषशशिनश्छायां बभार गतचेतन: ॥४६५॥
किष्किन्धेनापि निक्षिप्ता विद्युद्वाहनवक्षसि । शिला स ताडितो मूर्छां प्राप्य बोध पुनर्गत ॥४६६॥
आदाय ता शिला तेन ततो वक्षसि ताडित । किष्किन्धोऽपि गतो मूर्छां घूर्णितेक्षणमानस॰ ॥४६७॥
लङ्केन्द्रेण ततो नीत प्रेमसंसक्तचेतसा । किष्कु[1] प्रमादमुत्क्षिप्य चिरात् प्राप्तश्च चेतनाम् ॥४६८॥
उन्मील्य स ततो नेत्रे यदा नापश्यदन्धकम् । तदापृच्छन्मम भ्राता वर्तते क्वेति पार्श्वगान् ॥४६९॥
तत प्रलयवातेन क्षोभितस्याम्बुधे समम् । शुश्रावान्त पुराक्रन्दमन्धकध्वसहेतुकम् ॥४७०॥
विप्रलाप ततश्चक्रे प्रतप्त शोकवह्निना । चिर भ्रातृगुणध्यानकृतदु खोर्मिसन्तति ॥४७१॥
हा भ्रातर्मयि सत्येव कथ प्राप्तोऽसि पञ्चताम् । दक्षिण पतितो बाहुस्त्वयि मे पातमागते ॥४७२॥
दुरात्मना कथ तेन पापेन विनिपातितम् । शस्त्र बाले त्वयि क्रूर धिक् तमन्यायवर्तिनम् ॥४७३॥
अपश्यन्नाकुलोऽभूव यो भवन्त निमेषत । सोऽह वद कथ प्राणान् धारयिष्यामि साम्प्रतम् ॥४७४॥
अथवा निर्मित चेतो वज्रेण मम दारुणम् । यज्ज्ञात्वापि भवन्मृत्यु शरीर न विमुञ्चति ॥४७५॥
बाल ते स्मितसयुक्त वीरगोष्ठीसमुद्भवम् । स्मरन् स्फुटसमुल्लास दु ख प्राप्नोमि दु सहम् ॥४७६॥
यद्यद्विचेष्टित सार्द्ध क्रियमाण त्वया पुरा । प्रसेकममृतेनेव कृतवत्सर्वगात्रकम् ॥४७७॥
स्मर्यमाण तदेवेदमधुना मरण कथम् । प्रयच्छति विषेणेव सेक मर्मविदारणम् ॥४७८॥

---

मार डाला ॥४६४॥ तदनन्तर बालक अन्धक, तेज रहित पृथिवीपर गिर पड़ा और निष्प्राण हो प्रात कालके चन्द्रमाकी कान्तिको धारण करने लगा अर्थात् प्रात.कालीन चन्द्रमाके समान कान्ति हीन हो गया ॥४६५॥ इधर किष्किन्धने एक शिला विद्युद्वाहनके वक्ष स्थलपर फेंकी जिससे तड़ित हो वह मूर्च्छित हो गया परन्तु कुछ ही समयमे सचेत होकर उसने वही शिला किष्किन्धके वक्षस्थलपर फेंकी जिससे वह भी मूर्च्छाको प्राप्त हो गया। उस समय शिलाके आघातसे उसके नेत्र तथा मन दोनो ही घूम रहे थे ॥४६६-४६७॥ तदनन्तर प्रेमसे जिसका चित्त भर रहा था ऐसा लङ्काका राजा सुकेश उसे प्रमाद छोड़कर शीघ्र ही किष्कपुर ले गया। वहाँ चिरकालके बाद उसे चेतना प्राप्त हुई ॥४६८॥ जब उसने आँखे खोलीं और सामने अन्धक को नहीं देखा तब समीपवर्ती लोगोसे पूछा कि हमारा भाई कहाँ है ? ॥४६९॥ उसी समय उसने प्रलयकी वायुसे क्षोभित समुद्रके समान, अन्धककी मृत्युसे उत्पन्न अन्त पुरके रोनेका शब्द सुना ॥४७०॥ तदनन्तर जिसके हृदयमे भाईके गुणोके चिन्तवनसे उत्पन्न दु खकी लहरे उठ रहीं थी ऐसा किष्किन्ध शोकाग्निसे सन्तप्त हो चिर काल तक विलाप करता रहा ॥४७१॥ हे भाई ! मेरे रहते हुए तू मृत्युको कैसे प्राप्त हो गया ? तेरे मरनेसे मेरी दाहिनी भुजा ही भङ्गको प्राप्त हुई ॥४७२॥ उस पापी दुष्टने तुझ बालकपर शस्त्र कैसे चलाया ? अन्यायमे प्रवृत्ति करने-वाले उस दुष्टको धिक्कार है ॥४७३॥ जो तुझे निमेष मात्र भी नहीं देखता था तो आकुल हो जाता था वहीं मै अब प्राणोको किस प्रकार धारण करूँगा सो कह ॥४७४॥ अथवा मेरा कठोर चित्त वज्रसे निर्मित है इसीलिए तो वह तेरी मृत्यु जानकर भी शरीर नहीं छोड़ रहा है ॥४७५॥ हे बालक ! मन्द-मन्द मुसकानसे युक्त, वीर पुरुषोकी गोष्ठीमे समुत्पन्न जो तेरा प्रकट हर्षोल्लास था उसका स्मरण करता हुआ मै दुःसह दुःख प्राप्त कर रहा हूँ ॥४७६॥ पहले तेरे साथ जो-जो चेष्टाएँ—कौतुक आदि किये थे वे समस्त शरीरमें मानो अमृतका ही सिंचन करते थे ॥४७७॥ पर आज वे ही सब स्मरणमें आते ही विषके सिंचनके समान मर्मघातक मरण क्यो प्रदान कर रहे हैं अर्थात् जो पहले अमृतके समान सुखदायी थे वे ही आज विषके समान

---

१ किष्कु प्रमोद, -ख०, म० । किष्कुः ज०, ग० ।

ततोऽसौ विलपन् भूरि भ्रातृस्नेहातिविक्लव । सुकेशादिभिरानीत प्रबोधमिति भाषणात् ॥४७९॥
युक्तमेतन्न धीराणां कर्तुं क्षुद्रविचेष्टितम् । शोको हि पण्डितैर्दृष्ट पिशाचो भिन्ननामक ॥४८०॥
कर्मणा विनियोगेन वियोग सह बन्धुना । प्राप्ते तत्रापरं दु ख शोको यच्छति सन्ततम् ॥४८१॥
[1]प्रेक्षापूर्वप्रवृत्तेन जन्तुना सप्रयोजन. । व्यापार सतत कृत्यः शोकाश्रायमनर्थक ॥४८२॥
प्रत्यागम कृते शोके प्रेतस्य यदि जायते । ततोऽन्यानपि सगृह्य विदधीत जन. शुचम् ॥४८३॥
शोकः प्रत्युत देहस्य शोषीकरणमुत्तमम् । पापानामयमुद्रेको महामोहप्रवेशन ॥४८४॥
तदेव वैरिण शोक परित्यज्य प्रसन्नधी । कृत्ये कुरु मतिन्यास नानुबन्ध त्यजत्यरि ॥४८५॥
मूढा शोकमहापङ्के मग्ना. शेषामपि क्रियाम् । नाशयन्ति तदायत्तजोवितैर्वीक्षिता जनै ॥४८६॥
बलीयान् वज्रवेगोऽयमस्मन्नाशस्य चिन्तक । प्रतिकर्तव्यमस्माभिश्चिन्तनीयमिहाधुना ॥४८७॥
अथानन्तर जो अपने बलसे पृथिवीपर प्रसिद्ध था ऐसा माहिष्मतीका राजा सहस्ररश्मि भी उसी समय अन्य दिशासे नर्मदामे प्रविष्ट हुआ ॥६५॥ यह सहस्ररश्मि यथार्थमे परम सुन्दर था क्योकि उत्कृष्ट कान्तिको धारण करनेवाली हजारो स्त्रियाँ उसके साथ थीं ॥६६॥ उसने उत्कृष्ट कलाकारोके द्वारा नाना प्रकारके जलयन्त्र बनवाये थे सो उन सबका आश्रय कर आश्चर्यको उत्पन्न करनेवाला सहस्ररश्मि नर्मदामे उतरकर नाना प्रकारकी क्रीडा कर रहा था ॥६७॥ उसके साथ यन्त्र निर्माणको जाननेवाले ऐसे अनेक मनुष्य थे जो समुद्रका भी जल रोकनेमे समर्थ थे फिर नदीकी तो बात ही क्या थी । इस प्रकार अपनी इच्छानुसार वह नर्मदामे भ्रमण कर रहा था ॥६८॥ यन्त्रोके प्रयोगसे नर्मदाका जल क्षण भरमे रुक गया था इसलिए नाना प्रकारकी क्रीड़ामे निपुण स्त्रियाँ उसके तटपर भ्रमण कर रही थी ॥६९॥ उन स्त्रियोके अत्यन्त पतले और उज्ज्वल वस्त्र जलका सम्बन्ध पाकर उनके नितम्ब स्थलोसे एक दम श्लिष्ट हो गये थे इसलिए जब पति उनकी ओर आँख उठाकर देखता था तब वे लज्जासे गड़ जाती थीं ॥७०॥ शरीरका लेप धुल जानेके कारण जो नखक्षतोसे चिह्नित स्तन दिखला रही थी ऐसी कोई एक स्त्री अपनी सौतके लिए ईर्ष्या उत्पन्न कर रही थी ॥७१॥ जिसके समस्त अङ्ग दिख रहे थे ऐसी कोई उत्तम स्त्री लजाती हुई दोनो हाथोसे बड़ी आकुलताके साथ पतिकी ओर पानी उछाल रही थी ॥७२॥ कोई अन्य स्त्री सौतके नितम्ब स्थलपर नखक्षत देखकर क्रीडाकमलकी नालसे पतिपर प्रहार कर रही थी ॥७३॥ कोई एक स्वभावकी क्रोधिनी स्त्री मौन लेकर निश्चल खडी रह गई थी तब पतिने चरणोमे प्रणामकर उसे किसी तरह संतुष्ट किया ॥७४॥ राजा सहस्ररश्मि जब तक एक स्त्रीको प्रसन्न करता था तब तक दूसरी स्त्री रोषको प्राप्त हो जाती थी । इस कारण वह समस्त स्त्रियोको बड़ी कठिनाईसे संतुष्ट कर सका था ॥७५॥ उत्तमोत्तम स्त्रियोसे घिरा, मनोहर रूपका धारक वह राजा, किसी स्त्रीकी ओर देखकर, किसीका स्पर्श कर, किसीके प्रति कोप प्रकट कर, किसीके प्रति अनेक प्रकारकी प्रसन्नता प्रकट कर, किसीको प्रणाम कर, किसीके ऊपर पानी उछाल कर, किसीको कर्णाभरणसे ताड़ित कर, किसीका धोखेसे वस्त्र खीचकर, किसीको मेखलासे बाँधकर,

१ भवन्ति क०, ख० । २. दृष्ट्वा म० । ३. विगतालेखना म० । ४. तावत् + एति + अपरा, तावदेत्य परा रुषम् म० ।

पतितान् सिकतापृष्ठे नालङ्कारान् पुनः स्त्रियः । आचकाङ्क्षुर्महाचित्ता निर्माल्यस्रग्गुणानिव ॥८०॥
काचिच्चन्दनलेपेन चकार धवलं जलम् । अन्या कुङ्कुमपङ्केन द्रुतचामीकरप्रभम् ॥८१॥
धौतताम्बूलरागाणामधराणां सुयोषिताम् । चक्षुषां व्यञ्जनानां[1] च लक्ष्मीरभवदुत्तमा ॥८२॥
पुनश्च यन्त्रनिर्मुक्तवारि[2]मध्ये यथेप्सितम् । रेमे समं वरस्त्रीभिर्नरेशः स्मरहेतुभिः[3] ॥८३॥
क्रीडन्तीभिर्जले स्त्रीभिर्भूषणानां वरो रवः । शकुन्तेष्विव विन्यस्तः कूलकीलालचारिषु ॥८४॥
रावणोऽपि सुखं स्नात्वा वसानो धौतवाससी । विधाय प्रयतो मौलिं[4] शुक्लकर्पटसंयुतम् ॥८५॥
नियुक्तैः सर्वदा पुम्भिरुह्यमानां प्रयत्नतः । प्रतिमामर्हतो रत्नहेमनिर्मितविग्रहाम् ॥८६॥
तरङ्गिणीनवे[5] रम्ये पुलिने शुभ्रभासुरे । सिकतारचितोत्तुङ्गपीठबन्धविराजिते ॥८७॥
वैडूर्यदण्डिकासक्तमुक्ताफलवितानके । सर्वोपकरणव्यग्रपरिवर्गसमावृते ॥८८॥
स्थापयित्वा घनामोदसमाकृष्टमधुव्रतैः । धूपैरालेपनैः पुष्पैर्मनोज्ञैर्बहुभक्तिभिः ॥८९॥
विधाय महतीं पूजां सन्निविष्टः पुरोऽत्र नौ । सगर्भं वदनं[6] चक्रे पूतैः स्तुत्यक्षरैश्चिरम् ॥९०॥
अकस्मादथ पूरेण हता पूजा समन्ततः । फेनबुद्बुदयुक्तेन कलुषेण तरस्विना ॥९१॥

---

किसीके पाससे दूर हटकर, किसीको भारी डॉट दिखाकर, किसीके साथ सम्पर्क कर, किसीके स्तनोंमे कम्पन उत्पन्न कर, किसीके साथ हँसकर, किसीके आभूषण गिराकर, किसीको गुदगुदाकर, किसीके प्रति भौंह चलाकर, किसीसे छिपकर, किसीके समक्ष प्रकट होकर तथा किसीके साथ अन्य प्रकारके विभ्रम दिखाकर नर्मदा नदीमे बडे आनन्दसे उस तरह क्रीडा कर रहा था जिस प्रकार कि देवियोंके साथ इन्द्र क्रीड़ा किया करता है ॥७६–७९॥ उदार हृदयको धारण करनेवाली उन स्त्रियोंके जो आभूषण बालूके ऊपर गिर गये थे उन्होंने निर्माल्यकी मालाके समान फिर उन्हें उठानेकी इच्छा नही की थी ॥८०॥ किसी स्त्रीने चन्दनके लेपसे पानीको सफेद कर दिया था तो किसीने केशरके द्रवसे उसे सुवर्णके समान पीला बना दिया था ॥८१॥ जिनकी पानकी लालिमा धुल गई थी ऐसे स्त्रियोंके ओंठ तथा जिनका काजल छूट गया था ऐसे नेत्रोंकी कोई अद्भुत ही शोभा दृष्टि गोचर हो रही थी ॥८२॥ तदनन्तर यन्त्रके द्वारा छोड़े हुए जलके बीचमे वह राजा, काम उत्पन्न करनेवाली अनेक उत्कृष्ट स्त्रियोंके साथ इच्छानुसार क्रीडा करने लगा ॥८३॥ उस समय तटके समीपवर्ती जलमे विचरण करनेवाले पक्षी मनोहर शब्द कर रहे थे सो ऐसा जान पडता था मानो जलके भीतर क्रीड़ा करनेवाली स्त्रियोंने अपने आभूषणोंका शब्द उनके पास धरोहर ही रख दिया हो ॥८४॥

उधर यह सब चल रहा था इधर रावणने भी सुखपूर्वक स्नानकर धुले हुए उत्तम वस्त्र पहिने और अपने मस्तकको बडी सावधानीसे सफेद वस्त्रसे युक्त किया ॥८५॥ जिसे नियुक्त मनुष्य सदा बड़ी सावधानीसे साथ लिये रहते थे ऐसी स्वर्ण तथा रत्न निर्मित अर्हन्त भगवान्‌की प्रतिमाको रावणने नदीके उस तीर पर स्थापित कराया जो कि नदीके बीच नया निकला था, मनोहर था, सफेद तथा देदीप्यमान था, बालूके द्वारा निर्मित ऊँचे चबूतरेसे सुशोभित था, जहाँ वैडूर्यमणिकी छडियोंपर चन्दोवा तानकर उसपर मोतियोंकी झालर लटकाई गई थी, और जो सब प्रकारके उपकरण इकट्ठे करनेमे व्यग्र परिजनोंसे भरा था ॥८६–८८॥ प्रतिमा स्थापित कर उसने भारी सुगन्धिसे भ्रमरोंको आकर्षित करनेवाले धूप, चन्दन, पुष्प तथा मनोहर नैवेद्यके द्वारा बड़ी पूजा की और सामने बैठकर चिर काल तक स्तुतिके पवित्र अक्षरोंसे अपने मुखको सहित किया ॥८९–९०॥

अथानन्तर रावण पूजामे निमग्न था कि अचानक ही उसकी पूजा सब ओरसे फेन

---

१ कज्जलैरहितानाम् । २. निर्मुक्ति—क०, ख० । निर्मुक्त म० । ३. सुरहेतुभिः क०, ख० । स्तरुहेतुभिः म०, ब० । ४. मूल म० । ५. तरङ्गिणीजवे म० । ६. सगर्भवदन म० ।

ततो दशानन: क्षिप्रं गृहीत्वा प्रतियातनाम्[1] । क्रुद्धो जगाद किन्त्वेतदिति विज्ञायतामरम् ॥९२॥
ततोऽनुसृत्य वेगेन नरै: प्रतिनिवृत्य च । निवेदितमिदं नाथ कोऽप्ययं पुरुषो महान् ॥९३॥
मध्येललामनारीणां ललामपरमोदयः । दूरस्थेन नृलोकेन वेष्टितः खड्गधारिणा ॥९४॥
नानाकाराणि यन्त्राणि बृहन्ति सुबहूनि च । विद्यन्ते तस्य नूनं तैः कृतमेतद्विचेष्टितम् ॥९५॥
व्यवस्थामात्रकं तस्य पुरुषा इति नो[2] मतिः । [3]अवष्टम्भस्तु यस्तस्य स एवान्यस्य दु:सहः ॥९६॥
वार्तया श्रूयते कोऽपि [4]शक्र: स्वर्गे तथा गिरौ । अयं तु वीक्षितोऽस्माभिः शुनासीर: [5]समक्षत: ॥९७॥
श्रुत्वा सकुंचितभ्रूश्च रवं मुरजसंभवम् । वीणावंशादिभिर्युक्तं जयशब्दविमिश्रितम् ॥९८॥
गजवाजिनराणाञ्च [6]ध्वानमाज्ञपयन्नृपान् । त्वरितं गृह्यतामेष दुरात्मेति दशानन: ॥९९॥
दत्वा चाज्ञां पुनश्चक्रे पूजां रोधसि सत्तमाम् । रत्नकाञ्चननिर्माणै: पुष्पैर्जिनवराकृतौ ॥१००॥
शेषामिव दशास्याज्ञां कृत्वा शिरसि सम्भ्रमात् । अभ्यमित्रं समन्नद्धा प्रससुर्व्योमगाधिपा: ॥१०१॥
दृष्ट्वा परबलं प्राप्तं सहस्रकिरण: क्षणात् । क्षुब्धो दत्वाभयं स्त्रीणां निर्जगाम जलाशयात् ॥१०२॥
ततः कलकलं श्रुत्वा विदित्वा च नरौघतः । सनद्धा निर्ययुर्वीरा माहिष्मत्याः ससम्भ्रमम् ॥१०३॥
गजवाजिसमारूढा: [7]पादातेन समावृताः । रथारूढाश्च सामन्ता विविधायुधधारिण: ॥१०४॥
सहस्रकिरणं प्राप्ता नितान्तमनुरागिण: । ऋतव: क्रमनिर्मुक्ता सम्मेदमिव पर्वतम् ॥१०५॥
आपतन्तीं ततो दृष्ट्वा विद्याधरवरूथिनीम् । सहस्ररश्मिसामन्तास्त्यक्त्वा जीवितलोभिताम् ॥१०६॥

तथा बबूलोंसे युक्त, मलिन एवं वेगशाली जलके पूरसे नष्ट हो गई ॥९१॥ तब रावणने शीघ्र ही प्रतिमा ऊपर उठाकर कुपित हो लोगोंसे कहा कि मालूम करो क्या बात है ? ॥९२॥ तदनन्तर लोगोंने वेगसे जाकर और वापिस लौटकर निवेदन किया कि हे नाथ ! आभूषणोंसे परम अभ्युदयको प्रकट करनेवाला कोई मनुष्य सुन्दर स्त्रियोंके बीच बैठा है। तलवारको धारण करनेवाले मनुष्य दूर खड़े रहकर उसे घेरे हुए हैं। नाना प्रकारके बड़े-बड़े यन्त्र उसके पास विद्यमान हैं। निश्चय ही यह कार्य उन सब यन्त्रोंका किया है ॥९३–९५॥ हमारा ध्यान है कि उसके पास जो पुरुष हैं वे तो व्यवस्था मात्रके लिए हैं यथार्थमें उसका जो बल है वही दूसरोंके लिए दु:खसे सहन करने योग्य है ॥९६॥ लोक-कथासे सुना जाता है कि स्वर्गमें अथवा सुमेरु पर्वतपर इन्द्र नामका कोई व्यक्ति रहता है पर हमने तो यह साक्षात् ही इन्द्र देखा है ॥९७॥ उसी समय रावणने वीणा बाँसुरी आदिसे युक्त तथा जय-जय शब्दसे मिश्रित मृदङ्गका शब्द सुना। साथ ही हाथी घोड़े और मनुष्योंका शब्द भी उसने सुना। सुनते ही उसकी भौंह चढ़ गई। उसी समय उसने राजाओंको आज्ञा दी कि इस दुष्टको शीघ्र ही पकड़ा जाय ॥९८–९९॥ आज्ञा देकर रावण फिर नदीके किनारे रत्न तथा सुवर्ण निर्मित पुष्पोंसे जिन-प्रतिमाकी उत्तम पूजा करने लगा ॥१००॥ विद्याधर राजाओंने रावणकी आज्ञा शेषाक्षतके समान मस्तकपर धारण की और तैयार हो वे शीघ्र ही शत्रुके सम्मुख दौड़ पड़े ॥१०१॥

तदनन्तर शत्रुदलको आया देख सहस्ररश्मि क्षण भरमें क्षुभित हो गया और स्त्रियोंको अभय देकर शीघ्र ही जलाशयसे बाहर निकला ॥१०२॥ तत्पश्चात् कल-कल सुनकर और जन समूहसे सब समाचार जानकर माहिष्मतीके वीर शीघ्र ही तैयार हो बाहर निकल पड़े ॥१०३॥ जिस प्रकार वसन्त आदि ऋतुएँ सम्मेदाचलके पास एक साथ आ पहुँचती हैं उसी प्रकार नाना तरह के शस्त्रोंको धारण करनेवाले बहुत भारी अनुरागसे भरे सामन्त सहस्ररश्मिके पास एक साथ आ पहुँचे। वे सामन्त हाथियों घोड़ों और रथोंपर सवार थे तथा पैदल चलनेवाले सैनिकोंसे युक्त थे ॥१०४–१०५॥ परस्पर एक दूसरेकी रक्षा करनेमें तत्पर तथा उत्साहसे भरे सहस्र-

१ प्रतिमां । २ अस्माकम् । ३. बलम् । ४. शक्रः म० । ५. प्रत्यक्षम् । ६. ध्वनिमाज्ञापयन् म० । ७. पदातीनां समूहस्तेन ।

विरचय्य घनव्यूहमन्योऽन्य पालनोद्यता । विनापि भर्तृवाक्येन सोत्साहा योद्धुमुत्थिता. ॥१०७॥
बले च राक्षसेशस्य रण कर्तुं समुद्यते । विचेरुरम्बरे वाच. सुराणामिति सत्वरा ॥१०८॥
अहो महानय वीरैरन्याय कर्तुमीप्सित । भूगोचरै सम योद्धुमुद्यता यन्नभश्चरा. ॥१०९॥
अमी भूगोचरा स्वल्पा वराका ऋजुचेतस । विद्यामायाकृतोऽत्यन्त बहवश्च नभश्चरा ॥११०॥
इति श्रुत्वाथ खे शब्द पुनरुक्त समाकुलम् । त्रपायुक्ता भुव याता खेचराः साधुवृत्तयः ॥१११॥
असिबाणगदाप्रासैरथ जघ्नु' परस्परम् । तुल्यप्रतिभटारब्धे रणे रावणमानवा ॥११२॥
रथिनो रथिभि सार्धं तुरङ्गास्तुरगैरमी । साक गजैर्गजा सत्रा पादात च पदातिभि ॥११३॥
न्यायेन योद्धुमारब्धा क्रमानीतपराजयाः । शस्त्रसंपातनिष्पेषसमुत्थापितवह्नय. ॥११४॥
भङ्गासन्न तत सैन्य निज वीक्ष्य परैर्द्रुतम् । सहस्ररश्मिरारुह्य रथमुग्र समागत. ॥११५॥
किरीटी कवची चापि तेजो बिभ्रदनुत्तमम् । विद्याधरबल दृष्ट्वा स न बिभ्ये मनागपि ॥११६॥
स्वामिनाधिष्ठिता. सन्तस्तत प्रत्यागतौजस । उद्गूर्णविस्फुरच्छत्रा विस्मृतक्षतवेदना ॥११७॥
प्रविष्टा रक्षसा सैन्य रणशौण्डा महीचरा । स्तम्बेरमा इवोद्धृतमदा गम्भीरमर्णवम् ॥११८॥
तत सहस्रकिरणो बिभ्राण कोपमुन्नतम् । पराश्चिक्षेप बाणौघैर्घनानिव सदागति ॥११९॥
प्रतीहारेण चाख्यातमिति कैलासकम्पिने । देव पश्य नरेन्द्रेण केनाप्येतेन ते बलम् ॥१२०॥

रश्मिके सामन्तोने जब विद्याधरोकी सेना आती देखी तो वे जीवनका लोभ छोड मेघव्यूहकी रचनाकर स्वामीकी आज्ञाके विना ही युद्ध करनेके लिए उठ खड़े हुए ॥१०६–१०७॥ इधर जब रावणकी सेना युद्ध करनेके लिए उद्यत हुई तब आकाशमे सहसा देवताओके निम्नाङ्कित वचन विचरण करने लगे ॥१०८॥ देवताओने कहा कि अहो ! वीर लोग यह बड़ा अन्याय करना चाहते है कि भूमिगोचरियोके साथ विद्याधर युद्ध करनेके लिए उद्यत हुए हैं ॥१०९॥ ये बेचारे भूमिगोचरी थोड़े तथा सरल चित्त हैं और विद्याधर इनके विपरीत विद्या तथा मायाको करनेवाले एवं संख्यामे बहुत है ॥११०॥ इस प्रकार आकाशमे बार-बार कहे हुए इस आकुलता पूर्ण शब्दको सुनकर अच्छी प्रवृत्तिवाले विद्याधर लज्जासे युक्त होते हुए पृथिवीपर आ गये ॥१११॥ तदनन्तर समान योद्धाओके द्वारा प्रारम्भ किये हुए युद्धमे रावणके पुरुष परस्पर तलवार, बाण, गदा और भाले आदिसे प्रहार करने लगे ॥११२॥ रथोके सवार रथोके सवारोके साथ, घुड़सवार घुड़सवारोके साथ, हाथियोके सवार हाथियोके सवारोके साथ, और पैदल सैनिक पैदल सैनिकोंके साथ युद्ध करने लगे ॥११३॥ जिन्हें क्रम-क्रमसे पराजय प्राप्त हो रहा था और जिनके शस्त्र समूहकी टक्करसे अग्नि उत्पन्न हो रही थी ऐसे योद्धाओने न्यायपूर्वक युद्ध करना शुरू किया ॥११४॥ जब सहस्ररश्मिने अपनी सेनाको शीघ्र ही नष्ट होनेके निकट देखा तब उत्तम रथपर सवार हो तत्काल आ पहुँचा ॥११५॥ उत्तम किरीट और कवचको धारण करनेवाला सहस्ररश्मि उत्कृष्ट तेजको धारण करता था इसलिए विद्याधरोकी सेना देख वह जरा भी भयभीत नहीं हुआ ॥११६॥ तदनन्तर स्वामीसे सहित होनेके कारण जिनका तेज पुन' वापिस आ गया था, जिनके ऊपर खुले हुए छत्र लग रहे थे और जिन्होने घावोका कष्ट भुला दिया था ऐसे रणनिपुण भूमिगोचरी राक्षसोकी सेनामे इस प्रकार घुस गये जिस प्रकार कि मदोन्मत्त हाथी गहरे समुद्रमे घुस जाते है ॥११७–११८॥ जिस प्रकार वायु मेघोको उड़ा देता हैं उसी प्रकार अत्यधिक क्रोधको धारण करनेवाला सहस्ररश्मि बाणोके समूहसे शत्रुओंको उडाने लगा ॥११९॥ यह देख द्वारपालने रावणसे निवेदन किया कि हे देव ! देखो

---

१. वाणि म० । २. सार्धम् । ३. निश्शेष ख०, म० । ४. श्रेष्ठम् । रथमुख्यसमागतः म० । ५. प्रस्फुरच्छत्रा क० ।

धानुष्केण रथस्थेन पश्यता तृणवज्जगत् । योजन यावदध्वान शरौघैरपसारितम् ॥१२१॥
ततोऽभिमुखमायात तमालोक्य यमार्दन[1] । आरुह्य त्रिजगद्भूषणनामान[2] मत्तवारणम् ॥१२२॥
परैरालोकितो भीतैर्विमुक्तशरसहतिः । सहस्रकिरण चक्रे विरथ दु सहद्युति[3] ॥१२३॥
तत. सहस्रकिरण समारुह्य द्विपोत्तमम् । अभीयाय पुन क्रुद्धस्तरसा राक्षसाधिपम् ॥१२४॥
सहस्ररश्मिना मुक्ता बाणा निर्भिद्य कङ्कटम् । अङ्गानि दशवक्त्रस्य बिभिदुर्निशितानना ॥१२५॥
रत्नश्रवःसुतेनास्तान्वाणानाकृष्य देहत । सहस्रकिरणो हास कृत्वेत्यवददुन्नतम् ॥१२६॥
अहो रावण धानुष्को महानसि कुतस्तव । उपदेशोऽयमायातो गुरो परमकोशलात् ॥१२७॥
वत्स तावद्धनुर्वेदमधीष्व कुरु च श्रमम् । ततो मया सम युद्ध करिष्यसि नयोज्झितः[4] ॥१२८॥
तत परुषवाक्येन प्राप्तः सरम्भमुत्तमम् । बिभेद यक्षमर्दस्त कुन्तेनालिकपट्टके[5] ॥१२९॥
गलद्रुधिरधारोऽसौ घूर्णमाननिरीक्षण । मोह गत्वा समाश्वस्तो[6] यावद् गृह्णाति सायकम् ॥१३०॥
तावदुत्पत्यवेगेन तमष्टापदकम्पन[7] । अनुज्झितर्महाधैर्य[8] जीवग्राह गृहीतवान् ॥१३१॥
नीत स्वनिलय बद्ध्वा खगैर्दृष्ट सविस्मयै. । यदि नामोत्पतेत् सोऽपि केन गृह्येत जन्तुना ॥१३२॥
सहस्ररश्मिवृत्तान्तादिव नीतिमुपागत' । सहस्ररश्मिरैदस्त[9] सन्ध्याप्राकारवेष्टित ॥१३३॥
दशवक्त्रविमुक्तेन कोपेनेव च भूरिणा । तमसा पिहितो लोक सदसत्समताकृता ॥१३४॥

जगत्‌को तृणके समान तुच्छ देखनेवाले, रथपर बैठे धनुषधारी इस किसी राजाने बाणोके समूह से तुम्हारी सेनाको एक योजन पीछे खदेड़ दिया है ॥१२०–१२१॥ तदनन्तर सहस्ररश्मिको सम्मुख आता देख दशानन त्रिलोकमण्डन नामक हाथीपर सवार हो चला। शत्रु जिसे भयभीत होकर देख रहे थे तथा जिसका तेज अत्यन्त दु'सह था ऐसे रावणने बाणोका समूह छोड़कर सहस्ररश्मिको रथरहित कर दिया ॥१२२–१२३॥ तब सहस्ररश्मि उत्तम हाथीपर सवार हो क्रुद्ध होता हुआ वेगसे पुन रावणके सम्मुख आया ॥१२४॥ इधर सहस्ररश्मिके द्वारा छोड़े हुए पैने बाण कवचको भेदकर रावणके अङ्गोको विदीर्ण करने लगे ॥१२५॥ उधर रावणने सहस्ररश्मिके प्रति जो बाण छोड़े थे उन्हें वह शरीरसे खीचकर हँसता हुआ जोरसे बोला ॥१२६॥ कि अहो रावण ! तुम तो बड़े धनुर्धारी मालूम होते हो। यह उपदेश तुम्हें किस कुशल गुरुसे प्राप्त हुआ है ? ॥१२७॥ अरे छोकड़े ! पहले धनुर्वेद पढ और अभ्यास कर, फिर मेरे साथ युद्ध करना। तू नीतिसे रहित जान पड़ता है ॥१२८॥ तदनन्तर उक्त कठोर वचनोसे बहुत भारी क्रोधको प्राप्त हुए रावणने एक भाला सहस्ररश्मिके ललाटपर मारा ॥१२९॥ जिससे रुधिरकी धारा बहने लगी तथा आँखे घूमने लगीं। मूर्छित हो पुन सावधान होकर जब तक वह बाण ग्रहण करता है तब तक रावणने वेगसे उछलकर उस धैर्यशालीको जीवित ही पकड़ लिया ॥१३०–१३१॥ रावण उसे बाँधकर अपने डेरेपर ले गया। विद्याधर उसे बड़े आश्चर्यसे देख रहे थे। वे सोच रहे थे कि यदि यह किसी तरह उछलकर छूटता है तो फिर इसे कौन पकड़ सकेगा ? ॥१३२॥

तदनन्तर संध्यारूपी प्राकारसे वेष्टित होता हुआ सूर्य अस्त हो गया सो ऐसा जान पड़ता था मानो सहस्ररश्मिके इस वृत्तान्तसे उसने कुछ नीतिको प्राप्त किया था अर्थात् शिक्षा ग्रहण की थी ॥१३३॥ अच्छे और बुरेको समान करनेवाले अन्धकारसे लोक आच्छादित हो गया सो ऐसा जान पड़ता था मानो रावणके द्वारा छोड़े हुए बहुत भारी क्रोधसे ही आच्छादित हुआ

---

१. रावणः । २. त्रिलोकमण्डननामधेयम् । ३. श्रुतिः ख० । ४. नयोज्झतः म० । ५. भालतटे । ६. समास्वस्थो म० । ७. कैलासकम्पनो रावणः । ८. महो धैर्य म०, ब०, क० । ९. सूर्यः, सहस्ररश्मिः + ऐत् + अस्तम् । ऐत् = अगच्छत् ।

ततो रणादिव प्राप्तमत्यन्तविमलं यशः । शशाङ्कबिम्बमुद्यातं तमोहरणपण्डितम् ॥१३५॥
व्रणभङ्गविधानेन भटानां वीर्यवर्णनैः । गवेषणैश्च भिन्नानां निद्रया चाहतात्मनाम् ॥१३६॥
गता राक्षससैन्यस्य रजनी सा यथायथम् । विबुद्धश्च दशग्रीवः प्रभातहततूर्यतः ॥१३७॥
ततो वार्तामिव ज्ञातुं दशवक्त्रस्य भास्करः । बिभ्राणः परमं रागं कम्पमानः समागतः ॥१३८॥
शतबाहुरथ श्रुत्वा सुतं बद्धं निरम्बरः । जङ्घाचारणलब्धीशो महाबाहुर्महातपाः ॥१३९॥
रजनीपतिवत्कान्तो दीप्तस्तिग्ममरीचिवत् । मेरुवत् स्थैर्यसम्पन्नो धीरो रत्नालयो यथा ॥१४०॥
कृतप्रत्यङ्गकर्माणं सभामध्यसुखस्थितम् । प्रशान्तमानसः प्राप रावणं लोकवत्सलः ॥१४१॥
दूरादेव ततो दृष्ट्वा मुनिं कैलासकम्पनः । अभ्युत्तस्थौ प्रणामं च चक्रे भूमिस्थमस्तकः ॥१४२॥
वरासनोपविष्टे च यतौ भूमावुपाविशत् । करद्वयं समासाद्य विनयानतविग्रहः ॥१४३॥
जगाद चेति भगवन् कृतकृत्यस्य विद्यते । न तवागमने हेतुर्विहाय मम पावनम् ॥१४४॥
ततः प्रशंसनं कृत्वा कुलवीर्यविभूतिभिः । क्षरन्निवामृतं वाचा जगादेति दिगम्बरः ॥१४५॥
आयुष्मन्निदमस्त्येव शुभसङ्कल्पतस्तव । नान्तरीयकमेतत्तु वदामि यदिदं शृणु ॥१४६॥
पराभिभवमात्रेण क्षत्रियाणां कृतार्थता । यतः सहस्रकिरणं ततो मुञ्च ममाङ्गजम् ॥१४७॥
सम्प्रधार्य ततः सार्धमिङ्गितैरेवं मन्त्रिभिः । उवाच कैकसीपुत्रः प्रणतो मुनिपुङ्गवम् ॥१४८॥

---

हो ॥१३४॥ तदनन्तर अन्धकारके हरनेमें निपुण चन्द्रमाका बिम्ब उदित हुआ सो ऐसा जान पड़ता था मानो युद्धसे उत्पन्न हुआ रावणका अत्यन्त निर्मल यश ही हो ॥१३५॥ उस समय कोई तो घायल सैनिकोंके घावोंपर मरहमपट्टी लगा रहे थे, कोई योद्धाओंके पराक्रमका वर्णन कर रहे थे, कोई गुमे हुए सैनिकोंकी तलाश कर रहे थे और कोई, जिन्हें घाव नहीं लगे थे सो रहे थे। इस प्रकार यथायोग्य कार्योंसे रावणकी सेनाकी रात्रि व्यतीत हुई। प्रभात हुआ तो प्रभात सम्बन्धी तुरहीके शब्दसे रावण जागृत हुआ ॥१३६–१३७॥ तदनन्तर परम रागको धारण करता हुआ सूर्य काँपता-काँपता उदित हुआ सो ऐसा जान पड़ता था मानो रावणका समाचार जाननेके लिए उदित हुआ हो ॥१३८॥

अथानन्तर सहस्ररश्मिके पिता शतबाहु, जो दिगम्बर थे, जिन्हें जङ्घाचारण ऋद्धि प्राप्त थी जो महाबाहु, महातपस्वी, चन्द्रमाके समान सुन्दर, सूर्यके समान तेजस्वी, मेरुके समान स्थिर और समुद्रके समान गम्भीर थे, पुत्रको बँधा सुनकर रावणके समीप आये। उस समय रावण अपने शरीरसम्बन्धी कार्योंसे निपटकर सभाके बीचमें सुखसे बैठा था और मुनिराज शतबाहु प्रशान्तचित्त एवं लोगोंसे स्नेह करनेवाले थे ॥१३९–१४१॥ रावण, मुनिराजको दूरसे ही देखकर खड़ा हो गया उसने सामने जाकर तथा पृथ्वीपर मस्तक टेककर नमस्कार किया ॥१४२॥ जब मुनिराज उत्कृष्ट प्रासुक आसनपर विराजमान हो गये तब रावण पृथ्वीपर दोनों हाथ जोड़कर बैठ गया। उस समय उसका सारा शरीर विनयसे नम्रीभूत था ॥१४३॥ रावणने कहा कि हे भगवन्! आप कृतकृत्य हैं अतः मुझे पवित्र करनेके सिवाय आपके यहाँ आनेमें दूसरा कारण नहीं है ॥१४४॥ तब कुल, वीर्य और विभूतिके द्वारा रावणकी प्रशंसा कर वचनोंसे अमृत झराते हुए की तरह मुनिराज कहने लगे कि ॥१४५॥ हे आयुष्मन्! तुम्हारे शुभ संकल्पसे यही बात है फिर भी मैं एक बात कहता हूँ सो सुन ॥१४६॥ यतश्च शत्रुओंका पराभव करने मात्रसे क्षत्रियोंके कृतकृत्यपना हो जाता है अतः तुम मेरे पुत्र सहस्ररश्मिको छोड़ दो ॥१४७॥ तदनन्तर रावणने मन्त्रियोंके साथ इशारोंसे सलाहकर नम्र हो मुनिराजसे कहा कि हे नाथ! मेरा निम्नप्रकार निवेदन है। मैं इस समय राजलक्ष्मीसे उन्मत्त एवं हमारे पूर्वजोंका

---

१. -मुद्योतं म०, ख०, ब० । २. बिभ्राणं म० । ३. सभामध्ये म० । ४. -रेव ख० । -रिव म०

विज्ञापयामि नाथाह प्रस्थितः खेचराधिपम् । वशीकर्तुं श्रिया मत्त कृतास्मत्पूर्वजागसम् ॥१४९॥
तत्र याते[1] हि रेवायां रम्याया जिनपूजनम् । मया तटस्थचक्रेण कृत विमलसैकते ॥१५०॥
सहोपकरणैश्चासौ नीता[3] पूजा सुरहसा । सहसा पयसा यन्त्ररचितेनास्य भोगिनः ॥१५१॥
ततो मया जिनेन्द्रार्चाध्वसोद्भूतमहारुषा । कृत कर्मेदमर्थेन न विना द्वेष्मि मानवान् ॥१५२॥
न चानेनोदित[4] मह्य सम्प्राप्ताय प्रमादिना । यथा ज्ञात मया नेद क्षम्यतामिति मानिना ॥१५३॥
भूचरान्मानुषाञ्जेतु यो न शक्त स खेचरान् । कथ जेष्यामि विद्याभि' कृतनानाविचेष्टितान् ॥१५४॥
वशीकरोम्यतस्तावद्भूचरान्मानशालिन । ततो विद्याधराधीश सोपानक्रमयोगत ॥१५५॥
ततो वशीकृतस्यास्य मुक्तिर्न्याय्यैव कि पुन । [5]भवत्वाज्ञां प्रयच्छत्सु पुण्यवद्दृश्यमूर्तिषु ॥१५६॥
अथेन्द्रजिदुवाचेद साधु देवेन भाषितम् । को वा नयविद् नाथ मुक्त्वा जानाति भाषितुम् ॥१५७॥
ततो दशमुखादिष्टो मारीचोऽधिकृतैर्नरै. । आनाययत्सहस्राशु नग्नसायकपाणिभि. ॥१५८॥
तातस्य चरणौ नत्वा भूमौ चासावुपाविशत् । सम्मान्य च दशास्येन विरोषेणेति भाषित ॥१५९॥
अद्य प्रभृति मे भ्राता तुरीयस्त्व महाबल । जेष्यामि भवता साक कृताखण्डलविभ्रमम् ॥१६०॥
स्वयप्रभा च ते दास्ये मन्दोदर्या. कनीयसीम् । कृत यद्भवता तच्च प्रमाण मे वराकृते ॥१६१॥
सहस्ररश्मिरूचे च धिड् मे राज्यमशाश्वतम् । [6]आपातमात्ररम्यॉश्च विषयान् दु खभूयस ॥१६२॥

---

अपराध करनेवाले विद्याधराधिपति इन्द्रको वश करनेके लिए प्रयाण कर रहा हूँ ॥१४८–१४९॥ सो इस प्रयाणकालमें मनोहर रेवा नदीके किनारे चक्ररत्न रखकर मै बालूके निर्मल चबूतरेपर जिनेन्द्र भगवान्‌की पूजा करनेके लिए बैठा था सो इस भोगी—विलासी सहस्ररश्मिके यन्त्ररचित वेगशाली जलसे उपकरणोके साथ-साथ मेरी वह सब पूजा अचानक बह गई ॥१५०–१५१॥ जिनेन्द्र भगवान्‌की पूजाके नष्ट हो जानेसे मुझे बहुत क्रोध उत्पन्न हुआ सो इस क्रोधके कारण ही मैने यह कार्य किया है। प्रयोजनके विना मै किसी मनुष्यसे द्वेष नहीं करता ॥१५२॥ जब मैं पहुँचा तब इस मानी एवं प्रमादीने यह भी नहीं कहा कि मुझे ज्ञान नहीं था अत. क्षमा कीजिए ॥१५३॥ जो भूमिगोचरी मनुष्योंको जीतनेके लिए समर्थ नही है वह विद्याओंके द्वारा नाना प्रकारकी चेष्टाएँ करनेवाले विद्याधरोको कैसे जीत सकेगा ? ॥१५४॥ यही सोचकर मैं पहले अहकारी भूमिगोचरियोंको वश कर रहा हूँ। उसके बाद श्रेणीके क्रमसे विद्याधराधिपति इन्द्रको वश करूँगा ॥१५५॥ इसे मै वश कर चुका हूँ अत' इसको छोड़ना न्यायोचित ही है फिर जिनके दर्शन केवल पुण्यवान् मनुष्योंको ही हो सकते है ऐसे आप आज्ञा प्रदान कर रहे हैं अत' कहना ही क्या है ? ॥१५६॥ तदनन्तर रावणके पुत्र इन्द्रजित्‌ने कहा कि आपने बिलकुल ठीक कहा है सो उचित ही है क्योंकि आप जैसे नीतिज्ञ राजाको छोड़कर दूसरा ऐसा कौन कह सकता है ? ॥१५७॥

तदनन्तर रावणका आदेश पाकर मारीच नामा मन्त्रीने हाथमे नगी तलवार लिये हुए अधिकारी मनुष्योंके द्वारा सहस्ररश्मिको सभामे बुलवाया ॥१५८॥ सहस्ररश्मि पिताके चरणोमे नमस्कारकर भूमिपर बैठ गया। रावणने क्रोध रहित होकर बडे सन्मानके साथ उससे कहा ॥१५९॥ कि आजसे तुम मेरे चौथे भाई हो। चूँकि तुम महाबलवान् हो अत. तुम्हारे साथ मै इन्द्रकी विडम्बना करनेवाले राजा इन्द्रको जीतूँगा ॥१६०॥ मैं तुम्हारे लिए मन्दोदरीकी छोटी बहिन स्वयंप्रभा दूँगा। हे सुन्दर आकृतिके धारक ! तुमने जो किया हैं वह मुझे प्रमाण है ॥१६१॥ सहस्ररश्मि बोला कि मेरे इस क्षणभङ्गुर राज्यको धिक्कार है। जो प्रारम्भमे रमणीय दिखते

---

१. जाते ख०, क० । २. महोपकरणै- म०, ब० । ३. अपहृता । ४ कथितम् । ५. भवत्सु + आज्ञा । ६. आपातरम्याश्च विषयान्पश्चाद्दुःखभूयसः क०, ख० ।

स्वर्गं धिक्च्युतियोगेन[1] धिग्देहं दुःखभाजनम् । धिङ् मां वञ्चितमत्यन्तं चिरकालं कुकर्मभिः ॥१६३॥
तत्करोमि पुनर्येन न पतामि भवार्णवे । गतिष्वत्यन्तदुःखासु निर्विण्णः पर्यटन्नहम् ॥१६४॥
उवाचेति दशास्यश्च ननु प्रवयसां नृणाम् । प्रव्रज्या[2] शोभते भद्र त्वं च प्रत्यग्रयौवनः ॥१६५॥
सहस्रांशुरुवाचेति नैव मृत्युर्विवेकवान् । शरद्घन इवाकस्माद्देहो नाशं प्रपद्यते ॥१६६॥
यदि नाम भवेत् सारः कश्चिद्भोगेषु रावण । तातेनैव[3] न मे त्यक्तास्ते स्युरुत्तमबुद्धिना ॥१६७॥
इत्युक्त्वा तनये न्यस्य राज्यं परमनिश्चयः । क्षमितो दशवक्त्रेण प्राव्रजत्पितुरन्तिके ॥१६८॥
तेन चाभिहितः पूर्वमयोध्यायाः पतिः सुहृत् । अनरण्योऽनगारत्वं प्रपत्स्येऽहं यदा तदा ॥१६९॥
तुभ्यं वेदयितास्मीति तथाऽयं तेन भाषितः । ज्ञापनार्थमतोऽनेन तस्मै सम्प्रेषिता नराः ॥१७०॥
ततोऽसौ कथिते पुम्भिः श्रुत्वा वाष्पाकुलेक्षणः । विललाप चिरं स्मृत्वा गुणांस्तस्य महात्मनः ॥१७१॥
विषादे च गते मान्द्यमित्युवाच महाबुधः । बन्धुस्तस्य समायातो रिपुवेषेण रावणः ॥१७२॥
ऐश्वर्यपञ्जरान्तस्थो विषयैर्मोहितश्चिरम् । येनात्यन्तानुकूलेन नरपक्षी विमोचितः ॥१७३॥
माहिष्मतीपतिर्धन्यः साम्प्रतं यो भवार्णवम् । तितीर्षति यमध्वसबोधपोतसमाश्रितः[4] ॥१७४॥
कृतार्थः साम्प्रतं जातो यदन्तेऽत्यन्तदुःखदम् । पापं राज्याख्यमुज्झित्वा व्रतं जैनेश्वरं श्रितः ॥१७५॥

है और अन्तमे जो दुःखोसे बहुल होते हैं उन विषयोको धिक्कार है ॥१६२॥ उस स्वर्गके लिए धिक्कार है जिससे कि च्युति अवश्यम्भावी है। दुःखके पात्र स्वरूप इस शरीरको धिक्कार है और जो चिरकाल तक दुष्ट कर्मोंसे ठगा गया ऐसे मुझे भी धिक्कार है ॥१६३॥ अब तो मै वह काम करूँगा जिससे कि फिर संसारमे नहीं पड़ूँ। अत्यन्त दुःखदायी गतियोमे घूमता-घूमता मै बहुत खिन्न हो चुका हूँ ॥१६४॥ इसके उत्तरमे रावणने कहा कि हे भद्र! दीक्षा तो वृद्ध मनुष्योके लिए शोभा देती है अभी तो तुम नव यौवनसे सम्पन्न हो ॥१६५॥ सहस्ररश्मिने रावणकी बात काटते हुए बीचमे ही कहा कि मृत्युको ऐसा विवेक थोड़ा ही है कि वह वृद्ध जनको ही ग्रहण करे यौवन वालेको नहीं। अरे! यह शरीर शरद्ऋतुके बादलके समान अकस्मात् ही नष्ट हो जाता है ॥१६६॥ हे रावण! यदि भोगोमे कुछ सार होता तो उत्तम बुद्धिके धारक पिताजीने ही उनका त्याग नहीं किया होता ॥१६७॥ ऐसा कहकर उसने दृढ़ निश्चयके साथ पुत्रके लिए राज्य सौंपा और दशाननसे क्षमा याचनाकर पिता शतबाहुके समीप दीक्षा धारण कर ली ॥१६८॥ सहस्ररश्मिने अपने मित्र अयोध्याके राजा अनरण्यसे पहले कह रक्खा था कि जब मै दिगम्बर दीक्षा धारण करूँगा तब तुम्हारे लिए खबर दूँगा और अनरण्यने भी सहस्ररश्मिसे ऐसा ही कह रक्खा था सो इस कथनके अनुसार सहस्ररश्मिने खबर देनेके लिए अनरण्यके पास आदमी भेजे ॥१७०॥ गये हुए पुरुषोंने जब अनरण्यसे सहस्ररश्मिके वैराग्यकी वार्ता कही तो उसे सुनकर उसके नेत्र आँसुओसे भर गये। उस महापुरुषके गुणोका स्मरणकर वह चिर काल तक विलाप करता रहा ॥१७१॥ जब विषाद कम हुआ तो महाबुद्धिमान् अनरण्यने कहा कि उसके पास रावण क्या आया मानो शत्रुके वेषमे भाई ही उसके पास आया ॥१७२॥ वह रावण कि जिसने अत्यन्त अनुकूल होकर विषयोसे मोहित हो चिरकाल तक ऐश्वर्य रूपी पिंजड़ेके अन्दर स्थित रहनेवाले इस मनुष्य रूपी पक्षीको मुक्त किया है ॥१७३॥ माहिष्मतीके राजा सहस्ररश्मिको धन्य है जो रावणके सम्यग्ज्ञान रूपी जहाजका आश्रय ले संसार रूपी सागरको तैरना चाहता है ॥१७४॥ जो अन्तमे अत्यन्त दुःख देनेवाले राज्य नामक पापको छोड़कर जिनेन्द्र प्रणीत व्रतको प्राप्त हुआ है अब

---

१ सुवियोगेन ब०। द्युतियौगेन म०। २. प्रव्रज्या म०। ३. ततो नैव न मे म०। तातेनैव हि मे ख०, क०। ४. यमध्वसं क०, ख०। यमध्वसेन रावणेन निमित्तेन बोधपोतं सम्यग्ज्ञानतरणिं समाश्रितः प्राप्तः इत्यर्थः।

अभिनन्द्येति सविग्नः क्षिप्त्वा लक्ष्मीं शरीरजे[1] । सुतेन ज्यायसा साकमनरण्योऽभवन्मुनिः ॥१७६॥

### रथोद्धतावृत्तम्

येन केनचिदुदात्तकर्मणा कारणेन रिपुणेतरेण वा ।
निर्मितेन समवाप्यते मतिः श्रेयसी न तु [2]निकृष्टकर्मणा ॥१७७॥
यः प्रयोजयति मानसं शुभे यस्य तस्य परमं स बान्धवः ।
भोगवस्तुनि तु यस्य मानसं यः करोति परमारिरस्य सः ॥१७८॥
भावयन्निति सहस्रदीधितिं योऽनरण्यनृपतिं शृणोति च ।
[3]सयुतः [4]श्रमणशीलसंपदा स व्रजत्यमलतां यथा रविः ॥१७९॥

*इत्यार्षे रविषेणाचार्यप्रोक्ते पद्मचरिते दशग्रीवप्रस्थाने सहस्ररश्म्यनरण्य-श्रामण्याभिधानं नाम दशमं पर्व ॥१०॥*

---

उसकी कृत-कृत्यताका क्या पूछना ॥१७५॥ इस प्रकार सहस्ररश्मिकी प्रशंसाकर अनरण्य भी संसारसे भयभीत हो पुत्रके लिए राज्यलक्ष्मी सौंप बड़े पुत्रके साथ मुनि हो गया ॥१७६॥

गौतम स्वामी राजा श्रेणिकसे कहते हैं कि हे राजन्! जब उत्कृष्ट कर्मका निमित्त मिलता है तब शत्रु अथवा मित्र किसीके भी द्वारा इस जीवको कल्याणकारी बुद्धि प्राप्त हो जाती है पर जब तक निकृष्ट कर्मका उदय रहता है तब तक प्राप्त नहीं होती ॥१७७॥ जो जिसके मनको अच्छे कार्यमें लगा देता है यथार्थ में वही उसका बान्धव है और जो जिसके मनको भोगोपभोगकी वस्तुओंमें लगाता है वही उसका वास्तविक शत्रु है ॥१७८॥ इस प्रकार सहस्ररश्मिका ध्यान करता हुआ जो मनुष्य मुनियोंके समान शीलरूपी सम्पदासे युक्त राजा अनरण्यका चरित्र सुनता है वह सूर्यके समान निर्मलताको प्राप्त होता है ॥१७९॥

*इस प्रकार आर्षनामसे प्रसिद्ध रविषेणाचार्यके द्वारा कथित पद्मचरितमें दशाननके प्रयाणके समय राजा सहस्ररश्मि और अनरण्यकी दीक्षाका वर्णन करनेवाला दशम पर्व पूर्ण हुआ ॥१०॥*

१. पुत्रे । २. विकृष्ट - म० । ३. सयत क०, ख०, म० । ४. श्रवणशीलसंपदा म० ।

# एकादशं पर्व

अथ कैलाससंक्षोभो यान् यान् मानवतो नृपान् । शृणोति धरणीयातास्तांस्तान्सर्वाननीनमत् ॥१॥
वशीकृतैश्च सन्मानं प्रापितैर्वेष्टितो नृपैः । पश्यन् स्फीतपुरामुर्वी सुभूमश्चक्रभृद्[1]यथा ॥२॥
नानादेशसमुत्पन्नैर्नानाकारैर्नरैर्वृतः । नानाभूषाधरैर्नानाभाषैर्विविधवाहनैः ॥३॥
कारयन् [2]जीर्णचैत्यानां संस्कारान् परमां तथा । पूजां देवाधिदेवानां जिनेन्द्राणां सु[3]भावितः ॥४॥
ध्वंसयन् जिनविद्वेषकारिणः खलमानवान् । [4]दुर्विधान् करुणायुक्तो धनेन परिपूरयन् ॥५॥
सम्यग्दर्शनसंशुद्धान् वत्सलः पूजयञ्जनान् । प्रणमन् श्रमणान् भक्त्या रूपमात्रश्रितानपि ॥६॥
उदीचीं प्रस्थितः काष्ठां प्रतापं दुस्सहं किरन् । यथोत्तरायणे भानुः पुण्यकर्मानुभावतः ॥७॥
बलवांश्च श्रुतस्तेन राजा राजपुराधिपः । अभिमानं परं बिभ्रत्परप्रणतिवर्जितः ॥८॥
[5]जन्मप्रभृति दुश्चे[6]ता लौकिकोन्मार्गमोहितः । प्रविष्टः प्राणिविध्वंसं यज्ञदीक्षाख्यपातकम् ॥९॥
अथ यज्ञध्वनिं श्रुत्वा श्रेणिको गणपालिनम् । इत्यपृच्छद् विभो तावदास्तां रावणकीर्तनम् ॥१०॥
उत्पत्तिं भगवन्नस्य यज्ञस्येच्छामि वेदितुम् । प्रवृत्तो दारुणो यस्मिन् ज[7]नो जन्तुविनाशने ॥११॥
उवाच च गणाधीशः शृणु श्रेणिक शोभनम् । भवता पृष्टमेतेन बहवो मोहिता जनाः ॥१२॥

अथानन्तर रावणने पृथ्वीपर जिन-जिन राजाओंको मानी सुना उन सबको नम्रीभूत किया ॥१॥ जिन राजाओंको इसने वश किया था उनका सम्मान भी किया और ऐसे उन समस्त राजाओंसे वेष्टित होकर उसने बड़े-बड़े ग्रामोंसे सहित पृथ्वीको देखते हुए सुभूमचक्रवर्तीके समान भ्रमण किया ॥२॥ इसके साथ नाना देशोंमें उत्पन्न हुए नाना आकारके मनुष्य थे। वे मनुष्य नाना प्रकारके आभूषण पहने हुए थे, नाना प्रकारकी उनकी चेष्टाएँ थीं और नाना प्रकारके वाहनोंपर वे आरूढ थे ॥३॥ वह जीर्ण मन्दिरोंका जीर्णोद्धार कराता जाता था और देवाधिदेव जिनेन्द्रदेवकी बड़े भावसे पूजा करता था ॥४॥ जैनधर्मके साथ द्वेष रखनेवाले दुष्ट मनुष्योंको नष्ट करता था और दरिद्र मनुष्योंको दयासे युक्त हो धनसे परिपूर्ण करता था ॥५॥ सम्यग्दर्शनसे शुद्ध जनोंकी बड़े स्नेहसे पूजा करता था और जो मात्र जैनमुद्राको धारण करनेवाले थे ऐसे मुनियोंको भी भक्तिपूर्वक प्रणाम करता था ॥६॥ जिस प्रकार उत्तरायणके समय सूर्य दुःसह प्रताप बिखेरता हुआ उत्तर दिशाकी ओर प्रस्थान करता है उसी प्रकार रावणने भी पुण्य कर्मके उदयसे दुःसह प्रताप बिखेरते हुए उत्तर दिशाकी ओर प्रस्थान किया ॥७॥

अथानन्तर रावणने सुना कि राजपुरका राजा बहुत बलवान् है। वह बहुत भारी अहंकारको धारण करता हुआ कभी किसीको प्रणाम नहीं करता है ॥८॥ जन्मसे ही लेकर दुष्टचित्त है, लौकिक मिथ्या मार्गसे मोहित है, और प्राणियोंका विध्वंस करानेवाले यज्ञ दीक्षा नामक महापापको प्राप्त है अर्थात् यज्ञक्रियामें प्रवृत्त है ॥९॥ तदनन्तर यज्ञका कथन सुन राजा श्रेणिकने गौतम गणधरसे पूछा कि हे विभो! अभी रावणकी कथा रहने दीजिए। पहले मैं इस यज्ञकी उत्पत्ति जानना चाहता हूँ कि जीवोंका विघात करनेवाले जिस यज्ञमें दुष्टजन प्रवृत्त हुए हैं ॥१०-११॥ तब गणधर बोले कि हे श्रेणिक! सुन, तूने बहुत अच्छा प्रश्न किया है इस यज्ञके द्वारा बहुतसे जन मोहित हो रहे हैं ॥१२॥

१. चक्रवद्यथा म० । २. शीर्ण क०, ख०, म० । ३. सभावितः क०, ख० । सुभावितान् म० । ४. दरिद्रान् । ५. जन्मनः प्रभृति म० । ६. दुश्चेतो-क०, ख० । ७. जना म० ।

विनीतायां महानासीदिक्ष्वाकुकुलभूषण । ययातिर्नाम राजास्य सुरकान्तेति भामिनी ॥१३॥
वसुर्नामाभवत्तस्य गुरोर्योग्य स चार्पित । नाम्ना[1] क्षीरकदम्बस्य यस्य स्वस्तिमती प्रिया ॥१४॥
अन्यदारण्यक शास्त्र सर्वशास्त्रविशारद[2] । अध्यापयत्यसौ शिष्यान्नारदादीन् वनान्तरे ॥१५॥
अथ चारणसाधूना [3]प्रस्थिताना विहायसा । एकेन यतिना प्रोक्तमेव कारुण्यकारिणा ॥१६॥
चतुर्णां प्राणिनामेषामेको नरकभागिति । श्रुत्वा क्षीरकदम्बस्तद्वचो भीतोऽभवद् भृशम् ॥१७॥
ततोऽन्तेवासिनस्तेन प्रेषिता· स्वस्वमालयम् । ययुस्तुष्टा यथा वत्सा मुक्ता दामकबन्धनात्[4] ॥१८॥
स्वस्तिमत्यथ पप्रच्छ पुत्र पर्वतसज्ञकम् । क्व तवासौ पिता पुत्र येनैकाकी त्वमागत· ॥१९॥
[5]पश्चादेमीति तेनोक्तमिति तस्यै जगाद स । तदागम च काङ्क्षन्त्यास्तस्या यातमह क्षयम् ॥२०॥
नायात स दिनान्तेऽपि यदा तिमिरगह्वरे । तदा शोकभराक्रान्ता पतितासौ महीतले ॥२१॥
चक्रवाकीव दु खार्ता विलाप चाकरोदिति । हा हता मन्दभाग्यास्मि प्राणाना स्वामिनोज्झिता ॥२२॥
पापेन केनचिन्मृत्यु किमसौ प्रापितो भवेत् । कि वा देशान्तर यात· कान्त केनापि हेतुना ॥२३॥
सर्वशास्त्रार्थकुशलः कि वा वैराग्यमाश्रित । सर्वसङ्गान् परित्यज्य प्रव्रज्यां समशिश्रियत् ॥२४॥
विलापमिति कुर्वन्त्यास्तस्या सा रजनी गता । [6]अन्वेष्टु पितर चादावह्न· पर्वतको गत ॥२५॥
दृष्ट्वा सरित्तटोद्याने दिनै· कैश्चिद् गुरु मुनिम् । गुरो· सङ्घसमेतस्य समीपे विनयस्थितम् ॥२६॥
आरादेव निवृत्त्याख्यन्मातर च पिता मम । विप्रलब्धोऽभवन्नग्न श्रमणैस्तत्परायणै· ॥२७॥

---

अयोध्यानगरीमे इक्ष्वाकुकुलका आभूषण स्वरूप एक ययाति नामका राजा था और सुरकान्ता नामकी उसकी रानी थी ॥१३॥ उन दोनोके वसु नामका पुत्र हुआ । जब वह पढनेके योग्य हुआ तब क्षीरकदम्बक नामक गुरुके लिए सौंपा गया । क्षीरकदम्बककी स्त्रीका नाम स्वस्तिमती था ॥१४॥ किसी एक दिन सर्वशास्त्रोमे निपुण क्षीरकदम्बक, वनके मध्यमे नारद आदि शिष्योंको आरण्यकशास्त्र पढा रहा था ॥१५॥ वहीं आकाशमार्गसे विहार करनेवाले चारण मुनियोका सघ विराजमान था । उनमेसे एक दयालु मुनिने इस प्रकार कहा कि इन चार प्राणियोमें से एक नरकको प्राप्त होगा । मुनिके वचन सुन क्षीरकदम्बक अत्यन्त भयभीत हो गया ॥१६–१७॥ तदनन्तर उसने नारद पर्वत और वसु इन तीनो शिष्योको अपने-अपने घर भेज दिया और वे शिष्य भी बन्धनसे छोड़े गये बछड़ोंके समान सन्तुष्ट होते हुए अपने-अपने घर गये ॥१८॥ जब पर्वत अकेला ही घर पहुँचा तब उसकी माता स्वस्तिमतीने पूछा कि हे पुत्र ! तुम्हारे पिता कहाँ हैं ? जिससे कि तुम अकेले ही आये हो ॥१९॥ पर्वतने माताको उत्तर दिया कि उन्होने कहा था कि पीछे आते है। पतिके आगमनकी प्रतीक्षा करते हुए स्वस्तिमतीका दिन समाप्त हो गया ॥२०॥ जब दिनका बिलकुल अन्त हो गया और सघन अन्धकार फैल चुका फिर भी वह नहीं आया तब स्वस्तिमती शोकके भारसे आक्रान्त हो पृथ्वीपर गिर पड़ी ॥२१॥ वह दु·खसे पीडित हो चकवीके समान इस प्रकार विलाप करने लगी कि हाय-हाय मै बड़ी मन्दभाग्य हूँ जो पतिके द्वारा छोडी गई ॥२२॥ क्या मेरा पति किसी पापी मनुष्यके द्वारा मृत्युको प्राप्त हुआ है अथवा किसी कारण परदेशको चला गया है ? ॥२३॥ अथवा समस्त शास्त्रोंमे कुशल होनेसे वैराग्यको प्राप्त हो सर्व परिग्रहका त्यागकर मुनिदीक्षाको प्राप्त हुआ है ? ॥२४॥ इस प्रकार विलाप करते-करते स्वस्तिमतीकी रात्रि भी व्यतीत हो गई । जब प्रात काल हुआ तब पर्वत पिताको खोजनेके लिए गया ॥२५॥ लगातार कुछ दिनो तक खोज करनेके बाद पर्वतने देखा कि हमारे पिता नदीके तटवर्ती उद्यानमे मुनि होकर विद्यमान हैं। सङ्घसहित गुरुके समीप विनयसे बैठे हैं ॥२६॥ उसने दूरसे ही लौटकर मातासे कहा कि मेरा पिता नग्नमुनियो और उनके भक्तो द्वारा

---

१. नामा क०, ख० । २. विशारद म०, ब० । ३. प्रथिताना म० । ४. दामकबन्धनान् म० । ५. पश्चादागति क०, ख० । ६. अन्वेष्टं म० ।

ततो निश्चयविज्ञाततदसङ्गमदुःखिता । कराभ्यां भृशमाघ्नाना स्तनावरुरुदत् स्वनम् ॥२८॥
नारदस्तमथ श्रुत्वा वृत्तान्तं धर्मवत्सल. । द्रष्टुमागादुपाध्यायीं क्षणं शोकसमाकुल ॥२९॥
तं दृष्ट्वा सुतरां चक्रे स्तनताडनरोदनम् । निसर्गोऽयं यदाप्तस्य पुरः शोको विवर्धते ॥३०॥
जगाद नारदो मातः किं शोकं कुरुषे वृथा । कृते शोकेऽधुना नासावागच्छति विशुद्धधीः ॥३१॥
कर्मणानुगृहीतोऽसौ चारुणा चारुचेष्टित । जीवितं चञ्चलं ज्ञात्वा यस्तपः कर्तुमुद्यत ॥३२॥
[1]तनुता बोध्यमानाया शोकस्तस्या गतः क्रमात् । [2]द्विषती च स्तुवाना च भर्तारं सा स्थिता गृहे ॥३३॥
एतस्मादेव चोदन्ताद् ययातिस्तत्त्वकोविदः । राज्यभारं वसोर्न्यस्य बभूव श्रमणो महान् ॥३४॥
सुप्रतिष्ठोऽभवद् राजा पृथिव्यां प्रथितो वसुः । नभःस्फटिकविस्तीर्णशिलास्थहरिविष्टर ॥३५॥
समं पर्वतकेनाथ नारदस्यान्यदाभवत् । कथेयं शास्त्रतत्त्वार्थनिरूपणपरायणा ॥३६॥
जगाद नारदोऽर्हद्भिः सर्वज्ञैः सर्वदर्शिभिः । द्विविधो विहितो धर्मः सूक्ष्मोदारविशेषत ॥३७॥
हिंसाया अनृतात् स्तेयात् स्मरसङ्गात् परिग्रहात् । विरतेर्व्रतमुद्दिष्टं भावनाभिः समन्वितम् ॥३८॥
विरतिं सर्वतः कर्तुं ये शक्तास्ते महाव्रतम् । सेवन्तेऽणुव्रतं शेषा जन्तवो गृहमाश्रिताः ॥३९॥
संविभागोऽतिथीनां च तेषामुक्तो जिनाधिपैः । यज्ञाख्यावस्थितास्तस्मिन् भेदैः पात्रादिभिर्युतैः ॥४०॥

प्रतारित हो नग्न हो गया है ॥२७॥ तदनन्तर स्वस्तिमतीने जब निश्चयसे यह जान लिया कि अब पतिका समागम मुझे प्राप्त नहीं होनेवाला है तब वह अत्यन्त दुःखी हुई। वह दोनों हाथोंसे स्तनोंको पीटती एवं जोरसे चिल्लाती हुई रुदन करने लगी ॥२८॥ यह वृत्तान्त सुन धर्मस्नेही नारद शोकसे व्याकुल होता हुआ अपनी गुरानीको देखनेके लिए आया ॥२९॥ उसे देख वह और भी अधिक स्तन पीटकर रोने लगी सो ठीक ही है क्योंकि यह स्वाभाविक बात है कि आप्तजनोंके समक्ष शोक बढ़ने लगता है ॥३०॥ नारदने कहा कि हे माताजी! व्यर्थ ही शोक क्यों करती हो? क्योंकि इस समय शोक करनेसे निर्मल बुद्धिके धारक गुरुजी वापिस नहीं आवेंगे ॥३१॥ सुन्दर चेष्टाओंके धारक गुरुजीपर पुण्यकर्मने बड़ा अनुग्रह किया है कि जिससे वे जीवनको चञ्चल जानकर तप करनेके लिए उद्यत हुए हैं ॥३२॥ इस प्रकार नारदके समझानेपर उसका शोक क्रम-क्रमसे हलका हो गया। स्वस्तिमती कभी तो पतिकी निन्दा करती थी कि वे एक अबलाको असहाय छोड़कर चल दिये और कभी उनके गुणोंका चिन्तवन कर स्तुति करती थी कि इनकी निर्लेपता कितनी उच्चकोटिकी थी। इस प्रकार निन्दा और स्तुति करती हुई वह घरमें रहने लगी ॥३३॥

इसी घटनासे तत्त्वोंका जानकार ययाति राजा भी वसुके लिए राज्यभार सौंपकर महामुनि हो गया ॥३४॥ नवीन राजा वसुकी पृथिवीपर बड़ी प्रतिष्ठा बढ़ी। आकाशस्फटिककी लम्बी चौड़ी शिलापर उसका सिंहासन स्थित था सो लोकमें ऐसी प्रसिद्धि हुई कि सत्यके बलपर वसु आकाशमें निराधार स्थित है ॥३५॥ अथानन्तर एक दिन नारदकी पर्वतके साथ शास्त्रका वास्तविक अर्थ प्रकट करनेपर तत्पर निम्नलिखित चर्चा हुई ॥३६॥ नारदने कहा कि सबको जानने देखनेवाले अर्हन्त भगवान्ने अणुव्रत और महाव्रतके भेदसे धर्म दो प्रकारका कहा है ॥३७॥ हिंसा, झूठ, चोरी, कुशील और परिग्रह इन पाँच पापोंसे विरक्त होनेको व्रत कहते हैं। यह व्रत प्रत्येक व्रतकी पाँच-पाँच भावनाओंसे सहित होता है ॥३८॥ जो उक्त पापोंका सर्वदेश त्याग करनेमें समर्थ हैं वे महाव्रत ग्रहण करते हैं और जो घरमें रहते हैं ऐसे शेषजन अणुव्रत धारण करते हैं ॥३९॥ जिनेन्द्र भगवान्ने गृहस्थोंका एक व्रत अतिथिसंविभाग बतलाया

१. दृष्टा म० । २. कृशताम् । ३. द्विषतीव क०, म०, ब० । ४. द्वद्भिः (?) म० । ५. अणुव्रतमहाव्रतविशेषतः । ६. हिंसया म० । ७ स्तेया म० । ८. दारसंगात् म० ।

अजैर्यष्टव्यमित्यस्य वाक्यस्यार्थो दयापरै । अथ मुनिभिराख्यातो ग्रन्थार्थग्रन्थिभेदिभि ॥४१॥
अजास्ते जायते येषा नाङ्कुरः सति कारणे । सस्याना यजन कार्यमेतैरिति विनिश्चय ॥४२॥
अजाः पशव उद्दिष्टा इति पर्वतकोऽवदत् । तेषामालम्भन कार्यं [1]तच्च यागोऽभिधीयते ॥४३॥
नारद कुपितोऽवोचत्तत पर्वतक खलम् । मैव वोच पतस्येव नरके घोरवेदने ॥४४॥
प्रतिज्ञा चाकरोदेवमावयोर्योऽवसीदति । वसु प्राश्निकमासाद्य तस्य जिह्वा निकृत्यते ॥४५॥
अतिक्रान्ता वसु द्रष्टु वेलाद्य श्वो विनिश्चय । भवितेत्यभिधायागात् पर्वतो मातुरन्तिकम् ॥४६॥
तस्यै चाकथयन्मूल कलहस्याभिमानवान् । ततो जगाद सा पुत्र त्वया निगदित मृषा ॥४७॥
कुर्वतोऽनेकशो [5]व्याख्या मया तव पितु श्रुतम् । अजा' किलाभिधीयन्ते व्रीहयो [6]येऽप्ररोहका ॥४८॥
देशान्तर प्रयातेन मासभक्षणकारिणा । मानाद्य वितथ प्रोक्त तवेद दु खकारणम् ॥४९॥
रसनाच्छेदन पुत्र नियत ते भविष्यति । अपुण्या किं करिष्यामि पतिपुत्रविवर्जिता ॥५०॥
सस्मार[7] सा पुरा प्रोक्ता वसुना गुरुदक्षिणाम् । [8]न्यासभूता गता चाशु वसोरन्तकमाकुला ॥५१॥
उपाध्यायीति चोदारमादर विदधे वसु । प्रणम्य च सुखासीना पप्रच्छ रचिताञ्जलि ॥५२॥
[9]उपाध्यायि नियच्छाज्ञामायाता येन हेतुना । सर्वं सम्पादयाम्याशु दु खितेव च दृश्यते ॥५३॥
उवाच स्वस्तिमत्येव नित्यं पुत्रास्मि दुखिता । प्राणनाथपरित्यक्ता का वा स्त्री सुखमृच्छति ॥५४॥

है जो पात्रादिके भेदसे अनेक प्रकारका है। यज्ञका अन्तर्भाव इसी अतिथिसंविभाग व्रतमे होता है ॥४०॥ ग्रन्थोके अर्थकी गॉठ खोलनेवाले दयालु मुनियोने 'अजैर्यष्टव्यम्' इस वाक्यका यह अर्थ बतलाया है ॥४१॥ कि अज उस पुराने धानको कहते हैं जिसमे कि कारण मिलनेपर भी अङ्कुर उत्पन्न नहीं होते। ऐसे धानसे ही यज्ञ करना चाहिए ॥४२॥ नारदकी इस व्याख्याको सुनकर तमककर पर्वत बोला कि नहीं अज नाम पशुका है अत' उनकी हिंसा करनी चाहिए यही यज्ञ कहलाता है ॥४३॥ इसके उत्तरमे नारदने कुपित होकर दुष्ट पर्वतसे कहा कि ऐसा मत कहो क्योकि ऐसा कहनेसे भयङ्कर वेदनावाले नरकमे पडोगे ॥४४॥ अपने पक्षकी प्रबलता सिद्ध करते हुए नारदने यह प्रतिज्ञा भी की कि हम दोनो राजा वसुके पास चले, वहॉ जो पराजित होगा उसकी जिह्वा काट ली जावे ॥४५॥ 'आज राजा वसुके मिलनेका समय निकल चुका है इसलिए कल इस बातका निश्चय होगा' इतना कहकर पर्वत अपनी माताके पास गया ॥४६॥ अभिमानी पर्वतने कलहका मूल कारण माताके लिए कह सुनाया। इसके उत्तरमे माताने कहा कि हे पुत्र! तूने मिथ्या बात कही है ॥४७॥ अनेको बार व्याख्या करते हुए तेरे पितासे मैने सुना है कि अज उस धानको कहते है कि जिसमे अङ्कुर उत्पन्न नहीं होते ॥४८॥ तू देशान्तरमे जाकर मास भक्षण करने लगा इसलिए अभिमानसे तूने यह मिथ्या बात कही है। यह बात तुझे दुःखका कारण होगी ॥४९॥ हे पुत्र! निश्चित ही तेरी जिह्वाका छेद होगा। मै अभागिनी पति और पुत्रसे रहित होकर क्या करूँगी? ॥५०॥ उसी क्षण उसे स्मरण आया कि एक बार राजा वसुने मुझे गुरु दक्षिणा देना कहा था और मैने उसे धरोहरके रूपमे उन्हींके पास रख दिया था। स्मरण आते ही वह तत्काल घबड़ाई हुई राजा वसुके पास पहुँची ॥५१॥ 'यह हमारी गुरानी है' यह विचारकर राजा वसुने उसका बहुत सत्कार किया, उसे प्रणाम किया और जब वह आसनपर सुखसे बैठ गई तब हाथ जोड़कर विनयसे पूछा ॥५२॥ कि हे गुरानी! मुझे आज्ञा दीजिए। जिस कारण आप आई है मैं उसे अभी सिद्ध करता हूँ। आप दुःखी सी क्यों दिखाई देती है? ॥५३॥ इसके उत्तरमे स्वस्तिमतीने कहा कि हे पुत्र! मैं तो निरन्तर दुःखी

१. स च म० । २. विधीयते म० । ३. छिद्यते । निकृन्त्यते म० । ४. दृष्ट म० । ५. व्याख्या म० । ६. ये प्ररोहकाः म० । ७. सस्मार च क०, ख० । सस्मार पुरा म० । ८. न्याय-म० । ९. उपाध्यायीति म० ।

सम्बन्धो द्विविधो यौन शास्त्रीयश्च तयो परम् । शास्त्रीयमेव मन्येऽहमय मलविवर्जित ॥५५॥
अतो नाथस्य मे शिष्य. पुत्र एव भवानपि । [1]पश्यन्ती भवतो लक्ष्मीं करोमि धृतिमात्मन ॥५६॥
[2]दक्षिणा च गृहाणेति पुत्र प्रोक्त त्वया सुत । मया चोक्त गृहीष्यामि कालेऽन्यस्मिन्निति स्मर ॥५७॥
सत्य वदन्ति राजान पृथिवीपालनोद्यता. । [3]ऋषयस्ते हि भाष्यन्ते ये स्थिता जन्तुपालने ॥५८॥
[4]सत्येन श्रावितः स त्व मह्य ता यच्छ दक्षिणाम् । इत्युक्तश्चावदद्राजा विनयानतमस्तक ॥५९॥
अम्ब ते वचनादद्य करोम्यथ जुगुप्सितम् । वद यत्ते स्थित चित्ते मा कृथा मतिमन्यथा ॥६०॥
तमुदन्त ततोऽशेष निवेद्यास्मै जगाद सा । पुत्रस्यानृतमप्येतदनुमान्य त्वया मम ॥६१॥
जानतापि ततो राज्ञा नीतेन स्थिरता पुन. । मूढसत्यगृहीतेन प्रतिपन्न तयोदितम् ॥६२॥
पुनरुक्त प्रिय भूरि भाषित्वाशीः पुरस्सरम् । आनच्छे निलय तुष्टा भृश स्वस्तिमती तत. ॥६३॥
अथान्यस्य दिनस्यादौ गतौ नारदपर्वतौ । समीप क्षितिपालस्य [5]कुतूहलिजनावृतौ ॥६४॥
चतुर्विधो जनपदो नाना प्रकृतयस्तथा । सामन्ता मन्त्रिणश्चाशु विविशुर्जल्पमण्डलम् ॥६५॥
ततस्तयोः सता मध्ये विवाद सुमहानभूत् । व्रीहयोऽजा विबीजा ये पशवश्चेति वस्तुनि ॥६६॥
ततस्ताभ्या वसु पृष्टो यदुपाध्याय उक्तवान् । तत्त्व वद महाराज सत्येन श्रावितो भवान् ॥६७॥
यदेतत्पर्वतेनोक्त तदुपाध्याय उक्तवान् । इत्युक्ते स्फटिक यात वसो क्षिप्र महीतले ॥६८॥

रहती हूँ क्योंकि पतिके द्वारा छोड़ी हुई कौन सी स्त्री सुख पाती है ? ॥५४॥ सम्बन्ध दो प्रकार का है एक योनिसम्बन्धी और दूसरा शास्त्रसम्बन्धी । इन दोनोंमे मैं शास्त्रीय सम्बन्धको ही उत्तम मानती हूँ क्योंकि यह निर्दोष सम्बन्ध है ॥५५॥ चूँकि तुम मेरे पतिके शिष्य हो अतः तुम भी मेरे पुत्र हो । तुम्हारी लक्ष्मीको देखते हुए मुझे सन्तोष होता है ॥५६॥ हे पुत्र ! एक बार तुमने कहा था कि दक्षिणा ले लो तब मैंने कहा था कि फिर किसी समय ले लूँगी । स्मरण करो ॥५७॥ पृथिवीकी रक्षा करनेमे तत्पर राजा लोग सदा सत्य बोलते है । यथार्थमे जो जीवोंकी रक्षा करनेमे तत्पर हैं वे ही ऋषि कहलाते हैं ॥५८॥ तुम सत्यके कारण जगत्‌मे प्रसिद्ध हो अतः मेरे लिए वह दक्षिणा दो । गुरानीके ऐसा कहनेपर राजा वसुने विनयसे मस्तक झुकाते हुए कहा ॥५९॥ कि हे माता ! तुम्हारे कहनेसे मै आज घृणित कार्य भी कर सकता हूँ । जो बात तुम्हारे मनमे हो सो कहो अन्यथा विचार मत करो ॥६०॥ तदनन्तर स्वस्तिमतीने उसके लिए नारद और पर्वतके विवादका सब वृत्तान्त कह सुनाया और साथ ही इस बातकी प्रेरणा की कि यद्यपि मेरे पुत्रका पक्ष मिथ्या ही है तो भी तुम इसका समर्थन करो ॥६१॥ राजा वसु यद्यपि शास्त्रके यथार्थ अर्थको जानता था पर स्वस्तिमतीने उसे बार-बार प्रेरणा देकर अपने पक्षमे स्थिर रक्खा । इस तरह मूर्ख सत्यके वश हो राजाने उसकी बात स्वीकृत कर ली ॥६२॥ तदनन्तर स्वस्तिमती राजा वसुके लिए बार-बार अनेकों प्रिय आशीर्वाद देकर अत्यन्त सन्तुष्ट होती हुई अपने घर गई ॥६३॥

अथानन्तर दूसरे दिन प्रात.काल ही नारद और पर्वत राजा वसुके पास गये । कुतूहलसे भरे अनेकों लोग उनके साथ थे ॥६४॥ चार प्रकारके जनपद, नाना प्रजाजन, सामन्त और मन्त्री लोग शीघ्र ही उस वादस्थलमे आ पहुँचे ॥६५॥ तदनन्तर सज्जनोंके बीच नारद और पर्वतका बड़ा भारी विवाद हुआ उनमेसे नारद कहता था कि अजका अर्थ बीज रहित धान है और पर्वत कहता था कि अजका अर्थ पशु है ॥६६॥ जब विवाद शान्त नही हुआ तब उन्होंने राजा वसुसे पूछा कि हे महाराज ! इस विषयमे गुरु क्षीरकदम्बकने जो कहा था सो आप कहो । आप अपनी सत्यवादितासे प्रसिद्ध हैं ॥६७॥ इसके उत्तरमें राजा वसुने कहा कि पर्वतने

१. पश्यन्तो म० । २ दक्षिणा च गृहीष्यामि पुरा प्रोक्तं च या सुत म० । ३. ऋषयस्तेहि (?) म० । ४. सत्येव म० । ५ कुतूहल- म० ।

नाज्ञासीत् किल तल्लोक स्फटिक गगने तत । स्थित सिंहासन[1] तस्य विवेदेति ततोऽवदत् ।।६९।।
वसो वितथसामर्थ्यात्तव सिंहासन गतम् । भूमिमद्यापि ते युक्त परमार्थनिवेदनम् ।।७०।।
ततो मोहमदाविष्टस्तदैव पुनरभ्यधात् । प्रविष्टो धरणी सद्य सिंहासनसमन्वित ।।७१।।
महापापभराक्रान्तो हिंसाधर्मप्रवर्तनात् । गतस्तमस्तमोऽभिख्या पृथिवी घोरवेदनाम् ।।७२।।
ततो धिग् धिग् ध्वनि प्रायो[2] जात कलकलो महान् । जनाना पापभीतानामुद्दिश्य वसुपर्वतौ ।।७३।।
सम्प्राप्तो नारद पूजामहिंसाचारदेशनात् । एवमेव हि सर्वेषा यतो धर्मस्ततो जय ।।७४।।
पापः पर्वतको लोके धिग्धिग्दण्डसमाहत. । दु खित शोषयन् देहमकरोत् कुत्सित तप ।।७५।।
काल कृत्वाभवत् क्रूरो राक्षसः पुरुविक्रम· । अपमान च[3] सस्मार धिग्दण्डाधिकमात्मन ।।७६।।
अचिन्तयच्च लोकेन ममानेन पराभव· । कृतस्तत करिष्यामि प्रतिकर्मास्य दु खदम् ।।७७।।
वितान[4] दम्भरचित कृत्वा कर्म करोमि तत् । [5]यत्रासक्तो जनो याति तिर्यङ्नरकदुर्गती ।।७८।।
ततो मानुषवेषस्थो वामस्कन्धस्थसूत्रक । कमण्डल्वक्षमालादिनानोपकरणावृतः ।।७९।।
हिंसाकर्मपर शास्त्र घोर क्रूरजनप्रियम् । अधीयान सुदुष्टात्मा नितान्तामङ्गलस्वरम् ।।८०।।
तापसान् दुर्विधान् बुद्धया सूत्रकण्ठादिकास्तथा । व्यामोहयितुमुद्युक्तो हिंसाधर्मेण निर्दय ।।८१।।
तस्य पक्षे तत पेतु: प्राणिनो मूढमानसा । भविष्यद्दु खसभारा शलभा इव पावके ।।८२।।

---

जो कहा है वही गुरुने कहा था । इतना कहते ही राजा वसुका स्फटिक पृथिवीपर गिर पडा ।।६८।। लोग उस स्फटिकको नहीं जानते थे इसलिए यही समझते थे कि राजा वसुका सिंहासन आकाशमे निराधार स्थित है ।।६९।। नारदने राजाको सम्बोधते हुए कहा कि वसो ! मिथ्या पक्षका समर्थन करनेसे तुम्हारा सिंहासन पृथिवीपर आ पड़ा है । अत: अब भी सत्य पक्षका समर्थन करना तेरे लिए उचित है ।।७०।। परन्तु राजा वसु तो मोह रूपी मदिराके नशामे इतना निमग्न था कि उसने फिर भी वही बात कही । इस पापके फल स्वरूप राजा वसु शीघ्र ही सिंहासनके साथ ही साथ पृथिवीमें धँस गया ।।७१।। हिंसाधर्मकी प्रवृत्ति चलानेसे वह बहुत भारी पापके भारसे आक्रान्त हो बहुत भारी वेदनावाली तमस्तम.प्रभानामक सातवीं पृथिवीमे गया ।।७२।। तदनन्तर पापसे भयभीत मनुष्य राजा वसु और पर्वतको लक्ष्यकर धिक्-धिक् कहने लगे जिससे बडा भारी कोलाहल उत्पन्न हुआ ।।७३।। अहिंसापूर्ण आचारका उपदेश देनेके कारण नारद सन्मानको प्राप्त हुआ । सब लोगोंके मुखसे यही शब्द निकल रहे थे कि 'यतो धर्मस्ततो जय ' जहाँ धर्म वहाँ विजय ।।७४।। पापी पर्वत, लोकमे धिक्कार रूपी दण्डकी चोट खाकर दु खी हो शरीरको सुखाता हुआ कुतप करने लगा ।।७५।। अन्तमें मरणकर प्रबल पराक्रमका धारक दुष्ट राक्षस हुआ । उसे पूर्व पर्यायमे जो अपमान और धिक्कार रूपी दण्ड प्राप्त हुआ था उसका स्मरण हो आया ।।७६।। वह विचार करने लगा कि लोगोंने मेरा पराभव किया था इसलिए मै इसका दु.खदायी बदला लूँगा ।।७७।। मै कपट पूर्ण शास्त्र रचकर ऐसा कार्य करूँगा कि जिसमे आसक्त हुए मनुष्य तिर्यञ्च अथवा नरक जैसी दुर्गतियोंमे जावेंगे ।।७८।। तदनन्तर उस राक्षसने मनुष्यका वेष रक्खा, बाँये कन्धेपर यज्ञोपवीत पहिना और हाथमे कमण्डलु तथा अक्षमाला आदि उपकरण लिये ।।७९।। इस प्रकार हिंसा कार्योंकी प्रवृत्ति करानेमे तत्पर तथा क्रूर मनुष्योंको प्रिय भयावह शास्त्रका अत्यन्त अमाङ्गलिक स्वरमे उच्चारण करता हुआ वह दुष्ट राक्षस पृथिवीपर भ्रमण करने लगा ।।८०।। वह स्वभावसे निर्दय था तथा बुद्धि हीन तापसियों और ब्राह्मणोंको मोहित करनेमे सदा तत्पर रहता था ।।८१।। तदनन्तर जिन्हें भविष्यमे दु'ख प्राप्त होनेवाला था ऐसे मूर्ख प्राणी उसके

---

१. सिंहासने म० । २. ध्वनिस्तावज्जातः म० । ३ सस्मार म० । ४. विधान-डम्भचरित म० कडभरत (?) ख० । ५. यत्राशक्तो म० ।

तेभ्यो जगाद यज्ञस्य विधानार्थमहं स्वयम् । ब्रह्मा लोकमिमं प्राप्तो येन सृष्टं चराचरम् ॥८३॥
यज्ञार्थं पशवः सृष्टाः स्वयमेव मयादरात् । यज्ञो हि भूत्यै स्वर्गस्य तस्माद्यज्ञे वधोऽवधः ॥८४॥
सौत्रामणिविधानेन सुरापानं न दुष्यति । अगम्यागमनं कार्यं यज्ञे गोसवनामनि ॥८५॥
मातृमेधे वधो मातुः पितृमेधे वधः पितुः । अन्तर्वेदि विधातव्यं दोषस्तत्र न विद्यते ॥८६॥
आशुशुक्षणिमाधाय[1] पृष्ठे कूर्मस्य तर्पयेत् । हविषा[2] जुह्वकाख्याय स्वाहेत्युक्त्वा प्रयत्नतः ॥८७॥
यदा न प्राप्नुयात् कूर्मं तदा शुद्धद्विजन्मनः । [3]खलते पिङ्गलाभस्य विक्लवस्य शुचौ जले ॥८८॥
[4]आस्यदघ्नेऽवतीर्णस्य मस्तके कूर्मसन्निभे । प्रज्वाल्य ज्वलनं दीप्तमाहुतिं निक्षिपेद् द्विजः ॥८९॥
सर्वं पुरुष एवेदं यद्भूतं यद्भविष्यति । ईशानो [5]योऽमृतत्वस्य यदन्नेनातिरोहति ॥९०॥
एवमेकत्र पुरुषे [6]किं केनात्र विपाद्यते । [7]कुरुतातो यथाभीष्टं यज्ञे प्राणिनिपातनम् ॥९१॥
मांसस्य भक्षणं तेषां कर्तव्यं यज्ञकर्मणि । [8]यायजूकेन पूतं हि देवोद्देश्येन तत्कृतम् ॥९२॥
एवम्प्रकारमत्यन्तपापकर्म प्रदर्शयन् । प्राणिनः प्रवणांश्चक्रे राक्षसो धरणीतले ॥९३॥
[9]श्रद्धानास्ततो भूत्वा जन्तवः सुखवाञ्छया । हिंसायज्ञस्थलीं भूमिं [10]दीक्षिता प्रविशन्ति ये ॥९४॥
काष्ठभारं यथा सर्वं प्राध्वकृत्य स तान् दृढम् । भयोद्भूतमहाकम्पान् चलत्तारकलोचनान् ॥९५॥
पृष्ठस्कन्धशिरोजङ्घा[11]पादाग्रस्थान्विधाय खम् । उत्पपात पतद्रक्तधारानिकरदुःखितान् ॥९६॥

पद्मे इस प्रकार पड़ने लगे जिस प्रकार कि अग्निपर पतंगे पड़ते हैं ॥८२॥ वह उन लोगोंसे कहता था कि मैं वह ब्रह्मा हूँ जिसने इस चराचर विश्वकी रचना की है। यज्ञकी प्रवृत्ति चलानेके लिए मैं स्वयं इस लोकमें आया हूँ ॥८३॥ मैंने बड़े आदरसे स्वयं ही यज्ञके लिए पशुओंकी रचना की है। यथार्थमें यज्ञ स्वर्गकी विभूति प्राप्त करानेवाला है इसलिए यज्ञमें जो हिंसा होती है वह हिंसा नहीं है ॥८४॥ सौत्रामणि नामक यज्ञमें मदिरा पीना दोषपूर्ण नहीं है और गोसव नामक यज्ञमें अगम्या अर्थात् परस्त्रीका भी सेवन किया जा सकता है ॥८५॥ मातृमेध यज्ञमें माताका और पितृमेध यज्ञमें पिताका वध वेदीके मध्यमें करना चाहिए इसमें दोष नहीं है ॥८६॥ कछुएकी पीठपर अग्नि रखकर जुह्वक नामक देवको बड़े प्रयत्नसे स्वाहा शब्दका उच्चारण करते हुए साकल्यसे संतृप्त करना चाहिए ॥८७॥ यदि इस कार्यके लिए कछुआ न मिले तो एक गंजे शिरवाले पीले रङ्गके शुद्ध ब्राह्मणको पवित्र जलमें मुख प्रमाण नीचे उतारे अर्थात् उसका शरीर मुख तक पानीमें डूबा रहे ऊपर केवल कछुआके आकार मस्तक निकला रहे उस मस्तकपर प्रचण्ड अग्नि जलाकर आहुति देना चाहिए॥८८–८९॥ जो कुछ हो चुका है अथवा जो आगे होगा जो अमृतत्वका स्वामी है अर्थात् देवपर्यायी है और जो अन्नजीवी है अर्थात् भूचारी है वह सब पुरुष ही है ॥९०॥ इस प्रकार जब सर्वत्र एक ही पुरुष है तब किसके द्वारा कौन मारा जाता है ? अर्थात् कोई किसीको नहीं मारता इसलिए यज्ञमें इच्छानुसार प्राणियोंकी हिंसा करो ॥९१॥ यज्ञमें यज्ञ करनेवालेको उन जीवोंका मांस खाना चाहिए क्योंकि देवताके उद्देश्यसे निर्मित होनेके कारण वह मांस पवित्र माना जाता है ॥९२॥ इस प्रकार अत्यन्त पापपूर्ण कार्य दिखाता हुआ वह राक्षस पृथिवी तलपर प्राणियोंको यज्ञादि कार्योंमें निपुण करने लगा ॥९३॥ तदनन्तर उसकी बातोंका विश्वासकर जो लोग सुखकी इच्छासे दीक्षित हो हिंसामयी यज्ञकी भूमिमें प्रवेश करते थे उन सबको वह लकड़ियोंके भारके समान मजबूत बाँधकर आकाशमें उड़ जाता था। उस समय उनके शरीर भयसे काँप उठते थे, उनकी आँखोंकी पुतलियाँ घूमने लगती थीं। उन्हें वह उल्टाकर ऐसा झुकाता था कि उनकी जङ्घाएँ पीठ तथा ग्रीवापर और पैरके पञ्जे शिर पर आ लगते थे

१. -मादाय म० । २. हविष्यजुह्वकाख्याय म० । ३. खल्वाटस्य । ४. मुखप्रमाणे । ५. मृतस्तस्य क०, ज० । ६. किं कि मात्र क० । ७. कुरुत + अतो । ८. याजकेन म० । ९. श्रद्धानस्ततो म० । १०. दीक्षिताः क० । ११. जङ्घान् म० ।

ततस्ते [1]विस्वरोदार क्रोशन्तोऽभिदधु स्वरम् । किमर्थं देव रुष्टोऽसि येनास्मान् हतुमुद्यत ॥९७॥
प्रसीद मुञ्च निर्दोषानस्मान् देव महाबल । भवदाज्ञा वय सर्वा कुर्म प्रणतमूर्तय ॥९७॥
ततो बभाण तान् रक्ष यथैव पशवो हता । भवद्भिरियृ[2]ति स्वर्गं तथा यूय मया हता ॥९९॥
इत्युक्त्वा विजने काश्चिद् द्वीपेऽन्यस्मिन्निरक्षिपत्[3] । महार्णवे परानन्यान्क्रूरप्राणिगणान्तरे ॥१००॥
एकानास्फालयन् क्षोणीधरमूर्ध्नि शिलातले । कुर्वन् बहुविध शब्द वासासि रजको यथा ॥१०१॥
दु खेन मरणावस्था प्राप्तास्ते त्रस्तचेतस । पितरौ तनयान् भ्रातृन् स्मरन्तो मृत्युमापिताँ[4] ॥१०२॥
तद्व्यापादितशेषा ये मूढा कुग्रन्थकन्थया । रक्षसा[5] दर्शितो हिंसायज्ञस्तैर्वृद्धिमाहृत ॥१०३॥
हिसायज्ञमिम घोरमाचरन्ति न ये जना । दुर्गति ते न गच्छन्ति महादु.खविधायिनीम् ॥१०४॥
उदाहृतो [6]मया यस्ते हिसायज्ञसमुद्भव. । [7]श्रेणिकैन पुराज्ञासीत् प्राज्ञो रत्नश्रव सुत ॥१०५॥
अथ राजपुर प्राप्तो रावण स्वर्गसन्निभम् । बहिर्यस्य [8]मरुत्वाख्यो यज्ञवाटे[9] स्थितो नृप ॥१०६॥
हिसाधर्मप्रवीणश्च सवर्तो नाम विश्रुत । ऋत्विक् तस्मै ददौ कृत्स्नमुपदेश यथाविधि ॥१०७॥
सूत्रकण्ठाः पृथिव्या ये सर्वे तेऽत्र निमन्त्रिताः । पुत्रदारादिभिः सार्धमागता [10]लोभवाहिता. ॥१०८॥
सा तैर्यज्ञमही सर्वा वेदमङ्गलनि स्वनै । लाभाकाङ्क्षा प्रसन्नास्यैर्वृता क्षुभ्यत्सुभूरिभि. ॥१०९॥

तथा पड़ती हुई खूनकी धाराओसे वे बहुत दु खी हो जाते थे ॥९४–९६॥ इस कार्यसे वे सब बहुत भयकर शब्द करते हुए चिल्लाते थे और कहते थे कि हे देव ! तुम किस लिए रुष्ट हो गये हो जिससे हम सबको मारनेके लिए उद्यत हुए हो ॥९७॥ हे देव ! तुम महाबलवान् हो, प्रसन्न होओ, हम सब निर्दोष हैं अत. हम लोगोको छोडो । हम सब आपके समक्ष नतशरीर है और आप जो आज्ञा देंगे उस सबका पालन करेंगे ॥९८॥ तदनन्तर राक्षस उनसे कहता था कि जिस प्रकार तुम्हारे द्वारा मारे हुए पशु स्वर्ग जाते है उसी प्रकार मेरे द्वारा मारे गये आप लोग भी स्वर्ग जावेंगे ॥९९॥ ऐसा कहकर उसने कितने ही लोगोको जहाँ मनुष्योका सद्भाव नहीं था ऐसे दूसरे द्वीपोमे डाल दिया । कितने ही लोगोको समुद्रमे फेक दिया, कितने ही लोगोको सिहादिक दुष्ट जीवोंके मध्य डाल दिया और जिस प्रकार धोबी अनेक प्रकारके शब्द करता हुआ शिलातलपर वस्त्र पछाड़ता है उसी तरह कितने ही लोगोको घुमा-घुमाकर पर्वतकी चोटीपर पछाड़ दिया ॥१००–१०१॥ दु.खसे वे मरणासन्न अवस्थाको प्राप्त हो गये थे, उन सबके चित्त भयभीत थे, और अन्तमे माता पिता पुत्र और भाई आदिका स्मरण करते हुए मृत्युको प्राप्त हो गये ॥१०२॥ जो मरनेसे बाकी बचे थे वे मिथ्या शास्त्र रूपी कन्थासे मोहित थे अतः उन्होने राक्षसके द्वारा दिखलाये हुए हिसायज्ञकी वृद्धि की ॥१०३॥ गौतम स्वामी राजा श्रेणिकसे कहते है कि हे राजन् ! जो मनुष्य इस भयंकर हिसायज्ञको नहीं करते वे महा दुःख देनेवाली दुर्गतिमे नही जाते है ॥१०४॥ हे श्रेणिक ! मैंने यह तेरे लिए हिसायज्ञकी उत्पत्ति कही । रावण इसे पहलेसे ही जानता था ॥१०५॥

अथानन्तर रावण, स्वर्गकी तुलना करनेवाले उस राजपुर नगरमे पहुँचा जहाँ मरुत्वान् नामका राजा नगरके बाहर यज्ञशालामे बैठा था ॥१०६॥ हिसाधर्ममे प्रवीण सवर्त नामका प्रसिद्ध ब्राह्मण उस यज्ञका प्रधान याजक था जो राजाके लिए विधिपूर्वक सब उपदेश दे रहा था ॥१०७॥ पृथ्वीमे जो ब्राह्मण थे वे सब इस यज्ञमें निमन्त्रित किये गये थे इसलिए लोभके वशीभूत हो स्त्री पुत्रादिके साथ वहाँ आये थे ॥१०८॥ लाभकी आशासे जिनके मुख प्रसन्न थे

१. विश्वरोदार म०, ब०, क०, ख० । २. ऋ गतौ इत्यस्य लड्बहुवचने रूपम् । बहुल छन्दसीत्येव सिद्धे 'अर्तिपिपर्त्योश्चेतीत्व-विधानादय भाषायामपि । 'अभ्यासस्यासवर्णे' इतीयङ् इयर्ति, इयृतः, इयृति । गच्छन्तीत्यर्थः । रियति म० । ३. निरक्षिपेत् म० । ४. मीयूति म० । मीप्रति क०, ख० । ५. रक्षिता ख० । ६. पास्त म० । ७. श्रेणिकेन ख० । ८. मरुत्ताख्यो म० । ९. यज्ञवादे क०, ख । १०. लोकवाहिताः म० ।

उपनीताश्च तत्रैव पशवो दीनमानसा । वराका शतशो बद्धा श्वसत्कुक्षिपुटा भयात् ॥११०॥
नारदोऽथान्तरे[1] तस्मिन्निच्छया नभसा व्रजन् । [2]अपश्यद् घनपृष्ठस्थो जन त तत्र सगतम् ॥१११॥
अचिन्तयच्च दृष्ट्वेव विस्मयाकुलमानस । कुर्वन् विभ्रममङ्गस्य कुतूहलसमुद्भवम् ॥११२॥
एतत्सुनगर कस्य कस्य चेयमनीकिनी । इय च सागराकारा प्रजा[3] कस्मादिह स्थिता[4] ॥११३॥
नगराणि जनौघाश्च वरूथिन्यश्च भूरिश । मयेक्षाञ्चक्रिरे जातु नेदृग्दृष्टो जनोत्करः ॥११४॥
कुतूहलादिति ध्यात्वाऽवतीर्णोऽसौ विहायस । [5]कर्मैतदेव तस्यासीद्यत्कुतूहलदर्शनम् ॥११५॥
पप्रच्छ मागधेशोऽथ भगवन् क स नारद । उत्पत्तिर्वा कुतस्तस्य गुणा वा तस्य कीदृशा ॥११६॥
जगाद च गणाधीश श्रेणिक ब्राह्मणोऽभवत् । नाम्ना ब्रह्मरुचिस्तस्य कूर्मी नाम कुटुम्बिनी ॥११७॥
तापसेन सता तेन श्रितेन वनवासिताम् । एतस्यमाहितो गर्भ फलमूलादिवृत्तिना ॥११८॥
वीतसङ्गास्तमुद्देशमथाजग्मुर्महर्षय । यान्तो मार्गवशात् [6]क्वापि सयमासक्तमानसा ॥११९॥
विशश्रमु क्षण तस्मिन्नाश्रमे श्रमनोदिनि । [7]अपश्यन् दम्पती तौ च स्वाकारौ कर्मगर्हितौ ॥१२०॥
आपाण्डुरशरीरां च दृष्ट्वा योषां पृथुस्तनीम् । कृशा गर्भभरम्लानां श्वसन्ती पन्नगीमिव ॥१२१॥
ससारप्रकृतिज्ञानां श्रमणाना महात्मनाम् । कृपया सबभूवैतौ[8] धर्म बोधयितु मतिः ॥१२२॥
तेषां मध्ये ततो ज्येष्ठो जगाद मधुर यति । कष्ट पश्यत नर्त्यन्ते कर्मभिर्जन्तवः कथम् ॥१२३॥
त्यक्त्वा धर्मधिया बन्धून् ससारोत्तरणाशया । स्वय खलीकृतोऽरण्ये किमात्मा तापस त्वया ॥१२४॥

तथा जो वेदका मङ्गलपाठ कर रहे थे ऐसे बहुत सारे ब्राह्मणोसे यज्ञकी समस्त भूमि आवृत होकर क्षोभको प्राप्त हो रही थी ॥१०९॥ सैकड़ो दीनहीन पशु भी वहाँ लाकर बाँधे गये थे। भयसे उन पशुओके पेट दु खकी साँसे भर रहे थे ॥११०॥ उसी समय अपनी इच्छासे आकाशमे भ्रमण करते हुए नारदने वहाँ एकत्रित लोगोंका समूह देखा ॥१११॥ उसे देख नारद आश्चर्यसे चकित हो, कुतूहलजनित शरीरकी चेष्टाओंको धारण करता हुआ इस प्रकार विचार करने लगा ॥११२॥ यह उत्तम नगर कौन है? यह किसकी सेना है? और यह सागरके आकार किसकी प्रजा यहाँ किस प्रयोजनसे ठहरी हुई है? ॥११३॥ मैने बहुतसे नगर, बहुतसे लोगोके समूह और बहुत सारी सेनाएँ देखीं पर कभी ऐसा जनसमूह नहीं देखा ॥११४॥ ऐसा विचारकर नारद कुतूहलवश आकाशसे नीचे उतरा सो ठीक ही है क्योकि कुतूहल देखना ही उसका खास काम है ॥११५॥ यह सुनकर राजा श्रेणिकने गौतमस्वामीसे पूछा कि भगवन्! वह नारद कौन है? उसकी उत्पत्ति किससे हुई है और उसके कैसे गुण हैं? ॥११६॥ इसके उत्तरमे गणधर कहने लगे कि श्रेणिक! ब्रह्मरुचि नामका एक ब्राह्मण था और उसकी कूर्मी नामक स्त्री थी ॥११७॥ ब्राह्मण तापस होकर वनमे रहने लगा और फल तथा कन्दमूल आदि भक्षण करने लगा। ब्राह्मणी भी इसके साथ रहती थी सो ब्राह्मणने इसमे गर्भ धारण किया ॥११८॥ अथानन्तर किसी दिन संयमके धारक निर्ग्रन्थमुनि कही जा रहे थे सो मार्गवश उस स्थानपर आये ॥११९॥ और श्रमको दूर करनेवाले उस आश्रममे थोड़ी देरके लिए विश्राम करने लगे। उसी आश्रममे उन मुनियोने उस ब्राह्मण दम्पतीको देखा जिनका कि आकार तो उत्तम था पर कार्य निन्दनीय था ॥१२०॥ जिसका शरीर पीला था, स्तन स्थूल थे, जो दुर्बल थी, गर्भके भारसे म्लान थी और साँसे भरती हुई सर्पिणीके समान जान पडती थी ऐसी स्त्रीको देखकर संसारके स्वभावको जाननेवाले उदार हृदय मुनियोके मनमे दयावश उक्त दम्पतीको धर्मोपदेश देने का विचार उत्पन्न हुआ ॥१२१-१२२॥ उन मुनियोके बीचमे जो बड़े मुनि थे वे मधुर शब्दोंमें उपदेश देने लगे। उन्होने कहा कि बड़े खेदकी बात है देखो, ये प्राणी कर्मोंके द्वारा कैसे नचाये जाते है? ॥१२३॥ हे तापस! तूने

---

१. -थान्तरे यस्मिन्नि- म० । २. अपश्यद्यान- म० । ३. प्रजाः म० । ४. स्थिताः म० । ५. कस्मैचिदेव ख० । ६. केऽपि म० । ७. अपश्य म० । ८. दम्पती ।

भद्र प्रव्रजितो जात कस्ते भेदो गृहस्थत । चारित्र प्रतियातस्य केवल वेषमन्यथा ॥१२५॥
यथा हि छर्दित नान्न भुज्यते मानुषै. पुन । तथा त्यक्तेषु कामेषु न कुर्वन्ति मतिं बुधा ॥१२६॥
त्यक्त्वा लिङ्गी पुन पापो योषित यो निषेवते । सुभीमायामरण्यान्यां वृकता स [१]समश्नुते ॥१२७॥
सर्वारम्भस्थित. कुर्वन्नब्रह्म[२] मदनिर्भर. । दीक्षितोऽस्मीति यो वेत्ति स्व नितान्त स मोहवान् ॥१२८॥
ईर्ष्यामन्मथदग्धस्य दुष्टदृष्टेर्दुरामन. । आरम्भे वर्तमानस्य प्रव्रज्या वद कीदृशी ॥१२९॥
कुदृष्ट्या गर्वितो लिङ्गी विषयासक्तमानस । ब्रुवन्नह तपस्वीति मिथ्यावादी कथ व्रती ॥१३०॥
सुखासनविहार सन् सदाकशिपुसक्तधी[३] । सिद्धमन्यो विमूढात्मा जनोऽय स्वस्य वञ्चक' ॥१३१॥
[४]दह्यमाने यथागारे[५] कथञ्चिदपि नि सृत. । तत्रैव पुनरात्मान प्रक्षिपेन्मूढमानस ॥१३२॥
यथा च विवर प्राप्य निष्क्रान्त. पञ्जरात् खग । निवृत्य प्रविशेद् भूयस्तत्रैवाज्ञानचोदित[६] ॥१३३॥
तथा प्रव्रजितो भूत्वा यो यातीन्द्रियवश्यताम् । निन्दित स भवेल्लोके न च स्वार्थं समश्नुते ॥१३४॥
ध्येयमेकाग्रचित्तेन सर्वग्रन्थविवर्जिना । मुनिना ध्यायते तत्त्व सारम्भैर्न भवद्विधै ॥१३५॥
प्राणिनो ग्रन्थसङ्गेन रागद्वेषसमुद्भव । रागात् सजायते कामो द्वेषाज्जन्तुविनाशनम् ॥१३६॥
कामक्रोधाभिभूतस्य मोहेनाक्रम्यते मन. । कृत्याकृत्येषु[७] मूढस्य मतिर्न स्याद्विवेकिनी ॥१३७॥

---

संसार सागरसे पार होनेकी आशासे धर्म समझ भाई-बन्धुओका त्यागकर स्वय अपने आपको इस वनके मध्य क्या कष्टमे डाला है ? ॥१२४॥ अरे भलेमानुष ! तूने प्रव्रज्या धारण की है पर तुझमे गृहस्थसे भेद ही क्या है ? तूने जो चारित्र धारण किया था उसके तू प्रतिकूल चल रहा है। केवल वेष ही तेरा दूसरा है पर चारित्र तो गृहस्थ जैसा ही है ॥१२५॥ जिस प्रकार मनुष्य वमन किये हुए अन्नको फिर नहीं खाते है उसी प्रकार विज्ञजन जिन विषयोका परित्याग कर चुकते है फिर उनकी इच्छा नहीं करते ॥१२६॥ जो लिङ्गधारी साधु एक बार स्त्रीका त्यागकर पुनः उसका सेवन करता है वह पापी है और मरकर भयङ्कर अटवीमे भेड़िया होता है ॥१२७॥ जो सब प्रकारके आरम्भमे स्थित रहता हुआ, अब्रह्म सेवन करता हुआ और नशामे निमग्न रहता हुआ भी 'मै दीक्षित हूँ' ऐसा अपने आपको जानता है वह अत्यन्त मोही है ॥१२८॥ जो ईर्ष्या और कामसे जल रहा है, जिसकी दृष्टि दुष्ट है, जिसकी आत्मा दूषित है, और जो आरम्भमें वर्तमान है अर्थात् जो सब प्रकारके आरम्भ करता है उसकी प्रव्रज्या कैसी ? तुम्हीं कहो ॥१२९॥ जो कुदृष्टिसे गर्वित है, मिथ्यावेशधारी है, और जिसका मन विषयोके आधीन है फिर भी अपने आपको तपस्वी कहता है वह झूठ बोलनेवाला है वह व्रती कैसे हो सकता है ? ॥१३०॥ जो सुखपूर्वक उठता-बैठता और विहार करता है तथा जो सदा भोजन एवं वस्त्रोंमे बुद्धि लगाये रखता है फिर भी अपने आपको सिद्ध मानता है वह मूर्ख अपने आपको धोखा देता है ॥१३१॥ जिस प्रकार जलते हुए मकानसे कोई किसी तरह बाहर निकले और फिरसे अपने आपको उसी मकानमे फेंक दे तो वह मूर्ख ही समझा जाता है ॥१३२॥ अथवा जिस प्रकार कोई पक्षी छिद्र पाकर पिंजड़ेसे बाहर निकल आवे और अज्ञानसे प्रेरित हो पुन. उसीमे लौट आवे तो यह उसकी मूर्खता ही है ॥१३३॥ उसी प्रकार कोई मनुष्य दीक्षित होकर पुनः इन्द्रियोंकी आधीनताको प्राप्त हो जावे तो वह लोकमे निन्दित होता है और आत्मकल्याणको प्राप्त नही होता ॥१३४॥ जिनका चित्त एकाग्र है ऐसे सर्वपरिग्रहका त्याग करनेवाले मुनि ही ध्यान करने योग्य तत्त्वका ध्यान कर सकते हैं तुम्हारे जैसे आरम्भी मनुष्य नही ॥१३५॥ परिग्रहकी संगतिसे प्राणीके रागद्वेषकी उत्पत्ति होती है। रागसे काम उत्पन्न होता है और द्वेषसे जीवोका विघात होता है ॥१३६॥ जो काम और क्रोधसे अभिभूत हो रहा है उसका मन मोहसे

---

१. प्राप्नोति । २. व्यभिचारं । कुर्वन् न ब्रह्म- म० । ३. भोजनाच्छादनमग्नमनाः । ४ दह्यमाणो ब० । ५. यथाङ्गारैः ख० । ६. तत्रैव ज्ञान- म० । ७. कृत्यकृत्येषु म० ।

यत्किञ्चित्कुर्वतस्तस्य कर्मोपार्जयतोऽशुभम् । ससारसागरे घोरे भ्रमण न निवर्तते ॥१३८॥
एतान् ससर्गजान् दोषान्विदित्वाशु विपश्चित । वैराग्यमधिगच्छन्ति नियम्यात्मानमात्मना ॥१३९॥
एव सबोधितो वाक्यै परमार्थोपदेशनै । उपेत [1]श्रामणी दीक्षां मोहाद् ब्रह्मरुचिश्च्युत ॥१४०॥
निरक्षेपमति कूर्म्यां महावैराग्यसम्मत [3] । विजहार सुख सार्धं गुरुणा गुरुवत्सल. ॥१४१॥
सापि शुद्धमति कूर्मी कर्मण कृष्णतश्च्युता । ज्ञात्वा रागवश जन्तो ससारपरिवर्तनम् ॥१४२॥
कुमार्गसङ्गमुत्सृज्य जिनभक्तिपरायणा । सिंहीव शोभतेऽरण्ये भर्त्रा विरहिता सती ॥१४३॥
मासे च दशमे धीरा प्रसूता दारक शुभम् । अचिन्तयच्च वीक्ष्यैन ज्ञातकर्म विचेष्टिता ॥१४४॥
सपर्कोऽयमनर्थोऽसौ कथितो [4]यन्महर्षिभि । तस्मान्मुक्त्वाधुना सङ्ग करोमि हितमात्मने ॥१४५॥
अनेनापि भवे [5]स्वस्मिन्य. कर्मविधिरर्जित । फल तस्य शिशुर्भोक्ता मनोज्ञमथवेतरत् [6] ॥१४६॥
अरण्यान्यां समुद्रे वा स्थित वारातिपञ्जरे । स्वयकृतानि कर्माणि रक्षन्ति न परो जन ॥१४७॥
य [7]पुन प्राप्तकाल. स्यार्ज्जनन्यङ्कगतोऽपि स । ह्रियते मृत्युना जीव स्वकर्मवशता गत. ॥१४८॥
एव विदिततत्त्वा सा बुद्ध्यातिनिरपेक्षया । बालक विपिने त्यक्त्वा तापसी वीतमत्सरा ॥१४९॥
आनर्च्छालोकनगरे [9]क्षान्त्यार्यामिन्दुमालिनीम् । शरण [10]भूरिसवेगाद् [11]भूतार्या चारुचेष्टिता ॥१५०॥

आक्रान्त हो जाता है और जो करने योग्य तथा न करने योग्य कर्मोंके विषयमे मूढ है उसकी बुद्धि विवेकयुक्त नहीं हो सकती ॥१३७॥ जो मनुष्य इच्छानुसार चाहे जो कार्य करता हुआ अशुभ कर्मका उपार्जन करता है इस भयंकर ससार सागरमे उसका भ्रमण कभी भी बन्द नहीं होता ॥१३८॥ ये सब दोष संसर्गसे ही उत्पन्न होते है ऐसा जानकर विद्वान् लोग अपने आपके द्वारा अपने आपका नियन्त्रण कर वैराग्यको धारण करते है ॥१३९॥ इस प्रकार परमार्थका उपदेश देनेवाले वचनोसे संबोधा गया ब्रह्मरुचि ब्राह्मण मिथ्यात्वसे च्युत हो दैगम्बरी दीक्षाको प्राप्त हुआ और अपनी कूर्मी नामक स्त्रीसे निःस्पृह हो महावैराग्यसे युक्त होता हुआ गुरुके साथ सुखपूर्वक विहार करने लगा । उसका गुरुस्नेह ऐसा ही था ॥१४०–१४१॥ कूर्मीने भी जान लिया कि जीवका संसारमे जो परिभ्रमण होता है वह रागके वश ही होता है। ऐसा जानकर वह पाप कार्यसे विरत हो शुद्धाचारमे निमग्न हो गई ॥१४२॥ वह मिथ्यामार्गियोका ससर्ग छोड़कर सदा जिन-भक्तिमे ही तत्पर रहने लगी और पतिसे रहित होनेपर भी निर्जन बनमे सिंहिनीके समान सुशोभित होने लगी ॥१४३॥ उस धैर्यशालिनीने दशवे मासमे शुभ पुत्र उत्पन्न किया। पुत्रको देखकर कर्मोंकी चेष्टाको जाननेवाली कूर्मीने विचार किया ॥१४४॥ कि चूँकि महर्षियोने इस संपर्कको अनर्थका कारण कहा था इसलिए मैं इस संपर्क अर्थात् पुत्रकी संगतिको छोड़कर आत्माका हित करती हूँ ॥१४५॥ इस शिशुने भी अपने भवान्तरमे जो कर्मोंकी विधि अर्जित की है उसीका यह अच्छा या बुरा फल भोगेगा ॥१४६॥ घनघोर अटवी, समुद्र अथवा शत्रुओके पिंजड़ेमे स्थित जन्तुकी अपने आपके द्वारा किये हुए कर्म ही रक्षा करते हैं अन्य लोग नहीं ॥१४७॥ जिसका काल आ जाता है ऐसा स्वकृत कर्मोंकी आधीनताको प्राप्त हुआ जीव माताकी गोदमे स्थित होता हुआ भी मृत्युके द्वारा हर लिया जाता है ॥१४८॥ इस प्रकार तत्त्वको जाननेवाली तापसीने निरपेक्ष बुद्धिसे उस बालकको वनमें छोड़ दिया। तदनन्तर मत्सर भावसे रहित

---

१. दैगम्बरीम् । २. क०, ख०, म० पुस्तकेषु 'मोहाद् ब्रह्मरुचिश्च्युतः' इति पाठ उपलभ्यते, न० पुस्तके तु प्राग् 'मोहाब्रह्मरुचिश्च्युतः,' इत्येव पाठः स्वीकृतः पश्चात्केनापि टिप्पणकर्त्रा मोहात्—इति पाठः शोधित । ३. सम्पदः म० । ४. यो महर्षिभि· क०, ख०, ब० । ५. भवेद्यस्मिन् म० । ६. मभवेतरम् म० । मथवेतरं क०,ख०,ब० । ७. स्वय म० । ८. जन्मन्यङ्कगतो- म० । ९. कान्त्यार्यामिन्दु क०,ख०, म० । १०. भूरिसवेगा म० । ११. चारुचेष्टिता आर्या भूता = बभूवेति भावः ।

सत्कर्मा बालकश्चासौ रोदनादिविवर्जित । व्रजद्भिर्नभसा दृष्ट. सुरैर्जृम्भकसञ्ज्ञकै ॥१५१॥
गृहीत्वा च कृपायुक्तैरादरात् परिपालित । अध्यापितश्च शास्त्राणि सरहस्यान्यशेषत.[1] ॥१५२॥
लेभे च लब्धवर्ण सन् विद्यामाकाशगामिनीम् । यौवन च पर प्राप्त स्थितिश्चाणुव्रती[2] दृढाम्[3] ॥१५३॥
दृष्ट्वा च मातर चिह्नैः प्रत्यभिज्ञानकारिणीम् । तत्प्रीत्योपेत्य निर्ग्रन्थ सम्यग्दर्शनतत्पर ॥१५४॥
प्राप्य क्षुल्लकचारित्र जटामुकुटमुद्वहन् । [4]अवद्वारसमो जातो न गृहस्थो न सयत. ॥१५५॥
यश्च[5] कन्दर्पकौत्कुच्यमौखर्य्यात्यन्तवत्सल । कलहप्रेक्षणाकाङ्क्षी गीतचुञ्चु[6] प्रभाववान् ॥१५६॥
पूजितो राजलोकस्य परैरव्याहतायति. । चचार रोदसी नित्य कुतूहलगतेक्षण ॥१५७॥
देवै सवर्धितत्वाच्च देवसन्निभविभ्रम । देवर्षिः प्रथितः सोऽभूद्विद्या विद्योतिताद्भुत ॥१५८॥
कथञ्चित्सचरश्चासाविच्छया तां मखावनीम् । समीप गगनोद्देशस्थितोऽपश्यज्जनाकुलाम् ॥१५९॥
दृष्ट्वा च तान् पशून् बद्धान् समाश्लिष्टोऽनुकम्पया । अवतीर्णो मखक्षोणी जल्पाकपथपण्डित. ॥१६०॥
उवाचेति मरुत्वच्च[7] कि प्रारब्धमिद नृप । हिंसन प्राणिवर्गस्य द्वार दुर्गतिगामिनाम् ॥१६१॥
उवाचासावय वेत्ति सर्वशास्त्रार्थकोविद । ऋत्विग् मम यदेतेन कर्मणा प्राप्यते फलम् ॥१६२॥

होकर वह बड़ी शान्तिसे आलोक नगरमे इन्द्रमालिनी नामक आर्यिकाकी शरणमे गई और उनके पास बहुत भारी संवेगसे उत्तम चेष्टाकी धारक आर्यिका हो गई ॥१४९-१५०॥

अथानन्तर—आकाशमे जृम्भक नामक देव जाते थे सो उन्होने रोदनादि क्रियासे रहित उस पुण्यात्मा बालकको देखा ॥१५१॥ उन दयालु देवोने आदरसे ले जाकर उसका पालन किया और उसे रहस्य सहित समस्त शास्त्र पढ़ाये ॥१५२॥ विद्वान् होनेपर उसने आकाशगामिनी विद्या प्राप्त की और परम यौवन प्राप्तकर अत्यन्त दृढ अणुव्रत धारण किये ॥१५३॥ उसने चिह्नोसे पहिचाननेवाली माताके दर्शन किये और उसकी प्रीतिसे अपने पिता निर्ग्रन्थ गुरुके भी दर्शन कर सम्यग्दर्शन धारण किया ॥१५४॥ क्षुल्लकका चारित्र प्राप्तकर वह जटारूपी मुकुटको धारण करता हुआ अवद्वारके समान हो गया अर्थात् न गृहस्थ ही रहा और न मुनि ही किन्तु उन दोनोके मध्यका हो गया ॥१५५॥ वह कन्दर्प कौत्कुच्य और मौखर्य्यसे अधिक स्नेह रखता था, कलह देखनेकी सदा उसे इच्छा बनी रहती थी, वह संगीतका प्रेमी और प्रभावशाली था ॥१५६॥ राजाओके समूह उसका सम्मान करते थे, उसके आगमनमे कभी कोई रुकावट नही करते थे अर्थात् वह राजाओके अन्त.पुर आदि सुरक्षित स्थानोमे भी बिना किसी रुकावटके आ जा सकता था। और निरन्तर कुतूहलोपर दृष्टि डालता हुआ आकाश तथा पृथिवीमे भ्रमण करता रहता था ॥१५७॥ देवोने उसका पालन पोषण किया था इसलिए उसकी सब चेष्टाएँ देवोके समान थी। वह देवर्षि नामसे प्रसिद्ध था और विद्याओसे प्रकाशमान तथा आश्चर्यकारी था ॥१५८॥

अपनी इच्छासे संचार करता हुआ वह नारद किसी तरह राजपुर नगरकी यज्ञशालाके समीप पहुँचा और वहाँ पास ही आकाशमे खड़ा होकर मनुष्योसे भरी हुई यज्ञभूमिको देखने लगा ॥१५९॥ वहाँ बँधे हुए पशुओको देखकर वह दयासे युक्त हो यज्ञभूमिमे उतरा। वाद-विवाद करनेमे वह पण्डित था ही ॥१६०॥ उसने राजा मरुत्वान्से कहा कि हे राजन्! तुमने यह क्या प्रारम्भ कर रक्खा है? तुम्हारा यह प्राणिसमूहकी हिंसाका कार्य दुर्गतिमे जानेवालोके लिए द्वारके समान है ॥१६१॥ इसके उत्तरमे राजाने कहा कि इस कार्यसे मुझे जो फल प्राप्त होगा वह समस्त शास्त्रोंका अर्थ जाननेमें निपुण यह याजक (पुरोहित) जानता है ॥१६२॥

---

१. सरहस्याण्यशेषतः म०, ब० । २. अणुव्रतानामियम् आणुव्रती ताम् । ३. वृढाम् म० । ४ न यतिर्न गृहस्थः किन्तु तयोर्मध्यगतः अवद्वारसमः । ५. कान्दर्प- ख०, म० । ६. गीतेन वित्तो गीतचुञ्चुः 'तेन वित्त-श्चुञ्चुप्चणपौ' इति चुञ्चुप्प्रत्ययः । गीतचञ्चुः म०, क०, ख०, ब० । ७. मरुतश्च म० ।

आर्त्विजीन[1] ततोऽवादीदहो माणवक त्वया । किमिद प्रस्तुत दृष्ट सर्वज्ञैर्दु खकारणम् ॥१६३॥
सवर्त[2] कुपितोऽवोचदहोऽत्यन्तविमूढता । यदत्यतमसबद्ध भाषसे हेतुवर्जितम् ॥१६४॥
भवतो यो मत कोऽपि सर्वज्ञो रागवर्जित. । वक्तृत्वाद्युपपत्तिभ्यो[3] नासावेव तथेतर ॥१६५॥
अशुद्धै कर्तृभि प्रोक्त वचन स्यान्मलीमसम् । अनीदृशश्च नो कश्चिदुपपत्तेरभावत ॥१६६॥
तस्मादकर्तृको: वेद प्रमाण स्यादतीन्द्रिये[4] । वर्णत्रयस्य यज्ञे च कर्म तेन प्रकीर्तितम् ॥१६७॥
अपूर्वाख्यो ध्रुवो धर्मो यागेन प्रकटीकृत. । प्रयच्छति फल स्वर्गे मनोज्ञविषयोत्थितम् ॥१६८॥
अन्तर्वेदि पशूना च प्रत्यवायाय नो वध । शास्त्रेण चोदितो यस्माद्यायाद्यागादिसेवनम् ॥१६९॥
पशूना च वितानार्थं[5] कृता सृष्टि. स्वयभुवा । तस्मात्तदर्थसर्गाणां को दोषो विनिपातने ॥१७०॥
इत्युक्ते नारदोऽवोचदवद्य[6] निखिल त्वया । भाषित श्रृणु दुर्ग्रन्थभावनादूषितात्मना ॥१७१॥
यदि सर्वप्रकारोऽपि सर्वज्ञो नास्ति स त्रिधा । शब्दार्थबुद्धिभेदेन [7]स्ववाचा स्थितितो हता ॥१७२॥
अथ शब्दश्च बुद्धिश्च विद्यतेऽर्थस्तु नेष्यते । नैवमेतत्त्रय दृष्ट यस्मात् सर्वगवादिषु ॥१७३॥
असत्यर्थे नितान्त च कुरुते क्व पद मति. । शब्दो वा स तथाभूतो व्रजेद्धीवाग्व्यतिक्रमम् ॥१७४॥

---

नारदने याजकसे कहा कि अरे बालक ! तू ने यह क्या प्रारम्भ कर रक्खा है ? सर्वज्ञ भगवान्ने तेरे इस कार्यको दु खका कारण देखा है ॥१६३॥ नारदकी बात सुन संवर्त नामक याजकने कुपित होकर कहा कि अहो तेरी बड़ी मूर्खता है जो इस तरह बिना किसी हेतुके अत्यन्त असबद्ध बात बोलता है ॥१६४॥ तुम्हारा जो यह मत है कि कोई पुरुष सर्वज्ञ वीतराग है सो वह सर्वज्ञ वक्ता आदि होनेसे दूसरे पुरुषके समान सर्वज्ञ वीतराग सिद्ध नहीं होता। क्योकि जो सर्वज्ञ वीतराग है वह वक्ता नहीं हो सकता और जो वक्ता है वह सर्वज्ञ वीतराग नहीं हो सकता ॥१६५॥ अशुद्ध अर्थात् रागी द्वेषी मनुष्योके द्वारा कहे हुए वचन मलिन होते है और इनसे विलक्षण कोई सर्वज्ञ है नही, क्योकि उसका साधक कोई प्रमाण नहीं पाया जाता। इसलिए अकर्तृक वेद ही तीन वर्णोंके लिए अतीन्द्रिय पदार्थके विषयमे प्रमाण है। उसीमे यज्ञ कर्मका कथन किया है। यज्ञके द्वारा अपूर्व नामक ध्रुवधर्म प्रकट होता है जो जीवको स्वर्गमे इष्ट विषयोसे उत्पन्न फल प्रदान करता है ॥१६६–१६८॥ वेदीके मध्य पशुओका जो वध होता है वह पापका कारण नही है क्योंकि उसका निरूपण शास्त्रमे किया गया है इसलिए निश्चिन्त होकर यज्ञ आदि करना चाहिए ॥१६९॥ ब्रह्माने पशुओकी सृष्टि यज्ञके लिए ही की है इसलिए जो जिस कार्यके लिए रचे गये है उस कार्यके लिए उनका विघात करनेमे दोष नही है ॥१७०॥ सवर्तके इतना कह चुकनेपर नारदने कहा कि तूने सब मिथ्या कहा है। तेरी आत्मा मिथ्या शास्त्रोकी भावनासे दूषित हो रही है इसीलिए तूने ऐसा कहा है सुन ॥१७१॥ तू कहता है कि सर्वज्ञ नहीं है सो यदि सर्व प्रकारके सर्वज्ञका अभाव है तो शब्दसर्वज्ञ, अर्थसर्वज्ञ और बुद्धि सर्वज्ञ इस प्रकार सर्वज्ञके तीन भेद तूने स्वयं अपने शब्दो द्वारा क्यो कहे ? स्ववचनसे ही तू वाधित होता है ॥१७२॥ यदि तू कहता है कि शब्दसर्वज्ञ और बुद्धिसर्वज्ञ तो है पर अर्थ-सर्वज्ञ कोई नहीं है तो यह कहना नहीं बनता क्योंकि गो आदि समस्त पदार्थोंमे शब्द अर्थ और बुद्धि तीनो साथ ही साथ देखे जाते है ॥१७३॥ यदि पदार्थका बिलकुल अभाव है तो उसके बिना बुद्धि और शब्द कहाँ टिकेंगे अर्थात् किसके आश्रयसे उस प्रकारकी बुद्धि होगी और उस प्रकार शब्द बोला जावेगा। और उस प्रकारका अर्थ बुद्धि और वचनके व्यतिक्रमको प्राप्त हो

---

१. होतारम्। आर्तिजीनं क०ख० । अर्तिजीन म० । २ होता । सधर्ता म० । ३. यत्कृत्वाद्युप (?)। ४. स्यादतीन्द्रियैः म० । ५. यज्ञार्थम्। ६ कुत्सितम्। ७. स्ववाचा स्थानतो हताः म०, स्ववाचास्था इतोहता ख० ।

बुद्धे सर्वज्ञ इत्येष व्यवहारो गुणागत । मुख्यापेक्षो यथा चैत्रे सिंहशब्दप्रवर्तनम् ॥१७५॥
एतेन चानुमानेन प्रतिज्ञेय विरोधिनी । अभावश्च ममात्यन्त प्रसिद्धि न क्वचिद्गत ॥१७६॥
सर्वज्ञ सर्वदृक् क्वासौ यस्यैष महिमा भुवि । [1]दिवि ब्रह्मपुरे ह्येष [2]व्योम्नात्मा सुप्रतिष्ठित ॥१७७॥
आगमेन[3] तवानेन विरोध याति सगर । अनेकान्ते च साध्येऽर्थे भवेत्सिद्धप्रसाधकम् ॥१७८॥
वक्तृत्व सर्वथाऽयुक्त न पर प्रतिसिध्यति । असिद्ध च भवेत् स्वस्य स्याद्वादेन समागतम् ॥१७९॥
[4]नासावभिमतोऽस्माक वक्तृत्वाद्देवदत्तवत् । इत्याद्यपि भवेत्सिद्ध विरुद्ध साधन यतः ॥१८०॥
प्रजापत्यादिभिश्चायमुपदेशो न निश्चय. । [5]तेऽप्येवमिति चैतेभ्यो दोषवानागमो भवेत् ॥१८१॥
एक यो वेद तेन स्याज्ज्ञात सत्तात्मनाखिलम् । अत साध्यविहीनोऽय दृष्टान्तो गदितस्त्वया ॥१८२॥
अथ चैकान्तयुक्तोक्तिदृष्टान्तो वो यतस्तत । साध्यसाधनवैकल्यमुदाहार्यं [6]सधर्मणि ॥१८३॥
श्रुत्वा वस्तुन्यदृष्टे च प्रमाणं वेदमागतम् । न समाश्रयण युक्त हेतो सर्वज्ञदूषणे ॥१८४॥

जायगा ॥१७४॥ बुद्धिमे जो सर्वज्ञका व्यवहार होता है वह गौण है और गौण व्यवहार सदा मुख्यकी अपेक्षा करके प्रवृत्त होता है। जिस प्रकार चैत्रके लिए सिह कहना मुख्य सिहकी अपेक्षा रखता है उसी प्रकार बुद्धिसर्वज्ञ वास्तविक सर्वज्ञकी अपेक्षा रखता है ॥१७५॥ इस प्रकार इस अनुमानसे तुम्हारी 'सर्वज्ञ नही है' इस प्रतिज्ञामे विरोध आता है तथा हमारे मतमे सर्वथा अभाव माना नही गया है ॥१७६॥ 'पृथिवीमे जिसकी महिमा व्याप्त है ऐसा यह सर्वदर्शी सर्वज्ञ कहाँ रहता है' इस प्रश्नके उत्तरमे कहा गया है कि दिव्य ब्रह्मपुरमे आकाशके समान निर्मल आत्मा सुप्रतिष्ठित है ॥१७७॥ तुम्हारे इस आगमसे भी प्रतिज्ञावाक्य विरोधको प्राप्त होता है। यदि सर्वथा सर्वज्ञका अभाव होता तो तुम्हारे आगममे उसके स्थान आदिकी चर्चा क्यो की जाती ? और इस प्रकार साध्य अर्थके अनेकान्त हो जानेपर अर्थात् कथञ्चित् सिद्ध हो जानेपर वह हमारे लिए सिद्धसाधन है क्योकि यही तो हम कहते है ॥१७८॥ सर्वज्ञके अभावमे तुमने जो वक्तृत्व हेतु दिया है सो वक्तृत्व तीन प्रकारका होता है—सर्वथाअयुक्त-वक्तृत्व, युक्त वक्तृत्व और सामान्य वक्तृत्व। उनमेसे सर्वथाअयुक्तवक्तृत्व तो बनता नही, क्योकि प्रतिवादीके प्रति वह सिद्ध नहीं है। यदि स्वाद्वादसम्मत वक्तृत्व लेते हो तो तुम्हारा हेतु असिद्ध हो जाता है, क्योकि इससे निर्दोप वक्ताकी सिद्धि हो जाती है। दूसरे आपके जैमिनि आदिक वेदार्थ वक्ता हम लोगोको भी इष्ट नहीं है। वक्तृत्व हेतुसे देवदत्तके समान वे भी सदोष वक्ता सिद्ध होते है, इसलिए आपका यह वक्तृत्व हेतु विरुद्ध अर्थको सिद्ध करनेवाला होनेसे विरुद्ध हो जाता है ॥१७९-१८०॥ तथा प्रजापति आदिके द्वारा दिया गया यह उपदेश प्रमाण नहीं हो सकता, क्योकि वे भी देवदत्तादिके समान रागी द्वेषी ही हैं और ऐसे रागी द्वेषी पुरुषोसे जो आगम कहा जावेगा वह भी सदोष ही होगा अतः निर्दोष आगमका तुम्हारे यहाँ अभाव सिद्ध होता है ॥१८१॥ एकको जिसने जान लिया उसने सद्रूपसे अखिल पदार्थ जान लिये, अत सर्वज्ञके अभावकी सिद्धिमे जो तुमने दूसरे पुरुष का दृष्टान्त दिया है उसे तुमने ही साध्यविकल कह दिया है, क्योकि वह चूँकि एकको जानता है इसलिए वह सबको जानता है इसकी सिद्धि हो जाती है ॥१८२॥ दूसरे तुम्हारे मतसे सर्वथा युक्त वचन बोलनेवाला पुरुष दृष्टान्त रूपसे है नही, अत. आपको दृष्टान्तमे साध्यके अभावमे साधनका अभाव दिखलाना चाहिए। अर्थात् जिस प्रकार आप अन्वय दृष्टान्तमे अन्वयव्याप्ति करके घटित बतलाते है उसी प्रकार व्यतिरेक दृष्टान्तमे व्यतिरेकव्याप्ति भी घटित करके बतलानी चाहिए। तभी साध्यकी सिद्धि हो सकती है, अन्यथा नहीं ॥१८३॥ तथा आपके यहाँ सुनकर अदृष्ट वस्तुके

१. दिव्यब्रह्मपुरे म०। २. व्योमात्मा म०। ३. आगमेनानुमानेन ख०। ४. न शोचति ततोऽस्माक ख०। ५. तथैवमिति ज०। ६. सधर्मिणि म०, क०, ख०।

वक्तृत्वस्य विरोधो वा सर्वज्ञत्वेन क. समम् । सति सर्वज्ञतायोगे वक्ता हि सुतरां भवेत् ॥१८५॥
यो न वेत्ति स किं वक्ति वराको मतिदुर्विध. । व्यतिरेकाविनाभावो भावाच्च स्यान्न साधनम् ॥१८६॥
स्वपक्षोऽयमविद्येय तथा [1]रागादिक मलम् । क्षीयतेऽल क्वचिद्धेतोर्धातुहेममल यथा ॥१८७॥
अस्मदादिमते [2]धर्मा अपेक्षितविपर्यया । धर्मत्वादुत्पलद्रव्ये यथा नीलविशेषणम् ॥१८८॥
कर्त्रभावश्च, वेदस्य युक्त्यभावान्न युज्यते । कर्तृमत्त्वे तु ससाध्ये दृश्यवद्धेतुसभव' ॥१८९॥
[3]युक्तिश्च, [4]कर्तृमान् वेद. पदवाक्यादिरूपत । [5]विधेयप्रतिषेध्यार्थयुक्तत्वान्मैत्रकाव्यवत् ॥१९०॥
ब्रह्मप्रजापतिप्राय. पुरुषेभ्यश्च सभव । श्रूयते वेदशास्त्रस्य नापनेतु स शक्यते ॥१९१॥
स्यात्ते मतिर्न कर्तार प्रवक्तार. श्रुते स्मृताः । तथा नाम प्रवक्तारो रागद्वेषादिभिर्युता' ॥१९२॥

विषयमे वेदमे प्रमाणता आती है, अतः वक्तृत्व हेतुके बलसे सर्वज्ञके विषयमे दूषण उपस्थित करनेमें इसका आश्रय करना उचित नही है अर्थात् वेदार्थका प्रत्यक्ष ज्ञान न होनेसे उसके बलसे सर्वज्ञके अभावकी सिद्धि नही की जा सकती ॥१८४॥ फिर थोड़ा विचार तो करो कि सर्वज्ञताके साथ वक्तृत्वका क्या विरोध है ? मै तो कहता हूँ कि सर्वज्ञताका सुयोग मिलनेपर यह पुरुष अधिक वक्ता अपने आप हो जाता है ॥१८५॥ जो बेचारा स्वयं नही जानता है वह बुद्धिका दरिद्र दूसरोंके लिए क्या कह सकता है ? अर्थात् कुछ नहीं । इस प्रकार व्यतिरेक और अविनाभावका अभाव होनेसे वह साधक नहीं हो सकता ॥१८६॥ हमारा पक्ष तो यह है कि जिस प्रकार कि सुवर्णादिक धातुओका मल किसीमे बिलकुल ही क्षीण हो जाता है उसी प्रकार यह अविद्या अर्थात् अज्ञान और रागादिक मल कारण पाकर किसी पुरुषमे अत्यन्त क्षीण हो जाते है । जिसमे क्षीण हो जाते है वही सर्वज्ञ कहलाने लगता है ॥१८७॥ हमारे सिद्धान्तसे पदार्थोंके जो धर्म अर्थात् विशेषण है वे अपनेसे विरुद्ध धर्मकी अपेक्षा अवश्य रखते है जिस प्रकार कि उत्पल आदिके लिए जो नील विशेषण दिया जाता है उससे यह सिद्ध होता है कि कोई उत्पल ऐसा भी होता है जो कि नील नहीं है । इसी प्रकार पुरुषके लिए जो आपके यहाँ असर्वज्ञ विशेषण है वह सिद्ध करता है कि कोई पुरुष ऐसा भी है जो असर्वज्ञ नहीं है अर्थात् सर्वज्ञ है । यथार्थमे विशेषणकी सार्थकता सम्भव और व्यभिचार रहते ही होती है जैसा कि अन्यत्र कहा गया है 'सम्भवव्यभिचाराभ्या स्याद्विशेषणमर्थवत् । न शैत्येन न चौष्ण्येन वह्निः क्वापि विशिष्यते ।' अर्थात् सम्भव और व्यभिचारके कारण ही विशेषण सार्थक होता है । अग्निके लिए कहीं भी शीत विशेषण नही दिया जाता क्योकि वह सम्भव नही है इसी प्रकार कहीं भी उष्ण विशेषण नही दिया जाता क्योकि अग्नि सर्वत्र उष्ण ही होती है । इसी प्रकार तुम्हारे सिद्धान्तानुसार यदि पुरुष असर्वज्ञ ही होता तो उसके लिए असर्वज्ञ विशेषण देना निरर्थक था । उसकी सार्थकता तभी है जब किसी पुरुषको सर्वज्ञ माना जावे ॥१८८॥ 'वेदका कोई कर्ता नही है' यह बात युक्तिके अभावमें सिद्ध नहीं होती अर्थात् अकर्तृत्वकी सङ्गति नहीं बैठती जब कि 'वेदका कर्ता है' इस विषयमे अनेक हेतु सम्भव है । जिस प्रकार दृश्यमान घट पटादि पदार्थ सहेतुक होते है उसी प्रकार 'वेद सकर्ता है' इस विषयमे भी अनेक हेतु सम्भव हैं ॥१८९॥ चूँकि वेद पद और वाक्यादि रूप है तथा विधेय और प्रतिषेध्य अर्थसे युक्त है अत. कर्तृमान् है किसीके द्वारा बनाया गया है । जिस प्रकार मैत्रका काव्य पदवाक्य रूप होनेसे सकर्तृक है उसी प्रकार वेद भी पदवाक्य रूप होनेसे सकर्तृक है ॥१९०॥ इसके साथ लोकमे यह सुना जाता है कि वेदकी उत्पत्ति ब्रह्मा तथा प्रजापति आदि पुरुषोसे हुई है सो इस प्रसिद्धिका दूर किया जाना शक्य नहीं है ॥१९१॥ सम्भवतः तुम्हारा यह विचार हो कि ब्रह्मा आदि वेदके

१. यागादिक म० । २. धर्में आपेक्षित विपर्ययः म०, ख०, ब० । ३ युक्तेश्च म० । युक्तश्च ख० । ४. कृत्रिमो ख० । ५. विधेयप्रतिषेधार्थं म० ।

सर्वज्ञाश्च किं कुर्युरन्यथा ग्रन्थदेशनम् । अर्थस्य [1]चान्यथाख्यानं प्रमाणं [2]तन्मतं यतः ॥१९३॥
चातुर्विध्यं च यज्जात्या [3]तन्न युक्तमहेतुकम् । [4]ज्ञानं देहविशेषस्य [5]न च श्लोकाग्निसंभवात् ॥१९४॥
दृश्यते जातिभेदस्तु यत्र तत्रास्य संभवः । मनुष्यहस्तिवालेयगोवाजिप्रभृतौ यथा ॥१९५॥
न च जात्यन्तरस्थेन पुरुषेण स्त्रिया क्वचित् । क्रियते गर्भसंभूतिर्विप्रादीनां तु जायते ॥१९६॥
अश्वायां रासभेनास्ति संभवोऽस्येति चेन्न सः । नितान्तमन्यजातिस्थ [6]शफादितनुसाम्यतः ॥१९७॥
यदि वा तद्वदेव स्याद् द्वयोर्विसदृशः सुतः । नात्र दृष्टं तथा तस्माद् गुणैर्वर्णव्यवस्थितिः ॥१९८॥
मुखादिसंभवश्चापि ब्रह्मणो योऽभिधीयते । निर्हेतुः स्वगेहेऽसौ शोभते भाषमाणकः ॥१९९॥
ऋषिश्रृङ्गादिकानां च मानवानां प्रकीर्त्यते । ब्राह्मण्यं गुणयोगेन न तु तद्योनिसंभवात् ॥२००॥
बृहत्त्वाद् भगवान् ब्रह्मा [7]नाभेयस्तस्य ये जनाः । भक्ताः सन्तस्तु पश्यन्ति ब्राह्मणास्ते प्रकीर्तिताः ॥२०१॥
क्षत्रियास्तु क्षतत्राणाद् वैश्या शिल्पप्रवेशनात् । श्रुतात् सदागमाद् ये तु द्रुतास्ते शूद्रसंज्ञिताः ॥२०२॥

कर्ता नहीं है किन्तु प्रवक्ता अर्थात् प्रवचन करनेवाले है तो वे प्रवचनकर्ता आपके मतसे राग द्वेषादिसे युक्त ही ठहरेंगे ॥१९२॥ और यदि सर्वज्ञ है तो वे ग्रन्थका अन्यथा उपदेश कैसे देंगे और अन्यथा व्याख्यान कैसे करेंगे, क्योकि सर्वज्ञ होनेसे उनका मत प्रमाण है। इस प्रकार विचार करनेपर सर्वज्ञकी ही सिद्धि होती है ॥१९३॥

ब्राह्मण क्षत्रिय वैश्य और शूद्रके भेदसे जो जातिके चार भेद है वे विना हेतुके युक्तिसङ्गत नही है। यदि कहो कि वेदवाक्य और अग्निके संस्कारसे दूसरा जन्म होनेके कारण उनके देहविशेषका ज्ञान होता है सो यह कहना भी युक्त नही है ॥१९४॥ हाँ जहाँ-जहाँ जाति-भेद देखा जाता है वहाँ-वहाँ शरीरमे विशेषता अवश्य पाई जाती है जिस प्रकार कि मनुष्य, हाथी, गधा, गाय, घोडा आदिमे पाई जाती है ॥१९५॥ इसके सिवाय दूसरी बात यह है कि अन्य जातीय पुरुषके द्वारा अन्य जातीय स्त्रीमे गर्भोत्पत्ति नही देखी जाती परन्तु ब्राह्मणादिकमे देखी जाती है। इससे सिद्ध है कि ब्राह्मणादिकमे जातिवैचित्र्य नही है ॥१९६॥ इसके उत्तरमे यदि तुम कहो कि गधेके द्वारा घोड़ीमे गर्भोत्पत्ति देखी जाती है, इसलिए उक्त युक्ति ठीक नही हैं ? तो ऐसा कहना उचित नही है क्योंकि गधा और घोड़ा दोनो अत्यन्त भिन्न जातीय नही है क्योंकि एक खुर आदिकी अपेक्षा उनके शरीरमे समानता पाई जाती है ॥१९७॥ अथवा दोनोमे भिन्नजातीयता ही है यदि ऐसा पक्ष है तो दोनोकी जो सन्तान होगी वह विसदृश ही होगी जैसे कि गधा और घोड़ीके समागमसे जो सन्तान होगी वह न घोड़ा ही कहलावेगी और न गधा ही। किन्तु खच्चर नामकी धारक होगी किन्तु इस प्रकार सन्तानकी विसदृशता ब्राह्मणादिमे नही देखी जाती इससे सिद्ध होता है कि वर्णव्यवस्था गुणोके आधीन है जातिके आधीन नही है ॥१९८॥ इसके अतिरिक्त जो यह कहा जाता है कि ब्राह्मणकी उत्पत्ति ब्रह्माके मुखसे हुई है, क्षत्रियकी उत्पत्ति भुजासे हुई है, वैश्यकी उत्पत्ति जंघासे हुई है और शूद्रकी उत्पत्ति पैरसे हुई है सो ऐसा हेतुहीन कथन करनेवाला अपने घरमे ही शोभा देता है सर्वत्र नही ॥१९९॥ तथा ऋषिश्रृङ्ग आदि मानवोमे जो ब्राह्मणता कही जाती है वह गुणोके संयोगसे कही जाती है ब्राह्मण योनिमे उत्पन्न होनेसे नहीं कही जाती ॥२००॥ वास्तवमे समस्त गुणोके वृद्धिगत होनेके कारण भगवान् ऋषभदेव ब्रह्मा कहलाते है और जो सत्पुरुष उनके भक्त हैं वे ब्राह्मण कहे जाते है ॥२०१॥ क्षत अर्थात् विनाशसे त्राण अर्थात् रक्षा करनेके कारण क्षत्रिय कहलाते है, शिल्प अर्थात् वस्तुनिर्माण या व्यापारमे प्रवेश करनेसे लोग वैश्य कहे जाते है और

१. चान्यथाख्यानं ख०। अर्थस्येवान्यथाख्यानं ब०। २ तन्मयं क०, ब०। ३. तत्र म०। ४. ज्ञानं देह—म० 'ज' ज्ञानदेहस्य शेषस्य न च—ख०। ५. न श्लोकस्याग्निसंभवात् क०। ६. जातिस्थशफादि म०। ७ वृषभजिनेन्द्रः।

न जातिर्गर्हिता काचिद्‌गुणा कल्याणकारणम् । व्रतस्थमपि चाण्डाल त देवा ब्राह्मण विदु ॥२०३॥
विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिता' समदर्शिन ॥२०४॥
चातुर्वर्ण्यं यथान्यच्च चाण्डालादिविशेषणम् । सर्वमाचारभेदेन प्रसिद्धि भुवने गतम् ॥२०५॥
अपूर्वाख्यश्च धर्मो न व्यज्यते यागकर्मणा । नित्यत्वाद् व्योमवद् व्यक्तेरनित्यो वा घटादिवत् ॥२०६॥
फल रूपपरिच्छेद प्रदीपव्यक्त्यनन्तरम् । दृष्ट यथेह चापूर्वव्यक्तिकाल फल भवेत् ॥२०७॥
शास्त्रेण चोदितत्वाच्च वेदीमध्ये पशोर्वध । प्रत्यवायाय नेत्येतदयुक्त येन तच्छृणु ॥२०८॥
वेदागमस्य शास्त्रत्वमसिद्धं शास्त्रमुच्यते । तद्धि यन्मातृवच्छास्ति सर्वस्मै जगते हितम् ॥२०९॥
प्रायश्चित्त च निर्दोषे वस्तु कर्मणि नोचितम् । अत्र सूक्त ततो दुष्ट तच्चेदम'भिधीयते ॥२१०॥
राजान हन्त्यसौ सोम वीर वा नाकवासिनाम् । सोमेन यो यजेत्तस्य दक्षिणा द्वादश शतम् ॥२११॥
शोधय यत्र देवाना शत वीर प्रतर्पणम् । प्राणाना दश कुर्वन्ति यैकादश्यात्मनस्तु सा ॥२१२॥
द्वादशी दक्षिणा या तु दक्षिणा सैव केवलम् । इतरासा च दोषाणा व्यापारो विनिवर्तने ॥२१३॥

श्रुत अर्थात् प्रशस्त आगमसे जो दूर रहते है वे शूद्र कहलाते है ॥२०२॥ कोई भी जाति निन्दनीय नही है, गुण ही कल्याण करनेवाले है। यही कारण है कि व्रत धारण करनेवाले चाण्डालको भी गणधरादि देव ब्राह्मण कहते है ॥२०३॥ विद्या और विनयसे सम्पन्न ब्राह्मण, गाय, हाथी, कुत्ता और चाण्डाल आदिके विषयमे जो समदर्शी है वे पण्डित कहलाते है अथवा जो पण्डितजन हैं वे इन सबमे समदर्शी होते है ॥२०४॥ इस प्रकार ब्राह्मणादिक चार वर्ण और चाण्डाल आदि विशेषणोका जितना अन्य वर्णन है वह सब आचारके भेदसे ही संसारमे प्रसिद्धिको प्राप्त हुआ है ॥२०५॥

इसके पूर्व तुमने कहा था कि यज्ञसे अपूर्व अथवा अदृष्ट नामका धर्म व्यक्त होता है सो यह कहना ठीक नही है क्योकि अपूर्व धर्म तो आकाशके समान नित्य है वह कैसे व्यक्त होगा ? और यदि व्यक्त होता ही है तो फिर वह नित्य न रहकर घटादिके समान अनित्य होगा ॥२०६॥ जिस प्रकार दीपकके व्यक्त होनेके बाद रूपका ज्ञान उसका फल होता है उसी प्रकार स्वर्गादिकी प्राप्ति रूपी फल भी अपूर्वधर्मके व्यक्त होनेके बाद ही होना चाहिए पर ऐसा नही है ॥२०७॥

तुमने कहा है कि वेदीके मध्यमे पशुओका जो वध होता है वह शास्त्र निरूपित होनेसे पापका कारण नहीं है सो ऐसा कहना अयुक्त है उसका कारण सुनो ॥२०८॥ सर्वप्रथम तो वेद शास्त्र है यही बात असिद्ध है क्योंकि शास्त्र वह कहलाता है जो माताके समान समस्त संसारके लिए हितका उपदेश दे ॥२०९॥ जो कार्य निर्दोष होता है उसमे प्रायश्चित्तका निरूपण करना उचित नहीं है परन्तु इस याज्ञिक हिंसामे प्रायश्चित्त कहा गया है इसलिए वह सदोष है। उस प्रायश्चित्तका कुछ वर्णन यहाँ किया जाता है ॥२१०॥ जो सोमयज्ञमे सोम अर्थात् चन्द्रमाके प्रतीक रूप सोम लतासे यज्ञ करता है जिसका तात्पर्य होता है कि वह देवोके वीर सोम राजाका हनन करता है उसके इस यज्ञकी दक्षिणा एकसौ बारह गौ है ॥२११॥ इन एकसौ बारह दक्षिणाओमेसे सौ दक्षिणाएँ देवोके वीर सोमका शोधन करती है, दस दक्षिणाएँ प्राणोका तर्पण करती है, ग्यारहवी दक्षिणा आत्माके लिए है और जो बारहवी दक्षिणा है वह केवल दक्षिणा ही

१. -मभिधीयते म० । २. 'अस्माक सोमो राजा' इति श्रुत्या विशेषणविशेष्यभाव' । ३. द्वादशा क० । 'गवा शत द्वादश वाऽतिक्रामति' का० श्रौ० १०।२।१० । 'यथारम्भ द्वादश द्वादशाद्येभ्यः षड् षट् द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्र इतरेभ्यः ।' कात्यायनश्रौतसूत्र १०।२।२४ । ४ शुभा क० ।

[1]तथा च यत्पशुर्मायु[2]मकृतोरोऽवाहना (?)। पादाभ्यामेनसस्तस्माद्विश्वस्मान्मुञ्च[3]त्वनल[4] ॥२१४॥
एवमादि च बह्वेव गदितं दोषनोदनम्। आगमेन ततोऽन्येन व्यभिचारोऽत्र विद्यते ॥२१५॥
पशोर्मध्ये वधो वेद्या प्रत्यवायाय कल्प्यते। तस्य दुःखनिमित्तत्वाद् यथा व्याधकृतो वधः ॥२१६॥
स्वयंभुवा च लोकस्य सर्गो नेयर्ति सत्यताम्। विचार्यमाणमेतद्धि पुराणतृणदुर्बलम् ॥२१७॥
कृतार्थो यद्यसौ सृष्टो तस्याः किं स्यात्प्रयोजनम्। क्रीडेति चेत्कृतार्थोऽसौ न भवत्यर्भको यथा ॥२१८॥
साक्षादेव रतिं कस्मान्न सृजेत् स विनेतरैः। सृजतो वास्य के भावा व्रजेयुः करणादिताम् ॥२१९॥
किञ्चोपकारिणः केचित् केचिद्वास्यापकारिणः। सुखिनः कुरुते कांश्चिद् येन कांश्चिच्च दुःखिनः ॥२२०॥
अथ [5]नैव कृतार्थोऽसावेव तर्हि स नेश्वरः। कर्मणा परतन्त्रत्वाद् यथा कश्चिद् भवद्विधः ॥२२१॥
सुबुद्धिनरयत्नोत्थसंस्थानाः कमलादयः। विशिष्टाकारयुक्तत्वाद् रथवेश्मादयो यथा ॥२२२॥
यद्बुद्धिपूर्वका एते भविष्यन्ति स ईश्वरः। इत्येतच्च न सम्यक्त्वं व्रजत्येकान्तवादिनः ॥२२३॥

है। अन्य दक्षिणाओंका व्यापार तो दोषोंके निवारण करनेमें होता है ॥२१२-१३॥ तथा पशु यज्ञमें यदि पशु यज्ञके समय शब्द करे या अपने अगले दोनों पैरोंसे छाती पीटे तो हे अनल! तुम मुझे इससे होनेवाले समस्त दोषसे मुक्त करो ॥२१४॥ इत्यादि रूपसे जो दोषोंके बहुतसे प्रायश्चित्त कहे गये हैं उनके विषयमें अन्य आगमसे प्रकृतमें विरोध दिखाई देता है ॥२१५॥

जिस प्रकार व्याधके द्वारा किया हुआ वध दुःखका कारण होनेसे पापबन्धका निमित्त है उसी प्रकार वेदीके बीचमें पशुका जो वध होता है वह भी उसे दुःखका कारण होनेसे पापबन्धका ही निमित्त है ॥२१६॥

'ब्रह्माके द्वारा लोककी सृष्टि हुई है' यह कहना भी सत्य नहीं है क्योंकि विचार करनेपर ऐसा कथन जीर्णतृणके समान निस्सार जान पड़ता है ॥२१७॥ हम पूछते हैं कि जब ब्रह्मा कृतकृत्य है तो उसे सृष्टिकी रचना करनेसे क्या प्रयोजन है? कहो कि क्रीडावश वह सृष्टिकी रचना करता है तो फिर कृतकृत्य कहाँ रहा? जिस प्रकार क्रीडाका अभिलाषी बालक अकृतकृत्य है उसी प्रकार क्रीड़ाका अभिलाषी ब्रह्मा भी अकृतकृत्य कहलायगा ॥२१८॥ फिर ब्रह्मा अन्य पदार्थोंके बिना स्वयं ही रतिको क्यों नहीं प्राप्त हो जाता? जिससे सृष्टि निर्माणकी कल्पना करनी पड़ी। इसके सिवाय एक प्रश्न यह भी उठता है कि जब ब्रह्मा सृष्टिकी रचना करता है तो इसके सहायक करण अधिकरण आदि कौनसे पदार्थ हैं? ॥२१९॥ फिर संसारमें सब लोग एक सदृश नहीं हैं, कोई सुखी देखे जाते हैं और कोई दुखी देखे जाते हैं। इससे यह मानना पड़ेगा कि कोई लोग तो ब्रह्माके उपकारी हैं और कोई अपकारी हैं। जो उपकारी हैं उन्हें यह सुखी करता है और कोई अपकारी हैं उन्हें यह दुःखी करता है ॥२२०॥ इस सब विसंवादसे बचनेके लिए यदि यह माना जाय कि ईश्वर कृतकृत्य नहीं है तो वह कर्मोंके परतन्त्र होनेके कारण ईश्वर नहीं कहलावेगा जिस प्रकार कि आप कर्मोंके परतन्त्र होनेके कारण ईश्वर नहीं हैं ॥२२१॥ जिस प्रकार रथ मकान आदि पदार्थ विशिष्ट आकारसे सहित होनेके कारण किसी बुद्धिमान् मनुष्यके प्रयत्नसे निर्मित माने जाते हैं उसी प्रकार कमल आदि पदार्थ भी विशिष्ट आकारसे युक्त होनेके कारण किसी बुद्धिमान् मनुष्यके प्रयत्नसे रचित होना चाहिए। "जिसकी बुद्धिसे इन सबकी रचना होती है वही ईश्वर है" इस अनुमानसे सृष्टिकर्ता ईश्वरकी सिद्धि होती है सो यह कहना ठीक नहीं है क्योंकि एकान्तवादीका उक्त अनुमान समीचीनताको प्राप्त नहीं

---

१. तथापि ख०। २ माय म०। ३. मुञ्चातनलः म०। ४. नल क०। 'यत्पशुर्मायुमकृतोरो वा पद्भिराहते। अग्निर्मा तस्मादेनसो विश्वान् मुञ्चत्व् हस.। (कात्यायन श्रौतसूत्र २५।९)।१३। ५. च नैव ख०।

सुबुद्धिनरयत्नोत्था सर्वथा न रथादय । व्यवस्थित यतस्तत्र द्रव्य चैवोपजन्यते ।।२२४।।
क्लेशादियुक्तता चास्य व्यश्नुते तक्षकादिवत् । नामकर्म च मैव स्यादीश्वरो यस्त्वयेष्यते ।।२२५।।
विशिष्टाकारसद्वर्माग्वरस्य पुनर्वपु । ईश्वरान्तरयत्नोत्थमिष्यतेऽतो न निश्चय ।।२२६।।
अपरेश्वरयत्नोत्थमथैतदपि कल्प्यते । सत्येवमनवस्था स्यान्न च स्वस्याभिसर्जनम् ।।२२७।।
शरीरमथ नेवास्य विद्यते नैष सर्जक । अमूर्तत्वाद् यथाकाश तक्षवद् वा सविग्रह ।।२२८।।
यजनार्थं च सृष्टाना पशूना वाहनादिकम् । क्रियमाण विरुद्धयेत तद्धि स्तेय प्रकल्प्यते ।।२२९।।
अत कर्मभिरेवेद रागादिभिरुपार्जितै । वैचित्र्य व्यश्नुते विश्वमनादौ भवसागरे ।।२३०।।
कर्म किं पूर्वमाहोस्विच्छरीरमिति नेदश । युक्त प्रश्नो भवेऽनादौ बीजपादपयोर्यथा ।।२३१।।
अन्तोऽपि तर्हि न स्याच्चेत्तन्न बीजविनाशत । दृष्टा हि पादपोद्भूतेरसभूतिरिद तथा ।।२३२।।
तस्माद् द्विष्टेन केनापि प्राणिना पापकर्मणा । कुग्रन्थरचना कृत्वा यज्ञकर्म प्रवर्तितम् ।।२३३।।
सप्राप्तोऽसि कुले जन्म बुद्धिमानसि मानवः । निवर्तस्व तत पापादेतस्माद् व्याधकर्मण ।।२३४।।
यदि प्राणिवध स्वर्गसप्राप्तौ कारण भवेत् । तत शून्यो भवेदेष लोकोऽल्पैरेव वासरै ।।२३५।।

---

है ।।२२७–२२३।। विचार करनेपर जान पड़ता है कि रथ आदि जितने पदार्थ हैं वे सब एकान्तसे बुद्धिमान् मनुष्यके प्रयत्नसे ही उत्पन्न होते हैं ऐसी बात नहीं है । क्योंकि रथ आदि वस्तुओंमें जो लकडी आदि पदार्थ अवस्थित है वही रथादि रूप उत्पन्न होता है ।।२२४।। जिस प्रकार रथ आदिके बनानेमें बढई आदिको क्लेश उठाना पडता है उसी प्रकार ईश्वरको भी सृष्टिके बनानेमें क्लेश उठाना पड़ता होगा । इस तरह उसके सुखी होनेमें बाधा प्रतीत होती है । यथार्थमें तुम जिसे ईश्वर कहते हो वह नाम कर्म है ।।२२५।। एक प्रश्न यह भी उठता है कि ईश्वर सशरीर है या अशरीर ? यदि अशरीर है तो उससे मूर्तिक पदार्थोंका निर्माण सम्भव नहीं है । यदि सशरीर है तो उसका वह विशिष्टाकारवाला शरीर किसके द्वारा रचा गया है ? यदि स्वयं रचा गया है तो फिर दूसरे पदार्थ स्वय क्यों नहीं रचे जाते ? यदि यह माना जाय कि वह दूसरे ईश्वरके यत्नसे रचा गया है तो फिर यह प्रश्न उपस्थित होगा कि उस दूसरे ईश्वरका शरीर किसने रचा ? इस तरह अनवस्था दोष उत्पन्न होगा । इस विसंवादसे बचनेके लिए यदि यह माना जाय कि ईश्वरके शरीर है ही नहीं तो फिर अमूर्तिक होनेसे वह सृष्टिका रचयिता कैसे होगा ? जिस प्रकार अमूर्तिक होनेसे आकाश सृष्टिका कर्ता नहीं है उसी प्रकार अमूर्तिक होनेसे ईश्वर भी सृष्टिका कर्ता नहीं हो सकता । यदि बढ़ईके समान ईश्वरको कर्ता माना जाय तो वह सशरीर होगा न कि अशरीर ।।२२६–२२८।।

और तुमने जो कहा कि ब्रह्माने पशुओंकी सृष्टि यज्ञके लिए ही की है सो यदि यह सत्य है तो फिर पशुओंसे बोझा ढोना आदि काम क्यों लिया जाता ? इसमें विरोध आता है विरोध ही नहीं यह तो चोरी कहलावेगी ।।२२९।। इससे यह सिद्ध होता है कि रागादि भावोंसे उपार्जित कर्मोंके कारण ही समस्त लोग अनादि संसारसागरमें विचित्र दशाका अनुभव करते है ।।२३०।। कर्म पहले होता है कि शरीर पहले होता है ? ऐसा प्रश्न करना ठीक नहीं है क्योंकि इन दोनोंका सम्बन्ध बीज और वृक्षके समान अनादि कालसे चला आ रहा है ।।२३१।। कर्म और शरीरका सम्बन्ध अनादि है इसलिए इसका कभी अन्त नहीं होगा ऐसा कहना भी उचित नहीं है क्योंकि जिस प्रकार बीजके नष्ट हो जानेसे वृक्षकी उत्पत्तिका अभाव देखा जाता है उसी प्रकार कर्मके नष्ट होनेसे शरीरका अभाव भी देखा जाता है ।।२३२।। इसलिए पाप कार्य करनेवाले किसी द्वेषी पुरुषने खोटे शास्त्रकी रचनाकर इस यज्ञ कार्यको प्रचलित किया है ।।२३३।। तुम उच्च कुलमें उत्पन्न हुए हो और बुद्धिमान् मनुष्य हो इसलिए शिकारियोंके कार्यके समान इस पाप कार्यसे विरत होओ ।।२३४।। यदि प्राणियोंका वध स्वर्ग प्राप्तिका कारण होता तो थोड़े ही दिनोंमें

प्राप्तेन वापि किं तेन च्युतिर्यस्मात् पुनर्भवेत् । दुःखेन च समासक्तं सुखं स्वल्पं च बाह्यजम् ॥२३६॥
यदि प्राणिवधाद् ब्रह्मलोकं गच्छन्ति मानवाः । तस्यानुमननात् कस्मात् पतितो नरके वसुः ॥२३७॥
उत्तिष्ठ भो वसो स्वर्गं व्रजेति कृतनिस्वनैः । सूत्रकण्ठैर्दुराचारैः स्वपराशुभकारिभिः ॥२३८॥
स्वपक्षानुमतिप्रीतैरुद्घुष्याद्यापि[1] यद्द्विजैः । आहुतिः क्षिप्यते वह्नौ नितान्तं क्रूरमानसैः ॥२३९॥
पिष्टेनापि पशुं कृत्वा निघ्नन्तो नरकं गताः । सङ्कल्पादशुभात् कैव कथेतरपशोर्वधे ॥२४०॥
यज्ञकल्पनया नैव किञ्चिदस्ति प्रयोजनम् । अथापि स्यात्तथाप्येव न कर्तव्या बुधोत्तमैः ॥२४१॥
यजमानो भवेदात्मा शरीरं[2] तु वितर्दिका । पुरोडाशस्तु सन्तोषः परित्यागस्तथा हविः ॥२४२॥
मूर्धजा एव दर्भाणि दक्षिणा प्राणिरक्षणम् । प्राणायामः सितं ध्यानं यस्य सिद्धपदं फलम् ॥२४३॥
सत्यं यूपस्तपो[3] वह्निर्मानसं चपलः पशुः । समिधश्च हृषीकाणि धर्मयज्ञोऽयमुच्यते ॥२४४॥
यज्ञेन क्रियते तृप्तिर्देवानामिति चेन्मतिः । [4]तत्र तेषां यतोऽस्त्येव दिव्यमन्नं यथेप्सितम्[5] ॥२४५॥
स्पर्शतो रसतो रूपाद्गन्धाद्येषां मनोहरम् । अन्नमस्ति किमेतेन तेषां मांसादिवस्तुना ॥२४६॥
शुक्रशोणितसम्भूतममेध्यं कृमिसम्भवम् । दुर्गन्धदर्शनं मांसं भक्षयन्ति कथं सुराः ॥२४७॥
त्रयोऽग्नयो वपुष्येव ज्ञानदर्शनजाठराः । दक्षिणाग्न्यादिविज्ञानं कार्यं तेष्वेव सूरिभिः ॥२४८॥

यह संसार शून्य हो जाता ॥२३५॥ और फिर उस स्वर्गके प्राप्त होनेसे भी क्या लाभ है ? जिससे फिर च्युत होना पड़ता है । यथार्थमे बाह्य पदार्थोंसे जो सुख उत्पन्न होता है वह दुःखसे मिला हुआ तथा परिमाणमे थोड़ा होता है ॥२३६॥ यदि प्राणियोंका वध करनेसे मनुष्य स्वर्ग जाते है तो फिर प्राणिवधकी अनुमति मात्रसे वसु नरकमे क्यो पड़ा ? ॥२३७॥ वसु नरक गया है इसमे प्रमाण यह है कि दुराचारी, निज और परका अकल्याण करनेवाले दुष्टचेता ब्राह्मण, अपने पक्षके समर्थनसे प्रसन्न हो आज भी 'हे वसो ! उठो, स्वर्ग जाओ' इस प्रकार जोर-जोरसे चिल्लाते हुए अग्निमे आहुति डालते है । यदि वसु नरक नहीं गया होता तो उक्त मन्त्र द्वारा आहुति देनेकी क्या आवश्यकता थी ? ॥२३८-२३९॥ चूर्णके द्वारा पशु बनाकर उसका घात करनेवाले लोग भी नरक गये हैं फिर अशुभ सकल्पसे साक्षात् अन्य पशुके वध करनेवाले लोगोकी तो कथा ही क्या है ? ॥२४०॥ प्रथम तो यज्ञकी कल्पनासे कोई प्रयोजन नहीं है अर्थात् यज्ञकी कल्पना करना ही व्यर्थ है दूसरे यदि कल्पना करना ही है तो विद्वानोंको इस प्रकारके हिंसायज्ञकी कल्पना नहीं करनी चाहिए ॥२४१॥ उन्हें धर्मयज्ञ ही करना चाहिए । आत्मा यजमान है, शरीर वेदी है, संतोष साकल्य है, त्याग होम है, मस्तकके बाल कुशा हैं, प्राणियोंकी रक्षा दक्षिणा है, शुक्लध्यान प्राणायाम है, सिद्धपदकी प्राप्ति होना फल है, सत्य बोलना स्तम्भ है, तप अग्नि है, चञ्चल मन पशु है और इन्द्रियाँ समिधाएँ हैं । इन सबसे यज्ञ करना चाहिए यही धर्मयज्ञ कहलाता है ॥२४२-२४४॥ यज्ञसे देवोको तृप्ति होती है यदि ऐसा तुम्हारा ख्याल है तो यह ठीक नहीं है क्योंकि देवोको तो मनचाहा दिव्य अन्न उपलब्ध है ॥२४५॥ जिन्हें स्पर्श, रस, गन्ध और रूपकी अपेक्षा मनोहर आहार प्राप्त होता है उन्हें इस मासादि घृणित वस्तुसे क्या प्रयोजन है ? ॥२४६॥ जो रज और वीर्यसे उत्पन्न है, अपवित्र है, कीड़ोंका उत्पत्तिस्थान है तथा जिसकी गन्ध और रूप दोनो ही अत्यन्त कुत्सित हैं ऐसे मासको देव लोग किस प्रकार खाते हैं अर्थात् किसी प्रकार नही खाते ॥२४७॥ ज्ञानाग्नि, दर्शनाग्नि और जठराग्नि इस तरह तीन अग्नियाँ शरीरमे सदा विद्यमान रहती हैं; विद्वानोंको उन्हींमे दक्षिणाग्नि, गार्हपत्याग्नि और आहवनीयाग्नि इन तीन अग्नियोंकी स्थापना करना

१. -मतप्रीतै- म० । २. शरीरस्तु वितर्दिकः म० । ३. यूपस्ततो म० । ४. तत्र म० । ५. यथेक्षितम् म० ।

सुरा यदि हुतेनाग्नौ तृप्तिं यान्ति बुभुक्षिता । [1]स्वतो नाम ततो देवास्तृप्तिं किमिति नागता ॥२४९॥
ब्रह्मलोकात्किलागत्य दुर्गन्धं योनिजं वपुः । चखाद ध्वाङ्क्षगोमायुसारमेयसमो भवेत् ॥२५०॥
लालाक्लिन्ने मुखे क्षिप्तं कथं वान्नं द्विजातिभिः । विट्पूर्णकुक्षिसंप्राप्तं तर्पयेत् स्वर्गवासिनः ॥२५१॥
एवं ततो गदन्तं तमनेकान्तदिवाकरम् । देवर्षितेजसा दीप्तं शास्त्रार्थज्ञानजन्मना ॥२५२॥
ऋत्विक्पराजयोद्भूतक्रोधसंभारकम्पिताः । वेदार्थाभ्यसनात्यन्तदयानिर्मुक्तमानसाः ॥२५३॥
आशीविषसमाशेषदृष्टतारकलोचनाः । आवृत्य सर्वतः क्षुब्धाः कृत्वा कलकलं महत् ॥२५४॥
बद्ध्वा परिकरं पापाः सूत्रकण्ठाः समुद्धताः । हस्तपादादिभिर्हन्तुं वायसा इव कौशिकम् ॥२५५॥
नारदोऽपि ततः कांश्चिन्मुष्टिमुद्गरताडनैः । पार्ष्णिनिर्घातपातैश्च कांश्चिदन्यान् यथागतान् ॥२५६॥
शस्त्रायमाणैर्निःशेषैर्गात्रैरेव सुदुःसहैः । द्विजान् जघान कुर्वाणो रेचकं भ्रमणं बहून् ॥२५७॥
अथ घ्नन् स चिरात्खिन्नः क्रूरैर्बहुभिरावृतः । गृहीतः सर्वगात्रेषु भजन्नाकुलतां पराम् ॥२५८॥
पक्षीव निबिडं बद्धः पाशकैरतिदुःखितः । वियदुत्पतनाशक्तः सम्प्राप्तः प्राणसंशयम् ॥२५९॥
एतस्मिन्नन्तरे दूतो [2]दाशवक्त्रः समागतः । हन्यमानमिमं दृष्ट्वा प्रत्यभिज्ञाय नारदम् ॥२६०॥
निवृत्य त्वरयात्यन्तमेव रावणमब्रवीत् । यस्यान्तिकं महाराज दूतोऽहं प्रेषितस्त्वया ॥२६१॥

---

चाहिए ॥२४८॥ यदि भूखे देव होम किये गये पदार्थसे तृप्तिको प्राप्त होते हैं तो वे स्वयं ही क्यों नहीं तृप्तिको प्राप्त हो जाते, मनुष्योंके होमको माध्यम क्यों बनाते हैं ? ॥२४९॥ जो देव ब्रह्मलोकसे आकर योनिसे उत्पन्न होनेवाले दुर्गन्ध युक्त शरीरको खाता है वह कौए, शृगाल और कुत्तेके समान है ॥२५०॥

इसके सिवाय तुम श्राद्धतर्पण आदिके द्वारा मृत व्यक्तियोंकी तृप्ति मानते हो सो जरा विचार तो करो । ब्राह्मण लोग लारसे भीगे हुए अपने मुखमें जो अन्न रखते हैं वह मलसे भरे पेटमें जाकर पहुँचता है । ऐसा अन्न स्वर्गवासी देवताओंको तृप्त कैसे करता होगा ? ॥२५१॥ इस प्रकार शास्त्रोंके अर्थज्ञानसे उत्पन्न, देवर्षिके तेजसे देदीप्यमान, उक्त कथन करते हुए नारदजी अनेकान्तके सूर्यके समान जान पड़ते थे ॥२५२॥ ब्राह्मणोंने उन्हें सब ओरसे घेर लिया । उस समय वे ब्राह्मण याजककी पराजयसे उत्पन्न क्रोधके भारसे कम्पित थे, वेदार्थका अभ्यास करनेके कारण उनके हृदय दयासे रहित थे ॥२५३॥ सर्पके समान उनकी आँखोंकी पुतलियाँ सबको दिख रही थीं और क्षुभित हो सब ओरसे बड़ा भारी कल-कल कर रहे थे ॥२५३–२५४॥ वे सब ब्राह्मण कमर कसकर हस्तपादादिकसे नारदको मारनेके लिए ठीक उस तरह तैयार हो गये जिस प्रकार कि कौए उल्लूको मारनेके लिए तैयार हो जाते हैं ॥२५५॥ तदनन्तर नारद भी उनमेंसे कितने ही लोगोंको मुट्ठियोंरूपी मुद्गरोंकी मारसे और कितने ही लोगोंको एड़ीरूपी वज्रपातसे मारने लगा ॥२५६॥ उस समय नारदके समस्त अवयव अत्यन्त दुःसह शस्त्रोंके समान जान पड़ते थे उन सबसे उसने घूम घूमकर बहुतसे ब्राह्मणोंको मारा ॥२५७॥ अथानन्तर चिरकाल तक ब्राह्मणोंको मारता हुआ खेद खिन्न हो गया उसे बहुतसे दुष्ट ब्राह्मणोंने घेर लिया, वे उसे समस्त शरीरमें मारने लगे जिससे वह परम आकुलताको प्राप्त हुआ ॥२५८॥ जिस प्रकार जालसे कसकर बँधा पक्षी अत्यन्त दुखी हो जाता है और आकाशमें उड़नेमें असमर्थ होता हुआ प्राणोंके संशयको प्राप्त होता है ठीक वही दशा उस समय नारदकी थी ॥२५९॥

इसी बीचमें रावणका दूत आ रहा था सो उसने पिटते हुए नारदको देखकर पहिचान लिया ॥२६०॥ उसने शीघ्र ही लौटकर रावणसे इस प्रकार कहा कि हे महाराज ! मुझ दूतको आपने जिसके पास भेजा था वह अकेला ही राजाके देखते हुए बहुतसे दुष्ट ब्राह्मणोंके द्वारा उस

---

१. श्वेतो म० । स्वेनो क० । स्वेतो ब० । २. रावणसम्बन्धी ।

राज्ञ पश्यत एवास्य नारदो बहुभिर्द्विजै । एकाकी हन्यते क्रूरै. शलभैरिव पन्नग ॥२६२॥
अशक्तस्तत्र राजानमह दृष्ट्वा भयार्दितः । निवेदयितुमायातो वृत्तान्तमिति दारुणम् ॥२६३॥
तमुदन्तं तत श्रुत्वा रावण कोपमागत. । [2]वितानधरणी गन्तु प्रवृत्तो जविवाहन ॥२६४॥
समीररहसश्चास्य पुर सम्प्रस्थिता नरा । परिवार[3]विनिर्मुक्तखड्गा सूत्कारभासिता[4]. २६५॥
निमेषेण मखक्षोणी प्राप्ता दर्शनमात्रत । व्यमोचयन्[5] दयायुक्ता[6] नारद शत्रुपञ्जरात् ॥२६६॥
निस्त्रिशनरवृन्दैश्च [7]रक्षिता पशुसहति । मोचिता[8] तै सहुकार चक्षुर्निक्षेपमात्रत ॥२६७॥
भज्यमानैस्ततो यूपैस्ताड्यमानैर्द्विजातिभिः । पशुभिर्मुच्यमानैश्च जात साराविण[9] महत् ॥२६८॥
अब्रह्मण्यकृतारावास्ताड्यन्ते तावदेकश । यावन्निपतिता भूमौ विश्वे[10] निस्पन्दविग्रहा. ॥२६९॥
भटैश्च [11]पर्यचोद्यन्त यथा [12]वो दु.खमप्रियम् । सुख च दयित[13] तद्वत्पशूनामपि दृश्यताम् ॥२७०॥
यथा हि जीवित कान्त त्रैलोक्यस्यापि भावत । [14]भवतात् सर्वजन्तूनामियमेव[15] व्यवस्थिति. ॥२७१॥
भवता ताड्यमानानां कष्टा तावदिय व्यथा । शस्त्रैर्विशस्यमानाना पशूना तु किमुच्यताम् ॥२७२॥
दुष्कृतस्याधुना पापा. सहध्व फलमागतम् । येन नो पुनरप्येव कुरुध्व पुरुषाधमाः ॥२७३॥
सुत्रामापि सम देवैर्यद्यायाति तथापि न । अस्मत्स्वामिनि व क्रुद्धे जायते परिरक्षणम् ॥२७४॥
अश्वैर्मतङ्गजैस्तल्स्थै रथस्थैर्गगनस्थितै. । भूमिस्थै. पुरुषैरब्रैराहन्यन्ते द्विजातय' ॥२७५॥

---

तरह मारा जा रहा है जिस प्रकार कि बहुतसे दुष्ट पतगे किसी सॉपको मारते हैं ॥२६१॥-२६२॥ मै शक्तिहीन था और राजाको वहाँ देख भयसे पीड़ित हो गया इसलिए यह दारुण वृत्तान्त आपसे कहनेके लिए दौड़ा आया हूँ ॥२६३॥ यह समाचार सुनते ही रावण क्रोधको प्राप्त हुआ और वेगशाली वाहनपर सवार हो यज्ञभूमिमे जानेके लिए तत्पर हुआ ॥२६४॥ वायुके समान जिनका वेग था, जो म्यानोसे निकली हुई नगी तलवारे हाथमें लिये थे और सू सू शब्दसे सुशोभित थे ऐसे रावणके सिपाही पहले ही चल दिये थे ॥२६५॥ वे पलभरमे यज्ञभूमिमे जा पहुँचे । वहाँ जाकर उन दयालु पुरुषोने दृष्टिमात्रसे नारदको शत्रुरूपी पिंजड़ेसे मुक्त करा दिया ॥२६६॥ क्रूर मनुष्य जिस पशुओके झुण्डकी रक्षा कर रहे थे उसे उन्होने ऑखके इशारे मात्रसे छुड़वा दिया ॥२६७॥ यज्ञके खम्भे तोड़ डाले, ब्राह्मणोको पिटाई लगाई और पशुओको बन्धनसे छोड दिया । इन सब कारणोसे वहाँ बड़ा भारी कोलाहल मच गया ॥२६८॥ 'अब्रह्मण्यं' 'अब्रह्मण्यं' की रट लगानेवाले एक-एक ब्राह्मणको इतना पीटा कि जब तक वे निश्चेष्ट शरीर होकर भूमिपर गिर न पड़े तब तक पीटते ही गये ॥२६९॥ रावणके योद्धाओंने उन ब्राह्मणोसे पूछा कि जिस प्रकार आप लोगोको दु'ख अप्रिय लगता है और सुख प्रिय जान पड़ता है उसी तरह इन पशुओको भी लगता होगा ॥२७०॥ जिस प्रकार तीन लोकके समस्त जीवोको हृदयसे अपना जीवन अच्छा लगता है उसी प्रकार इन समस्त जन्तुओकी भी व्यवस्था जाननी चाहिए ॥२७१॥ आप लोगोको जो पिटाई लगी है उससे आप लोगोकी यह कष्टकारी अवस्था हुई है फिर शस्त्रोसे मारे गये पशुओंकी क्या दशा होती होगी सो आप ही कहो ॥२७२॥ अरे पापी नीच पुरुषो ! इस समय तुम्हारे पापका जो फल प्राप्त हुआ है उसे सहन करो जिससे फिर ऐसा न करोगे ॥२७३॥ देवोके साथ इन्द्र भी यहाँ आ जाय तो भी हमारे स्वामीके कुपित रहते तुम लोगोंकी रक्षा नहीं हो सकती ॥२७४॥ हाथी, घोड़े, रथ, आकाश और पृथिवीपर जो भी जहाँ स्थित था वह

---

१. पश्यतः सत । २. यज्ञभूमिम् । ३. कोशबहिर्गतकृपाणाः । ४. . भासिनः म० । ५. विमोचयन् म० । ६. दयायुक्तो म० । ७. वधाय धृता रक्षिताः पशुसहतीः म० । ८. मोचितास्तैः म० । ९. कलकलम् । १०. विप्राः म०, ब० । ११. पर्यबोच्यन्त क० । १२. युष्माकम् । १३. प्रियम् । १४. भवता क०, ख०, ब० म० । १५. -जन्तूना नियमे च व्यवस्थितिः ख० ।

अब्रह्मण्यमहो राजन् हा मातर्यज्ञपालये[1] । [2]जीवामि मुञ्च मा नैव करिष्यामि पुनर्भटा ॥२७६॥
एवंविधमलं दीनं विलपन्तो विचेष्टितम् । गण्डूपदा इव प्राप्ता समताड्यन्त ते भटैः ॥२७७॥
हन्यमानं ततो दृष्ट्वा [3]सूत्रकण्ठकदम्बकम् । [4]सहस्रकिरणग्राहमित्यवोचत नारदः ॥२७८॥
कल्याणमस्तु ते राजन् येनाहं मोचितस्त्वया । हन्यमानः [5]इमैर्व्याधैः सूत्रकण्ठैर्दुरात्मभिः ॥२७९॥
अवश्यमेवमेतेन भवितव्यं यतस्ततः । [6]कुर्वेतेषां दयां क्षुद्रा जीवन्तु प्रियजीविताः ॥२८०॥
[7]ज्ञातं किं न तथोत्पन्ना कुपाखण्डा यथा नृप । शृण्वस्यामवसर्पिण्यां [8]तुरीयसमयागमे ॥२८१॥
ऋषभो नाम विख्यातो बभूव त्रिजगन्नतः[9] । कृत्वा कृतयुगं येन कलानां कल्पितं शतम् ॥२८२॥
जातमात्रश्च यो देवैर्नीत्वा [10]मन्दरमस्तकम् । क्षीरोदवारिणा तुष्टैरभिषिक्तो महाद्युतिः ॥२८३॥
ऋषभस्य विभोर्दिव्यं चरितं पापनोदनम् । स्थितं लोकत्रयं व्याप्य पुराणं[11] न श्रुतं त्वया ॥२८४॥
भर्ता बभूव कौमारं स भुवो भूतवत्सलः । गुणास्तस्य क्षमो वक्तुं न सुरेन्द्रोऽपि विस्तरात् ॥२८५॥
उद्वहन्ती स्तनौ तुङ्गौ विन्ध्यप्रालेयपर्वतौ । आर्यदेशमुखी रम्या [12]नगरीवलयैर्युताम् ॥२८६॥
अब्धिकाञ्चीगुणा नीलसत्काननशिरोरुहाम् । नानारत्नकृतच्छायामत्यन्तप्रवणां सतीम् ॥२८७॥
यः परित्यज्य भूभार्यां मुमुक्षुर्भवसंकटम् । प्रतिपेदे विशुद्धात्मा श्रामण्यं जगते हितम् ॥२८८॥

---

वहींसे शस्त्रों द्वारा ब्राह्मणोंको मार रहा था ॥२७५॥ और ब्राह्मण चिल्ला रहे थे कि 'अब्रह्मण्यम्' बड़ा अनर्थ हुआ। हे राजन्! हे माता यज्ञपालि! हमारी रक्षा करो। हे योद्धाओ! हम जीवित रह सकें इसलिए छोड़ दो, अब ऐसा नहीं करेंगे' ॥२७६॥ इस प्रकार दीनताके साथ अत्यन्त विलाप करते हुए वे ब्राह्मण केंचुए जैसी दशाको प्राप्त थे फिर भी रावणके योद्धा उन्हें पीटते जाते थे ॥२७७॥ तदनन्तर ब्राह्मणोंके समूहको पिटता देख नारदने रावणसे इस प्रकार कहा ॥२७८॥ कि हे राजन्! तुम्हारा कल्याण हो। मैं इन दुष्ट शिकारी ब्राह्मणोंके द्वारा मारा जा रहा था जो आपने मुझे इनसे छुड़ाया ॥२७९॥ यह कार्य चूँकि ऐसा ही होना था सो हुआ अब इनपर दया करो। ये क्षुद्र जीव जीवित रह सकें ऐसा करो, अपना जीवन इन्हें प्रिय है ॥२८०॥ हे राजन्! इन कुपाखण्डियोंकी उत्पत्ति किस प्रकार हुई है? यह क्या आप नहीं जानते हैं। अच्छा सुनो मैं कहता हूँ। इस अवसर्पिणी युगका जब चौथा काल आनेवाला था तब भगवान् ऋषभदेव तीर्थंकर हुए। तीनों लोकोंके जीव उन्हें नमस्कार करते थे। उन्होंने कृत युगकी व्यवस्था कर सैकड़ों कलाओंका प्रचार किया ॥॥२८१-२८२॥ जिस समय ऋषभ-देव उत्पन्न हुए थे उसी समय देवोंने सुमेरु पर्वतके मस्तकपर ले जाकर सन्तुष्ट हो क्षीरसागरके जलसे उनका अभिषेक किया था। वे महाकान्तिके धारक थे ॥२८३॥ भगवान् ऋषभदेवका पापापहारी चरित्र तीनों लोकोंमें व्याप्त होकर स्थित है क्या तुमने उनका पुराण नहीं सुना? ॥२८४॥ प्राणियोंके साथ स्नेह करनेवाले भगवान् ऋषभदेव कुमार-कालके बाद इस पृथिवीके स्वामी हुए थे। उनके गुण इतने अधिक थे कि इन्द्र भी उनका विस्तारके साथ वर्णन करनेमें समर्थ नहीं था ॥२८५॥ जब उन्हें वैराग्य आया और वे संसाररूपी सङ्कटको छोड़नेकी इच्छा करने लगे तब जो विन्ध्याचल और हिमाचलरूपी उन्नत स्तनोंको धारण कर रही थी, आर्य देश ही जिसका मुख था, जो नगरीरूपी चूड़ियोंसे युक्त होकर बहुत मनोहर जान पड़ती थी, समुद्र ही जिसकी करधनी थी, हरे भरे वन जिसके शिरके बाल थे, नाना रत्नोंसे जिसकी कान्ति बढ़ रही थी और जो अत्यन्त निपुण थी ऐसी पृथिवी रूपी स्त्रीको छोड़कर उन्होंने

---

१. पालये म० । २. जीव विमुञ्च मा नैव ख० । ३ विप्रसमूहम् । ४ रावणम् । ५ अपाणिनीय एष प्रयोगः । ६ कुरु + एतेषां । ७ ज्ञानं म० । ८. चतुर्थकालागमे । ९. त्रिजगतोन्नत. (?) म० । १० मन्दिर -म० । सुमेरुशिखरम् । ११. पुराणा म० । १२. नगरीं वलयैः -म० ।

स्थितो वर्षसहस्त्र च वज्राङ्गो स्थिरयोगभृत् । प्रलम्बितमहाबाहु प्राप्तभूमिजटाचय ॥२८९॥
स्वामिनश्चानुरागेण गृहीतोग्रपरीषहै । कच्छाद्यैर्नग्नता मुक्ता वल्कलादिसमाश्रितम् ॥२९०॥
अज्ञातपरमार्थैस्तै क्षुधादिपरिपीडितै । फलाद्याहारसन्तुष्टै प्रणीतास्तापसादय ॥२९१॥
ऋषभस्य तु सजात केवल सर्वभासनम् । महान्यग्रोधवृक्षस्य स्थितस्यासन्नगोचरे ॥२९२॥
तत्प्रदेशे कृता देवैस्तस्मिन् काले विभोर्यत । पूजा तेनैव मार्गेण लोकोऽद्यापि प्रवर्तते ॥२९३॥
प्रतिमाश्च सुरैस्तस्य तस्मिन्देशे सुमानसै । स्थापिता रम्यचैत्येषु मनुजैश्च महोत्सवै ॥२९४॥
भरतेनास्य पुत्रेण सृष्टा ये चक्रवर्तिना । पुरा मरीचिना ये च प्रमादस्मययोगत ॥२९५॥
विसर्पणमिमे सूत्रकण्ठास्तु भुवने गता । प्राणिना दु खदा यद्वत्सलिले बिषविन्दव ॥२९६॥
[1]उद्वृत्तकुहुकाचारैर्बहुदम्भै[2] कुलिङ्गकै[3] । प्रचण्डदण्डैरत्यन्त तैरिद मोहित जगत् ॥२९७॥
जात शश्वत्प्रवृत्तातिक्रूरकर्मतमश्रितम् । प्रनष्टसुकृतालोक [4]साध्वसत्कारतत्परम् ॥२९८॥
एकविंशतिवारान् ये निधन प्रापिता क्षितौ । सूभूमचक्रिणा प्राप्ता न नितान्तमभावताम् ॥२९९॥
ते कथ वद शाम्यन्ते त्वया विप्रा दशानन । [5]उपशाम्यानया किञ्चिन्न कृत्य[6] प्राणिहिंसया ॥३००॥
जिनैरपि कृत नैतत्सर्वज्ञैर्नि कुमार्गकम् । जगत् किमुत [7]शक्येत कर्तुमस्मद्विधैर्जनै ॥३०१॥

ततश्चानय ता गत्वा प्राणैर्यावन्न मुच्यते । प्राणिना रक्षणे धर्म श्रूयते प्रकटो भुवि ॥१३२॥
[2]इत्युक्त्वा [3]परिसृष्टा सा गत्वा तामानयत् क्षणात् । आदरश्च [4]महानस्या कृतो यमविमर्दिना ॥१३३॥
ततो मदनसप्राप्तां[5] सा तेनैवमभाष्यत । दुर्लङ्घ्यनगरे देवि रन्तु मम परा स्पृहा ॥१३४॥
अटव्यामिह कि सौख्य कि वा मदनकारणम् । तथा कुरु यथैतस्मिस्त्वया सह पुरे रमे ॥१३५॥
ततस्तत्तस्य कौटिल्यमविज्ञाय स्मरातुरा । स्त्रीणा स्वभावमुग्धत्वात्पुरस्यागमनाय सा ॥१३६॥
ददावाशालिका विद्या प्राकारत्वेन कल्पिताम् । व्यन्तरै कृतरक्षाणि नानास्त्राणि च सादरा ॥१३७॥
अपयातश्च शालोऽसो विद्यालाभादनन्तरम् । स्थित प्रकृतिशालेन केवलेनावृत पुरम् ॥१३८॥
बभूव रावण साक सैन्येन महतान्तिक[6] । पुरस्य [7]निनद श्रुत्वा क्षुब्धश्च नलकूबरः ॥१३९॥

ही क्या सो तू ही कह ॥१२५॥ हे भद्रे ! दूसरे मनुष्यके मुखकी लारसे पूर्ण तथा अन्य मनुष्यके अङ्गसे मर्दित जूठा भोजन खानेकी कौन मनुष्य इच्छा करता है ? ॥१२६॥

तदनन्तर रावणने यह बात प्रीतिपूर्वक विभीषणसे भी एकान्तमे कही सो नीतिको जाननेवाले एव निरन्तर मन्त्रिगणोमे प्रमुखता धारण करनेवाले विभीषणने इस प्रकार उत्तर दिया ॥१२७॥ कि हे देव ! चूँकि यह कार्य ही ऐसा है अत सदा नीतिके जाननेवाले राजाको कभी झूठ भी बोलना पड़ता है ॥१२८॥ सम्भव है स्वीकारकर लेनेसे सन्तोषको प्राप्त हुई उपरम्भा उत्कट विश्वास करती हुई, किसी तरह नगर लेनेका कोई उपाय बता दे ॥१२९॥ तदनन्तर विभीषणके कहनेसे कपटका अनुसरण करनेवाले रावणने दूतीसे कहा कि हे भद्रे ! तूने जो कहा है वह ठीक है ॥१३०॥ चूँकि उस बेचारीके प्राण मुझमे अटक रहे है और वह अत्यन्त दु खसे युक्त है अत मेरे द्वारा रक्षा करनेके योग्य है । यथार्थमे उदार मनुष्य दयालु होते हैं ॥१३१॥ इसलिए जब तक प्राण उसे नही छोड़ देते है तब तक जाकर उसे ले आ । 'प्राणियोकी रक्षा करनेमे धर्म है' यह बात पृथिवीपर खूब सुनी जाती है ॥१३२॥ इतना कहकर रावणके द्वारा विदा की हुई दूती क्षणभरमे जाकर उपरम्भाको ले आई । आनेपर रावणने उसका बहुत आदर किया ॥१३३॥

तदनन्तर कामके वशीभूत हो जब उपरम्भा रावणके समीप पहुँची तब रावणने कहा कि हे देवि ! मेरी उत्कट इच्छा दुर्लङ्घ्यनगरमे ही रमण करने की है ॥१३४॥ तुम्ही कहो इस जङ्गलमे क्या सुख है ? और क्या कामवर्धक कारण है ? हे देवि ! ऐसा करो कि जिससे मै तुम्हारे साथ नगरमे ही रमण करूँ ॥१३५॥ स्त्रियाँ स्वभावसे ही मुग्ध होती हैं इसलिए उपरम्भा रावणकी कुटिलताको नही समझ सकी । निदान, उसने कामसे पीडित हो उसे नगरमें आनेके लिए आशालिका नामकी वह विद्या जो कि प्राकार बनकर खड़ी हुई थी तथा व्यन्तर देव जिनकी रक्षा किया करते थे ऐसे नाना शस्त्र बड़े आदरके साथ दे दिये ॥१३६–१३७॥ विद्या मिलते ही वह मायामय प्राकार दूर हो गया और उसके अभावमे वह नगर केवल स्वाभाविक प्राकारसे ही आवृत रह गया ॥१३८॥ रावण बड़ी भारी सेना लेकर नगरके निकट पहुँचा सो

१. वक्तु म० । २. इत्युक्ता म०, ब०, क० । ३ परिहृष्टा क०, म०, ब० । ४. महा तस्याः म० । ५. मदनसप्राप्तौ क०,ख०,म० । ६ निकटस्थः । ७ निन्दन म० ।

तमदृष्ट्वा तत शाल लोकपालो विषादवान् । गृहीतमेव नगर मेने यक्षविमर्दिना ॥१४०॥
तथापि पौरुष बिभ्रद् योद्धु [1]श्रमभरेण स । निष्क्रान्तोऽत्यन्तविक्रान्त[2]सर्व[3]सामन्तवेष्टित ॥१४१॥
ततो महति सग्रामे प्रवृत्ते शस्त्रसङ्कुले । अदृष्टपद्मिनीनाथकिरणे क्रूरनि स्वने ॥१४२॥
विभीषणेन वेगेन [4]निपत्य नलकूबर । गृहीत कूबर भङ्क्त्वा स्यन्दनस्याङ्घ्रिताडनात् ॥१४३॥
सहस्रकिरणे कर्म दशवक्त्रेण यत्कृतम् । विभीषणेन क्रुद्धेन तत्कृत नलकूबरे ॥१४४॥
देवासुरभयोत्पादे दक्ष चक्र च रावण । त्रिदशाधिपसम्बन्धि [5]प्राप नाम्ना सुदर्शनम् ॥१४५॥
उपरम्भा दशास्येन रहसीदमथोदिता । विद्यादानाद् गुरुत्व मे वर्तते प्रवराङ्गने ! ॥१४६॥
जीवति प्राणनाथे ते न युक्त कर्तुमीदृशम् । ममापि सुतरामेव न्यायमार्गोपदेशिन ॥१४७॥
समाश्वास्य ततो नीतो [6]भार्यान्त नलकूबर । शस्त्रदारितसन्नाह[7]दृष्टविक्षतविग्रह ॥१४८॥
अनेनैव सम भर्त्रा भुङ्क्ष्व भोगान् यथेप्सितान् । कामवस्तुनि को भेदो मम [8]वास्य च भोजने[9]॥१४९॥
मलीमसा च मे कीर्ति कर्मेद कुर्वतो भवेत् । अपरोऽपि जन कर्म कुर्वीतेद मया कृतम् ॥१५०॥
सुताकाशध्वजस्यासि सभूता विमले कुले । सजाता मृदुकान्ताया शील रक्षितुमर्हसि ॥१५१॥
उच्यमानेति सा तेन नितान्त त्रपयान्विता । स्वभर्तरि भृ[10]श चक्रे मानस प्रतिबोधिनी ॥१५२॥
व्यभिचारमविज्ञाय कान्ताया नलकूबर । रेमे तया सम प्राप्त सन्मान दशवक्त्रत ॥१५३॥

उसका कलकल सुनकर नलकूबर क्षोभको प्राप्त हुआ ॥१३९॥ तदनन्तर उस मायामय प्राकारको न देखकर लोकपाल नलकूबर बडा दु खी हुआ । यद्यपि उसने समझ लिया था कि अब तो हमारा नगर रावणने ले ही लिया तो भी उसने उद्यम नही छोडा । वह पुरुषार्थको धारण करता हुआ बड़े श्रमसे युद्ध करनेके लिए बाहर निकला । अत्यन्त पराक्रमी सब सामन्त उसके साथ थे ॥१४०–१४१॥ तदनन्तर जो शस्त्रोसे व्याप्त था, जिसमे सूर्यकी किरणे नही दिख रही थी और भयंकर कठोर शब्द हो रहा था ऐसे महायुद्धके होनेपर विभीषणने वेगसे उछलकर पैरके आघातसे रथका धुरा तोड दिया और नलकूबरको जीवित पकड़ लिया ॥१४२–१४३॥ रावणने राजा सहस्ररश्मिके साथ जो काम किया था वही काम क्रोधसे भरे विभीषणने नलकूबरके साथ किया ॥१४४॥ उसी समय रावणने देव और असुरोको भय उत्पन्न करनेमे समर्थ इन्द्र सम्बन्धी सुदर्शन नामका चक्ररत्न प्राप्त किया ॥१४५॥

तदनन्तर रावणने एकान्तमे उपरम्भासे कहा कि हे प्रवराङ्गने ! विद्या देनेसे तुम मेरी गुरु हो ॥१४६॥ पतिके जीवित रहते तुम्हे ऐसा करना योग्य नहीं है और नीतिमार्गका उपदेश देनेवाले मुझे तो बिलकुल ही योग्य नहीं है ॥१४७॥ तत्पश्चात् शस्त्रोसे विदारित कवचके भीतर जिसका अक्षत शरीर दिख रहा था ऐसे नलकूबरको वह समझाकर स्त्रीके पास ले गया ॥१४८॥ और कहा कि इस भर्ताके साथ मन चाहे भोग भोगो । काम सेवनके विषयमे मेरे और इसके साथ उपभोगमे विशेषता ही क्या है ? ॥१४९॥ इस कार्यके करनेसे मेरी कीर्ति मलिन हो हो जायगी और मैंने यह कार्य किया है इसलिए दूसरे लोग भी यह कार्य करने लग जावेगे ॥१५०॥ तुम राजा आकाशध्वज और मृदुकान्ताकी पुत्री हो, निर्मल कुलमे तुम्हारा जन्म हुआ है अतः शीलकी रक्षा करना ही योग्य है ॥१५१॥ रावणके ऐसा कहनेपर वह अत्यधिक लज्जित हुई और प्रतिबोधको प्राप्त हो अपने पतिमे ही संतुष्ट हो गई ॥१५२॥ इधर नलकूबरको अपनी स्त्रीके व्यभिचारका पता नहीं चला इसलिए रावणसे सन्मान प्राप्तकर वह पूर्ववत् उसके साथ रमण करने लगा ॥१५३॥

१. समभरेण ख०, म०, ब० । २. विक्रान्त. क०, ब०, म० । ३. सामन्तशतवेष्टितः क०, ब०, म० । ४. निपात्य ख०, म० । ५. प्रापन्नाम्ना म०, ब० । ६. भार्यां तां ख०, म०, ब० । ७ दिष्ट ख०, म०, ब० । ८. चास्य म० । ९ भोगे । १० सम चक्रे म० ।

रावण सयुगे लब्ध्वा परध्वसात्पर यश । वर्धमानश्रिया प्राप विजयार्धगिरेर्महीम् ॥१५४॥
अभ्यर्णं रावण श्रुत्वा शक्र प्रचलितु तत । देवानास्थानसप्राप्तान् समस्तानिदमभ्यधात् ॥१५५॥
वस्वशिवप्रमुखा देवा सनह्यत किमासताम् । विश्रब्ध कुरुत प्राप्त प्रभुरेष स रक्षसाम् ॥१५६॥
इत्युक्त्वा जनकोद्देश सप्रधारयितु ययौ । उपविष्टो नमस्कृत्य धरण्या विनयान्वित ॥१५७॥
उवाच च विधातव्य किमस्मिन्नन्तरे मया । प्रबलोऽयमरि. प्राप्तो बहुशो विजिताहित ॥१५८॥
आत्मकार्यविरुद्धोऽय तातात्यन्त मया कृत । अनय स्वल्प एवासौ प्रलय यन्न लम्भित ॥१५९॥
उत्तिष्ठतो मुख भड्क्तुमधरेणापि शक्यते । कण्टकस्यापि यत्नेन परिणाममुपेयुषः ॥१६०॥
उत्पत्तावेव रोगस्य क्रियते ध्वसन सुखम् । व्याप्तो तु बद्धमूल. स्यादूर्ध्वं स क्षेत्रियोऽथवा ॥१६१॥
अनेकश कृतोद्योगस्तस्यास्मि विनिपातने । निवारितस्त्वया व्यर्थं येन क्षान्तिर्मया कृता ॥१६२॥
नयमार्ग प्रपन्नेन मयेद तात भाष्यते । मर्यादैषेति पृष्टोऽसि न त्वशक्तोऽस्मि तद्वधे ॥१६३॥
स्मयरोषविमिश्र तच्छ्रुत्वा वाक्य सुतेरितम् । सहस्रारोऽगदत् पुत्र त्वरावानिति मा स्म भू ॥१६४॥
तावद्विमृश्य कार्याणि प्रवरैर्मन्त्रिभि सह । जायते विफल कर्माप्रेक्षापूर्वकारिणाम् ॥१६५॥
भवत्यर्थस्य ससिद्ध्यै केवल च न पौरुषम् । कर्षकस्य विना वृष्ट्या का सिद्धि कर्मयोगिनः ॥१६६॥
समानमहिमानाना पठता च समादरम् । अर्थभाजो भवन्त्येके नापरे कर्मणा वशात् ॥१६७॥

तदनन्तर रावण युद्धमे शत्रुके सहारसे परम यशको प्राप्त करता हुआ बढ़ती हुई लक्ष्मीके साथ विजयार्ध गिरिकी भूमिमे पहुँचा ॥१५४॥ अथानन्तर इन्द्रने रावणको निकट आया सुन सभामण्डपमे स्थित समस्त देवोसे कहा ॥१५५॥ कि हे वस्वशिव आदि देव जनो! युद्धकी तैयारी करो, आप लोग निश्चिन्त क्यो बैठे हो? यह राक्षसोका स्वामी रावण यहाँ आ पहुँचा है ॥१५६॥ इतना कहकर इन्द्र पितासे सलाह करनेके लिए उसके स्थानपर गया और नमस्कार कर विनयपूर्वक पृथिवीपर बैठ गया ॥१५७॥ उसने कहा कि इस अवसरपर मुझे क्या करना चाहिए। जिसे मैने अनेक बार पराजित किया पुन स्थापित किया ऐसा यह शत्रु अब प्रबल होकर यहाँ आया है ॥१५८॥ हे तात! मैने आत्म कार्यके विरुद्ध यह बडी अनीति की है कि जब यह शत्रु छोटा था तभी इसे नष्ट नही कर दिया ॥१५९॥ उठते हुए कण्टकका मुख एक साधारण व्यक्ति भी तोड़ सकता है पर जब वही कण्टक परिपक्व हो जाता है तब बड़ा प्रयत्न करना पड़ता है ॥१६०॥ जब रोग उत्पन्न होता है तब उसका सुखसे विनाश किया जाता है पर जब वह रोग जड बाँधकर व्याप्त हो जाता है तब मरनेके बाद ही उसका प्रतिकार हो सकता है ॥१६१॥ मैंने अनेक बार उसके नष्ट करनेका उद्योग किया पर आपके द्वारा रोक दिया गया। आपने व्यर्थ ही मुझे क्षमा धारण कराई ॥१६२॥ हे तात! नीतिमार्गका अनुसरण कर ही मैं यह कह रहा हूँ। बडोसे पूछकर कार्य करना यह कुलकी मर्यादा है और इसलिए ही मैंने आपसे पूछा है। मै उसके मारनेमे असमर्थ नहीं हूँ ॥१६३॥

अहंकार और क्रोधसे मिश्रित पुत्रके वचन सुनकर सहस्रारने कहा कि हे पुत्र! इस तरह उतावला मत हो ॥१६४॥ पहले उत्तम मन्त्रियोके साथ सलाह कर क्योकि बिना विचारे कार्य करनेवालोका कार्य निष्फल हो जाता है ॥१६५॥ केवल पुरुषार्थ ही कार्यसिद्धिका कारण नहीं है क्योंकि निरन्तर कार्य करनेवाले—पुरुषार्थी किसानके वर्षाके विना क्या सिद्ध हो सकता है? अर्थात् कुछ नहीं ॥१६६॥ एक ही समान पुरुषार्थ करनेवाले और एक ही समान आदरसे

१. प्रचलित म०। २ विश्वाश्व म०। ३. सनह्यन्त किमासनम् म०। ४. जनकादेशं म०। ५. तवात्यन्तं मया कृतः म०। ततोत्यन्त मया कृतः ब०। तातात्यन्तमयाकृतः ख०। ६. क्षत्रियोऽथवा क०, ख०, म०, ब०। शरीरान्तरे चिकित्स्यः अप्रतीकार्यं इत्यर्थः 'क्षेत्रियच् परक्षेत्रे चिकित्स्यः'। ७. नयमार्गप्रयत्नेन क०, नयमार्गप्रयत्नेन ख०। ८. स्मयरोषविमुक्त म०। ९. कृष्ट्या म०।

एव गतेऽपि सधान रावणेन सम कुरु । तस्मिन् सति जगत्सर्वं विधत्स्वोद्धृतकण्टकम् ॥१६८॥
रूपिणी च सुता तस्मै यच्छ रूपवती सुताम् । एव सति न दोषोऽस्ति तथावस्था च राजताम्[1] ॥१६९॥
विविक्तधिषणेनासाविति पित्रा प्रचोदित[2] । रोषराशिवशोद्गार[3]शोणचक्षु क्षणादभूत्[4] ॥१७०॥
रोषज्वलनसतापसजातस्वेदसन्तति । बभाण भासुर शक्र स्फोटयन्निव ख गिरा ॥१७१॥
वध्यस्य दीयते कन्येत्येतत्तात क्व युज्यते । प्रकृष्टवयसा पुसा धीर्यान्त्येवाथवा क्षयम् ॥१७२॥
वद केनाधरस्तस्मादह जनक वस्तुना । अत्यन्तकातर वाक्य येनेद भाषित त्वया ॥१७३॥
रवेरपि कृतस्पर्शं पादैर्मूर्ध्नीति[5] खिद्यते । [6]योगे स कथमन्यस्य तुङ्ग प्रणतिमाचरेत् ॥१७४॥
पौरुषेणाधिकस्तावदेतस्मान्नितरामहम् । दैव तस्यानुकूल ते कथ बुद्धाववस्थितम् ॥१७५॥
विजिता बहवोऽनेन विपक्षा इति चेन्मति । हतानेककुरङ्ग कि शबरो हन्ति नो हरिम् ॥१७६॥
सग्रामे शस्त्रसपातजातज्वलनजालके । वर प्राणपरित्यागो न तु प्रतिनरानति ॥१७७॥
सोऽयमिन्द्रो दशास्यस्य राक्षसस्यानतिं गत । इति लोके च हास्यत्व न दृष्ट मे[7] कथ त्वया ॥१७८॥
नभश्चरत्वसामान्य न च सन्धानकारणम् । वनगोचरसामान्य यथा सिहश्रृगालयो ॥१७९॥
इति ब्रुवत एवास्य शब्द पूरितविष्टप । प्रविष्ट श्रोत्रयो शत्रुबलजो [8]वासरानने ॥१८०॥

---

पढनेवाले छात्रोंमे से कुछ तो सफल हो जाते हैं और कुछ कर्मोंकी विवशतासे सफल नहीं हो पाते ॥१६७॥ ऐसी स्थिति आनेपर भी तुम रावणके साथ सन्धि कर लो क्योंकि सन्धिके होनेपर तुम समस्त संसारको निष्कण्टक बना सकते हो ॥१६८॥ साथ ही तू रूपवती नामकी अपनी सुन्दरी पुत्री रावणके लिए दे दे । ऐसा करनेमें कुछ भी दोष नही है । बल्कि ऐसा करनेसे तेरी यही दशा बनी रहेगी ॥१६९॥

पवित्र बुद्धिके धारक पिताने इस प्रकार इन्द्रको समझाया अवश्य परन्तु क्रोधके समूहके कारण उसके नेत्र क्षण भरमे लाल-लाल हो गये ॥१७०॥ क्रोधाग्निके सतापसे जिसके शरीरमें पसीनेकी परम्परा उत्पन्न हो गई थी ऐसा देदीप्यमान इन्द्र अपनी वाणीसे मानो आकाशको फोडता हुआ बोला कि हे तात ! जो वध करने योग्य है उसीके लिए कन्या दी जावे यह कहाँ तक उचित है ? अथवा वृद्ध पुरुषोकी बुद्धि क्षीण हो ही जाती है ॥१७१-१७२॥ हे तात ! कहो तो सही मै किस वस्तुमे उससे हीन हूँ ? जिससे आपने यह अत्यन्त दीन वचन कहे है ॥१७३॥ जो मस्तकपर सूर्यकी किरणोका स्पर्श होनेपर भी अत्यन्त खेदखिन्न हो जाता है वह उदार मानव मिलनेपर अन्य पुरुपके लिए प्रणाम किस प्रकार करेगा ? ॥१७४॥ मैं पुरुषार्थकी अपेक्षा रावणसे हर एक बातमे अधिक हूँ फिर आपकी बुद्धिमे यह बात कैसे बैठ गई कि भाग्य उसके अनुकूल है ? ॥१७५॥ यदि आपका यह ख्याल है कि इसने अनेक शत्रुओको जीता है तो अनेक हरिणोको मारनेवाले सिहको क्या एक भील नहीं मार देता ? ॥१७६॥ शस्त्रोके प्रहारसे जहाँ ज्वालाओके समूह उत्पन्न हो रहे है ऐसे युद्धमे प्राण त्याग करना भी अच्छा है पर शत्रुके लिए नमस्कार करना अच्छा नही है ॥१७७॥ 'वह इन्द्र रावण राक्षसके सामने नम्र हो गया' इस तरह लोकमें जो मेरी हँसी होगी उस ओर भी आपने दृष्टि क्यो नहीं दी ? ॥१७८॥ 'वह विद्याधर है और मै भी विद्याधर हूँ' इस प्रकार विद्याधरपनाकी समानता सन्धिका कारण नहीं हो सकती । जिस प्रकार सिह और शृगालमे वनचारित्वकी समानता होनेपर भी एकता नहीं होती है उसी प्रकार विद्याधरपनाकी समानता होनेपर भी हम दोनोमे एकता नही हो सकती ॥१७९॥ इस प्रकार प्रात:कालके समय इन्द्र पिताके समक्ष कह रहा था कि उसी समय समस्त संसारको व्याप्त करनेवाला शत्रु सेनाका जोरदार शब्द उसके कानोमे प्रविष्ट हुआ ॥१८०॥

---

१. राजते ब० । राज्यता म० । राजता क० । २. प्रबोधितः म० । ३ वशोद्दार-म० । ४. १७० तम. श्लोकः ख० पुस्तके नास्ति । ५. मूर्ध्नाभि- ख० । ६. यो मेरुः ख०,म० । ७. ते कथ मया म० । ८. प्रातःकाले ।

[1]ततोऽपकर्णेन कृत्वा पितु सन्नाहमण्डपम् । गत्वा सन्नाहसज्ञार्थं तूर्यं तारमवीवदत् ॥१८१॥
उपाहर गज शीघ्र सप्ति पर्याणय द्रुतम् । मण्डलाग्रमितो देहि पट्टु चाहर [2]कङ्कटम् ॥१८२॥
धनुराहर धावस्व शिरस्त्राणमित कुरु । [3]यच्छार्धबाहुका क्षिप्र देहि सायकपुत्रिकाम् ॥१८३॥
चेट यच्छ [4]समायोग सज्जमाशु रथ कुरु । एवमादि कृताराव [5] सुरलोकश्चलोऽभवत् ॥१८४॥
अथ क्षुब्धेषु वीरेषु रटत्सु पटहेषु च । तुङ्ग रणत्सु शङ्खेषु सान्द्र गर्जत्सु दन्तिषु ॥१८५॥
मुञ्चत्सु दीर्घहुङ्कार स्पृष्टवेत्रेषु सप्तिषु । सक्रीडत्सु रथौघेषु ज्याजाले पटु गुञ्जति ॥१८६॥
भटानामट्टहासेन जयशब्देन वादिनाम् । अभूत्तदा जगत्सर्वं शब्देनेव विनिर्मितम् ॥१८७॥
असिभिस्तोमरै पाशैर्ध्वजैश्छत्रै शरासनै । ककुभश्छादिता सर्वा प्रभावोऽपहृतो रवे ॥१८८॥
निष्क्रान्ताश्च सुसनद्धा सुरा रभसरागिण । गोपुरे कृतसघट्टा घण्टाभिर्वरदन्तिनाम् ॥१८९॥
स्यन्दन परतो धेहि[6] प्राप्तोऽयं मत्तवारण । आधोरण गज देशादस्मात्सारय सत्वरम् ॥१९०॥
स्तम्भितोऽसीह कि सादिन्नयाश्व द्रुतमग्रत । मुञ्च मुग्धे निवर्तस्व कुरु [7]मा मा समाकुलम् ॥१९१॥
एवमादिसमालापा सत्वरा मन्दिरात् सुरा । निष्क्रान्ता [8]गर्वनिर्मुक्तशुभारभटगर्जिता ॥१९२॥
आलीने च यथा[9]जातप्रतिपच्च चमूमुखे । विषमाहततूर्येण परमुत्साहमाहते[10] ॥१९३॥
ततो राक्षससैन्यस्य मुखभङ्ग सुरै कृत । मुञ्चद्भि शस्त्रसघातमन्तर्हितनभस्तलम् ॥१९४॥
सेनामुखावसादेन कुपिता राक्षसास्तत । अभ्यूषु पृतनावक्त्र निजमूर्जितविक्रमाः ॥१९५॥

---

तदनन्तर पिताकी बात अनसुनीकर वह आयुधशालामे गया और वहाँ युद्धकी तैयारीका संकेत करनेके लिए उसने जोरसे तुरही बजवाई ॥१८१॥ 'हाथी शीघ्र लाओ, घोड़ापर शीघ्र ही पलान बाँधो, तलवार यहाँ देओ, अच्छा-सा कवच लाओ, दौड़कर धनुष लाओ, शिरकी रक्षा करनेवाला टोप इधर बढाओ, हाथपर बाँधनेकी पट्टी शीघ्र देओ, छुरी भी जल्दी देओ, अरे चेट घोड़े जोत और रथको तैयार करो' इत्यादि शब्द करते हुए देव नामधारी विद्याधर इधर उधर चलने लगे ॥१८२-१८४॥ अथानन्तर—जब वीर सैनिक क्षुभित हो रहे थे, बाजे बज रहे थे, शङ्ख जोरदार शब्द कर रहे थे, हाथी बार-बार चिघाड़ रहे थे, वेतके छूते ही घोड़े दीर्घ हुंकार छोड रहे थे, रथोंके समूह चल रहे थे और प्रत्यञ्चाओंके समूह जोरदार गुञ्जन कर रहे थे, तब योद्धाओंके अट्टहास और चारणोंके जयजयकारसे समस्त ससार ऐसा हो गया था मानो शब्दसे निर्मित हो ॥१८५-१८७॥ तलवारो, तोमरो, पाशो, ध्वजाओ, छत्रो और धनुषोसे समस्त दिशाएँ आच्छादित हो गईं और सूर्यका प्रभाव जाता रहा ॥१८८॥ शीघ्रताके प्रेमी देव तैयार हो होकर बाहर निकल पड़े और हाथियोंके घंटाओंके शब्द सुन-सुनकर गोपुरके समीप धक्कम-धक्का करने लगे ॥१८९॥ 'रथको उधर खड़ा करो, इधर यह मदोन्मत्त हाथी आ रहा है। अरे महावत ! हाथीको यहाँसे शीघ्र ही हटा। अरे सवार ! यही क्यो रुक गया ? शीघ्र ही घोड़ा आगे ले जा। अरी मुग्धे ! मुझे छोड़ तू लौट जा, व्यर्थ ही मुझे व्याकुल मत कर' इत्यादि वार्तालाप करते हुए शीघ्रतासे भरे देव, अपने-अपने मकानोसे बाहर निकल पड़े। उस समय वे अहंकारके कारण शुभ गर्जना कर रहे थे ॥१९०-१९२॥ कभी धीमी और कभी जोरसे बजाई हुई तुरहीसे जिसका उत्साह बढ रहा था ऐसी सेना जब शत्रुके सम्मुख जाकर यथास्थान खड़ी हो गई तब आकाशको आच्छादित करने वाले शस्त्रसमूहको छोड़ते हुए देवोंने राक्षसोकी सेना का मुख भङ्ग कर दिया अर्थात् उसके अग्र भागपर जोरदार प्रहार किया ॥१९३-१९४॥ सेनाके

---

१. तत्रोपकर्णयन् ख० । ततोपकर्णल ब० । ततोपकर्णभ म० । २. कवचम् । ३. यच्छार्धवाहका म० । ४. अश्वम् । ५. कृताराव म०, ख० । ६. देहि म० । ७ मा मा म० । ८. गर्भनिर्मुक्तसुतारभट- म० । गर्वनिर्मुक्तसुतारभट- ख०, ब० । ९. यातप्रतिपच्चं ख० । १०. माहते म० ।

वज्रवेगः प्रहस्तोऽथ हस्तो मारीच उद्भवः । वज्रवक्त्रः शुको घोरः सारणो गगनोज्ज्वलः ॥१९६॥
महाजठरसंध्याभ्रक्रूरप्रभृतयस्तथा । सुसंनद्धा[1] सुयानाश्च[2] सुशस्त्राश्च पुरः स्थिताः ॥१९७॥
ततस्तैरुत्थितैः सैन्यं सुराणां क्षणमात्रतः । कृतं [4]विहतवित्रस्तशस्त्रसंगतशत्रुकम् ॥१९८॥
भज्यमानं ततः सैन्यमवस्त्र दृष्ट्वा महासुराः । उत्थिता योद्धुमत्युग्रकोपापूरितविग्रहाः ॥१९९॥
मेघमाली तडित्पिङ्गो ज्वलिताक्षोऽरिसंज्वरः । पावकस्यन्दनाद्याश्च सुराः प्रकटतां ययुः ॥२००॥
उत्थाय राक्षसास्तैस्ते[5] मुञ्चद्भिः शस्त्रसंहतिम् । अवष्टब्धाः समुद्भूततीव्रकोपातिभासुरैः ॥२०१॥
ततो भङ्गं परिप्राप्ताश्चिरं कृतमहाहवाः । प्रत्येकं राक्षसा देवैर्बहुभिः कृतवेष्टनाः ॥२०२॥
आवर्तेष्विव निक्षिप्ता राक्षसा वेगशालिषु । बभ्रमुर्विगलच्छस्त्रशिथिलस्थित[6]पाणयः ॥२०३॥
परावृत्तास्तथाप्यन्ये राक्षसा मानशालिनः । प्राणानभिमुखीभूता मुञ्चन्ति न तु सायकान् ॥२०४॥
ततोऽवसादनाद्[7] भग्नं दृष्ट्वा तद्रक्षसां बलम् । सूनुर्महेन्द्रसेनस्य कपिकेतोर्महाबलः ॥२०५॥
दक्षः प्रसन्नकीर्त्याख्यां धारयन्नर्थसंगताम् । त्रासयन् द्विषतां सैन्यं जन्यस्य शिरसि स्थितम् ॥२०६॥
रक्षता बलमात्मीयं तेन तत्रै दशं बलम् । शरैः पराङ्मुखं चक्रे निष्कामद्भिरनन्तरम् ॥२०७॥
अतिमात्रं ततो भूरि विजयार्धनिवासिनाम् । सैन्यं प्राप्तं महोत्साहं नानाशस्त्रसमुज्ज्वलम् ॥२०८॥
दृष्ट्वैव कपिलक्ष्मास्य ध्वजे [8]छत्रे च भीषणम् । अवाप मानसे भेदं विजयार्धद्विजं बलम् ॥२०९॥
तत्तेन विशिखैः पश्चात्स्फुरत्तेजःशिखैः क्षणात् । भिन्नं कुतीर्थहृदयं यथा मन्मथविभ्रमैः ॥२१०॥

अग्रभागका विनाश देख प्रबल पराक्रमके धारक राक्षस कुपित हो अपनी सेनाके आगे आ डटे ॥१९५॥ वज्रवेग, प्रहस्त, हस्त, मारीच, उद्भव, वज्रमुख, शुक, घोर, सारण, गगनोज्ज्वल, महाजठर, सन्ध्याभ्र और क्रूर आदि राक्षस आ आकर सेनाके सामने खड़े हो गये। ये सभी राक्षस कवच आदिसे युक्त थे, उत्तमोत्तम सवारियोंपर आरूढ थे और अच्छे-अच्छे शस्त्रोंसे युक्त थे ॥१९६-१९७॥ तदनन्तर इन उद्यमी राक्षसोंने देवोंकी सेनाको क्षणमात्रमें मारकर भयभीत कर दिया। उसके छोड़े हुए अस्त्र-शस्त्र शत्रुओंके हाथ लगे ॥१९८॥ तब अपनी सेनाके अग्रभागको नष्ट होता देख बड़े-बड़े देव युद्ध करनेके लिए उठे। उस समय उन सबके शरीर अत्यन्त तीव्र क्रोधसे भर रहे थे ॥१९९॥ मेघमाली, तडित्पिङ्ग, ज्वलिताक्ष, अरिसंज्वर और अग्निरथ आदि देव सामने आये ॥२००॥ जो शस्त्रोंके समूह की वर्षा कर रहे थे और उत्पन्न हुए तीव्र क्रोधसे अतिशय देदीप्यमान थे ऐसे देवोंने उठकर राक्षसोंको रोका ॥२०१॥ तदनन्तर चिरकाल तक युद्ध करनेके बाद राक्षस भङ्गको प्राप्त हुए। एक-एक राक्षसको बहुतसे देवोंने घेर लिया ॥२०२॥ वेगशाली भँवरोंमें पड़े हुएके समान राक्षस इधर-उधर घूम रहे थे तथा उनके ढीले हाथोंसे शस्त्र छूट-छूटकर नीचे गिर रहे थे ॥२०३॥ कितने ही राक्षस युद्धसे पराङ्मुख हो गये पर जो अभिमानी राक्षस थे वे सामने आकर प्राण तो छोड़ रहे थे पर उन्होंने शस्त्र नहीं छोड़े ॥२०४॥ तदनन्तर देवोंकी विकट मारसे राक्षसोंकी सेनाको नष्ट होता देख वानरवंशी राजा महेन्द्रका महाबलवान् पुत्र, जो कि अत्यन्त चतुर था और प्रसन्नकीर्ति इस सार्थक नामको धारण करता था, युद्धके अग्रभागमें स्थित शत्रुओंकी सेनाको भयभीत करता हुआ सामने आया ॥२०५-२०६॥ अपनी सेनाकी रक्षा करते हुए उसने निरन्तर निकलनेवाले बाणोंसे शत्रुकी सेनाको पराङ्मुख कर दिया ॥२०७॥ विजयार्ध पर्वतपर रहनेवाले देवोंकी जो सेना नाना प्रकारके शस्त्रोंसे देदीप्यमान थी वह प्रथम तो प्रसन्नकीर्तिसे अत्यधिक महान् उत्साहको प्राप्त हुई ॥२०८॥ पर उसके बाद ही जब उसने उसकी ध्वजा और छत्रमें वानरका चिह्न देखा तो उसका मन टूक-टूक हो गया ॥२०९॥ तदनन्तर जिस प्रकार कामके बाणोंसे कुगुरुका हृदय

---

१. सुसवद्धाः म० । २ सुपानाश्च म० । ३. सुशास्त्राश्च म० । ४. विहतवित्रस्त शस्त्रसघातशत्रुकम् म० । ५. -स्तैस्तै- ख० । ६. शिथिलास्थितपाणयः म० । ७. भङ्गं म० । ८. छत्रेण म० ।

ततोऽन्यदपि सम्प्राप्तं सैन्यं त्रिदशगोचरम् । कनकासिगदाशक्तिचापमुद्गरसंकुलम् ॥२११॥
ततोऽन्तराल एवातिवीरो माल्यवतः सुतः । श्रीमालीति प्रतीतात्मा पुरोऽस्य समवस्थितः ॥२१२॥
तेन ते क्षणमात्रेण सुराः सूर्यसमत्विषा[1] । क्व नीता इति न ज्ञाता मुञ्चता शरसंहतीः ॥२१३॥
दृष्ट्वा [2]तमभ्यमित्रीणमनिवार्यरयं ततः । क्षोभयन्तं द्विषां सैन्यं महाग्राहमिवार्णवम् ॥२१४॥
मत्तद्विपेन्द्रसंघट्टघटितारातिमण्डलम् । करवालकरोदारभटमण्डलमध्यगम् ॥२१५॥
अमी समुत्थिता देवा निजं पालयितुं बलम् । महाक्रोधपरीताङ्गा समुल्लासितहेतयः ॥२१६॥
शिखिकेशरिदण्डोग्रकनकप्रवरादयः । छादयन्तो नभो दूरं प्रावृषेण्या इवाम्बुदाः ॥२१७॥
[3]स्वस्रीयाश्च सुरेन्द्रस्य मृगचिह्नादयोऽधिकम् । दीप्यमाना रणोद्भूततेजसा सुमहाबलाः ॥२१८॥
ततः श्रीमालिना तेषां शिरोभिः कमलैरिव । सशैवलैर्महीछन्नाच्छिन्नैश्चन्द्रार्ध[4]सायकैः ॥२१९॥
अचिन्तयत्ततः शक्रो येनैते नरपुङ्गवाः । कुमाराः क्षयमानीताः सममेभिर्वरैः[5] सुरैः ॥२२०॥
तस्यास्य को रणे स्थातुं पुरो वाञ्छेद्दिवौकसाम् । राक्षसस्य [[6] महातेजो दुरीक्ष्यस्यातिवीर्यवान् ॥२२१॥
तस्मादस्य स्वयं युद्धश्रद्धाध्वंसं करोम्यहम् । अपरानमरान् यावन्नयते नैव [7]पञ्चताम् ॥२२२॥
इति ध्यात्वा समाश्वास्य ] बलं स त्रासकम्पितम् । योद्धुं समुद्यतो यावत्त्रिदशानामधीश्वरः ॥२२३॥

---

खण्डित हो जाता है उसी प्रकार जिनसे अग्निकी देदीप्यमान शिखा निकल रही थी ऐसे प्रसन्नकीर्तिके बाणोंसे देवोंकी सेना खण्डित हो गई ॥२१०॥ तदनन्तर देवोंकी और दूसरी सेना सामने आई। वह सेना कनक, तलवार, गदा, शक्ति, धनुष और मुद्गर आदि अस्त्र-शस्त्रोंसे युक्त थी ॥२११॥ तत्पश्चात् माल्यवान्‌का पुत्र श्रीमाली जो अत्यन्त वीर और निःशङ्कहृदय वाला था देवोंकी सेनाके आगे खड़ा हो गया ॥२१२॥ जिसकी सूर्यके समान कान्ति थी तथा जो निरन्तर बाणोंका समूह छोड़ रहा था ऐसे श्रीमालीने देवोंको क्षणमात्रमें कहीं भेज दिया इसका पता नहीं चला ॥२१३॥ तदनन्तर जो शत्रु पक्षकी ओरसे सामने खड़ा था, जिसका वेग अनिवार्य था, जो शत्रुओंकी सेनाको इस तरह क्षोभयुक्त कर रहा था जिस प्रकार की महाग्राह किसी समुद्रको क्षोभयुक्त करता है, जो अपना मदोन्मत्त हाथी शत्रुओं की सेना पर हूल रहा था और जो तलवार हाथमें लिये उद्दण्ड योद्धाओंके बीचमें घूम रहा था ऐसे श्रीमालीको देख कर देव लोग अपनी सेनाकी रक्षा करनेके लिए उठे। उस समय उन सबके शरीर बहुत भारी क्रोधसे व्याप्त थे तथा उनके हाथोंमें अनेक शस्त्र चमक रहे थे ॥२१४–२१६॥ शिखी, केशरी, दण्ड, उग्र, कनक, प्रवर आदि इन्द्रके योद्धाओंने आकाशको दूर तक ऐसा आच्छादित कर लिया जैसा कि वर्षाऋतुके मेघ आच्छादित कर लेते हैं ॥२१७॥ इनके सिवाय मृगचिह्न आदि इन्द्रके भानेज भी जो कि रणसे समुत्पन्न तेजके द्वारा अत्यधिक देदीप्यमान और महाबलवान् थे, आकाशको दूर-दूर तक आच्छादित कर रहे थे ॥२१८॥ तदनन्तर श्रीमालीने अपने अर्द्धचन्द्राकार बाणोंसे काटे हुए उनके शिरोंसे पृथिवीको इस प्रकार ढक दिया मानो शेवाल सहित कमलोंसे ही ढक दिया हो ॥२१९॥

अथानन्तर इन्द्रने विचार किया कि जिसने इन श्रेष्ठ देवोंके साथ-साथ इन नरश्रेष्ठ राजकुमारोंका क्षय कर दिया है तथा अपने विशाल तेजसे जिसकी ओर आँख उठाना भी कठिन है ऐसे इस राक्षसके आगे युद्धमें देवोंके बीच ऐसा कौन है जो सामने खड़ा होनेकी भी इच्छा कर सके ? इसलिए जब तक यह दूसरे देवोंको नहीं मारता है उसके पहले ही मैं स्वयं इसके युद्धकी श्रद्धाका नाश कर देता हूँ ॥२२०–२२२॥ ऐसा विचारकर देवोंका स्वामी इन्द्र भयसे

---

१. त्विषः म० । २. तमभ्रमित्रीण म० । ३. भागिनेयाः । ४. चित्रचन्द्रार्ध म० । ५. शरैः ख० । ६. [ ] कोष्ठकान्तर्गतः पाठः क०पुस्तके नास्ति । ७. मृत्युम् ।

निपत्य पादयोस्तावज्जानुस्पृष्टमहीतल । तमुवाच महावीरो जयन्त इति विश्रुत ॥२२४॥
सत्येव मयि देवेन्द्र करोषि यदि सयुगम् । ततो भवत्कृत जन्म त्वया मम निरर्थकम् ॥२२५॥
बालकोऽङ्के भजन्क्रीडा पुत्रप्रीत्या यदीक्षित । स्नेहस्यानृण्यमेतस्य जनयामि तवाधुना ॥२२६॥
स त्व निराकुलो भूत्वा तिष्ठ तात यथेप्सितम् । शत्रून् क्षणेन नि शेषानय व्यापादयाम्यहम् ॥२२७॥
नखेन प्राप्यते छेद वस्तु यत्स्वल्पयत्नत । व्यापार परशोस्तत्र ननु तात निरर्थक ॥२२८॥
वारयित्वेत्यमौ तात सयुगाय समुद्यत । कोपावेशाच्छरीरेण ग्रसमान इवाम्बरम् ॥२२९॥
प्रतिश्रीमालि चायासीदायासपरिवर्जित । गुप्त पवनवेगेन सैन्येनोज्ज्वलहेतिना ॥२३०॥
श्रीमाली चापि सप्राप्त चिराद्योग्य प्रतिद्विषम् । दृष्ट्वा तुष्टो दधावास्य समुख सैन्यमध्यग ॥२३१॥
अमुञ्चता तत क्रुद्धौ शरासार परस्परम् । कुमारौ सततकृष्टदृष्टकोदण्डमण्डलो ॥२३२॥
तयो कुमारयोर्युद्ध निश्चल पृतनाद्वयम् । ददर्श विस्मयप्राप्तमानस रेखया स्थितम् ॥२३३॥
कनकेन ततो भित्त्वा जयन्तो विरथीकृत । श्रीमालिना स्वसैन्यस्य कुर्वता समद परम् ॥२३४॥
मूर्च्छया पतिते तस्मिन् स्ववर्गस्यापतन्मन । मूर्च्छायाश्च परित्यागादुत्थिते पुनरुत्थितम् ॥२३५॥
आहत्य भिण्डिमालेन जयन्तेन तत कृत । श्रीमाली विरथो रोषात्प्रहारेणातिवर्द्धितात् ॥२३६॥
तत परबले तोषनिर्घोषो निर्गतो महान् । निजे च यातुधानस्य समाक्रन्दध्वनिर्बभौ ॥२३७॥

कॉपती हुई सेवाको सान्त्वना देकर ज्योही युद्धके लिए उठा त्योही उसका महाबलवान् जयन्त नामका पुत्र चरणोमे गिरकर तथा पृथिवीपर घुटने टेककर कहने लगा कि हे देवेन्द्र ! यदि मेरे रहते हुए आप युद्ध करते है तो आपसे जो मेरा जन्म हुआ है वह निरर्थक है ॥२२३-२२५॥ जब मै बाल्य अवस्थामे आपकी गोदमे क्रीडा करता था और आप पुत्रके स्नेहसे बार-बार मेरी ओर देखते थे आज मै उस स्नेहका बदला चुकाना चाहता हूँ उस ऋणसे मुक्त होना चाहता हूँ ॥२२६॥ इसलिए हे तात ! आप निराकुल होकर घर पर रहिये । मै क्षणभरमे समस्त शत्रुओका नाश कर डालता हूँ ॥२२७॥ हे तात ! जो वस्तु थोडे ही प्रयत्नसे नखके द्वारा छेदी जा सकती है वहाँ परशुका चलाना व्यर्थ ही है ॥२२८॥ इस प्रकार पिताको मनाकर जयन्त युद्धके लिए उद्यत हुआ । उस समय वह क्रोधावेशसे ऐसा जान पड़ता था मानो शरीरके द्वारा आकाशको ही ग्रस रहा हो ॥२२९॥ पवनके समान वेगशाली एवं देदीप्यमान शस्त्रोको धारण करनेवाली सेना जिसकी रक्षा कर रही थी ऐसा जयन्त बिना किसी खेदके सहज ही श्रीमालीके सन्मुख आया ॥२३०॥ श्रीमाली चिर काल बाद रणके योग्य शत्रुको आया देख बहुत सतुष्ट हुआ और सेनाके बीच गमन करता हुआ उसकी ओर दौडा ॥२३१॥

तदनन्तर जिनके धनुर्मण्डल निरन्तर खिचते हुए दिखाई देते थे ऐसे क्रोधसे भरे दोनो कुमारोने एक दूसरेपर बाणोंकी वर्षा छोड़ी ॥२३२॥ जिनका चित्त आश्चर्यसे भर रहा था और जो अपनी-अपनी रेखाओपर खड़ी थी ऐसी दोनो ओरकी सेनाएँ निश्चल होकर उन दोनो कुमारोका युद्ध देख रही थी ॥२३३॥ तदनन्तर अपनी सेनाको हर्षित करते हुए श्रीमालीने कनक नामक हथियारसे जयन्तका रथ तोड़कर उसे रथरहित कर दिया ॥२३४॥ जयन्त मूर्च्छासे नीचे गिर पड़ा सो उसे गिरा देख उसकी सेनाका मन भी गिर गया और मूर्च्छा दूर होनेपर जब वह उठा तो सेनाका मन भी उठ गया ॥२३५॥ तदनन्तर जयन्तने भिण्डिमाल नामक शस्त्र चलाकर श्रीमालीको रथरहित कर दिया और अत्यन्त बढ़े हुए क्रोधसे ऐसा प्रहार किया कि वह मूर्च्छित होकर गिर पड़ा ॥२३६॥ तब शत्रुसेनामे बड़ा भारी हर्षनाद हुआ और इधर राक्षसोंके सेनामे

१. जनस्पृष्ट म० । २. जनत्क्रीडा म० । ३. त्वयाह फलमेतस्य । ४. यथेक्षितम् म० । ५. यसमान क० । ६. दधाव = धावति स्म । ७. स ततकृष्ट म० । ८. पृतनीद्वयम् य० । ९. शर्मदं म० । समत ख० । १०. श्रीमालिर् म० । ११. वर्धितान् म० । १२. बभौ म० ।

गतमूर्च्छस्तु सक्रुद्ध श्रीमाली भृशभीषण । किरन् प्रहरणव्रात जयन्ताभिमुखो ययौ ॥२३८॥
मुञ्चन्तौ हेतिजाल तौ कुमारौ रेजतुस्तराम् । सिंहार्भकाविवोद्धूतदीप्तकेसरसचयौ ॥२३९॥
ततो माल्यवत पुत्रः सुरराजस्य सूनुना । स्तनान्तरे हतो गाढ गदया पतितो भुवि ॥२४०॥
वदनेन ततो रक्त विमुञ्चन् धरणी गत । अस्तङ्गत इवाभाति कमलाकरबान्धवः ॥२४१॥
हतश्रीमालिक प्राप्य रथ वासवनन्दन । दध्मौ शङ्ख मुदा भीता राक्षसाश्च विदुद्रुवु ॥२४२॥
माल्यवत्तनय दृष्ट्वा ततो निर्गतजीवितम् । जयन्त च सुसन्नद्ध तोषमुक्तभटस्वनम् ॥२४३॥
आश्वासयन्निज सैन्य पलायनपरायणम् । इन्द्रजित्सम्मुखीभूतो जयन्तस्योत्कटो रुषा ॥२४४॥
ततोऽभिभवने सक्त जनाना त कलिं यथा । जयन्तमिन्द्रजिच्चक्रे जर्जर वर्मवच्छरै ॥२४५॥
दृष्ट्वा च छिन्नवर्माण रुधिरारुणविग्रहम् । जयन्त शरसघातै प्राप्त शललितुल्यताम् ॥२४६॥
अमरेन्द्र स्वय योद्धुमुत्थितशस्त्रादयन्नभ । नीरन्ध्र वाहनैरुग्रैरायुधैश्च चलत्करैः ॥२४७॥
अवादीत् सारथिश्चैव रावण सन्मतिश्रुति । अय स देव सप्राप्त स्वय नाथो दिवौकसाम् ॥२४८॥
चक्रेण लोकपालाना परित कृतपालन । मत्तैरावतपृष्ठस्थो मौलिरत्नप्रभावृत ॥२४९॥
पाण्डुरेणोपरिस्थेन छत्रेणावृतभास्कर. । क्षुब्धेन सागरेणेव सैन्येन कृतवेष्टन. ॥२५०॥

रुदन शब्द सुनाई पड़ने लगा ॥२३७॥ जब मूर्च्छा दूर हुई तब श्रीमाली अत्यन्त कुपित हो शस्त्र-समूहकी वर्षा करता हुआ जयन्तके सन्मुख गया । उस समय वह अत्यन्त भयंकर दिखाई देता था ॥२३८॥ शस्त्रसमूहको छोड़ते हुए दोनो कुमार ऐसे सुशोभित हो रहे थे मानो जिनकी चमकीली सटाओंका समूह उड़ रहा था ऐसे सिहके दो बालक ही हो ॥२३९॥ तदनन्तर इन्द्रके पुत्र जयन्तने माल्यवान्‌के पुत्र श्रीमालीके वक्ष स्थलपर गदाका ऐसा प्रहार किया कि वह पृथिवी पर गिर पड़ा ॥२४०॥ मुखसे खूनको छोड़ता पृथिवीपर पडा श्रीमाली ऐसा जान पड़ता था मानो अस्त होता हुआ सूर्य ही हो ॥२४१॥ श्रीमालीको मारनेके बाद जयन्तने रथपर सवार हो हर्षसे शङ्ख फूंका जिससे राक्षस भयभीत होकर इधर-उधर भागने लगे ॥२४२॥

तदनन्तर श्रीमालीको निष्प्राण और जिसके योद्धा हर्षनाद कर रहे थे ऐसे जयन्तको आगामी युद्धके लिए तत्पर देख रावणका पुत्र इन्द्रजित् अपनी भागती हुई सेनाको आश्वासन देता हुआ जयन्तके सन्मुख आया । उस समय वह क्रोधसे बड़ा विकट जान पड़ता था ॥२४३–२४४॥ तदनन्तर इन्द्रजित्‌ने कलिकालकी तरह लोगोंके अनादर करनेमे सलग्न जयन्तको अपने बाणोसे कवचकी तरह जर्जर कर दिया अर्थात् जिस प्रकार बाणोसे उसका कवच जर्जर किया था उसी प्रकार उसका शरीर भी जर्जर कर दिया ॥२४५॥ जिसका कवच टूट गया था, जिसका शरीर खूनसे लाल-लाल हो रहा था और जो गडे हुए बाणोसे सेहीकी तुलना प्राप्त कर रहा था ऐसे जयन्तको देखकर इन्द्र स्वयं युद्ध करनेके लिए उठा । उस समय इन्द्र अपने वाहनो और चमकते हुए तीक्ष्ण शस्त्रोंसे नीरन्ध्र आकाशको आच्छादित कर रहा था ॥२४६–२४७॥ इन्द्रको युद्धके लिए उद्यत देख सन्मति नामक सारथिने रावणसे कहा कि हे देव ! यह देवोका अधिपति इन्द्र स्वयं ही आया है ॥२४८॥ लोकपालोंका समूह चारो ओरसे इसकी रक्षा कर रहा है, यह मदोन्मत्त ऐरावत हाथीपर सवार है, मुकुटके रत्नोंकी प्रभासे आवृत है, ऊपर लगे हुए सफेद छत्रसे सूर्यको ढक रहा है, तथा क्षोभको प्राप्त हुए महासागरके समान सेनासे घिरा हुआ

१. विवोद्भूत म० । २ हत. श्रीमाली येन स । हत. श्रीमालिकः म०, क०, ब० । ३ कवचवत् । ४. 'श्वावित्तु शल्यस्तल्लोम्नि शलली शलल शलम्' इत्यमर. । शलली 'सेही' इति हिन्दी । सलिलतुल्यताम् क०, ख०, म०, ब० ।

महाबलोऽयमेतस्य कुमारो नोचितो रणे । उत्तिष्ठ[1] स्वयमेव त्वं जहि शत्रोरहंयुताम्[2] ॥२५१॥
ततोऽभिमुखमायान्तं दृष्ट्वाखण्डलमूर्जितम् । संस्मृत्य मालिमरणं श्रीमालिवधदीपित ॥२५२॥
दृष्ट्वा च शत्रुभिः पुत्रं वेष्ट्यमानं समन्ततः । दधाव रावणः क्रोधाद् रथेनानिलरंहसा ॥२५३॥
भटानामभवद्युद्धमेतयो रोमहर्षणम् । तुमुलं शस्त्रसंघातघनध्वान्तसमावृतम् ॥२५४॥
ततः शस्त्रकृतध्वान्ते रक्तनीहारवर्तिनि । अज्ञायन्त भटाः शूरास्ताराराविण[3] केवलम् ॥२५५॥
प्रेरिता स्वामिनो भक्त्या पूर्वानादरचोदिता[4] । प्रहारोत्थेन कोपेन भटा युयुधिरे भृशम् ॥२५६॥
गदाभिः शक्तिभिः कुन्तैर्मुसलैरसिभिः शरैः । परिघैः कनकैश्चक्रैः करवालीभिरङ्घ्रिपैः[5] ॥२५७॥
शूलैः पाशैर्भुशुण्डीभिः कुठारैर्मुद्गरैर्घनैः । ग्रावभिर्लाङ्गलैर्दण्डैः कौणैः सायकवेणुभिः ॥२५८॥
अन्यैश्च विविधैः शस्त्रैरन्योन्यच्छेदकारिभिः । करालमभवद् व्योम तदाघातोत्थितानलम् ॥२५९॥
क्वचिद्ग्रसदिति ध्वानो भवत्यन्यत्र शूदिति । क्वचिद्रणरणाराव क्वचित्किणिकिणिस्वनः ॥२६०॥
त्रपत्रपायतेऽन्यत्र तथा दमदमायते । छमाछमायतेऽन्यत्र तथा पटपटायते ॥२६१॥
छलछलायतेऽन्यत्र टट्टटायते तथा । तटत्तटायतेऽन्यत्र तथा चटचटायते ॥२६२॥
घग्घग्घग्घायतेऽन्यत्र रणे शस्त्रोत्थितैः स्वरैः । शब्दात्मकमिवोद्भूतं तदा त्वजिरमण्डलम् ॥२६३॥
हन्यते वाजिना वाजी वारणेन मतङ्गजः । तत्रस्थेन च तत्रस्थो रथेन ध्वस्यते रथः ॥२६४॥
पदातिभिः समं युद्धं कर्तुं पादातमुद्यतम् । यथा पुरोगतैकैकभटपाटनतत्परम् ॥२६५॥

है ॥२४९–२५०॥ यह चूँकि महाबलवान् है इसलिए कुमार इन्द्रजित् युद्ध करनेके लिए इसके योग्य नहीं है अतः आप स्वयं ही उठिये और शत्रुका अहंकार नष्ट कीजिये ॥२५१॥

तदनन्तर बलवान् इन्द्रको सामने आता देख रावण वायुके समान वेगशाली रथसे सामने दौडा। उस समय रावण मालीके मरणका स्मरण कर रहा था और अभी हालमें जो श्रीमालीका वध हुआ था उससे देदीप्यमान हो रहा था। उस समय इन दोनों योद्धाओंका रोमाञ्चकारी भयङ्कर युद्ध हो रहा था। वह युद्ध शस्त्र समुदायसे उत्पन्न सघन अन्धकारसे व्याप्त था। रावणने देखा कि उसका पुत्र इन्द्रजित् सब ओरसे शत्रुओं द्वारा घेर लिया गया है अतः वह कुपित हो आगे दौडा ॥२५२–२५४॥ तदनन्तर जहाँ शस्त्रोंके द्वारा अन्धकार फैल रहा था और रुधिरका कुहरा छाया हुआ था ऐसे युद्धमें यदि शूरवीर योद्धा पहिचाने जाते थे तो केवल अपनी जोरदार आवाज से ही पहिचाने जाते थे ॥२५५॥ जिन योद्धाओंने पहले अपेक्षा भावसे युद्ध करना बन्द कर दिया था उनपर भी जब चोटें पड़ने लगीं तब वे स्वामीकी भक्तिसे प्रेरित हो प्रहारजन्य क्रोधसे अत्यधिक युद्ध करने लगे ॥२५६॥ गदा, शक्ति, कुन्त, मुसल, कृपाण, बाण, परिघ, कनक, चक्र, छुरी, अंह्निप, शूल, पाश, भुशुण्डी, कुठार, मुद्गर, घन, पत्थर, लाङ्गल, दण्ड, कौण, बाँसके बाण, तथा एक दूसरेको काटनेवाले अन्य अनेक शस्त्रोंसे उस समय आकाश भयङ्कर हो गया था और शस्त्रोंके पारस्परिक आघातसे उसमें अग्नि उत्पन्न हो रही थी ॥२५७–२५९॥ उस समय कहीं तो ग्रसद्-ग्रसद्, कहीं शूद्-शूद्, कहीं रण्-रण्, कहीं किण-किण, कहीं त्रप-त्रप, कहीं दम-दम, कहीं छम-छम, कहीं पट-पट, कहीं छल-छल, कहीं टट्-टट्, कहीं तड-तड़, कहीं चट-चट और कहीं घग्घ-घग्घकी आवाज आ रही थी। यथार्थ बात यह थी कि शस्त्रोंसे उत्पन्न स्वरोंसे उस समय रणाङ्गण शब्दमय हो रहा था ॥२६०–२६३॥ घोड़ा घोडाको मार रहा था, हाथी हाथीको मार रहा था, घुड़सवार घुड़सवारको, हाथीका सवार हाथीके सवारको और रथ रथको नष्ट कर रहा था ॥२६४॥ जो जिसके सामने आया उसीको चीरनेमें

१. उत्तिष्ठ। २. गर्वम्। ३. ताररावेण-ब०। ४. पूर्वमारव म०, पूर्वमारद ब०। ५. करवालिभि-रङ्घ्रिपैः म०

गजशूत्कृतनिस्सर्पच्छीकरासारसंहति । शस्त्रपातसमुद्भूतधूमकेतुमशीशमत् ॥२६६॥
प्रतिमागुरवो दन्ता भ्रष्टा अपि गजाननात् । पतन्त कुर्वते भेद भटपङ्क्तेरधोमुखा ॥२६७॥
प्रहार मुञ्च भो शूर मा भू पुरुष कातर । प्रहार [2]भटसिहासे' सहस्व मम साम्प्रतम् ॥२६८॥
अथ मृतोऽसि मा प्राप्य गतिस्तव कुतोऽधुना । दु शिक्षित न जानासि गृहीतुमपि सायकम् ॥२६९॥
रक्षात्मान व्रजामुष्माद् रणकण्डूर्मुधा तव । कण्डूरेव न मे भ्रष्टा क्षत स्वल्प त्वया कृतम् ॥२७०॥
मुधैव जीवन भुक्त प[3]ण्डकेन प्रभोस्त्वया । कि गर्जसि फले व्यक्तिर्भटताया करोम्यहम् ॥२७१॥
कि कम्पसे भज स्थैर्यं गृहाण त्वरित शरम् । दृढमुष्टि कुरु[5] स्रसत्खड्गोऽय तव यास्यति ॥२७२॥
एवमादिसमालापा परमोत्साहवर्तिनाम् । भटानामाहवे जाता स्वामिनामग्रतो मुहु ॥२७३॥
अलस कस्यचिद्बाहुराहतो गदया द्विषा[6] । बभूव विशदोऽत्यन्त क्षणनर्तनकारिण ॥२७४॥
प्रयच्छत्प्रतिपक्षस्य साधुकार मुहु शिर । पपात कस्यचिद्वेगनिष्क्रामद्भूरिशोणितम् ॥२७५॥
अभिद्यत शरैर्वक्षो भटाना न तु मानसम् । शिर पपात नो मान कान्तो मृत्युर्न जीवितम् ॥२७६॥
कुर्वाणा यशसो रक्षा दक्षा वीरा महौजसः । भटा सकटमायाता प्राणान् शस्त्रभृतोऽमुचन् ॥२७७॥
म्रियमाणो भट कश्चिच्छत्रुमारणकाङ्क्षया । पपात देहमाक्रम्य रिपो कोपेन पूरित ॥२७८॥
च्युते शस्त्रान्तराघाताच्छस्त्रे कश्चिद्भटोत्तम । मुष्टिमुद्गरघातेन चक्रे शत्रु गतासुकम् ॥२७९॥

---

तत्पर रहनेवाला पैदल सिपाहियोंका झुण्ड पैदल सिपाहियोंके साथ युद्ध करनेके लिए उद्यत था ॥२६५॥ हाथियोंकी शूत्कारके साथ जो जलके छींटोंका समूह निकल रहा था वह शस्त्रपातसे उत्पन्न अग्निको शान्त कर रहा था ॥२६६॥ प्रतिमाके समान भारी-भारी जो दाँत हाथियोंके मुखसे नीचे गिरते थे वे गिरते-गिरते ही अनेक योद्धाओंकी पङ्क्तिका कचूमर निकाल देते थे ॥२६७॥ अरे शूर पुरुष ! प्रहार छोड़, कायर क्यों हो रहा है ? हे सैनिकशिरोमणे ! इस समय जरा मेरी तलवारका भी तो वार सहन कर ॥२६८॥ ले अब तू मरता ही है, मेरे पास आकर अब तो जा ही कहाँ सकता है ? अरे दु शिक्षित ! तलवार पकड़ना भी तो तुझे आता नहीं है, युद्ध करनेके लिए चला है ॥२६९॥ जा यहाँसे भाग जा और अपने आपकी रक्षा कर। तेरी रणकी खाज व्यर्थ है, तूने इतना थोड़ा घाव किया कि उससे मेरी खाज ही नहीं गई ॥२७०॥ तुझ नपुंसकने स्वामीका वेतन व्यर्थ ही खाया है, चुप रह, क्यों गरज रहा है ? अवसर आनेपर शूरवीरता अपने आप प्रकट हो जायगी ॥२७१॥ काँप क्यों रहा है ? जरा स्थिरताको प्राप्त हो, शीघ्र ही बाण हाथ में ले, मुट्ठीको मजबूत रख, देख यह तलवार खिसक कर नीचे चली जायेगी ॥२७२॥ उस समय युद्धमें अपने-अपने स्वामियोंके आगे परमोत्साहसे युक्त योद्धाओंके बार-बार उल्लिखित वार्तालाप हो रहे थे ॥२७३॥ किसीकी भुजा आलस्यसे भरी थी—उठती ही नहीं थी पर जब शत्रुने उसमें गदाकी चोट जमाई तब वह क्षणभरमें नाच उठा और उसकी भुजा ठीक हो गई ॥२७४॥ जिससे बड़े वेगसे अत्यधिक खून निकल रहा था ऐसा किसीका शिर शत्रुके लिए बार-बार धन्यवाद देता हुआ नीचे गिर पड़ा ॥२७५॥ बाणोंसे योद्धाओंका वक्ष स्थल तो खण्डित हो गया पर मन खण्डित नहीं हुआ। इसी प्रकार योद्धाओंका शिर तो गिर गया पर मान नहीं गिरा। उन्हें मृत्यु प्रिय थी पर जीवन प्रिय नहीं था ॥२७६॥ जो महातेजस्वी कुशल वीर थे उन्होंने सङ्कट आनेपर शस्त्र लिये यशकी रक्षा करते-करते अपने प्राण छोड़ दिये थे ॥२७७॥ कोई एक योद्धा मर तो रहा था पर शत्रुको मारनेकी इच्छासे क्रोधयुक्त हो जब गिरने लगा तो शत्रुके शरीर पर आक्रमण कर गिरा ॥२७८॥ शत्रुके शस्त्रकी चोटसे जब किसी योद्धाका शस्त्र

---

१. शीकराकार-म० । २. भटसहासेः म० । ३ क्लीबेन 'तृतीयाप्रकृतिः शण्ढः क्लीबः पण्डो नपुंसके' इत्यमरः। पाण्डुकेन म०, पण्डुकेन क०, ख०, ब० । ४. भव म० । ५ कुरुस्त्रश म० (?)। ६. द्विषः म० ।

आलिङ्गय मित्रवत्कश्चिद्दोर्भ्यां गाढ महाभट । चकार विगलद्रक्तधार शत्रु विजीवितम् ॥२८०॥
कश्चिच्चकार पन्थानमृजु निघ्नन् भटावलीम् । समरे पुरुषैरन्यैर्भयादकृतसङ्गमम् ॥२८१॥
पतन्तोऽपि न पृष्ठस्य दर्शन भटसत्तमा । वितेरु• प्रतिपक्षस्य गर्वोत्तानितवक्षस ॥२८२॥
अश्वै रथैर्भटैर्नागै पतद्भिरतिरहसा । अश्वा रथा भटा नागा न्यपात्यन्त सहस्रश ॥२८३॥
रजोभि शस्त्रनिक्षेपसमुद्भूतै सशोणितै• । दानाम्भसा च सच्छन्न शक्रचापैरभून्नभः ॥२८४॥
कश्चित्करेण सरुध्य[1] वामेनान्त्राणि सङ्कट । तरसा खड्गमुद्यम्य ययौ प्रत्यरि भीषण ॥२८५॥
कश्चिन्निजै पुरीतद्भिर्बद्ध्वा परिकर दृढम् । दष्टोष्ठोऽभिययौ शत्रु दृष्टाशेषकर्नीनिक[2] ॥२८६॥
कश्चित्कीलालमादाय निज रोषपरायण । कराभ्या द्विपतो मूर्ध्नि चिक्षेप गलितायुध ॥२८७॥
गृहीत्वा कीकस कश्चिन्निज [3]छिन्नमरातिना । डुढौके त गलद्रक्तधाराशुकविराजित[4] ॥२८८॥
पाशेन कश्चिदानीय रिपु युद्धसमुत्सुक । मुमोच दूरनिर्मुक्त रणसभवसभ्रम ॥२८९॥
कश्चिच्च्युतायुध दृष्ट्वा प्रतिपक्षमनिच्छया । डुढौके शस्त्रमुज्झित्वा न्याय्यसग्रामतत्पर ॥२९०॥
पिनाकाननलग्नेन रिपून् कश्चित्प्रतिद्विषा । जघान घनकीलालधारानिकरवर्षिणा ॥२९१॥
कश्चित्कबन्धता प्राप्तः शिरसा स्फुटरहसा । मुञ्चस्त[5]द्दिशि कीलाल प्रतिपक्षमताडयत् ॥२९२॥

---

छूटकर नीचे गिर गया तब उसने मुट्ठीरूपी मुद्‌गरकी मारसे ही शत्रुको प्राणरहित कर दिया ॥२७९॥ किसी महायोद्धाने मित्रकी तरह भुजाओंसे शत्रुका गाढ आलिङ्गन कर उसे निर्जीव कर दिया—आलिङ्गन करते समय शत्रुके शरीरसे खूनकी धारा बह निकली थी ॥२८०॥ किसी योद्धाने योद्धाओंके समूहको मारकर युद्धमे अपना सीधा मार्ग बना लिया था। भयके कारण अन्य पुरुष उसके उस मार्गमे आडे नहीं आये थे ॥२८१॥ गर्वसे जिनका वक्ष स्थल तना हुआ था ऐसे उत्तम योद्धाओंने गिरते-गिरते भी शत्रुके लिए अपनी पीठ नहीं दिखलाई थी ॥२८२॥ बड़े वेगसे नीचे गिरनेवाले घोडों, रथों, योद्धाओं और हाथियोंने हजारो घोडो, रथों, योद्धाओं और हाथियोंको नीचे गिरा दिया था ॥२८३॥ शस्त्रोंके निक्षेपसे उठी हुई रुधिराक्त धूलि और हाथियोंके मदजलसे आकाश ऐसा व्याप्त हो गया था मानो इन्द्रधनुषोंसे ही आच्छादित हो रहा हो ॥२८४॥ कोई एक भयकर योद्धा अपनी निकलती हुई ऑतोंको बायें हाथसे पकड़कर तथा दाहिने हाथसे तलवार उठा बड़े वेगसे शत्रुके सामने जा रहा था ॥२८५॥ जो ओठ चाब रहा था तथा जिसके नेत्रोंकी पूर्ण पुतलियाँ दिख रही थीं ऐसा कोई योद्धा अपनी ही ऑतोंसे कमरको मजबूत कसकर शत्रुकी ओर जा रहा था ॥२८६॥ जिसके हथियार गिर गये थे ऐसे किसी योद्धाने क्रोधनिमग्न हो अपना खून दोनो हाथोंमे भरकर शत्रुके शिरपर डाल दिया था ॥२८७॥ जो निकलते हुए खूनकी धारासे लथपथ वस्त्रोंसे सुशोभित था ऐसा कोई योद्धा शत्रुके द्वारा काटी हुई अपनी हड्डी लेकर शत्रुके सामने जा रहा था ॥२८८॥ जो युद्धमें उत्सुक तथा युद्धकालमे उत्पन्न होनेवाली अनेक चेष्टाओंसे युक्त था ऐसे किसी योद्धाने शत्रुको पाशमे बॉधकर दूर ले जाकर छोड़ दिया ॥२८९॥ जो न्यायपूर्ण युद्ध करनेमे तत्पर था ऐसे किसी योद्धाने जब देखा कि हमारे शत्रुके शस्त्र नीचे गिर गये है और वह निरस्त्र हो गया है तब वह स्वयं भी अपना शस्त्र छोड़कर अनिच्छासे शत्रुके सामने गया था ॥२९०॥ कोई योद्धा धनुषके अग्रभागमे लगे एवं खूनकी बड़ी मोटी धाराओंकी वर्षा करनेवाले शत्रुके द्वारा ही दूसरे शत्रुओंको मार रहा था ॥२९१॥ कोई एक योद्धा शिर कट जानेसे यद्यपि कबन्ध दशाको प्राप्त हुआ था तथापि उसने शत्रुकी दिशामें वेगसे उछलते हुए शिरके द्वारा ही रुधिरकी

---

१. सरुह्य म० । २ कनीनिकाः म०। ३. छिन्न- म० । ४. विराजित ब० । ५. त दिशि म० ।

[1]कृत्तोऽपि कस्यचिन्मूर्धा गर्वनिर्भर[2]चेतस । दष्टदन्तच्छदोऽपप्तद्धुङ्कारमुखरश्चिरम् ॥२६३॥
अन्येनाशीविषेणेव पतताऽत्यन्तभीषणा । दृष्टिरुल्कानिभाक्षेपि प्रतिपक्षस्य विग्रहे ॥२६४॥
अर्धकृत्त शिरोऽन्येन धृत्वा वामेन पाणिना । पातित प्रतिपक्षस्य शिरो विक्रमशालिना ॥२६५॥
कश्चिद्विक्षिप्य कोपेन शस्त्रमप्राप्तशत्रुकम् । हन्तु परिघतुल्येन [3]बाहुनैव समुद्यत ॥२६६॥
अराति मूर्च्छित कश्चित्सिषेच स्वासृजा भृशम् । शीतीकृतेन वस्त्रान्तवायुना सभ्रमान्वित ॥२६७॥
विश्रान्त मूर्च्छया शूरैः शस्त्रघातै सुखायितम् । मरणेन कृतार्थत्व मेने कोपेन कम्पितै ॥२६८॥
एव महति सग्रामे प्रवृत्ते भीतिभीषणे । भटानामुत्तमानन्दसपादनपरायणे ॥२६९॥
गजनासासमाकृष्टवीरकल्पिततत्करे । जवनाश्वखुराघातपतत्तत्कर्तनोद्यते ॥३००॥
सारथिप्रेरणा[4]कृष्टरथविक्षत[5]वाजिनि । जङ्घावष्टम्भसङ्क्रान्तक्षतकुम्भमहागजे ॥३०१॥
परस्परजवाघातदलत्पादातविग्रहे । भटोत्तमकराकृष्टपुच्छनिष्पन्दवाजिनि ॥३०२॥
कराघातदलत्कुम्भिकुम्भनिष्ठ्यूतमौक्तिके । पतन्मातङ्गनिर्भग्नरथाहतपतद्भटे ॥३०३॥

वर्षाकर शत्रुको मार डाला था ॥२६२॥ जिसका चित्त गर्वसे भर रहा था ऐसे किसी योद्धाका शिर यद्यपि कट गया था तो भी वह ओठोंको डशता रहा और हुंकारसे मुखर होता हुआ चिर काल बाद नीचे गिरा था ॥२६३॥ जो साँपके समान जान पड़ता था ऐसे किसी योद्धाने गिरते समय उल्काके समान अत्यन्त भयंकर अपनी दृष्टि शत्रुके शरीरपर डाली थी ॥२६४॥ किसी पराक्रमी योद्धाने शत्रुके द्वारा आधे काटे हुए अपने शिरको बाये हाथसे थाम लिया और दाहिने हाथसे शत्रुका शिर काटकर नीचे गिरा दिया ॥२६५॥ किसी योद्धाका शस्त्र शत्रु तक नहीं पहुँच रहा था इसलिए क्रोधमे आकर उसने उसे फेंक दिया और अर्गलके समान लम्बी भुजासे ही शत्रुको मारनेके लिए उद्यत हो गया ॥२६६॥ किसी एक दयालु योद्धाने देखा कि हमारा शत्रु सामने मूर्च्छित पड़ा है जब उसे सचेत करनेके लिए जल आदि अन्य साधन न मिले तब उसने संभ्रमसे युक्त हो वस्त्रके छोरकी वायुसे शीतल किये गये अपने ही रुधिरसे उसे बार-बार सींचना शुरू कर दिया ॥२६७॥ क्रोधसे काँपते हुए शूर वीर मनुष्योंको जब मूर्च्छा आती थी तब वे समझते थे कि विश्राम प्राप्त हुआ है, जब शस्त्रोंकी चोट लगती थी तब समझते थे कि सुख प्राप्त हुआ और जब मरण प्राप्त होता था तब समझते थे कि कृतकृत्यता प्राप्त हुई है ॥२६८॥

इस प्रकार जब योद्धाओंके बीच महायुद्ध हो रहा था, ऐसा महायुद्ध कि जो भयको भी भय उत्पन्न करनेवाला था तथा उत्तम मनुष्योंको आनन्द उत्पन्न करनेमे तत्पर था ॥२६९॥ जहाँ हाथी अपनी सूंडोमे कसकर वीर पुरुषोको अपनी ओर खींचते थे पर वे वीर पुरुष उनकी सूँड़ें स्वय काट डालते थे। जहाँ लोग घोड़ोको काटनेके लिए उद्यत होते अवश्य थे पर वे वेग-शाली घोड़े अपने खुरोंके आघातसे उन्हें वहीं गिरा देते थे ॥३००॥ जहाँ घोड़े सारथियोकी प्रेरणा पाकर रथ खीचते थे पर उनसे उनका शरीर घायल हो जाता था। जहाँ मस्तकरहित बड़े-बड़े हाथी पड़े हुए थे और लोग उनपर पैर रखते हुए चलते थे ॥३०१॥ जहाँ पैदल सिपाहियोके शरीर एक दूसरेके वेगपूर्ण आघातसे खण्डित हो रहे थे। जहाँ उत्तम योद्धा अपने हाथोंसे घोड़ोकी पूँछ पकड़कर इतने जोरसे खींचते थे कि वे निश्चल खड़े रह जाते थे ॥३०२॥ जहाँ हाथोंकी चोटसे हाथियोके गण्डस्थल फट जाते थे तथा उनसे मोती निकलने लगते थे। जहाँ गिरते हुए हाथियोसे रथ टूट जाते थे और उनकी चपेटमें आकर अनेक योद्धा घायल

---

१. कृत्तोऽपि म० । २. गर्वनिर्भर म० । ३. बाहुनेव म० । ४. प्रेरणात् म० । ५. वीक्षित- म० ।

कीलालपटलच्छन्न[1]गलन्नासाकदम्बके । गजकर्णसमुद्भूततीव्राकुलसमीरणे ॥३०४॥
उवाच सारथिं वीरः सुमतिं कैकसीसुतः । न किंचिदिव मन्वानो रणं रणकुतूहली ॥३०५॥
तस्यैव शक्रसंज्ञस्य सम्मुखो वाह्यतां रथः । असमानैः किमत्रान्यैः सामन्तैस्तस्य मारितैः ॥३०६॥
तृणतुल्येषु नामीषु मम शस्त्रं प्रवर्तते । मनश्च सुमहावीरग्रासग्रहणघस्मरम् ॥३०७॥
आखण्डलत्वमस्याद्य कृतं क्षुद्राभिमानतः । करोमि मृत्युना दूरं स्वविडम्बनकारिणः ॥३०८॥
अयं शक्रो महानेते लोकपालाः प्रकल्पिताः । अन्ये च मानुषा देवा नाकश्च धरणीधरः[2] ॥३०९॥
अहो लोकावहासस्य[3] मत्तस्य क्षुद्रया श्रिया । आत्मा विस्मृत एवास्य श्रुकुसस्येव दुर्मतेः ॥३१०॥
शुक्रशोणितमांसास्थिमज्जादिघटिते चिरम् । उषित्वा जठरे पापश्चिद्दशमन्यतां गतः ॥३११॥
विद्याबलेन यत्किंचित्कुर्वाणो धैर्यदुर्विधः । एष देवायते ध्वाङ्क्षो वैनतेयायते यथा ॥३१२॥
एवमुक्तेन शक्रस्य बलं सम्मतिना[4] रथः । प्रवेशितो [5]महाशूरसामन्तपरिपालितः ॥३१३॥
पश्यन्निन्द्रस्य सामन्तान्युद्धाशक्तपलायितान् । ऋजुना चक्षुषा राजा कीटकोपमचेष्टितान् ॥३१४॥
अशक्यः शत्रुभिर्धर्तुं कूलैः पूरो यथाम्भसः । चेतोवेगश्च सक्रोधो मिथ्यादृष्टिव्रताश्रितैः ॥३१५॥
दृष्ट्वातपत्रमेतस्य क्षीरोदावर्तपाण्डुरम् । नष्टं सुरबलं क्वापि तमश्चन्द्रोदये यथा ॥३१६॥

होकर नीचे गिर जाते थे ॥३०३॥ जहाँ लोगोंकी नासिकाओंके समूह पड़ते हुए खूनके समूहसे आच्छादित हो रहे थे अथवा जहाँ आकाश और दिशाओंके समूह खूनके समूहसे आच्छादित थे और जहाँ हाथियोंके कानोंकी फटकारसे प्रचण्ड वायु उत्पन्न हो रही थी ॥३०४॥ इस प्रकार योद्धाओंके बीच भयंकर युद्ध हो रहा था पर युद्धके कुतूहलसे भरा वीर रावण उस युद्धको ऐसा मान रहा था जैसा कि मानो कुछ हो ही न रहा हो। उसने अपने सुमति नामक सारथिसे कहा कि उस इन्द्रके सामने ही रथ ले जाया जाय क्योंकि जो हमारी समानता नहीं रखते ऐसे उसके अन्य सामन्तोंके मारनेसे क्या लाभ है ? ॥३०५-३०६॥ तृणके समान तुच्छ इन सामन्तोंपर न तो मेरा शस्त्र उठता है और न महा भटरूपी ग्रासके ग्रहण करनेमे तत्पर मेरा मन ही इनकी ओर प्रवृत्त होता है ॥३०७॥ अपने आपकी विडम्बना करानेवाले इस विद्याधरने क्षुद्र अभिमानके वशीभूत हो अपने आपको जो इन्द्र मान रक्खा है सो इसके उस इन्द्रपनाको आज मृत्युके द्वारा दूर करता हूँ ॥३०८॥ यह बड़ा इन्द्र बना है, ये लोकपाल इसीने बनाये हैं। यह अन्य मनुष्योंको देव मानना है और विजयार्ध पर्वतको स्वर्ग समझता है ॥३०९॥ बड़े आश्चर्यकी बात है कि जिस प्रकार कोई दुर्बुद्धि नट उत्तम पुरुषका वेष धर अपने आपको भुला देता है उसी प्रकार यह दुर्बुद्धि क्षुद्र लक्ष्मीसे मत्त होकर अपने आपको भुला रहा है, तथा लोगोंकी हँसीका पात्र हो रहा है ॥३१०॥ शुक्र, शोणित, मांस, हड्डी और मज्जा आदिसे भरे हुए माताके उदरमे चिर काल तक निवासकर यह अपने आपको देव मानने लगा है ॥३११॥ विद्याके बलसे कुछ तो भी करता हुआ यह अधीर व्यक्ति अपने आपको देव समझ रहा है जो इसका यह कार्य ऐसा है कि जिस प्रकार कौआ अपने आपको गरुड समझने लगता है ॥३१२॥ ऐसा कहते ही सुमति नामक सारथिने महाबलवान् सामन्तोंके द्वारा सुरक्षित रावणके रथको इन्द्रकी सेनामे प्रविष्ट कर दिया ॥३१३॥ वहाँ जाकर रावणने इन्द्रके उन सामन्तो को सरल दृष्टिसे देखा कि जो युद्धमे असमर्थ होकर भाग रहे थे, तथा कीड़ोंके समान जिनकी दयनीय चेष्टाएँ थीं ॥३१४॥ जिस प्रकार किनारे नीरके प्रवाहको नहीं रोक सकते हैं और जिस प्रकार मिथ्यादर्शनके साथ व्रताचरण करनेवाले मनुष्य क्रोध सहित मनके वेगको नही रोक पाते हैं उसी प्रकार शत्रु भी रावणको आगे बढ़नेसे नहीं रोक सके थे ॥३१५॥ जिस प्रकार चन्द्रमाका उदय होनेपर अन्धकार नष्ट हो जाता है उसी

१. गगनाशा- म० । २. विजयार्धगिरिः । ३. लोकापहासस्य म० । ४. सन्मतिना ब० । ५. महाशूरः सामन्तः म० ।

इन्द्रोऽपि गजमारूढ कैलासगिरिसन्निभम् । शर समुद्धरँस्तूणादभीयाय दशाननम् ॥३१७॥
शरानाकर्णमाकृष्टान् चिक्षेप च यमद्विषि । महीधर इवाम्भोद स्थूलधारामहाचयम् ॥३१८॥
दशवक्त्रोऽपि [1]तान्बाणैराच्छित्त्वान्तर [2]वर्तिन । ततस्तैर्गगन चक्रे निखिल मण्डपाकृतिम् ॥३१९॥
आच्छिद्यन्त शरा बाणैरभिद्यन्त च भूरिश । [3]भीता इव रवे पादा. क्वापि नष्टा निरन्वया ॥३२०॥
अन्तरेऽस्मिन्नवद्वारगतिर्नि[4] शरगोचरम्[5] । ननर्त कलहप्रेक्षासभूतपुरुसम्मद॰ ॥३२१॥
असाध्य प्रकृतास्त्राणा ततो ज्ञात्वा दशाननम् । निचिक्षेपास्त्रमाग्नेय नाथेन स्वर्गवासिनाम् ॥३२२॥
इन्धनत्व गत तस्य खमेव विततात्मन । धनुरादौ तु किं शक्य वक्तु पुद्गलवस्तुनि ॥३२३॥
कीचकानामिवोदारो दह्यमाने वने ध्वनि । ज्वालावलीकरालस्य सबभूवाशुशुक्षणे ॥३२४॥
ततस्तेनाकुल दृष्ट्वा स्वबल कैकसीसुत । चिक्षेप क्षेपनिर्मुक्तमस्त्र वरुणलक्षितम् ॥३२५॥
तेन क्षणसमुद्भूतमहाजीमूतराशिना । पर्वतस्थूलधारौघवर्षिणा रावशालिना ॥३२६॥
रावणस्येव कोपेन विलीनेन विहायसा । क्षणात्तद्धूमल[6]क्ष्मास्त्र विध्यापितमशेषत. ॥३२७॥
सुरेन्द्रेण ततोऽसर्जि तामसास्त्रं समन्ततः । तेनान्धकारिता चक्रे ककुभा नभसा समम् ॥३२८॥
ततस्तेन दशास्यस्य वितत सकल बलम् । स्वदेहमपि नापश्यत्कुत शत्रोरनीकिनीम् ॥३२९॥
ततो निजबल मूढ दृष्ट्वा रत्नश्रव सुत । प्रभास्त्रममुचत्काल[7]वस्तुयोजनकोविद. ॥३३०॥

प्रकार क्षीरसमुद्रकी आवर्तके समान धवल रावणका छत्र देखकर देवोकी सेना न जाने कहाँ नष्ट हो गई ॥३१६॥ कैलास पर्वतके समान ऊँचे हाथीपर सवार हुआ इन्द्र भी तरकससे बाण निकालता हुआ रावणके सम्मुख आया ॥३१७॥ जिस प्रकार मेघ बड़ी मोटी धाराओके समूहको किसी पर्वतपर छोडता है उसी प्रकार इन्द्र भी कान तक खींचे हुए बाण रावणके ऊपर छोड़ने लगा ॥३१८॥ इधर रावणने भी इन्द्रके उन बाणोको बीचमें ही अपने बाणोसे छेद डाला और अपने बाणोसे समस्त आकाशमे मण्डप सा बना दिया ॥३१९॥ इस प्रकार बाणोके द्वारा बाण छेदे भेदे जाने लगे और सूर्यकी किरणे इस तरह निर्मूल नष्ट हो गई मानो भयसे कहीं जा छिपी हो ॥३२०॥ इसी समय युद्धके देखनेसे जिसे बहुत भारी हर्ष उत्पन्न हो रहा था ऐसा नारद जहाँ बाण नही पहुँच पाते थे वहाँ आनन्द विभोर हो नृत्य कर रहा था ॥३२१॥

अथानन्तर जब इन्द्रने देखा कि रावण सामान्य शस्त्रोसे साध्य नही है तब उसने आग्नेय बाण चलाया ॥३२२॥ वह आग्नेय बाण इतना विशाल था कि स्वयं आकाश ही उसका ईंधन बन गया, धनुष आदि पौद्गलिक वस्तुओके विषयमे तो कहा ही क्या जा सकता है ? ॥३२३॥ जिस प्रकार बाँसोके वनके जलनेपर विशाल शब्द होता है उसी प्रकार ज्वालाओके समूहसे भयङ्कर दिखनेवाली आग्नेय बाणकी अग्निसे विशाल शब्द हो रहा था ॥३२४॥ तदनन्तर जब रावणने अपनी सेनाको आग्नेय बाणसे आकुल देखा तब उसने शीघ्र ही वरुण अस्त्र चलाया ॥३२५॥ उस बाणके प्रभावसे तत्क्षण ही महामेघोका समूह उत्पन्न हो गया। वह मेघसमूह पर्वतके समान बड़ी मोटी धाराओंके समूहकी वर्षा कर रहा था, गर्जनासे सुशोभित था और ऐसा जान पड़ता था मानो रावणके क्रोधसे आकाश ही पिघल गया हो। ऐसे मेघसमूहने इन्द्रके उस आग्नेय बाणको उसी क्षण सम्पूर्ण रूपसे बुझा दिया ॥३२६-३२७॥ तदनन्तर इन्द्रने तामस बाण छोड़ा जिससे समस्त दिशाओं और आकाशमे अन्धकार ही अन्धकार छा गया ॥३२८॥ उस बाणने रावणकी सेनाको इस प्रकार व्याप्त कर लिया कि वह अपना शरीर भी देखनेमे असमर्थ हो गई फिर शत्रुकी सेनाको देखनेकी तो बात ही क्या थी ? ॥३२९॥ तब अवसरके

१. तैर्बाणै ख० । तां म०, ब०, क० । २. राच्छिदन्तरवर्तिनः ख०, ब०, म० । राच्छादन्तर- क०, छिदिर द्वैधीकरणे इत्यस्य लङि आत्मनेपदे रूपम् , आ उपसर्गेण सहितम् । ३ भ्रान्ता इव म० । ४. नारदः । ५. गोचरे ब०, निस्सारगोचर म० । ६. लक्ष्मास म० । ७. काल-वस्त्र-म० ।

तेन तन्निखिल ध्वान्त विध्वस्त क्षणमात्रत । जिनशासनतत्त्वेन मत मिथ्यादृशामिव ॥३३१॥
ततो यमविमर्दन कोपान्नागास्त्रमुज्झितम् । विलेने गगन तेन भोगिभि[1] रत्नभासुरै ॥३३२॥
कामरूपभृतो बाणास्ते गत्वा वृत्रविद्विष । चेष्टया रहित चक्रु शरीर कृतवेष्टना ॥३३३॥
महानीलनिभैरेभिर्वलयाकारधारिभि । जगामाकुलता शक्रश्चलद्रसनभीषणै ॥३३४॥
प्रययावस्वतन्त्रत्व कुलिशी[2] व्यालवेष्टित[3] । वेष्टित कर्मजालेन यथा जन्तुर्भवोदधौ ॥३३५॥
गरुडास्त्र ततो दध्यौ सुरेन्द्रस्तदनन्तरम् । हेमपक्षप्रभाजालै पिञ्जता गगन गतम् ॥३३६॥
पक्षवातेन तस्याभूच्चितान्तोदाररहसा । दोलारूढमिवाशेष प्रेङ्खण[4]प्रवण बलम् ॥३३७॥
स्पृष्टा गरुडवातेन न ज्ञाता नागसायका । क्व गता इति विस्पष्टबन्धस्थानोपलक्षिता. ॥३३८॥
गरुत्मता कृताश्लेषो बन्धलक्षणवर्जित. । बभूव दारुण शक्रो निदाघरविसन्निभ ॥३३९॥
विमुक्त सर्प[5]जालेन दृष्ट्वा शक्र दशानन । आरूढस्त्रिजगद्भूष क्षरदान जयद्विप[6]म् ॥३४०॥
शक्रोऽप्यैरावत रोषादस्यात्यासन्नमानयत् । ततो महदभूद्युद्ध दन्तिनो [7]पुरुदर्पयो ॥३४१॥
क्षरद्दानौ स्फुरद्धेमकक्षाविद्युद्गुणान्वितौ । दधतुस्तौ घनाकार सान्द्रगर्जितकारिणौ[8] ॥३४२॥
परस्पररदाघातनिर्घातैरिव दारुणै । पतद्भिर्भुवन कम्प प्रययौ शब्दपूरितम् ॥३४३॥
पिण्डयित्वा स्थवीयान्सौ करौ चपलविग्रहौ । पुन प्रसारयन्तौ च ताडयन्तौ महारयौ ॥३४४॥

योग्य वस्तुकी योजना करनेमे निपुण रावणने अपनी सेनाको मोहग्रस्त देख प्रभास्त्र अर्थात् प्रकाशबाण छोड़ा ॥३३०॥ सो जिस प्रकार जिन-शासनके तत्त्वसे मिथ्यादृष्टियोंका मत नष्ट हो हो जाता है उसी प्रकार उस प्रभास्त्रसे क्षणभरमे ही वह समस्त अन्धकार नष्ट हो गया ॥३३१॥ तदनन्तर रावणने क्रोधवश नागास्त्र छोड़ा जिससे समस्त आकाश रत्नोसे देदीप्यमान सर्पोंसे व्याप्त हो गया ॥३३२॥ इच्छानुसार रूप धारण करनेवाले उन बाणोंने जाकर इन्द्रके शरीरको निश्चेष्ट कर दिया तथा सब उससे लिपट गये ॥३३३॥ जो महानीलमणिके समान श्याम थे, वलयका आकार धारण करनेवाले थे और चञ्चल जिह्वाओसे भयङ्कर दिखते थे ऐसे सर्पोंसे इन्द्र बड़ी आकुलताको प्राप्त हुआ ॥३३४॥ जिस प्रकार कर्मजालसे घिरा प्राणी संसाररूपी सागरमे विवश हो जाता है उसी प्रकार व्याल अर्थात् सर्पोसे घिरा इन्द्र विवशताको प्राप्त हो गया ॥३३५॥ तदनन्तर इन्द्रने गरुडास्त्रका ध्यान किया जिसके प्रभावसे उसी क्षण आकाश सुवर्णमय पङ्खोंकी कान्तिके समूहसे पीला हो गया ॥३३६॥ जिसका वेग अत्यन्त तीव्र था ऐसी गरुडके पङ्खोंकी वायुसे रावणकी समस्त सेना ऐसी चञ्चल हो गई मानो हिंडोला ही झूल रही हो ॥३३७॥ गरुडकी वायुका स्पर्श होते ही पता नही चला कि नागबाण कहाँ चले गये । वे शरीरमें कहाँ-कहाँ बँधे थे उन स्थानोंका पता भी नहीं रहा ॥३३८॥ गरुडका आलिङ्गन होनेसे जिसके समस्त बन्धन दूर हो गये थे ऐसा इन्द्र ग्रीष्मऋतुके सूर्यके समान भयङ्कर हो गया ॥३३९॥ जब रावणने देखा कि इन्द्र नागपाशसे छूट गया है तब वह जिससे मद झर रहा था ऐसे त्रिलोकमण्डन नामक विजयी हाथी पर सवार हुआ ॥३४०॥ उधरसे इन्द्र भी क्रोधवश अपना ऐरावत हाथी रावणके निकट ले आया । तदनन्तर बहुत भारी गर्वको धारण करनेवाले दोनो हाथियोमे महा-युद्ध हुआ ॥३४१॥ जिनसे मद झर रहा था, जो चमकती हुई स्वर्णकी मालारूपी बिजलीके सहित थे, तथा जो लगातार विशाल गर्जना कर रहे थे ऐसे दोनों हाथी मेघका आकार धारण कर रहे थे ॥३४२॥ परस्परके दाँतोके आघातसे ऐसा लगता था मानो भयङ्कर वज्र गिर रहे हो और उनसे शब्दायमान हो समस्त संसार कम्पित हो रहा हो ॥३४३॥ जिनका शरीर अत्यन्त

१. भोगिनीरत्न म० । सर्पैः । २. इन्द्रः । ३. व्यालचेष्टितः म० । ४. प्रेङ्क्षणप्रवण म० । ५. शक्रजालेन (?) म० । ६. जैत्रगजमित्यर्थः । जगद्विषम् म० । ७. पुरदर्पयोः म० । ८. कारणौ म० ।

दन्तिनौ दृष्टविस्पष्टतारकाक्रूरवीक्षणौ । चक्रतुः सुमहद्युद्धं स्तब्धकर्णौ महाबलौ ॥३४५॥
तत उत्पत्य विन्यस्य पादमिन्द्रेभमूर्धनि । नितान्त लाघवोपेतपादनिर्धूतसारथि. ॥३४६॥
वस्त्राशुकेन देवेन्द्र मुहुराश्वासयन्विभु । आरोपयद्यमध्वसो निज वाहनमूर्जितः ॥३४७॥
राक्षसाधिपपुत्रोऽपि गृहीत्वा वासवात्मजम् । समर्प्य किङ्करौघस्य सुरसैन्यस्य सम्मुखं[2] ॥३४८॥
धावमानो जयोद्भूतमहोत्साहं[1] परतप । उक्तो द्विषतपेनैव मरुत्वमखविद्विषा ॥३४९॥
अल वत्स ! प्रयत्नेन निवर्तस्व रणादगत् । शिरो गृहीतमेतस्या. सेनाया गिरिवासिनाम् ॥३५०॥
गृहीतेऽस्मिन् परिष्यन्दमत्र क कुरुते पर' । क्षुद्रा जीवन्तु सामन्ता गच्छन्तु स्थानमीप्सितम् ॥३५१॥
तन्दुलेषु गृहीतेषु ननु शालिकलापत । त्यागस्तुषपलालस्य क्रियते कारणाद् विना ॥३५२॥
अलाबूबीजसंस्थानदशनाः शुक्लविग्रहाः । काणकुण्ठ[3]गतच्छाया विवर्णाः परुषत्वचः ॥२९५॥
अनेकरोगसंपूर्णमलिनाश्छिद्रवाससः । कुत्सिताशनजीविन्यः परकर्मसमाश्रिताः ॥२९६॥
उत्कृत्तश्रवणं[4] विप्रं धनबन्धुविवर्जितम् । प्राप्नुवन्ति पतिं नार्यो रात्रिभोजनतत्पराः ॥२९७॥
दुःखभारसमाक्रान्ता बालवैधव्यसंगताः । अम्बुकाष्ठादिवाहिन्यो दुःपूरोदरतत्पराः ॥२९८॥
सर्वलोकपराभूता वाग्वासीनष्टचेतसः । अङ्गव्रणशताधारा भवन्ति निशि भोजनात् ॥२९९॥
उपशान्ताशया यास्तु नार्यः शीलसमन्विताः । साधुवर्गहिता रात्रिभोजनाद्विरतात्मिकाः[5] ॥३००॥
लभन्ते ता यथाभीष्टं भोगं स्वर्गे समावृताः । परिवारेण मूर्धस्थपाणिना शासनैषिणा[6] ॥३०१॥
ततश्च्युताः स्फुरन्त्युच्चैः कुले विभवधारिणि । शुभलक्षणसंपूर्णा गुणैः सर्वैः समन्विताः ॥३०२॥
कलाविशारदा नेत्रमानसस्नेहविग्रहाः । विमुञ्चन्त्योऽमृतं वाचा ह्लादयन्त्योऽखिलं जनम् ॥३०३॥

व्यक्ति भी दिनमे भोजन करने से ही होते है ॥२८८॥ जिनका तेज युद्धमे असह्य है, जो नगर आदिके अधिपति है, विचित्र वाहनोसे सहित है तथा सामन्तगण जिनका सत्कार करते है ऐसे पुरुष भी दिनमें भोजन करनेसे ही होते है ॥२८९॥ इतना ही नहीं, भवनेन्द्र, देवेन्द्र, चक्रवर्ती और महालक्षणोसे सम्पन्न व्यक्ति भी दिनमे भोजन करने से ही होते है ॥२९०॥ जो रात्रिभोजन-त्यागव्रतमे उद्यत रहते है वे सूर्यके समान प्रभावान्, चन्द्रमाके समान सौम्य और स्थायी भोगोसे युक्त होते है ॥२९१॥ रात्रिमे भोजन करने से स्त्रियाँ अनाथ, दुर्भाग्यशाली, मातापिता भाईसे रहित तथा शोक और दारिद्र्यसे युक्त होती है ॥२९२॥ जिनकी नाक चपटी है, जिनका देखना ग्लानि उत्पन्न करता है, जिनके नेत्र कीचड़से युक्त है, जो अनेक दुष्टलक्षणोसे सहित है,। जिनके शरीरसे दुर्गन्ध आती रहती है, जिनके ओठ फटे और मोटे हैं, कान खड़े हैं, शिरके बाल पीले तथा चटके हैं, दाँत तूँवड़ीके बीजके समान है और शरीर सफेद है, जो कानी, शिथिल तथा कान्तिहीन है, रूपरहित हैं, जिनका चर्म कठोर है। जो अनेक रोगोसे युक्त तथा मलिन हैं, जिनके वस्त्र फटे है, जो गन्दा भोजन खाकर जीवित रहती है, और जिन्हें दूसरेकी नौकरी करनी पड़ती है। ऐसी स्त्रियाँ रात्रि भोजनके ही पापसे होती हैं ॥२९३–२९६॥ रात्रिभोजनमे तत्पर रहनेवाली स्त्रियाँ बूचे नकटे और धन तथा भाई बन्धुओसे रहित पतिको प्राप्त होती है ॥२९७॥ जो दुःखके भारसे निरन्तर आक्रान्त रहती है, बाल अवस्थामे ही विधवा हो जाती हैं, पानी लकड़ी आदि ढो ढो कर पेट भरती है, अपना पेट बड़ी कठिनाईसे भर पाती है, सब लोग जिनका तिरस्कार करते है, जिनका चित्त वचन रूपी वसूलासे नष्ट होता रहता है और जिनके शरीरमें सैकड़ो घाव लगे रहते है, ऐसी स्त्रियाँ रात्रि भोजनके कारण ही होती हैं ॥२९८–२९९॥ जो स्त्रियाँ शान्त चित्त, शील सहित, मुनिजनोका हित करनेवाली और रात्रि भोजनसे विरत रहती हैं वे स्वर्गमे यथेच्छ भोग प्राप्त करती है। शिरपर हाथ रखकर आज्ञाकी प्रतीक्षा करनेवाले परिवारके लोग उन्हें सदा घेरे रहते है॥३००–३०१॥ स्वर्गसे च्युत होकर वे वैभवशाली उच्च कुलमें उत्पन्न होती हैं, शुभ लक्षणोसे युक्त तथा समस्त गुणोसे सहित होती हैं ॥३०२॥ अनेक कलाओमें

१. युद्धे । २. अभङ्गुरभोगयुक्ताः । ३. 'कुण्ठो मन्दः क्रियासु यः' इत्यमरः । ४. छिन्नकर्णम् । उत्कृत-श्रवण म०, ब० । उत्कृष्टश्रवण ख० । ५. विरतात्मिका म० । ६. शासनैषिणः म० ।

भवन्त्युत्कण्ठया युक्तास्तासु विद्याधराधिपा । हरयो[1] बलदेवाश्च तथा चक्राङ्कितश्रिय· ॥३०४॥
विद्युद्रक्तोत्पलच्छाया. स्फुरल्ललितकुण्डला । नरेन्द्रकृतसम्बन्धा भवन्ति दिनभोजनात् ॥३०५॥
अन्नं यथेप्सितं तासां जायते भृत्यकल्पितम् । निशासु या न कुर्वन्ति भोजनं करुणापरा· ॥३०६॥
श्रीकान्तासुप्रभातुल्या सुभद्रासदृशस्तथा । लक्ष्मीसमत्विषो योषा भवन्ति दिनभोजनात् ॥३०७॥
तस्मान्नरेण नार्या वा नियमस्थेन[2] चेतसा । वर्जनीया निशाभुक्तिरनेकापायसंगता ॥३०८॥
अत्यल्पेन प्रयासेन शर्मैवमुपलभ्यते । ततो भजत तं नित्यं स्वसुखं को न वाञ्छति ॥३०९॥
धर्मो मूलं सुखोत्पत्तेरधर्मो दु खकारणम् । इति ज्ञात्वा भजेद्धर्ममधर्मं च विवर्जयेत् ॥३१०॥
आगोपालाङ्गनं लोके प्रसिद्धिमिदमागतम्[3] । यथा धर्मेण शर्मेति विपरीतेन दु खितम्[4] ॥३११॥
धर्मस्य पश्य माहात्म्यं येन नाकच्युता नरा । उत्पद्यन्ते महाभोगा मनुष्यत्वे मनोहरा ॥३१२॥
जलस्थलसमुद्भूतरत्नाना ते समाश्रया । औदासीन्यमपि प्राप्ता भवन्ति सुखिन· सदा ॥३१३॥
सुवर्णवस्त्रसस्यादिभाण्डागाराणि मानवै । रक्ष्यन्ते सततं तेषां विचित्रायुधपाणिभि· ॥३१४॥
प्रभूत गोमहिष्यादिवारणास्तुरगा रथा । भृत्या जनपदा ग्रामा प्रासादा नगराणि च ॥३१५॥
दासवर्गो विशाला श्रीर्विष्टर हरिभिर्धृतम् । मानसस्येन्द्रियाणाञ्च विषयाहरणक्षमाः ॥३१६॥
हंसीविभ्रमगामिन्यो घनलावण्यविग्रहा । माधुर्ययुक्तनिस्वाना· पीनस्तन्य सुलक्षणाः ॥३१७॥
चक्षुषां वागुरातुल्यास्तरुण्यो [5]हारिचेष्टिता । नानालङ्कारधारिण्यो दास्य पुण्यफलात्मिका· ॥३१८॥

निपुण रहती है,उनके शरीर नेत्र और मनमे स्नेह उत्पन्न करनेवाले होते है,अपने वचनोसे मानो वे अमृत छोड़ती हैं,समस्त लोगोको आनन्दित करती है॥३०३॥विद्याधरोके अधिपति,नारायण,बलदेव और चक्रवर्ती भी उनमे उत्कण्ठित रहते है—उन्हें प्राप्त करनेके लिए उत्सुक रहते है॥३०४॥जिनके शरीरकी कान्ति बिजली तथा लाल कमलके समान मनोहारी है, जिनके सुन्दर कुण्डल सदा हिलते रहते है, तथा राजाओके साथ जिनके विवाह सम्बन्ध होते है ऐसी स्त्रियॉ दिनमे भोजन करनेसे ही होती है ॥३०५॥ जो दयावती स्त्रियॉ रात्रिमे भोजन नहीं करती है उन्हें सदा भृत्यजनोके द्वारा तैयार किया हुआ मनचाहा भोजन प्राप्त होता है ॥३०६॥ दिनमे भोजन करनेसे स्त्रियॉ श्रीकान्ता, सुप्रभा, सुभद्रा और लक्ष्मीके समान कान्ति युक्त होती हैं ॥३०७॥ इसलिए नर हो चाहे नारी, दोनोको अपना चित्त नियममे स्थिरकर अनेक दु खोसे सहित जो रात्रि भोजन है उसका त्याग करना चाहिए ॥३०८॥ इस प्रकार थोड़े ही प्रयाससे जब सुख मिलता है तो उस प्रयासका निरन्तर सेवन करो । ऐसा कौन है जो अपने लिए सुखकी इच्छा न करता हो ॥३०९॥ 'धर्म सुखोत्पत्तिका कारण है और अधर्म दु.खोत्पत्तिका' ऐसा जानकर धर्मकी सेवा करनी चाहिए और अधर्मका परित्याग ॥३१०॥ यह बात गोपालको तकमें प्रसिद्ध है कि धर्मसे सुख होता है और अधर्मसे दु ख॥३११॥ धर्मका माहात्म्य देखो कि जिसके प्रभावसे प्राणी स्वर्गसे च्युत होकर मनुष्योंमें उत्पन्न होते हैं और वहॉ महाभोगोसे युक्त तथा मनोहर शरीरके धारक होते हैं ॥३१२॥ वे जल तथा स्थलमे उत्पन्न हुए रत्नोके आधार होते है और उदासीन होनेपर भी सदा सुखी रहते है ॥३१३॥ ऐसे मनुष्योके स्वर्ण, वस्त्र तथा धान आदिके भाण्डारोंकी रक्षा हाथोमे विविध प्रकारके शस्त्र धारण करनेवाले लोग किया करते हैं॥३१४॥उन्हें अत्यधिक गाय भैंस आदि पशु, हाथी, घोड़,रथ, पयादे, देश,ग्राम, महल, नौकरोंके समूह, विशाल लक्ष्मी और सिंहासन प्राप्त होते है । साथ ही जो मन और इन्द्रियोके विषय उत्पन्न करनेमे समर्थ है, जिनकी चाल हंसीके समान विलास पूर्ण है,जिनका शरीर अत्यधिक सौन्दर्यसे युक्त है, जिनकी आवाज मीठी है, जिनके स्तन स्थूल हैं, जो अनेक शुभ लक्षणोंसे युक्त हैं, जो नेत्रोको पराधीन करनेके लिए जालके समान है, तथा जिनकी चेष्टाएँ

१. नारायणाः । २ नियमस्तेन म० । ३. प्रसिद्ध -म० । ४. दुःखिता क०, ख०, म० । ५. मनोरमचेष्टायुक्ताः । हारचेष्टिताः म०, ख० ।

उपाय केचिदज्ञात्वा धर्माख्य सुखसन्तते. । मूढा तस्य समारम्भे न यतन्तेऽसुधारिण ॥३१९॥
पापकर्मवशात्मान केचिच्छ्रुत्वापि मानवा । शर्मोपाय न सेवन्ते धर्मं दुष्कृततत्परा ॥३२०॥
उपशान्ति गते केचित्सच्चेष्टारोधिकर्मणि । अभिगम्य गुरु धर्मं पृच्छन्त्युद्यतचेतस ॥३२१॥
उपशान्तेरशुद्धस्य[1] कर्मणस्तद्गुरोर्वच । अर्थवज्जायते तेषु श्रेष्ठानुष्ठानकारिषु ॥३२२॥
इम ये नियम प्राज्ञा कुर्वते मुक्तदुष्कृताः । [2]एके भवन्ति ते नाके द्वितीया वा महागुणाः ॥३२३॥
समय येऽनगाराणा भुञ्जतेऽतीत्य भक्तित । तेषा स्वर्गे सुखप्रेक्षामाकाङ्क्षन्ति सुरा सदा ॥३२४॥
इन्द्रत्व देवसङ्घाना ते प्रयान्ति सुतेजस. । जना सामानिकत्व वा सपादितयथेप्सिता ॥३२५॥
न्यग्रोधस्य यथा स्वल्प बीजमुच्चैस्तरुर्भवेत् । तपोऽल्पमपि तद्वत्स्यान्महाभोगफलावहम् ॥३२६॥
सम कुबेरकान्तस्य नेत्रबन्धनविग्रह । [3]धर्मसक्तमतिर्नित्य जायते पूर्वधर्मत ॥३२७॥
मुनिवेलाव्रतो दत्वा मुनेर्भिक्षा समागतः । रत्नवृष्टिं सहस्राख्यः कुबेरदयितोऽभवत्[4] ॥३२८॥
महीमण्डलविख्यातो नामोदारपराक्रम । धनेन महता युक्तो भृत्यमण्डलमध्यग ॥३२९॥
पौर्णमास्यां यथा [5]चन्द्र कान्तदर्शनविग्रह. । भुञ्जान परम भोग सर्वशास्त्रार्थकोविद ॥३३०॥
पूर्वधर्मानुभावेन पर निर्वेदमागतः । अभीयाय महादीक्षा जिनेन्द्रमुख[6]निर्गताम् ॥३३१॥

मनोहर है ऐसी अनेक तरुण स्त्रियाँ और नाना अलङ्कार धारण करनेवाली दासियाँ पुण्यके फल-स्वरूप प्राप्त होती हैं ॥३१५-३१८॥ कितने ही मूर्ख प्राणी ऐसे हैं कि जो सुख-समूहकी प्राप्तिका कारण धर्म है उसे जानते ही नहीं है अत' वे उसके साधनके लिए प्रयत्न ही नही करते ॥३१९॥ और जिनकी आत्मा पाप कर्मके वशीभूत है तथा जो पाप कर्मोंमे निरन्तर तत्पर रहते है ऐसे भी कितने ही लोग है कि जो धर्मको सुख प्राप्तिका साधन सुनकर भी उसका सेवन नहीं करते ॥३२०॥ उत्तम कार्योंके बाधक पापकर्मके उपशान्त हो जानेपर कुछ ही जीव ऐसे होते हैं कि जो उत्सुक चित्त हो गुरुके समीप जाकर धर्मका स्वरूप पूछते है ॥३२१॥ तथा पाप कर्मके उपशान्त होनेसे यदि वे जीव उत्तम आचरण करने लगते है तो उनमे सद्गुरुके वे वचन सार्थक हो जाते है ॥३२२॥ जो बुद्धिमान् मनुष्य पापका परित्याग कर इस नियमका पालन करते हैं वे स्वर्गमे महागुणोके धारक होते हुए प्रथम अथवा द्वितीय होते है ॥३२३॥ जो मनुष्य भक्ति-पूर्वक मुनियोके भोजन करनेका समय बिताकर बादमे भोजन करते हैं स्वर्गमे देव लोग सदा उन्हें सुखी देखनेकी इच्छा करते है ॥३२४॥ उत्तम तेजको धारण करनेवाले वे पुरुष देवोंके समूहके इन्द्र होते है अथवा मनचाहे भोग प्राप्त करनेवाले सामानिक पदको प्राप्त करते है ॥३२५॥ जिस प्रकार वट वृक्षका छोटा-सा बीज आगे चलकर ऊँचा वृक्ष हो जाता है उसी प्रकार छोटा-सा तप भी आगे चलकर महाभोग रूपी फलको धारण करता है ॥३२६॥ जिसकी बुद्धि निरन्तर धर्ममे आसक्त रहती है ऐसा मनुष्य अपने पूर्वाचरित धर्मके प्रभावसे कुबेरकान्तके समान नेत्रोंको आकर्षित करनेवाले सुन्दर शरीरका धारक होता है ॥३२७॥ एक सहस्रभट नामका पुरुष था। उसने मुनिवेलाव्रत धारण किया था अर्थात् मुनियोंके भोजन करनेका समय बीत जानेके बाद ही वह भोजन करता था। एक बार उसने मुनिके लिए आहार दिया। उसके प्रभावसे उसके घर रत्नवृष्टि हुई और वह मरकर परभवमे कुबेरकान्त सेठ हुआ ॥३२८॥ जो कि भूमण्डलमें प्रसिद्ध, उत्कृष्ट पराक्रमी, महाधनसे युक्त और सेवक समूहके मध्यमे स्थित रहनेवाला था ॥३२९॥ पूर्णिमाके चन्द्रमाके समान उसका शरीर अत्यन्त सुन्दर था और वह उत्कृष्ट भोगोको भोगता हुआ समस्त शास्त्रोंका अर्थ जाननेमे निपुण था ॥३३०॥ पूर्व धर्मके प्रभावसे ही उसने परम

१. रधर्मस्य म० । २. अद्वितीयाः । ३. धर्मे सक्तमति ख० । धर्मशक्तमति म० । ४. भवेत् म०, सहस्रभटो मुनेर्दानप्रभावात् कुबेरकान्तनामा श्रेष्ठी अभवत् । ५. चन्द्रकान्तदर्शन म० । चन्द्रःकान्तिदर्शन ख०, ब० । ६. सुख म० ।

अनगारमहर्षीणां वेलामर्चन्ति ये जनाः । भोगोत्सवं प्रपद्यन्ते परं ते हरिषेणवत् ॥३३२॥
मुनिवेलाप्रतीक्ष्यत्वादुपार्ज्य सुकृतं महत् । हरिषेणः परिप्राप्तो लक्ष्मीमत्यन्तमुन्नताम् ॥३३३॥
मुनेरन्तिकमासाद्य समाधानप्रचोदिताः । एकभक्तं जना ये तु कुर्वते शुद्धदर्शनाः ॥३३४॥
एकभक्तेन ते कालं नीत्वा पञ्चत्वमागताः । उत्पद्यन्ते विमानेषु रत्नभाचक्रवर्तिषु ॥३३५॥
नित्यालोकेषु ते तेषु विमानेषु सुचेतसः । रमन्ते सुचिरं कालमप्सरोमध्यवर्तिनः[1] ॥३३६॥
हारिणः कटकाधारप्रकोष्ठाः[2] कटिसूत्रिणः । मौलिमन्तो भवन्त्येते छत्रचामरिणोऽमराः ॥३३७॥
उत्तमव्रतसंसक्ता ये चाणुव्रतधारिणः । शरीरमध्रुवं ज्ञात्वा प्रशान्तहृदया जनाः ॥३३८॥
उपवासं चतुर्दश्यामष्टम्यां च सुमानसाः । सेवन्ते ते[3] निबध्नन्ति चिरमायुस्त्रिविष्टपे ॥३३९॥
सौधर्मादिषु कल्पेषु यान्ति केचित्समुद्भवम् । अपरे त्वहमिन्द्रत्वं मुक्तिमन्ये विशुद्धितः ॥३४०॥
विनयेन परिष्वक्ता गुणशीलसमन्विताः । तपःसयोजितस्वान्ता यान्ति नाकमसंशयम् ॥३४१॥
तत्र कामेन भुक्त्वासौ भोगान्प्राप्तो मनुष्यताम् । भुङ्क्ते राज्यं महज्जैनं मतं च प्रतिपद्यते ॥३४२॥
जिनशासनमासाद्य स क्रमात्साधुचेष्टितः । सर्वकर्मविमुक्तानामालयं प्रतिपद्यते ॥३४३॥
स्तुत्वा कालत्रये यस्तु नमस्यति जिनं त्रिधा । शैलराजवदक्षोभ्यः कुतीर्थमतवायुभिः ॥३४४॥

---

वैराग्यको प्राप्त हो जिनेन्द्र-प्रतिपादित दीक्षाको धारण किया था ॥३३१॥ जो मनुष्य अनगार महर्षियोंके कालकी प्रतीक्षा करते हैं वे हरिषेण चक्रवर्तीके समान उत्कृष्ट भोगोंको प्राप्त होते हैं ॥३३२॥ हरिषेणने मुनिवेलामें मुनिके आगमनकी प्रतीक्षा कर बहुत भारी पुण्यका सञ्चय किया था इसलिए वह अत्यन्त उन्नत लक्ष्मीको प्राप्त हुआ था ॥३३३॥

शुद्ध सम्यग्दर्शनको धारण करनेवाले जो मनुष्य ध्यानकी भावनासे प्रेरित हो मुनिके समीप जाकर एकभक्त करते हैं अर्थात् एक बार भोजन करनेका नियम लेते हैं और एक भक्तसे ही समय पूराकर मृत्युको प्राप्त होते हैं वे रत्नोंकी कान्तिसे जगमगाते हुए विमानोंमें उत्पन्न होते हैं ॥३३४-३३५॥ शुद्ध हृदयको धारण करनेवाले वे देव, निरन्तर प्रकाशित रहनेवाले उन विमानोंमें अप्सराओंके बीच बैठकर चिरकाल तक क्रीडा करते हैं ॥३३६॥ जो उत्तम हार धारण किये हुए हैं, जिनकी कलाइयोंमें उत्तम कड़े सुशोभित हैं, जो कमरमें कटिसूत्र और शिरपर मुकुट धारण करते हैं, जिनके ऊपर छत्र फिरता है और पार्श्वमें चमर ढोले जाते हैं ऐसे देव, एक भक्त व्रतके प्रभावसे होते हैं ॥३३७॥

जो महाव्रत धारण करनेकी भावना रखते हुए वर्तमानमें अणुव्रत धारण करते हैं तथा शरीरको अनित्य समझकर जिनके हृदय अत्यन्त शान्त हो चुके हैं ऐसे जो मनुष्य हृदयपूर्वक अष्टमी और चतुर्दशीके दिन उपवास करते हैं वे स्वर्गकी दीर्घायुका बन्ध करते हैं ॥३३८-३३९॥ उनमेंसे कोई तो सौधर्मादि स्वर्गोंमें जन्म लेते हैं, कोई अहमिन्द्र पद प्राप्त करते हैं और कोई विशुद्धताके कारण मोक्ष जाते हैं ॥३४०॥ जो निरन्तर विनयसे युक्त रहते हैं, गुण और शीलव्रतसे सहित होते हैं तथा जिनका चित्त सदा तपमें लगा रहता है ऐसे मनुष्य निःसन्देह स्वर्ग जाते हैं वहाँ इच्छानुसार भोग भोगकर मनुष्य होते हैं, बड़े भारी राज्यका उपभोग करते हैं और जैनमतको प्राप्त होते हैं ॥३४१-३४२॥ जैनमतको पाकर क्रम-क्रमसे मुनियोंका चरित्र धारण करते हैं और उसके प्रभावसे सर्व कर्मरहित सिद्धोंका निकेतन प्राप्त कर लेते हैं ॥३४३॥

जो प्रातःकाल, मध्याह्नकाल और सायंकाल इन तीनों कालोंमें मन, वचन, कायसे स्तुति कर जिन देवको नमस्कार करता है अर्थात् त्रिकाल वन्दनाका नियम लेता है वह सुमेरुपर्वतके

---

१. रमन्ते मध्यवर्तिनः म० । २. कटकाधाराः प्रकोष्ठाः म० । ३. ते न विघ्नन्ति ख० । तेन बध्नन्ति म० ।

गुणालङ्कारसंपन्नः सुशीलसुरभीकृतः । सर्वेन्द्रियहरं भोगं भजते त्रिदशालये ॥३४५॥
ततः कतिचिदावृत्तीः कृत्वा शुभगतिद्वये । प्रयाति परमं स्थानं सर्वकर्मविवर्जितः ॥३४६॥
विषया हि समभ्यस्ताश्चिरं सकलजन्तुभिः । ततस्तैर्मोहिताः कर्तुं विरतिं विभवो[1] न ते ॥३४७॥
इदं तत्र परं चित्रं ये तान् दृष्ट्वा विषान्नवत् । निर्वाणकारणं कर्म सेवन्ते पुरुषोत्तमाः ॥३४८॥
संसारे भ्रमतो जन्तोरेकापि विरतिः कृता । सम्यग्दर्शनयुक्तस्य मुक्तेरायाति बीजताम् ॥३४९॥
एकोऽपि नास्ति येषां तु नियमः प्राणधारिणाम् । पशवस्तेऽथवा भग्नकुम्भा गुणविवर्जिताः ॥३५०॥
गुणव्रतसमृद्धेन[2] नियमस्थेन[3] जन्तुना । भाव्यं प्रमादयुक्तेन संसारतरणैषिणा ॥३५१॥
दुष्कर्म ये न मुञ्चन्ति मानवा मतिदुर्विधाः । भ्रमन्ति भवकान्तारं जात्यन्धा इव ते चिरम् ॥३५२॥
ततस्तेऽनन्तवीर्येन्दुवाङ्मरीचिसमागमात् । प्रमोदं परमं प्राप्तास्तिर्यङ्मानवनाकजाः ॥३५३॥
सम्यग्दर्शनमायाताः केचित्केचिदणुव्रतम् । महाव्रतधराः केचिज्जाता विक्रमशालिनः ॥३५४॥
अथ धर्मरथाख्येन मुनिनाभाषि[4] रावणः । गृहाण नियमं भव्य कञ्चिदित्यात्मशक्तितः ॥३५५॥
द्वीपोऽयं धर्मरत्नानामनगारमहेश्वरः । गृह्यतामेकमप्यस्माद्रत्नं नियमसंज्ञकम् ॥३५६॥
किमर्थमेवमास्से[5] त्वं चिन्ताभारवशीकृतः । महतां हि ननु त्यागो न मतेः खेदकारणम् ॥३५७॥
रत्नद्वीपं प्रविष्टस्य यथा भ्रमति मानसम् । इदं वृत्तं तथैवास्य परमाकुलतां गतम् ॥३५८॥

समान मिथ्यामत रूपी वायुसे सदा अक्षोभ्य रहता है ॥३४४॥ जो गुणरूपी अलङ्कारोंसे सुशोभित है तथा जिसका शरीर शीलव्रत रूपी चन्दनसे सुगन्धित है ऐसा वह पुरुष स्वर्गमें समस्त इन्द्रियोंको हरनेवाले भोग भोगता है ॥३४५॥ तदनन्तर मनुष्य और देव इन दो शुभगतियोंमें कुछ आवागमन कर सर्वकर्मरहित हो परम धाम (मोक्ष) को प्राप्त हो जाता है ॥३४६॥ चूँकि पञ्चेन्द्रियोंके विषय सब जीवोंके द्वारा चिरकालसे अभ्यस्त हैं इसलिए इनसे मोहित हुए प्राणी विरति (त्याग–आखड़ी) करनेके लिए समर्थ नहीं हो पाते हैं ॥३४७॥ यहाँ बड़ा आश्चर्य तो यही है कि फिर भी उत्तम पुरुष उन विषयोंको विषमिश्रित अन्नके समान देखकर मोक्ष प्राप्तिके साधक कार्यका सेवन करते हैं ॥३४८॥ संसारमें भ्रमण करनेवाले सम्यग्दृष्टि जीवको यदि एक ही विरति (आखड़ी) प्राप्त हो जाती है तो वह मोक्षका बीज हो जाती है ॥३४९॥ जिन प्राणियोंके एक भी नियम नहीं है वे पशु हैं अथवा रस्सीसे रहित (पक्षमें व्रतशील आदि गुणोंसे रहित) फूटे घड़ेके समान हैं ॥३५०॥ गुण और व्रतसे समृद्ध तथा नियमोंका पालन करनेवाले प्राणीको यदि वह संसारसे पार होनेकी इच्छा रखता है तो प्रमादरहित होना चाहिए ॥३५१॥ जो बुद्धिके दरिद्र मनुष्य दुष्कर्म—खोटे कार्य नहीं छोड़ते हैं वे जन्मान्ध मनुष्योंके समान चिरकाल तक संसाररूपी अटवीमें भटकते रहते हैं ॥३५२॥

तदनन्तर वहाँ जो भी तिर्यञ्च मनुष्य और देव विद्यमान थे वे उन अनन्तबल केवली रूपी चन्द्रमाके वचन रूपी किरणोंके समागमसे परम हर्षको प्राप्त हुए ॥३५३॥ उनमेंसे कोई तो सम्यग्दर्शनको प्राप्त हुए, कोई अणुव्रती हुए और कोई बलशाली महाव्रतोंके धारक हुए ॥३५४॥ अथानन्तर धर्मरथ नामक मुनिने रावणसे कहा कि हे भव्य! अपनी शक्तिके अनुसार कोई नियम ले ॥३५५॥ ये मुनिराज धर्मरूपी रत्नोंके द्वीप हैं सो इनसे अधिक नहीं तो कमसे कम एक ही नियम रूपी रत्न ग्रहण कर ॥३५६॥ इस प्रकार चिन्ताके वशीभूत होकर क्यों बैठा है? निश्चयसे त्याग महापुरुषोंकी बुद्धिके खेदका कारण नहीं है अर्थात् त्यागसे महापुरुषोंको खिन्नता नहीं होती प्रत्युत प्रसन्नता होती है ॥३५७॥ जिस प्रकार रत्नद्वीपमें प्रविष्ट हुए पुरुषका चित्त 'यह लूँ या यह लूँ' इस तरह चञ्चल होकर घूमता है उसी प्रकार इस चारित्र रूपी द्वीपमें

१. समर्थाः । २. गुणवृत्तसमृद्धेन म० । ३. नियमस्तेन म० । ४. मुनिराजः । ५. मारेभे म० ।

अथास्य मानसं चिन्ता समारूढेयमुत्कटा । भोगानुरक्तचित्तस्य व्याकुलत्वमुपेयुषः ॥३५९॥
स्वभावेनैव मे शुद्धमन्धो[1] गन्धमनोहरम् । स्वादु वृष्यं परित्यक्तमांसादिमलसंगमम् ॥३६०॥
स्थूलप्राणिवधादिभ्यो विरतिं गृहवासिनाम् । एकामपि न शक्तोऽहं कर्तुं कान्यत्र सकथा ॥३६१॥
मत्तेभसदृशं चेतस्तद्धावत्सर्ववस्तुषु । हस्तेनेवात्मभावेन धर्तुं न प्रभवाम्यहम् ॥३६२॥
हुताशनशिखा पेया बद्धव्यो वायुरंशुके । उत्क्षेप्तव्यो धराधीशो निर्ग्रन्थत्वमभीप्सता ॥३६३॥
शूरोऽपि न समर्थोऽहं सेवितुं यत्तपोव्रतम्[2] । अहो चित्रमिदं तद्ये धारयन्ति नरोत्तमाः ॥३६४॥
किमेकमाश्रयाम्येतं नियमं शोभनामपि । अवष्टभ्नामि नानिच्छामन्ययोषां बलादिभिः ॥३६५॥
अथवा[3] न ननु क्षुद्रे कुतः शक्तिरियं मयि । स्वस्याप्यस्य न शक्नोमि वोढुं चित्तस्य निश्चयम् ॥३६६॥
यद्वा लोकत्रये नासौ विद्यते प्रमदोत्तमा । दृष्ट्वा मां विकलत्वं या न व्रजेन्मन्मथार्दिता ॥३६७॥
का वा नरान्तराश्लेषदूषितप्रमदातनौ । ओष्ठचर्मदधानाया परदन्तकृतव्रणम् ॥३६८॥
दुर्गन्धायां स्वभावेन वर्चोराशौ भवेद्धृतिः[4] । नरस्य दधतश्चित्तं मानसस्कारभाजनम् ॥३६९॥
अवधार्येतिभावेन प्रणम्यानन्तविक्रमम् । देवासुरसमक्षं स प्रकाशमिदमभ्यधात् ॥३७०॥
भगवन्न मया नारी परस्येच्छाविवर्जिता । गृहीतव्येति नियमो ममाय कृतनिश्चयः ॥३७१॥
चतुःशरणमाश्रित्य भानुकर्णोऽपि कर्णवान् । इमं नियममातस्थे मन्दरस्थिरमानसः ॥३७२॥

प्रविष्ट हुए पुरुषका भी चित्त 'यह नियम लूँ या यह नियम लूँ' इस तरह परम आकुलताको प्राप्त हो घूमता रहता है ॥३५८॥

अथानन्तर जिसका चित्त सदा भोगोमें अनुरक्त रहता था और इसी कारण जो व्याकुलताको प्राप्त हो रहा था ऐसे रावणके मनमे यह भारी चिन्ता उत्पन्न हुई कि ॥३५९॥ मेरा भोजन तो स्वभावसे ही शुद्ध है, सुगन्धित है, स्वादिष्ट है, गरिष्ठ है और मांसादिके संसर्गसे रहित है ॥३६०॥ स्थूल हिंसा त्याग आदि जो गृहस्थोंके व्रत है उनमेसे मैं एक भी व्रत धारण करनेमे समर्थ नही हूँ फिर अन्य व्रतोंकी चर्चा ही क्या है ? ॥३६१॥ मेरा मन मदोन्मत्त हाथीके समान सर्व वस्तुओमे दौड़ता रहता है सो उसे मै हाथके समान अपनी भावनासे रोकनेमे समर्थ नहीं हूँ ॥३६२॥ जो निर्ग्रन्थ व्रत धारण करना चाहता है वह मानो अग्निकी शिखाको पीना चाहता है, वायुको वस्त्रमे बाँधना चाहता है, और सुमेरुको उठाना चाहता है ॥३६३॥ बड़ा आश्चर्य है कि मै शूर वीर होकर भी जिस तप एवं व्रतको धारण करनेमे समर्थ नही हूँ उसी तप एवं व्रतको अन्य पुरुष धारण कर लेते हैं। यथार्थमे वे ही पुरुषोत्तम हैं ॥३६४॥ रावण सोचता है कि क्या मै एक यह नियम ले लूँ कि परस्त्री कितनी ही सुन्दर क्यो न हो यदि वह मुझे नही चाहेगी तो मै उसे बलपूर्वक नहीं छेड़ूँगा ॥३६५॥ अथवा मुझ क्षुद्र व्यक्तिमें इतनी शक्ति कहाँसे आई ? मै अपने ही चित्तका निश्चय वहन करनेमे समर्थ नहीं हूँ ॥३६६॥ अथवा तीनो लोकोमे ऐसी उत्तम स्त्री नहीं है जो मुझे देखकर कामसे पीड़ित होती हुई विकलता को प्राप्त न हो जाय ? ॥३६७॥ अथवा जो मनुष्य मान और संस्कारके पात्र स्वरूप मनको धारण करता है उसे अन्य मनुष्यके संसर्गसे दूषित स्त्रीके उस शरीरमे धैर्य—सन्तोष हो ही कैसे सकता है कि जो अन्य पुरुषके दाँतो द्वारा किये हुए घावसे युक्त ओठको धारण करता है, स्वभावसे ही दुर्गन्धित है और मलकी राशि स्वरूप है ॥३६८-३६९॥ ऐसा विचारकर रावणने पहले तो अनन्तबल केवलीको भाव पूर्वक नमस्कार किया। फिर देवो और असुरोके समक्ष स्पष्ट रूपसे यह कहा कि ॥३७०॥ हे भगवन् ! 'जो परस्त्री मुझे नहीं चाहेगी मै उसे ग्रहण नही करूँगा' मैंने यह दृढ़ नियम लिया है ॥३७१॥ जो समस्त बातोंको सुन रहा था तथा जिसका मन सुमेरुके समान स्थिर था ऐसे भानुकर्ण ( कुम्भकर्ण ) ने भी अरहन्त सिद्ध साधु और जिन धर्म इन चारकी

१. भोजनम् । २. संयतव्रतम् ज० । ३. ननु न म० । नन न क०, ख० । ४. भवेद्रतिः म० ।

करोमि प्रातरुत्थाय साम्प्रत प्रतिवासरम् । स्तुत्वा पूजा जिनेन्द्राणामभिषेकसमन्वितम् ॥३७३॥
[1]वरिवस्यामॅवस्त्राणामकृत्वा विधिनान्वितम् । अद्य प्रभृति नाहार करोमीति ससमदः ॥३७४॥
जानुभ्या भुवमाक्रम्य प्रणम्य मुनिमादरात् । अन्यानपि महाशक्तिनियमान् स समार्जयत् ॥३७५॥
ततो देवा सुरा भक्ता॰ प्रणम्य मुनिपुङ्गवम् । यथास्व निलय जग्मुर्हर्षविस्तारितेक्षणा. ॥३७६॥
अभि लङ्कां दशास्योऽपि प्रतस्थे पृथुविक्रम. । खमुत्पत्य दधल्लीलां सुरनाथसमुद्भवाम् ॥३७७॥
वरस्त्रीजनसघातै कृतप्रणतिपूजन । नगरी स्वा विवेशासौ वस्त्रादिकृतभूषणाम् ॥३७८॥
प्रविश्य वसति स्वां च समस्तविभवार्चिताम् । [3]अनावृत इवातिष्ठद्गम्भीरा [4]मान्दरी गुहाम् ॥३७९॥

### वंशस्थवृत्तम्

भवन्ति कर्माणि यदा शरीरिणा प्रशान्तियुक्तानि विमुक्तिभाविनाम् ।
ततोपदेश परम गुरोर्मुखादवाप्नुवन्ति प्रभव शुभस्य ते ॥३८०॥
इति प्रबुद्धोद्यतमानसा जना जिनश्रुतौ सजत भो पुन॰ पुन. ।
परेण धर्मं विनयेन शृण्वतां भवत्यमन्दोऽवगमो यथा रवि. ॥३८१॥

*इत्यार्षे रविषेणाचार्यप्रोक्ते पद्मचरिते अनन्तबलधर्माभिधान नाम चतुर्दशं पर्व ॥१४॥*

---

शरणमे जाकर यह नियम लिया कि 'मै प्रति दिन प्रात काल उठकर तथा स्तुतिकर अभिषेक पूर्वक जिनेन्द्र देवकी पूजा करूँगा । साथ ही जब तक मै निर्ग्रन्थ साधुओकी पूजा नही कर लूँगा तब तक आजसे लेकर आहार नही करूँगा' । भानुकर्णने यह प्रतिज्ञा बड़े हर्षसे की ॥३७२–३७४॥ इसके सिवाय उसने पृथिवीपर घुटने टेक मुनिराजको आदर पूर्वक नमस्कारकर और भी बड़े-बड़े नियम लिये ॥३७५॥ तदनन्तर हर्षसे जिनके नेत्र फूल रहे थे ऐसे भक्त देव और असुर मुनिराजको नमस्कारकर अपने-अपने स्थानोपर चले गये ॥३७६॥ विशाल पराक्रमका धारी रावण भी आकाशमे उड़कर इन्द्रकी लीला धारण करता हुआ लङ्काकी ओर चला ॥३७७॥ उत्तमोत्तम स्त्रियोके समूहने प्रणाम पूर्वक जिसकी पूजा की थी ऐसे रावणने वस्त्रादिसे सुसज्जित अपनी नगरीमे प्रवेश किया ॥३७८॥ जिस प्रकार अनावृत देव मेरुपर्वतकी गंभीर गुहामे रहता है उसी प्रकार रावण भी समस्त वैभवसे युक्त अपने निवासगृहमे प्रवेश कर रहने लगा ॥३७९॥

गौतम स्वामी राजा श्रेणिकसे कहते हैं कि हे राजन् ! जब भव्य जीवोके कर्म उपशम भावको प्राप्त होते हैं तब वे सुगुरुके मुखसे कल्याणकारी उत्तम उपदेश प्राप्त करते है ॥३८०॥ ऐसा जानकर हे प्रबुद्ध एवं उद्यमशील हृदयके धारक भव्य जनो ! तुम लोग बार-बार जिन धर्मके सुननेमे तत्पर होओ क्योकि जो उत्तम विनयपूर्वक धर्म श्रवण करते है उन्हें सूर्यके समान विपुल ज्ञान प्राप्त होता है ॥३८१॥

*इस प्रकार आर्षनामसे प्रसिद्ध रविषेणाचार्यके द्वारा कथित पद्मचरितमे अनन्तबल केवलीके द्वारा धर्मोपदेशका निरूपण करनेवाला चौदहवाँ पर्व समाप्त हुआ ॥१४॥*

---

१. पूजाम् । २. निग्रन्थगुरूणाम् । ३. अनावृतदेव इव । ४. मेरुसम्बन्धिनीम् ।

# पञ्चदशं पर्व

तस्यैव च मुने पार्श्वे हनूमान् गृहिणा व्रतम् । विभीषणश्च जग्राह कृत्वा भाव सुनिश्चितम् ॥१॥
न तथा गिरिराजस्य स्थिरत्व शस्यते बुधै । हनूमच्छीलसम्यक्त्व यथा परमनिश्चलम् ॥२॥
सौभाग्यादिभिरत्यन्त हनूमति तत[1] स्तुते । इत्यूचे मगधाधीशो रोमाञ्च बिभ्रदुत्कटम् ॥३॥
हनूमान् को गणाधीश किंविशिष्ट कुत क्व वा । भगवन्नस्य तत्त्वेन ज्ञातुमिच्छामि चेष्टितम् ॥४॥
तत सत्पुरुषाभिख्यासजातपुरुसम्मद । वाचाह्लादनकारिण्या गणप्राग्रहरो[2]ऽवदत् ॥५॥
दक्षिणस्या नृप श्रेण्या विजयार्धस्य भूभृत । दशयोजनमध्वानमतिक्रम्य व्यवस्थितम् ॥६॥
आदित्यनगराभिख्य पुरमस्ति मनोहरम् । प्रह्लादस्तत्र राजास्य नाम्ना केतुमती प्रिया ॥७॥
शुभो वायुगतिर्नाम बभूव तनयोऽनयो' । लक्ष्म्या वक्षस्थल यस्य विपुल निलयीकृतम्[3] ॥८॥
सम्पूर्णयौवन दृष्ट्वा त तद्दारक्रिया प्रति । चकार जनकश्चिन्ता सन्तानच्छेदकातर ॥९॥
आस्ता तावदिद राजन्निदमन्यन्मतौ कुरु । वचन येन तद्दारसभव परिकीर्त्यते ॥१०॥
वा[4]सस्य भरतस्यान्ते सन्निकृष्टे महोदधे. । पूर्वदक्षिणदिग्भागे दन्तीत्यस्ति महीधर ॥११॥
विपुलाभ्रलिहोदारतेज शिखरसकट' । नानाद्रुमौषधिव्याप्त. सुनिर्झरमहातटः ॥१२॥
यत प्रभृति त[5]त्रास्थात्सनिवेश्य वर पुरम् । विद्याधरो महेन्द्राख्यो महेन्द्रोपमविक्रम ॥१३॥

---

अथानन्तर उन्ही मुनिराजके पास हनूमान और विभीषणने भी अभिप्रायको सुदृढ़ कर गृहस्थोके व्रत ग्रहण किये ॥१॥ गौतमस्वामी कहते है कि विद्वान् लोग सुमेरुपर्वतकी स्थिरताकी उस प्रकार प्रशंसा नहीं करते जिस प्रकार कि परमनिश्चलताको प्राप्त हुए हनूमानके शील और सम्यग्दर्शनकी करते है ॥२॥ इस प्रकार जब गौतमस्वामीने सौभाग्य आदिके द्वारा हनूमानकी अत्यधिक प्रशसा की तब उत्कट रोमाञ्चको धारण करता हुआ श्रेणिक बोला कि ॥३॥ हे गणनाथ ! हनूमान कौन ? इसकी क्या विशेषता है ? कहाँ किससे इसकी उत्पत्ति हुई है ? हे भगवन् ! मै इसका चरित्र यथार्थमे जानना चाहता हूँ ॥४॥ तदनन्तर सत्पुरुषका नाम सुननेसे जिन्हें अत्यधिक हर्ष उत्पन्न हो रहा था ऐसे गणधर भगवान् आह्लाद उत्पन्न करनेवाली वाणीमे कहने लगे ॥५॥

हे राजन् ! विजयार्ध पर्वतकी दक्षिण श्रेणीमे दशयोजनका मार्ग लाँघकर आदित्यपुर नामक एक मनोहर नगर है। वहाँके राजा प्रह्लाद और उनकी रानीका नाम केतुमती था ॥६-७॥ इन दोनोके पवनगति नामका उत्तम पुत्र हुआ। पवनगतिके विशाल वक्षःस्थलको लक्ष्मीने अपना निवासस्थल बनाया था ॥८॥ उसे पूर्णयौवन देख, सन्तान-विच्छेदका भय रखनेवाले पिताने उसके विवाहकी चिन्ता की ॥९॥ गौतमस्वामी कहते हैं कि हे राजन् ! यह कथा तो अब रहने दो। दूसरी कथा हृदयमे धारण करो जिससे कि पवनगतिके विवाहकी चर्चा सम्भव हो सके ॥१०॥

इसी भरत क्षेत्रके अन्तमें महासागरके निकट आग्नेय दिशामे एक दन्ती नामका पर्वत है ॥११॥ जो बड़ी-बड़ी गगनचुम्बी चमकीली शिखरोंसे युक्त है, नाना प्रकारके वृक्ष और औषधियोंसे व्याप्त है, तथा जिसके लम्बे-चौड़े किनारे उत्तमोत्तम झरनोसे युक्त हैं ॥१२॥ महेन्द्रके समान पराक्रमको धारण करनेवाला महेन्द्र विद्याधर उत्तम नगर बसाकर जबसे उस पर्वतपर

---

१. ततस्तुते क०, म०, ब०, ज० । ततोऽस्तुते ख० । २. गणधरः । ३. गृहीकृतम् । ४. क्षेत्रस्य । ५. तत्रस्थात् म० ।

तत आरभ्य सप्राप महेन्द्राख्या रसाधर[1] । महेन्द्रनगर तच्च पुर तत्र प्रकीर्तितम् ॥१४॥
नार्यां हृदयवेगायामजायन्त[2] महेन्द्रत. । गुणवन्त शत पुत्रा नामतोऽरिदमादय. ॥१५॥
उदपाद्यनुजा[3] तेषा कीर्तिताञ्जनसुन्दरी । त्रैलोक्यसुन्दरीरूपसन्दोहेनैव निर्मिता[4] ॥१६॥
नीलनीरजनिर्भासा प्रशस्तकरपल्लवा । पद्मगर्भाभचरणा कुम्भिकुम्भनिभस्तनी ॥१७॥
तनुमध्या पृथुश्रोणी[5] सुजानूरू[6] सुलक्षणा । प्रफुल्लमालतीमालामृदुबाहुलतायुगा ॥१८॥
कर्णान्तसगते कान्तिकूलपुङ्खे सुदूरगे । इषू ते कामदेवस्य ननु तस्या विलोचने ॥१९॥
गन्धर्वादिकलाभिज्ञा साक्षादिव सरस्वती । लक्ष्मीरिव च रूपेण सा बभूव गुणान्विता ॥२०॥
अन्यदा कन्दुकेनासौ रममाणा[7] सरेचकम् । जनकेनेक्षिताभ्यग्रयौवनाञ्चितविग्रहा ॥२१॥
सुलोचनासुताभर्तृवरचिन्तातिदु खित[8] । अकम्पननृपस्येव सद्गुणार्पितचेतस. ॥२२॥
तद्वरान्वेषणे तस्य ततः सक्ताभवन्मति । अत्यन्तव्याकुलप्राय कन्यादु ख मनस्विनाम् ॥२३॥
गमिष्यति पति श्लाघ्य रमयिष्यति त चिरम् । भविष्यत्युज्झिता दोषैरतिचिन्ता नृणां सुता ॥२४॥
आहूय सुहृद' सर्वांस्ततो विज्ञानभूषणान् । राजा वरविनिश्चित्यै रहोगेह[9]मशिश्रियत् ॥२५॥
जगाद मन्त्रिणश्चैव सद्रो निखिलवेदिन । सूरयो मम कन्याया वदत प्रवर वरम् ॥२६॥

रहने लगा था तभीसे उस पर्वतका 'महेन्द्रगिरि' नाम पड़ गया था और उस नगरका महेन्द्र-नगर नाम प्रसिद्ध हो गया था ॥१३–१४॥ राजा महेन्द्रकी हृदयवेगा रानीमे अरिंदम आदि सौ गुणवान् पुत्र उत्पन्न हुए ॥१५॥ उनके अञ्जनासुन्दरी नामसे प्रसिद्ध छोटी बहिन उत्पन्न हुई । वह ऐसी जान पड़ती थी मानो तीन लोककी सुन्दर स्त्रियोका रूप इकट्ठाकर उसके समूहसे ही उसकी रचना हुई थी ॥१६॥ उसकी प्रभा नील कमलके समान सुन्दर थी, हस्त रूप पल्लव अत्यन्त प्रशस्त थे, चरण कमलके भीतरी भागके समान थे, स्तन हाथीके गण्डस्थलके तुल्य थे ॥१७॥ उसकी कमर पतली थी, नितम्ब स्थूल थे, जङ्घाएँ उत्तम घुटनोसे युक्त थी, उसके शरीरमे अनेक शुभ लक्षण थे, उसकी दोनो भुजलताएँ प्रफुल्ल मालतीकी मालाके समान कोमल थीं ॥१८॥ कानों तक लम्बे एवं कान्तिरूपी मूठसे युक्त उसके दोनो नेत्र ऐसे जान पड़ते थे मानो कामदेवके सुदूर-गामी बाण ही हो ॥१९॥ वह गन्धर्व आदि कलाओको जाननेवाली थी इसलिए साक्षात् सरस्वतीके समान जान पड़ती थी और रूपसे लक्ष्मीके तुल्य लगती थी ॥२०॥ इस प्रकार अनेक गुणोसे सहित वह कन्या किसी समय गोलाकार भ्रमण करती हुई गेंद खेल रही थी कि पिताकी उसपर दृष्टि पड़ी । पिताने देखा कि कन्याका शरीर नव-यौवनसे सुशोभित हो रहा है । उसे देख जिस प्रकार उत्तम गुणामें चित्त लगानेवाले राजा अकम्पनको अपनी पुत्री सुलोचनाके योग्य वर ढूँढ़नेकी चिन्ता हुई थी और उससे वह अत्यन्त दु'खी हुआ था उसी प्रकार राजा महेन्द्रको भी पुत्रीके योग्य वर ढूँढ़नेकी चिन्ता हुई सो ठीक ही है क्योकि स्वाभिमानी मनुष्योको कन्याका दु ख अत्यन्त व्याकुलता उत्पन्न करनेवाला होता है ॥२१–२३॥ कन्याके पिताको सदा यह चिन्ता लगी रहती है कि कन्या उत्तम पतिको प्राप्त होगी या नहीं, यह उसे चिरकाल तक रमण करा सकेगी या नहीं और निर्दोष रह सकेगी या नही । यथार्थमे पुत्री मनुष्यके लिए बड़ी चिन्ता है ॥२४॥

अथानन्तर राजा महेन्द्र ज्ञानरूपी अलङ्कारसे अलंकृत समस्त मित्रजनोको बुलाकर वरका निश्चय करनेके लिए एकान्त घरमें गये ॥२५॥ वहाँ उन्होंने मन्त्रियोसे कहा कि अहो मन्त्रिजनो ! आप लोग सब कुछ जानते हैं तथा विद्वान् हैं अतः मेरी कन्याके योग्य उत्तम

१. पृथिवीधरः पर्वतः । २. प्रतिषु '-जायत' इति पाठः । ३. उदयाद्यनुजास्तेषा म० । ४. निर्मिताः म० । ५. पृथुश्रेणी म० । ६ सलक्षणा ख० । ७. स भ्रमणम् । ८. दुःखितः म० । ९. एकान्तगृहम्-स० ।

तत्र मन्त्री जगादैक कन्येयं भरताधिपे । योज्यता रक्षसामीश इति मे [1]निश्चितं मतम् ॥२७॥
रावणं स्वजनं प्राप्य सर्वविद्याधराधिपम् । जगत्यां सागरान्तायां प्रभावस्ते भ्रमिष्यति ॥२८॥
अथवेन्द्रजिते यूने मेघनादाय वा नृप । दीयतामेवमप्येष रावणस्तत्र बान्धवः ॥२९॥
[2]अथैतन्न तवाभीष्टं ततः कन्या स्वयंवरा । विमुच्यतां न वैरी ते तथा सत्युपजायते ॥३०॥
इत्युक्त्वा विरतिं याते[3] मन्त्रिण्यमरसागरे । विद्वान्सुमतिसंज्ञाको जगाद वचनं स्फुटम् ॥३१॥
दशास्योऽनेकपत्नीको महाहङ्कारगोचरः । इमां प्राप्यापि नो तस्य प्रीति[4]रस्मासु जायते ॥३२॥
षोडशाब्दसमानेऽपि सत्याकारेऽस्य भोगिनः । [5]उत्कृष्टमेव विज्ञेयं नयः परमतेजसः ॥३३॥
इन्द्रजिन्मेघवाहाय सति दाने प्रकुप्यति । मेघवाहस्तथा तस्मै तस्मात्तावपि नो वरौ ॥३४॥
श्रीषेणसुतयोरासीद् गणिकार्थं तदा महत् । पितृदुःखकरं युद्धं स्त्रीहेतोः किं न वेष्यते ॥३५॥
वाक्यं ततोऽनुमन्येदं नाम्ना [6]ताराधरायणः । जगाद वचनं [7]चैनं भावेन [8]धृतमानसः ॥३६॥
जयाद्रिदक्षिणं स्थानं कनकं नाम विद्यते । राजा तत्र हिरण्याभः सुमनास्तस्य भामिनी ॥३७॥
अभवत्तनयस्तस्य नाम्ना सौदामिनीप्रभः । महता यशसा कान्त्या वयसा चातिशोभनः ॥३८॥
सर्वविद्याकलापारो लोकनेत्रमहोत्सवः । गुणैरनुपमश्चेष्टारञ्जिताखिलविष्टपः ॥३९॥

वर बतलाइए ॥२६॥ तब एक मन्त्रीने कहा कि यह कन्या भरत क्षेत्रके स्वामी राक्षसोंके अधिपति रावणके लिए दी जानी चाहिए ऐसा मेरा निश्चित मत है ॥२७॥ समस्त विद्याधरोंके स्वामी रावण जैसे स्वजनको पाकर आपका प्रभाव समुद्रान्त पृथिवीमें फैल जायगा ॥२८॥ अथवा हे राजन्! रावणके पुत्र इन्द्रजित् और मेघनाद तरुण हैं सो इन्हें यह कन्या दीजिए क्योंकि उन्हें देनेपर भी रावण स्वजन होगा ॥२९॥ अथवा यह बात भी आपको इष्ट नहीं है तो फिर कन्याको स्वयं पति चुननेके लिए छोड़ दीजिए अर्थात् इसका स्वयंवर कीजिए। ऐसा करनेसे आपका कोई वैरी नहीं बन सकेगा ॥३०॥ इतना कहकर जब अमरसागर मन्त्री चुप हो गया तब सुमति नामका दूसरा विद्वान् मन्त्री स्पष्ट वचन बोला ॥३१॥ उसने कहा कि रावणके अनेक पत्नियाँ हैं, साथ ही वह महा अहङ्कारी है इसलिए इसे पाकर भी उसकी हम लोगोंमें प्रीति उत्पन्न नहीं होगी ॥३२॥ यद्यपि इस परम प्रतापी भोगी रावणका आकार सोलह वर्षके पुरुषके समान है तो भी उसकी आयु अधिक तो है ही ॥३३॥ अतः इसके लिए कन्या देना मैं उचित नहीं समझता। दूसरा पक्ष इन्द्रजित् और मेघनादका रक्खा सो यदि मेघनादके लिए कन्या दी जाती है तो इन्द्रजित् कुपित होता है और इन्द्रजित्के लिए देते हैं तो मेघनाद कुपित होता है इसलिए ये दोनों वर भी ठीक नहीं हैं ॥३४॥ पहले राजा श्रीषेणके पुत्रोंमें एक गणिकाके निमित्त पिताको दुःखी करनेवाला बड़ा युद्ध हुआ था यह सुननेमें आता है सो ठीक ही है क्योंकि स्त्रीका निमित्त पाकर क्या नहीं होता है? ॥३५॥

तदनन्तर जिसका हृदय सदभिप्रायसे युक्त था ऐसा ताराधरायण नामका मन्त्री, पूर्व मन्त्रीके वचनोंकी अनुमोदनाकर इस प्रकारके वचन बोला ॥३६॥ उसने कहा कि विजयार्ध-पर्वतकी दक्षिण श्रेणीमें एक कनकपुर नामका नगर है। वहाँ राजा हिरण्याभ रहते हैं उनकी रानीका नाम सुमना है ॥३७॥ उन दोनोंके विद्युत्प्रभ नामका पुत्र उत्पन्न हुआ है जो बहुत भारी यश, कान्ति और अवस्थासे अत्यन्त सुन्दर है ॥३८॥ वह समस्त विद्याओं और कलाओंका पारगामी है, लोगोंके नेत्रोंका मानो महोत्सव ही है, गुणोंसे अनुपम है और अपनी चेष्टाओंसे

१. निश्चयम्- म० । २. अथ त न क०, ख०, म०, ब०, ज० । ३. याति म० । ४. प्रीतिरस्या सुजायते ख० । ५. अधिकमेव । ६. तारान्धरायणः क०, म० । ७. स्वेन क०, म०, ब०, ज० । ८. हतमानसः ब० । हृतमानसः क०, म०, ज० ।

सुरविद्याधरै सर्वैरेकीभूयापि यत्नत. । अजय्यस्त्रिजगच्छक्तिसग्रहेणेव[1] निर्मित ॥४०॥
कन्येय दीयतां तस्मै भवता यदि सम्मतम् । चिरादुत्पद्यता योगो दम्पत्योरनुरूपयोः ॥४१॥
उत्तमाङ्ग ततो धूत्वा[2] समील्य नयने चिरम् । जगाद वचन मन्त्री नाम्ना सन्देहपारगः ॥४२॥
भव्योऽय पूर्वजा याता मम क्वेति विचिन्तयत् । ससारप्रकृति बुद्ध्वा निर्वेद परमेष्यति ॥४३॥
विषयेष्वप्रसक्तात्मा वर्षेऽष्टादशसख्यके[3] । भड्‌क्त्वा[4] भोगमहालान[5] गृहिता[6] परिहास्यति ॥४४॥
बहिरन्तश्च स सङ्ग परित्यज्य महामना । केवलज्ञानमुत्पाद्य किल निर्वाणमेष्यति ॥४५॥
वियुक्तानेन बालेय भ्रष्टशोभा भविष्यति । शर्वरीव शशाङ्केन जगदालोककारिणा ॥४६॥
[7]श्रृणुतातोऽस्ति नगरमादित्यपुरसज्ञकम् । पुरन्दरपुराकारं रत्नैरादित्यभासुरम् ॥४७॥
नभश्चरशशाङ्कोऽत्र प्रह्लादो नाम भोगवान् । तस्य केतुमती पत्नी केतु[8]र्मानसवासिन ॥४८॥
तयोर्विक्रमसभारो रूपशीलो गुणाम्बुधि । पवनञ्जयनामास्ति तनयो नयमण्डन ॥४९॥
शुभलक्षणसच्छन्नविशालोत्तुङ्गविग्रह[9] । कलाना निलयो वीरो दूरीभूतदुरीहित ॥५०॥
सवत्सरशतेनापि यस्य वक्तु न शक्यते । गुणग्रामोऽखिलः[10] प्राप्तसमस्तजनचेतसः ॥५१॥
अथवा वचनज्ञानमस्पष्टमुपजायते । अतो गत्वैव वीक्षध्वमिम देवसमद्युतिम् ॥५२॥

उसने समस्त लोकको अनुरञ्जित कर रक्खा है ॥३९॥ समस्त देव विद्याधर एक होकर भी उसे प्रयत्नपूर्वक नहीं जीत सकते है । ऐसा जान पड़ता है कि मानो वह तीनो लोकोकी शक्ति इकट्ठी कर ही बनाया गया है ॥४०॥ यदि आपकी सम्मति हो तो यह कन्या उसे दी जावे जिससे योग्य दम्पतियोका चिर कालके लिए सयोग उत्पन्न हो सके ॥४१॥

तदनन्तर संदेहपारग नामका मन्त्री शिर हिलाकर तथा चिर काल तक नेत्र बन्द कर निम्नांकित वचन बोला ॥४२॥ उसने कहा कि यह निकट भव्य है तथा निरन्तर ऐसा विचार करता रहता है कि मेरे पूर्वज कहाँ गये ? सो इससे जान पड़ता है कि यह ससारका स्वभाव जानकर परम वैराग्यको प्राप्त हो जायगा ॥४३॥ जिसकी आत्मा विषयोमे अनासक्त रहती है ऐसा यह कुमार अठारह वर्षकी अवस्थामे भोगरूपी महा आलानका भङ्गकर गृहस्थ अवस्था छोड़ देगा ॥४४॥ वह महामना बहिरङ्ग और अन्तरङ्ग परिग्रहका त्यागकर तथा केवलज्ञान उत्पन्नकर निर्वाणको प्राप्त होगा ॥४५॥ सो जिस प्रकार जगत्को प्रकाशित करनेवाले चन्द्रमासे रहित होनेपर रात्रि शोभाहीन हो जाती है उसी प्रकार इससे वियुक्त होनेपर यह बाला शोभाहीन हो जावेगी ॥४६॥ इसलिए मेरी बात सुनो, इन्द्रके नगरके समान सुन्दर तथा रत्नोसे सूर्यके समान देदीप्यमान एक आदित्यपुर नामका नगर है इसमे प्रह्लाद नामका राजा रहता है जो भोगोसे युक्त है तथा विद्याधरोंके बीच चन्द्रमाके समान जान पडता है । प्रह्लादकी रानी केतुमती है जो कि सौन्दर्यके कारण कामदेवकी पताकाके समान सुशोभित है ॥४७–४८॥ उन दोनोके एक पवनञ्जय नामका पुत्र है जो कि अत्यन्त पराक्रमी, रूपवान, गुणोका सागर तथा नयरूपी आभूषणोसे विभूषित है ॥४९॥ उसका अतिशय ऊँचा शरीर अनेक शुभलक्षणोसे व्याप्त है, वह कलाओंका घर, शूरवीर तथा खोटी चेष्टाओसे दूर रहनेवाला है ॥५०॥ वह सब लोगोके चित्तमे बसा हुआ है तथा सौ वर्षमे भी उसके समस्त गुणोका समूह कहा नहीं जा सकता है ॥५१॥ अथवा वचनोके द्वारा जो किसीका ज्ञान कराया जाता है वह अस्पष्ट ही रहता है इसलिए देव तुल्य कान्तिको धारण करनेवाले इस युवाको स्वयं जाकर ही देख लीजिए ॥५२॥

१ सग्रहेण विनिर्मितः म० । २. कम्पयित्वा । ३. सज्ञके म० । ४. भुक्त्वा म० । ५. महालाभ ज०, म० । महालीना ख० । ६. गृहे ता ख० । ७. श्रृणुत + अतः + अस्ति । ८. कामस्य । ९. विशालो तुङ्ग म० । १०. खिलप्राप्तसमस्त म०, क०, ब० ।

तत कैतुमतस्योच्चैर्गुणै[1] [2] श्रोत्रपथं गतै । सर्वे ते परम प्राप्ता प्रमोद कृतसम्मदा ॥५३॥
श्रुत्वा कन्यापि ता वार्ता विचकास प्रमोदत. । निशाकरकरालोकमात्रादिव कुमुद्वती ॥५४॥
अत्रान्तरेऽत्यय प्राप्त कालो हिमकणान्वित । कामिनीवदनाम्भोजलावण्यहरणोद्यत ॥५५॥
नव पटलमब्जाना नलिनीनामजायत । चिरोत्कण्ठितम[3]ध्वाशसमूहकृतसङ्गमम् ॥५६॥
घन शाखामृता जज्ञे पत्रपुष्पाङ्कुरोद्भव । मधुलक्ष्मीपरिष्वङ्गसजातपुलकाकृति ॥५७॥
चूतस्य मञ्जरीजाल मधुव्रतकृतस्वनम् । मनोलोकस्य विव्याध पटल मारसायकम्[4] ॥५८॥
कोकिलाना स्वनश्चक्रे मानिनीमानभञ्जन । जनस्य व्याकुलीभाव वसन्तालापता गत. ॥५९॥
रमणद्विजदष्टानामोष्ठाना वेदनाभृताम् । [5]उदपद्यत वैशद्य चिरेण वरयोषिताम् ॥६०॥
स्नेहो बभूव चात्यन्तमन्योन्य जगत परम् । उपकारसमाधानपरेहाप्रकटीकृत. ॥६१॥
भ्रमरीं भ्रमणश्रान्तां रमण पक्षवायुना । परितो भ्रमण कुर्वंश्चकार विगतश्रमाम् ॥६२॥
दूर्वाप्रवालमुद्धृत्य[6] सारङ्गयै पृषतो ददौ । तस्यास्तेनामृतेनेव कापि प्रीतिरजायत ॥६३॥
क[7]रिकण्डूयन रेजे [8]वदनभ्रंशिपल्लवम् । करिण्या.[9] सुखसभारनिमीलितविलोचनम् ॥६४॥
स्तवकस्तननम्राभिश्चलत्पल्लवपाणिभि । [10]समालिङ्ग्यन्त वल्लीभिर्भ्रमराक्षीभिरङ्घ्रिपा ॥६५॥
दक्षिणाशामुखोद्गीर्णो[11] प्रावर्तत समीरण । प्रेर्यमाण इवानेन रविरासीदुदग्गतिः ॥६६॥

---

तदनन्तर कर्ण मार्गको प्राप्त हुए पवनञ्जयके उत्कृष्ट गुणोसे सब लोग परम हर्षको प्राप्त हो आन्तरिक प्रसन्नता प्रकट करने लगे ॥५३॥ तथा कन्या भी उस वार्ताको सुनकर हर्षसे इस तरह खिल उठी जिस तरह कि चन्द्रमाकी किरणोके देखने मात्रसे कुमुदिनी खिल उठती है ॥५४॥

अथानन्तर इसी बीचमे वसन्त ऋतु आई और स्त्रियोके मुख कमलकी सुन्दरताके अपहरणमे उद्यत शीतकाल समाप्त हुआ ॥५५॥ कमलिनी प्रफुल्लित हुईं और नये कमलोके समूह चिरकालसे उत्कण्ठित भ्रमर-समूहके साथ समागम करने लगे अर्थात् उनपर भ्रमरोके समूह गूँजने लगे ॥५६॥ वृक्षोके पत्र पुष्प अङ्कुर आदि घनी मात्रामे उत्पन्न हुए जो ऐसे जान पड़ते थे मानो वसन्त लक्ष्मीके आलिङ्गनसे उनमे रोमाञ्च ही उत्पन्न हुए हो ॥५७॥ जिनपर भ्रमर गुंजार कर रहे थे ऐसे आमके मौरोके समूह कामदेवके बाणोके पटलके समान लोगोका मन बेधने लगे ॥५८॥ मानवती स्त्रियोके मानको भङ्ग करनेवाला कोकिलाओंका मधुर शब्द लोगोको व्याकुलता उत्पन्न करने लगा। वह कोकिलाओंका शब्द ऐसा जान पड़ता था मानो उसके बहाने वसन्त ऋतु ही वार्तालाप कर रही हो ॥५९॥ स्त्रियोके जो ओठ पतिके दाँतोसे डसे जानेके कारण पहले वेदनासे युक्त रहते थे अब चिरकाल बाद उनमे विशदता उत्पन्न हुई ॥६०॥ जगत्के जीवोंमे परस्पर बहुत भारी स्नेह प्रकट होने लगा। उनका यह स्नेह उपकारपरक चेष्टाओसे स्पष्ट ही प्रकट हो रहा था ॥६१॥ चारो ओर भ्रमण करता हुआ भ्रमर अपने पङ्खोकी वायुसे, थकी हुई भ्रमरीको श्रमरहित करने लगा ॥६२॥ उस समय हरिण दूर्वाके प्रवाल उखाड़-उखाड़ कर हरिणीके लिए दे रहा था और उससे हरिणीको ऐसा प्रेम उत्पन्न हो रहा था मानो अमृत ही उसे मिल रहा हो ॥६३॥ हाथी हथिनीके लिए खुजला रहा था इस कार्यमे उसके मुखका पल्लव छूटकर नीचे गिर गया था और हथिनीके नेत्र सुखके भारसे निमीलित हो गये थे ॥६४॥ जो गुच्छे रूपी स्तनोंसे झुक रही थीं, जिनके पल्लवरूपी हाथ हिल रहे थे और ऊपर बैठे हुए भ्रमर ही जिनके नेत्र थे ऐसी लतारूपी स्त्रियाँ वृक्षरूप पुरुषोका आलिङ्गन कर रही थीं ॥६५॥ दक्षिण दिशाके मुखसे प्रकट हुआ मलयसमीर बहने लगा और सूर्य उत्तरायण

---

१. केतुमत्या अयमिति कैतुमतस्तस्य पवनञ्जयस्य'। २. कैतुमतस्योच्चै- । ३. भ्रमर । ४. स्मरपत्रिणाम् म० । ५. उपपद्यत म० । ६. -मुद्धृत्य म० । ७ करिकण्डूयितं म० । ८. वदन भ्रंशि म० । ९. करिण्या म० । १०. समलिङ्ग्यन्त म० । ११. मुखोद्गीर्गाः म० ।

समीरणकृताकम्प[1] केसरप्रकर पतन् । मधुसिंहस्य पान्थेन ददृशे केसरोत्कर[2] ॥६७॥
दंष्ट्रा वसन्तसिंहस्य मानस्तम्बेरमाङ्कुश । अङ्कोलकेशर रेजे[3]प्रोषितस्त्रीभयङ्करम् ॥६८॥
घन[4]कैरवज जाल क्वणद्भृङ्गकदम्बकम् । वियोगिनीमनासीव मधुनाकृष्टुमुज्झितम् ॥६९॥
कुड्मलोद्दीपितोऽशोक[6] प्रचलन्नवपल्लव । प्राचुर्याद्वनितोदीर्णरागराशिरिवाबभौ ॥७०॥
किंशुक घनमत्यन्त दिदीपे वनराजिषु । वियोगिनीमन स्थातिरिक्तदु खानिलोपमम् ॥७१॥
व्याप्तदिक्चक्रवालेन रजसा पुष्पजन्मना । वसन्त. पटवासेन चकारेव महोत्सवम् ॥७२॥
निमेषमपि सेहाते न स्त्रीपुसावदर्शनम् । कुत एवान्यदेशेन सङ्गम प्रेमबन्धनौ ॥७३॥
गन्तुमारेभिरे देवा जिनभक्तिप्रचोदिता । नन्दीश्वर महामोदा फाल्गुनाष्टदिनोत्सवे ॥७४॥
जग्मुरष्टापदे तत्र काले विद्याधराधिपाः । पूजोपकरणव्यग्रकरभृत्यगणान्विता ॥७५॥
पूज्य नाभेयनिर्वृत्या तमद्रि भक्तिनिर्भर । समेतो बन्धुवर्गेण महेन्द्रोऽपि समीयिवान् ॥७६॥
स तत्र जिनमर्चित्वा स्तुत्वा नत्वा च भावत । रौक्मे शिलातले श्रीमानासाञ्चक्रे यथासुखम् ॥७७॥
प्रह्लादोऽपि तदायासीत्त गिरिं वन्दितु जिनम् । कृताभीष्ट भ्रमन्नासीन्महेन्द्रेक्षणगोचर. ॥७८॥
महेन्द्रस्य ततोऽभ्याश सुतप्रीत्या महादर । ससर्प विकसन्नेत्र प्रह्लाद प्रीतिमानस' ॥७९॥
अभ्युत्थाय महेन्द्रोऽपि मुदितः पुरुसभ्रम । आलिङ्गन्त समालिङ्गत् प्रह्लाद ह्लादकारणम् ॥८०॥

हो गया सो ऐसा जान पड़ता था मानो इस मलयसमीरसे प्रेरित होकर ही सूर्य उत्तरायण हो गया था ॥६६॥ वायुसे हिलते हुए मौलश्रीके फूलोका समूह नीचे गिर रहा था जिसे पथिक लोग ऐसा समझ रहे थे मानो वसन्तरूपी सिहकी जटाओका समूह ही हो ॥६७॥ विरहिणी स्त्रियोंको भय उत्पन्न करनेवाली अकोल वृक्षके पुष्पोंकी केशर ऐसी सुशोभित हो रही थी मानो वसन्तरूपी सिहकी दंष्ट्रा अर्थात् जबडे ही हो अथवा मानरूपी हाथीका अङ्कुश ही हो ॥६८॥ जिस पर भ्रमर गूँज रहे थे ऐसा कुमुदोका सघनजाल ऐसा जान पड़ता था मानो वियोगिनी स्त्रियोंके मनको खीचनेके लिए वसन्तने जाल ही छोड़ रक्खा था ॥६९॥ जिसके नये-नये पत्ते हिल रहे थे ऐसा बोडियोसे सुशोभित अशोकका वृक्ष ऐसा सुशोभित हो रहा था मानो अधिकताके कारण स्त्रियोंके द्वारा उगला हुआ रागका समूह ही हो ॥७०॥ वनश्रेणियोमे पलाशके सघन वृक्ष ऐसे सुशोभित हो रहे थे मानो विरहिणी स्त्रियोंके मनमे ठहरनेसे बाकी बचे हुए दु खरूपी अग्निके समूह ही हो ॥७१॥ समस्त दिशाओंको व्याप्त करनेवाला फूलोंका पराग सब ओर फैल रहा था उससे ऐसा जान पड़ता था मानो वसन्त सुगन्धित चूर्णके द्वारा महोत्सव ही मना रहा था ॥७२॥ जब प्रेमरूपी बन्धनसे बँधे स्त्री पुरुष पलभरके लिए भी एक दूसरेका अदर्शन नही सहन कर पाते थे तब अन्य देशमे गमन किस प्रकार सहन करते ? ॥७३॥ फाल्गुन मासके अन्तिम आठ दिनमे आष्टाह्निक महोत्सव आया सो जिनभक्तिसे प्रेरित तथा महाहर्ष से भरे देव नन्दीश्वर द्वीपको जाने लगे ॥७४॥ उसी समय पूजाके उपकरणोसे व्यग्र हाथोंवाले सेवकोंसे सहित विद्याधर राजा कैलाशपर्वत पर गये ॥७५॥ वह पर्वत भगवान् ऋषभदेवके मोक्ष जानेसे अत्यन्त पूजनीय था इसलिए भक्तिसे भरा राजा महेन्द्र भी बन्धुवर्गके साथ वहाँ गया था ॥७६॥ उसी समय राजा प्रह्लाद भी जिनेन्द्र देवकी वन्दना करनेके लिए कैलास पर्वतपर गया था सो पूजाके अनन्तर भ्रमण करता हुआ राजा महेन्द्रको दिखाई दिया ॥७८॥ तदनन्तर जिसके नेत्र विकसित हो रहे थे और मन प्रीतिसे भर रहा था ऐसा प्रह्लाद पुत्रकी प्रीतिसे बड़े आदरके साथ राजा महेन्द्रके पास गया ॥७९॥ सो हर्षसे भरे महेन्द्रने भी सहसा उठकर उसकी अग-

१. वकुलकुसुमसमूहः । २ जटासमूहः । ३. प्रेषित-म० । ४. कौरवजङ्घाल ज०, ख० । कौरवक जाल म० । ५. कृष्ट-म० । ६. शोकप्रचलन्नव-म० । ७. ऋषभदेवनिर्वाणेन । ८. रौक्म्ये म० । ९. महेन्द्रेण खगोचरः म० ।

उपविष्टौ च विश्रब्धौ तौ मनोज्ञशिलातले । परस्पर शरीरादिकुशल पर्यपृच्छताम् ॥८१॥
उवाचेति महेन्द्रोऽथ सखे किं कुशल मम । कन्यानुरूपसम्बन्धचिन्ताव्याकुलितात्मन ॥८२॥
अस्ति मे दुहिता योग्या वर प्राप्तु मनोहरा । कस्मै ता प्रददामीति मम भ्राम्यति मानसम् ॥८३॥
रावणो बहुपत्नीकस्तत्सुतौ [1]व्रजतो रुषम् । दानेनान्यतरस्यातो न तेषु रुचिरस्ति मे ॥८४॥
पुरे हेमपुराभिख्ये तनयः कनकद्युते । विद्युत्प्रभो दिनैरल्पैर्निर्वाण प्रतिपत्स्यते ॥८५॥
मयेय विदिता वार्ता प्रकटा सर्वविष्टपे । केनापि कथित नून सज्ज्ञानेनेति योगिना ॥८६॥
मन्त्रिमण्डलयुक्तस्य ततो मम विनिश्चित । पुत्रस्तव वरत्वेन निर्वाच्य पवनञ्जय ॥८७॥
मनोरथोऽयमायाता त्वया[2] प्रह्लाद पूरित । समयेनास्मि सजात क्षणेन परिनिर्वृत ॥८८॥
ततोऽवोचदल प्रीत प्रह्लादो लब्धवाञ्छित । चिन्ता ममापि पुत्रस्य [3]द्वितीयान्वेषण प्रति ॥८९॥
ततोऽहमपि वाक्येन त्वदीयेनामुना सुहृत् । शब्दगोचरतायु[4]क्तां परिप्राप्त सुखासिकाम् ॥९०॥
सरसो मानसाख्यस्य तटेऽथात्यन्तचारुणि । [5]गुरुभ्यां वाञ्छित कर्तुं तयोर्वैवाहमङ्गलम् ॥९१॥
स्थिते तत्रोभयो सेने क्षणकल्पितसश्रये । गजवाजिपदातीनामनुकूलरवाकुले ॥९२॥
दिनेषु त्रिषु यातेषु तयो सावत्सरा जगु. । कल्याणदिवस ज्ञातनिखिलज्योतिरीहिता. ॥९३॥
श्रुत्वा परिजनादेतां सर्वावयवसुन्दरीम् । दिवसानां त्रय सेहे न [6]प्राह्लादि प्रतीक्षितुम् ॥९४॥

---

वानी की और आनन्दके कारण आलिङ्गन करते हुए प्रह्लादका आलिङ्गन किया ॥८०॥ तदनन्तर दोनो ही राजा निश्चित होकर मनोहर शिलातलपर बैठे और परस्पर शरीरादिकी कुशलता पूछने लगे ॥८१॥

अथानन्तर राजा महेन्द्रने कहा कि हे मित्र ! मेरा मन तो निरन्तर कन्याके अनुरूप सम्बन्ध ढूँढनेकी चिन्तासे व्याकुल रहता है अतः कुशलता कैसे हो सकती है ? ॥८२॥ मेरी एक कन्या है जो वर प्राप्त करने योग्य अवस्थामे है किसके लिए उसे दूँ इसी चिन्तामे मन घूमता रहता है ॥८३॥ रावण बहुपत्नीक है अर्थात् अनेक पत्नियोका स्वामी है और इसके पुत्र इन्द्रजित् तथा मेघनाद किसी एकके लिए देनेसे शेष रोषको प्राप्त होते हैं अत उन तीनोमे मेरी रुचि नही है ॥८४॥ हेमपुर नगरमें राजा कनकद्युतिके विद्युत्प्रभ नामका पुत्र है सो वह थोड़े ही दिनोमे निर्वाण प्राप्त करेगा ॥८५॥ यह बात किसी सम्यग्ज्ञानी मुनिने कही है सो समस्त लोकमे प्रसिद्ध है और परम्परा वश मुझे भी विदित हुई है ॥८६॥ अतः मन्त्रिमण्डलके साथ बैठकर मैने निश्चय किया है कि आपके पुत्र पवनञ्जयको ही कन्याका वर चुनना चाहिए ॥८७॥ सो हे प्रह्लाद ! यहाँ पधारकर तुमने मेरे इस मनोरथको पूर्ण किया है । मै तुम्हें देखकर क्षण भरमे ही सन्तुष्ट हो गया हूँ ॥८८॥

तदनन्तर जिसे अभिलषित वस्तुकी प्राप्ति हो रही है ऐसे प्रह्लादने बड़ी प्रसन्नतासे कहा कि पुत्रके अनुरूप वधू ढूँढ़नेकी मुझे भी चिन्ता है ॥८९॥ सो हे मित्र ! आपके इस वचन से मै जो शब्दोंसे न कही जाय ऐसी निश्चिन्तताको प्राप्त हुआ हूँ ॥९०॥ अथानन्तर अञ्जना और पवनञ्जयके पिताने वहीं मानुषोत्तर पर्वतके अत्यन्त सुन्दर तटपर उनका विवाह-मङ्गल करनेकी इच्छा की ॥९१॥ इसलिए क्षणभरमें ही जिनके डेरे तम्बू तैयार हो गये थे तथा जो हाथी घोड़े और पैदल सैनिकोके अनुकूल शब्दोसे व्याप्त था ऐसी उन दोनोकी सेनाएँ वहीं ठहर गईं ॥९२॥ समस्त ज्योतिषियोंकी गतिविधिको जाननेवाले ज्योतिषियोने तीन दिन बीतनेके बाद विवाहके योग्य दिन बतलाया था ॥९३॥ पवनञ्जयने परिजनोंके मुखसे सुन रक्खा था कि

---

१. व्रजतौ म० । २. मायाता ज०, ब० । मायातस्त्वया म०, क०, ख० । ३. भार्यान्वेषणम् । ४. मुक्ता म० । ५. पितृभ्याम् । ६. पवनञ्जयः ।

सङ्गमोत्कण्ठित सोऽयमेभिर्मन्मथसभवै । पूरितो दशभिर्वेगैर्भटो बाणैरिवाहवे ॥९५॥
आद्ये तद्विषया चिन्ता वेगे समुपजायते । द्वितीये द्रष्टुमाकारो बहि समभिलष्यते ॥९६॥
तृतीये मन्ददीर्घोष्णानि श्वासाना विनिर्गम । चतुर्थे सज्वरो दृष्टज्वलनोपमचन्दनः ॥९७॥
विवर्त पञ्चमेऽङ्गस्य कुसुमप्रस्तरादिषु । मन्यते विविध स्वादु षष्ठे भक्त विषोपमम् ॥९८॥
सप्तमे तत्कथासक्त्या विप्रलापसमुद्भव । उन्मत्तताष्टमे गीतनृत्यविभ्रमकारिणी ॥९९॥
मदनोरगदष्टस्य नवमे मूर्च्छनोद्भव. । दशमे दु खसभार' स्वसवेद्य प्रवर्तते ॥१००॥
विवेकिनोऽपि तस्येद तदा जातमनङ्कुशम् । चरित वायुवेगस्य हताशं धिगनङ्गकम् ॥१०१॥
अथ चेतोभुवो वेगैरसो धैर्यात्परिस्युत । उद्वर्तितकरच्छन्नानिश्वासप्रचलानन ॥१०२॥
करसङ्गारुणीभूतस्वेदवद्गण्डमण्डल । उष्णातिदीर्घनिश्वासग्लपितासनपल्लव ॥१०३॥
जृम्भण कम्पन जम्भा मन्द कुर्वन् पुनः पुनः । नि सह धारयन्काय गाढाकल्पकशल्यत ॥१०४॥
रामाभिध्यानतो मोघ हृषीकपटल दधत् । मनोज्ञेष्वपि देशेषु महतीमधृति व्रजन् ॥१०५॥
दधान शून्यमात्मान परित्यक्ताखिलक्रिय. । क्षणमात्रधृता भूय परिमुञ्चन्नपत्रपाम् ॥१०६॥
तनुभूतसमस्ताङ्ग. परिभ्रष्टविभूषण । दध्याविति सचिन्तेन परिवारेण वीक्षित. ॥१०७॥

---

अञ्जनासुन्दरी सर्वाङ्गसुन्दरी है इसलिए उसे देखनेके लिए वह तीन दिनका व्यवधान सहन नही कर सका ॥९४॥ निरन्तर समागमकी उत्कण्ठा रखनेवाला यह पवनञ्जय कामके दश वेगो से इस प्रकार पूर्ण हो गया जिस प्रकार कि युद्धमे कोई योद्धा शत्रुके बाणोसे पूर्ण हो जाता है—भर जाता है ॥९५॥ प्रथम वेगमे उसे अञ्जनाविषयक चिन्ता होने लगी अर्थात् मनमे अञ्जना की इच्छा उत्पन्न हुई। दूसरे वेगके समय बाह्यमे उसकी आकृति देखनेकी इच्छा हुई ॥९६॥ तीसरे वेगमे मन्द लम्बी और गरम साँसे निकलने लगी। चौथे वेगमे ऐसा ज्वर उत्पन्न हो गया कि जिसमे चन्दन अग्निके समान सन्तापकारी जान पडने लगा ॥९७॥ पञ्चम वेगमे उसका शरीर फूलोकी शय्यापर करवटे बदलने लगा। छठवे वेगमे अनेक प्रकारके स्वादिष्ट भोजनको वह विषके समान मानने लगा ॥९८॥ सातवे वेगमे उसीकी चर्चामे आसक्त रहकर विप्रलाप—बकबाद करने लगा। आठवे वेगमे उन्मत्तता प्रकट हो गई जिससे कभी गाने लगता और कभी नाचने लगता था ॥९९॥ कामरूपी सर्पके द्वारा डसे हुए उस पवनञ्जयको नौवे वेगमे मूर्च्छा आने लगी और दशवे वेगमे जिसका स्वयं ही अनुभव होता था ऐसा दु.खका भार प्राप्त होने लगा ॥१००॥ गौतम स्वामी कहते है कि यद्यपि वह पवनञ्जय विवेकसे युक्त था तो भी उस समय उसका चरित्र स्वच्छन्द हो गया था सो ऐसे दुष्ट कामके लिए धिक्कार हो ॥१०१॥

अथानन्तर कामके उपर्युक्त वेगोके कारण पवनञ्जयका धैर्य छूट गया। उसका मुख निरन्तर निकलनेवाले श्वासोच्छ्वासोसे चञ्चल हो गया और वह उसे अपनी हथेलियोसे ढँकने लगा॥१०२॥ वह स्वेदसे भरे अपने कपोलमण्डलको सदा हथेलीपर रखे रहता था जिससे उसमे लालिमा उत्पन्न हो गई थी। वह शीतलता प्राप्त करने के उद्देश्यसे पल्लवोके आसनपर बैठता था तथा उसे गरम-गरम लम्बी श्वासोसे म्लान करता रहता था ॥१०३॥ बाणोके गहरे प्रहारसे असहनीय कामको धारण करनेवाला वह पवनञ्जय बार-बार जमुहाई लेता था, बार-बार सिहर उठता था और बार-बार अङ्गड़ाई लेता था ॥१०४॥ निरन्तर स्त्रीका ध्यान रखनेसे उसकी इन्द्रियोका समूह व्यर्थ हो गया था अर्थात् उसकी कोई भी इन्द्रिय अपना कार्य नहीं करती थी और अच्छे-से-अच्छे स्थानोमे भी उसे धैर्य प्राप्त नहीं होता था—वह सदा अधीर ही बना रहता था ॥१०५॥ उसने शून्य हृदय होकर सब काम छोड़ दिये थे। क्षण भरके लिए वह लज्जाको धारण करता भी था तो पुनः उसे छोड़ देता था ॥१०६॥ जिसके समस्त अङ्ग दुर्बल हो गये थे और जिसने

---

१ पवनञ्जयस्य। २. कृशीभूत।

कदा नु तामहं कान्तां वीक्षे स्वाङ्कनिवेशिताम् । स्पृशन्[1] कमलतुल्यानि गात्राणि कृतसत्कथः ॥१०८॥
श्रुत्वा तावदियं जाता ममावस्थातिदुःखदा । आलोक्य तां तु नो[2] पश्यन् भवेयं पञ्चतां गतः ॥१०९॥
अहो महदिदं चित्रं मनोज्ञापि सखी मम । यदसौ दुःखभारस्य कारणत्वमुपागता ॥११०॥
अयि भद्रे कथं यस्मिन्[3]नुष्यते हृदये त्वया । [4]दग्धुं तदेव सक्तासि पण्डिते दुःखवह्निना ॥१११॥
मृदुचित्ताः स्वभावेन भवन्ति किल योषितः । मद्दुःखदानतो जातं विपरीतमिदं तव ॥११२॥
अनङ्गः सन् व्यथामेतामनङ्ग त्वं करोषि मे । यदि नाम भवेत्साङ्गस्ततः कष्टतमं भवेत् ॥११३॥
[6]क्षतं न चास्ति मे देहे वेदना च गरीयसी । तिष्ठन्नेकत्र चोद्देशे [7]भ्रमामि क्वापि सततम् ॥११४॥
दिवसाना त्रयं नैतन्मम क्षेमेण गच्छति । यदि तां विषयीभावमानयामि न चक्षुषः ॥११५॥
अतस्तद्दर्शनोपायः कतरो मे भविष्यति । यस्याधिगमतश्चित्तं प्रशान्तिमधियास्यति ॥११६॥
अथवा सर्वकार्येषु साधनीयेषु विष्टपे । मित्रं परममुज्झित्वा कारणं नान्यदीक्ष्यते ॥११७॥
इति ध्यात्वा स्थितं पार्श्वे छायाबिम्बमिवानुगम् । विक्रियातः समुत्पन्नं शरीरं स्वमिवापरम् ॥११८॥
नाम्ना प्रहसितं मित्रं सर्वविश्रम्भभाजनम् । मन्दगद्गदया वाचा जगाद पवनञ्जयः ॥११९॥
जानास्येव ममाकूतमतः किं ते निवेद्यते । केवलं मुखरत्वं मे करोत्यत्यन्तदुःखिताम् ॥१२०॥
सखे कस्य वदान्यस्य दुःखमेतन्निवेद्यते । मुक्त्वा त्वां विदिताशेषजगत्त्रयविचेष्टितम् ॥१२१॥

---

सब आभूषण उतारकर अलग कर दिये थे ऐसा पवनञ्जय निरन्तर स्त्रीका ही ध्यान करता रहता था। परिवारके लोग बड़ी चिन्तासे उसकी इस दशाको देखते थे ॥१०७॥ वह सोचा करता था कि मैं उस कान्ताको अपनी गोदमें बैठी कब देखूँगा और उसके कमलतुल्य शरीरका स्पर्श करता हुआ उसके साथ कब वार्तालाप करूँगा ॥१०८॥ उसकी चर्चा सुनकर तो हमारी यह अत्यन्त दुःख देनेवाली अवस्था हो गई है फिर साक्षात् देखकर तो न जाने क्या होगा ? उसे देखकर तो अवश्य ही मृत्युको प्राप्त हो जाऊँगा ॥१०९॥ अहो ! यह बड़ा आश्चर्य है कि वह मेरी सखी मनोहर होकर भी मेरे लिए दुःखका कारण बन रही है ॥११०॥ अरी भली आदमिन ? तू तो बड़ी पण्डिता है फिर जिस हृदयमें निवास कर रही है उसे ही दुःख रूपी अग्निसे जलानेके लिए तैयार क्यों बैठी है ॥१११॥ स्त्रियाँ स्वभावसे ही कोमलचित्त होती है पर मेरे लिए दुःख देनेके कारण तुम्हारे विषयमें यह बात विपरीत मालूम होती है ॥११२॥ हे अनङ्ग ! जब तुम शरीर रहित होकर भी इतनी पीड़ा उत्पन्न कर सकते हो तब फिर यदि शरीर सहित होते तो बड़ा ही कष्ट होता ॥११३॥ मेरे शरीरमें यद्यपि घाव नहीं है तो भी पीड़ा अत्यधिक हो रही है और यद्यपि एक स्थानपर बैठा हूँ तो भी निरन्तर कहीं घूमता रहता हूँ ॥११४॥ यदि मैं उसे नेत्रोंका विषय नहीं बनाता हूँ—उसे देखता नहीं हूँ तो मेरे ये तीन दिन कुशलता पूर्वक नहीं बीत सकेंगे ॥११५॥ इसलिए उसके दर्शनका उपाय क्या हो सकता है जिसे प्राप्तकर चित्त शान्ति प्राप्त करेगा ॥११६॥ अथवा इस संसारमें करने योग्य समस्त कार्योंमें परममित्रको छोड़कर और दूसरा कारण नहीं दिखाई देता ॥११७॥ ऐसा विचारकर पवनंजयने पास ही बैठे हुए प्रहसित नामक मित्रसे धीमी एवं गद्गद वाणीमें कहा। वह मित्र छायाके समान सदा पवनञ्जयके साथ रहता था। विक्रियासे उत्पन्न हुए उन्हींके दूसरे शरीरके समान जान पड़ता था और सर्व विश्वासका पात्र था ॥११८–११९॥

उसने कहा कि मित्र ! तुम मेरा अभिप्राय जानते ही हो अतः तुमसे क्या कहा जाय ? मेरी मुखरता केवल तुम्हें दुःखी ही करेगी ॥१२०॥ हे सखे ! तीनों लोकोंकी समस्त चेष्टाओंको

---

१ स्पृशे कमल म० । २ नोऽपश्यद्भवेयं म० । ३. निवासः क्रियते । यस्मिन् तुष्यते म० । ४. दग्ध म० । ५. शक्तासि म० । ६. कृतं न चात्र म० । ७. भ्रमसि म० ।

कुटुम्बी क्षितिपालाय गुरवेऽन्तेवसन् प्रिया । पत्यै वैद्याय रोगार्तो मात्रे शैशवसंगत. ॥१२२॥
निवेद्य मुच्यते दु खाद्यथात्यन्तपुरोरपि । मित्रायैव नर. प्राज्ञस्ततस्ते कथयाम्यहम् ॥१२३॥
श्रुत्वैव तामह हृद्या महेन्द्रतनुसंभवाम् । मन्मथस्य शरैर्दूर विकलत्वमुपागत ॥१२४॥
तामदृष्ट्वातिचक्षुष्या प्रिया मानसहारिणीम् । अतिवाहयितु नाह प्रभवामि दिनत्रयम् ॥१२५॥
अतो विधत्स्व त यत्न येन पश्यामि तामहम् । तद्दर्शनादह स्वस्थो मयि स्वस्थे भवानपि ॥१२६॥
जीवित ननु सर्वस्यादिष्ट सर्वशरीरिणाम् । सति तत्रान्यकार्याणामात्मलाभस्य संभव ॥१२७॥
एवमुक्तस्ततोऽवोचदाशु प्रहसितो हसन् । लब्धार्थमिव कुर्वाण सद्यो मित्रस्य मानसम् ॥१२८॥
सखे किं बहुनोक्तेन कृत्यकालातिपातिना । वद किं करवाणीति ननु नान्यत्वमावयो ॥१२९॥
यावत्तयो समालापो वर्ततेऽग्य सुचित्तयो । तावत्तदुपकारीव गतोऽस्त घर्मदीधिति[1] ॥१३०॥
[2]प्राह्लादेरिव रागेण सन्ध्यालोकेन भानुमान्[3] । प्रेरितो ध्वान्तसम्भूतिमिच्छता प्रियकारिणा ॥१३१॥
कान्तया रहितस्यास्य दु ख दृष्ट्वैव सध्यया । करुणायुक्तया भर्त्ता तेजसामनुवर्तित ॥१३२॥
ततो भास्करनाथस्य वियोगादिव [4]कृष्णताम् । आशा पौरन्दरी[5] प्राप तमसात्यन्तभूरिणा ॥१३३॥
नीलेनेव च वस्त्रेण क्षणाल्लोकस्तिरस्कृत । रजो नीलाञ्जनस्येव प्रवृत्त पतितु घनम् ॥१३४॥

---

ऐसा विचार करते हुए उसका मन अपनी प्रिया अञ्जनासुन्दरीपर गया और उसीमे प्रेम होनेके कारण उसने विवाहके समय सेवित स्थानोंको बड़े गौरसे देखा ॥११७॥ वे सब स्थान उसके नेत्रोंके सामने आनेपर शोकके कारण हो गये और मर्म भेद करनेवालोंके समान दुःसह हो उठे ॥११८॥ वह मन ही मन सोचने लगा कि हाय हाय बड़े कष्टकी बात है—मुझ दुष्ट चित्तके द्वारा छोड़ी हुई वह प्रिया भी इस चकवीके समान दुःखको प्राप्त हो रही होगी ॥११९॥ यदि उस समय उसकी सखीने कठोर शब्द कहे थे तो दूसरेके दोषसे मैंने उसे क्यों छोड़

---

१ कृपाहतः म० ।

धिगस्मत्सदृशान्मूर्खानप्रेक्षापूर्वकारिणः । जनस्य[1] ये विना हेतुं यत्कुर्वन्त्यसुखासनम् ॥१२१॥
मम वज्रमयं नूनं हृदयं पापचेतसः । प्रत्यवस्थितं यत्कालमियन्तं तां प्रियां प्रति ॥१२२॥
किं करोम्यधुना तातमापृच्छ्य निरितो गृहात् । कथं नु विनिवर्तेऽहमहो प्राप्तोऽस्मि संकटम् ॥१२३॥
व्रजेयं यदि संग्रामं जीवेन्नासौ ततः स्फुटम् । तदभावे ममाभावः स्वतश्च गुरु नापरम् ॥१२४॥
अथवा सर्वसन्देहग्रन्थिभेदनकारणम् । विद्यते मे परं मित्रं तत्रेदं तिष्ठते[2] शुभे ॥१२५॥
तस्मात्पृच्छाम्यमुं तावत्सर्वाचारविशारदम् । निश्चित्ये विहिते कार्ये लभन्ते प्राणिनः सुखम् ॥१२६॥
इति च ध्यातमेतेन दृष्ट्वा चैव विचेतसम् । मन्दं प्रहसितोऽपृच्छद्वेव तद्दुःखदुःखितः ॥१२७॥
सखे ! प्रतिनरोच्छेदकृतये प्रस्थितस्य ते । कस्माद्वदनमद्यैव विषण्णमिव दृश्यते ॥१२८॥
[3]अपत्रपां विमुच्याशु मह्यं सुजन वेदय । नितान्तमाकुलीभावो जातो मे भवतीदृशि ॥१२९॥
ततोऽसावेवमुक्तः सन् [4]कृच्छ्रनिःसृतया गिरा । जगादेति [5]परिभ्रंशं दूरं धैर्याद्[6]उपागतः ॥१३०॥
शृणु सुन्दर कस्यान्यत्कथनीयमिदं मया । ननु सर्वरहस्यानां त्वमेव मम भाजनम् ॥१३१॥
स त्वं कथयितुं नैतदन्यस्मै सुहृदर्हसि । त्रपा हि वस्तुनानेन जायते परमा मम ॥१३२॥
ततः प्रहसितोऽवोचद् विश्रब्धस्त्वं निवेदय । त्वया हि वेदितो मेऽर्थस्तप्तायोगतवारिवत् ॥१३३॥
ततो वायुरुवाचेदं शृणु मित्राञ्जना मया । न कदाचित्कृतप्रीतिरिति मे दुःखितं मनः ॥१३४॥

दिया ? ॥१२०॥ बिना विचारे काम करनेवाले मुझ जैसे मूर्खोंके लिए धिक्कार है। जो बिना कारण ही लोगोंको दुःखी करते हैं ॥१२१॥ निश्चय ही मुझ पापीका चित्त वज्रका बना है इसीलिए तो वह इतने समय तक प्रियाके विरुद्ध रह सका है ॥१२२॥ अब क्या करूँ ? मैं पितासे पूछकर घरसे बाहर निकला हूँ इसलिए अब लौटकर वापिस कैसे जाऊँ ? अहो ! मैं बड़े संकटमें आ पड़ा हूँ ॥१२३॥ यदि मैं युद्धके लिए जाता हूँ तो निश्चित है कि वह जीवित नहीं बचेगी और उसके अभावमें मेरा भी अभाव स्वयमेव हो जायगा। इसलिए इससे बढ़कर और दूसरा कष्ट नहीं है ॥१२४॥ अथवा समस्त सन्देहकी गाँठको खोलनेवाला मेरा परम मित्र विद्यमान है सो यही इस शुभ कार्यका निर्णायक है ॥१२५॥ इसलिए सब प्रकारके व्यवहारमें निपुण इस मित्रसे पूछता हूँ क्योंकि जो कार्य विचार कर किया जाता है उसीमें प्राणी सुख पाते हैं सर्वत्र नहीं ॥१२६॥

इधर पवनञ्जय इस प्रकार विचार कर रहा था उधर प्रहसित मित्रने उसे अन्यमनस्क देखा। तब उसके दुःखसे दुखी होकर उसने स्वयं ही धीरेसे पूछा ॥१२७॥ कि हे सखे ! तुम तो शत्रुका उच्छेद करनेके लिए निकले हो फिर आज इस तरह तुम्हारा मुख खिन्न-सा क्यों दिखाई दे रहा है ? ॥१२८॥ हे सत्पुरुष ! लज्जा छोड़कर शीघ्र ही मेरे लिए इसका कारण बताओ। आपके इस तरह खिन्न रहते हुए मुझे बहुत आकुलता उत्पन्न हो रही है ॥१२९॥ तदनन्तर जो धैर्यसे भ्रष्ट होकर बहुत दूर जा पड़ा था ऐसा पवनञ्जय मित्रके इस प्रकार कहनेपर कठिनाईसे निकलती हुई वाणीसे कहने लगा कि ॥१३०॥ हे सुन्दर ! सुनो, तुम्हें छोड़कर और किससे कहूँगा ? यथार्थमें मेरे समस्त रहस्योंके तुम्हीं एक पात्र हो ॥१३१॥ हे मित्र ! यह बात तुम किसी दूसरेसे कहनेके योग्य नहीं हो क्योंकि इससे मुझे अधिक लज्जा उत्पन्न होती है ॥१३२॥ इसके उत्तरमें प्रहसितने कहा कि तुम निःशङ्क होकर कहो क्योंकि तुम्हारे द्वारा कहा हुआ पदार्थ मेरे लिए संतप्त लोहेपर पड़े पानीके समान है ॥१३३॥

तदनन्तर पवनञ्जयने कहा कि हे मित्र ! सुनो, मैंने आज तक कभी अञ्जनासे प्रेम नहीं

१. जीविना युक्त ये म० । जनस्योर्जो विना ज० । २. निर्णेतृत्वेनावलम्ब्यते । ३. लज्जाम् । ४ कृच्छ्र-निस्त्रपया म० । ५. परं भ्रंशं म० ख । ६. धैर्यमुपागतः क० ।

क्रूरेऽपि मयि सामीप्यादियन्त समय तथा । आत्मा सन्धारितो[1] नित्य प्रवृत्तनयनाम्भसा ॥१३५॥
आगच्छता मया दृष्टा तस्याश्चेष्टाधुना तु या । तया जानामि सा नून न प्राणिति वियोगिनी ॥१३६॥
तस्या विनापराधेन मया परिभव कृत । द्व्यग्र विंशतिमब्दाना पाषाणसमचेतसा ॥१३७॥
आगच्छता मया दृष्ट तस्यास्तन्मुखपङ्कजम् । शोकप्रालेयसपर्कान्मुक्त लावण्यसम्पदा ॥१३८॥
तस्यास्ते नयने दीर्घे नीलोत्पलसमप्रभे । इषुवत्स्मृतिमारूढे हृदय विध्यतेऽधुना ॥१३९॥
तदुपाय कुरु त्व तमावयोर्येन सगम । जायेत मरण माभूदुभयोरपि सज्जन ॥१४०॥
ऊचे प्रहसितोऽथैव[2] क्षण[3] निश्चलविग्रह । उपायचिन्तनात्यन्तचलदोलास्थमानस ॥१४१॥
कृत्वा गुरुजनापृच्छा निर्गतस्य तवाधुना । [4]शत्रु निर्जेतुकामस्य [5]साम्प्रत न निवर्तनम् ॥१४२॥
समक्ष गुरुलोकस्य नानीता प्रथम च या । लज्यते तामिहानेतुमधुनाञ्जनसुन्दरीम् ॥१४३॥
तस्मादविदितो गत्वा तत्रैवैतां त्वमानय । नेत्रयोर्गोचरीभाव सभाषणसुखस्य च ॥१४४॥
जीवितालम्बन कृत्वा चिरात्तस्या समागमम् । तत क्षिप्र निवर्तस्व शीतलीभूतमानस ॥१४५॥
निरपेक्षस्ततो भूत्वा वहन्नुत्साहमुत्तमम् । गमिष्यसि रिपु जेतुमुपायोऽय सुनिश्चित ॥१४६॥
तत. परममित्युक्त्वा सेनान्य मुद्गराभिधम् । नियुज्य बलरक्षाया व्याजतो मेरुवन्दनात् ॥१४७॥
माल्यानुलेपनादीनि गृहीत्वा त्वरयान्वित । पुर प्रहसित कृत्वा वायुर्गगनमुद्ययौ ॥१४८॥
तावच्च भानुरैदस्त कृपयेव प्रचोदित. । विश्रब्धमेतयोर्योगो निशीथे जायतामिति ॥१४९॥

किया इसलिए मेरा मन दुखी हो रहा है ॥१३४॥ यद्यपि मै क्रूर हूँ और क्रूरतावश उससे बोलता-चालता नहीं था तो भी मात्र समीपमे रहनेके कारण उसने निरन्तर आँसू डाल-डालकर अपने आपको जीवित रक्खा है ॥१३५॥ परन्तु उस दिन आते समय मैने उसकी जो चेष्टा देखी थी उससे जानता हूँ कि वह वियोगिनी अब जीवित नहीं रहेगी ॥१३६॥ मुझ पाषाणचित्तने अपराधके बिना ही उसका बाईस वर्ष तक अनादर किया है ॥१३७॥ आते समय मैने उसका वह मुख देखा था जो कि शोक रूपी तुषारसे सम्पर्क होनेके कारण सौन्दर्य रूपी सम्पदासे रहित था ॥१३८॥ उसके जब नीलोत्पलके समान नीले एवं दीर्घ नेत्र स्मृतिमे आते है तो बाणकी तरह हृदय विध जाता है ॥१३९॥ इसलिए हे सज्जन ! ऐसा उपाय करो कि जिससे हम दोनोका समागम हो जाय और मरण न हो सके ॥१४०॥

अथानन्तर क्षणभरके लिए जिसका शरीर तो निश्चल था और मन उपायकी चिन्तनामे मानो अत्यन्त चञ्चल झूलापर ही स्थित था ऐसा प्रहसित बोला कि ॥१४१॥ चूँकि तुम गुरुजनोसे पूछकर निकले हो और शत्रुको जीतना चाहते हो इसलिए इस समय तुम्हारा लौटना उचित नहीं है ॥१४२॥ इसके सिवाय गुरुजनोंके समक्ष तुम कभी अञ्जनाको अपने पास नही लाये हो इसलिए इस समय उसका यहाँ लाना भी लज्जाकी बात है ॥१४३॥ अत: अच्छा उपाय यही है कि तुम गुप्त रूपसे वहीं जाकर उसे अपने दर्शन तथा सभाषणजन्य सुखका पात्र बनाओ ॥१४४॥ तुम्हारा समागम उसके जीवनका आलम्बन है सो उसे चिर काल तक प्राप्त कराकर तथा अपने मनको ठण्डाकर शीघ्र ही वहाँसे वापिस लौट आना ॥१४५॥ और इस तरह तुम उस ओरसे निश्चिन्त हो उत्तम उत्साहको धारण करते हुए शत्रुको जीतनेके लिए जा सकोगे॥१४६॥

तदनन्तर 'बहुत ठीक है' ऐसा कहकर शीघ्रतासे भरा पवनंजय, मुद्गर नामक सेनापतिको सेनाकी रक्षामे नियुक्त कर माला अनुलेपन आदि अन्य सुगन्धित पदार्थ लेकर और प्रहसित मित्रको आगे कर मेरुवन्दनाके बहाने आकाशमे जा उड़ा ॥१४७-१४८॥ इतने मे ही सूर्य अस्त

१. सन्धारिता म० । २. प्रहसितोऽप्येव म० । ३. क्षणनिश्चल म० । ४. शत्रुनिर्जेतु, -म० । ५. युक्तम् ।

[1]सन्ध्यालोकपरिध्वसहेतुना तमसान्वितम्[2] । जगत् स्पर्शनविज्ञेयपदार्थमभवत्तत ॥१५०॥
प्राप्तश्चाञ्जनसुन्दर्या गृहे [3]प्रग्रीवकोदरे । वायुरस्थात्प्रविष्टस्तु तस्या प्रहसितोऽन्तिकम् ॥१५१॥
ततस्त सहसा दृष्ट्वा मन्दद्वीपप्रकाशत । अञ्जना विव्यथेऽत्यर्थं क कोऽयमिति वादिनी ॥१५२॥
सखी वसन्तमालाञ्च सुप्ता पार्श्वे व्यनिद्रयत् । कुशलोत्थाय सा तस्याश्चकार भयनाशनम् ॥१५३॥
तत प्रहसितोऽस्मीति गदित्वाऽसौ नमस्कृतिम् । प्रयुज्याकथयत्तस्मै पवनञ्जयमागतम् ॥१५४॥
तत स्वप्नसम श्रुत्वा प्राणनाथस्य सागमम् । ऊचे प्रहसित दीनमिद गद्गदया गिरा ॥१५५॥
किं मा प्रहसितापुण्या हससि प्रियवर्जिताम् । ननु कर्मभिरेवाह हसितातिमलीमसै ॥१५६॥
प्रियेण परिभूतेति विदित्वा वद केन नो । परिभूतास्मि निर्भाग्या दु खावस्थानविग्रहा ॥१५७॥
विशेषतस्त्वया कान्त प्रोत्साह्य क्रूरचेतसा । एतामारोपितोऽवस्था मम कृच्छ्रविधायिनीम् ॥१५८॥
अथवा भद्र ते कोऽत्र दोष कर्मवशीकृतम् । जगत्सर्वमवाप्नोति दुख वा यदि वा सुखम् ॥१५९॥
इति साश्रु वदन्ती तामात्मनिन्दनतत्पराम् । नत्वा प्रहसितोऽवोचद् दु खार्द्रीकृतमानस ॥१६०॥
कल्याणि मा भणीरेव क्षमस्व जनित मया । आगो विचारशून्येन पापावष्टब्धचेतसा ॥१६१॥
प्राप्तानि विलय नून दुष्कर्माणि तवाधुना । येन प्रेमगुणाकृष्टो जीवितेश समागत ॥१६२॥
अधुनास्मिन् [4]प्रसन्ने ते किं न जात सुखावहम् । ननु चन्द्रेण शर्वर्या सगमे का न चारुता ॥१६३॥

हो गया सो रात्रिके समय इन दोनोका निश्चिन्ततासे समागम हो सके इस करुणासे प्रेरित हो कर ही मानो अस्त हो गया था ॥१४९॥ तदनन्तर सध्याके प्रकाशको नष्ट करनेका कारण जो अन्धकार उससे युक्त हो कर समस्त संसार श्याम वर्ण हो गया और समस्त पदार्थ मात्रस्पर्शन इन्द्रियके द्वारा ही जानने योग्य रह गये ॥१५०॥ अञ्जनासुन्दरीके घर पहुँच कर पवनञ्जय तो बाह्य बरण्डामें रह गया और प्रहसित उसके पास गया ॥१५१॥

तदनन्तर दीपकके मन्द प्रकाशमे उसे सहसा देख कर 'यह कौन है कौन है', ऐसा कहती हुई अञ्जना अत्यधिक भयभीत हुई ॥१५२॥ उसने पासमे सोई वसन्तमाला सखीको जगाया सो उस चतुरने उठकर उसका भय नष्ट किया ॥१५३॥ तत्पश्चात् 'मै प्रहसित हूँ' ऐसा कह कर उसने नमस्कार किया और पवनंजयके आनेकी सूचना दी ॥१५४॥ तब वह स्वप्नके समान प्राणनाथके समागमका समाचार सुन गद्गद वाणीमे दीनताके साथ प्रहसितसे कहने लगी कि ॥१५५॥ हे प्रहसित ! मुझ पुण्यहीना तथा पतित्यक्ताकी हँसी क्यो करते हो ? मै तो अपने मलिन कर्मोंसे स्वयं ही हास्यका पात्र हो रही हूँ ॥१५६॥ यह हृदयवल्लभके द्वारा तिरस्कृत है—पतिके द्वारा ठुकराई गई है ऐसा जानकर मुझ अभागिनी एवं दु खिनीका किसने नहीं तिरस्कार किया है ? ॥१५७॥ खास कर दुष्ट चित्तको धारण करने वाले तुम्हींने प्राणनाथको प्रोत्साहित कर मुझे अत्यन्त दु ख देने वाली इस अवस्था तक पहुँचाया है ॥१५८॥ अथवा हे भद्र ! इसमें तुम्हारा क्या दोष है ? क्योकि कर्मके वशीभूत हुआ समस्त संसार दुःख अथवा सुख प्राप्त कर रहा है ॥१५९॥ इस प्रकार जो अश्रु ढालती हुई कह रही थी तथा अपने आपकी निन्दा करनेमे तत्पर थी ऐसी अञ्जना सुन्दरीको नमस्कार कर प्रहसित बोला । उस समय प्रहसितका मन दुःख से द्रवीभूत हो रहा था ॥१६०॥ उसने कहा कि हे कल्याणि ! ऐसा मत कहो मुझ निर्विचार तथा पापयुक्त चित्तके धारकने जो अपराध किया है उसे क्षमा करो ॥१६१॥ इस समय तुम्हारे दुष्कर्म निश्चय ही नष्ट हो गये हैं क्योंकि प्रेमरूपी गुणसे खिंचा हुआ तुम्हारा हृदय-वल्लभ स्वयं आया है ॥१६२॥ अब इसके प्रसन्न रहने पर तुम्हें कौन सी वस्तु सुखदायक नहीं होगी ? वास्तवमे चन्द्रमाके साथ समागम होने पर रात्रिमें कौनसी सुन्दरता नही आ जाती ? ॥१६३॥

१. सन्ध्या म० । २. तपसान्वितांम् म० । ३. प्रग्रीवो मत्तवारणः । ४. प्रसन्नेति ।

तत क्षणं[1] स्थिता चेद जगादाञ्जनसुन्दरी । प्रतिनिस्वनवत्येव सख्यनूदितया गिरा ॥१६४॥
असभाव्यमिद भद्र यथा वर्षं जलोज्झितम् । भवत्यप्यथवा काले कल्याण कर्मचोदितम् ॥१६५॥
तथास्तु स्वागत तस्य जीवितस्येशितुर्मम । अद्य मे फलित पूर्वशुभानुष्ठानपादप ॥१६६॥
वदन्त्यामेवमेतस्यामानन्दास्राक्षचक्षुषि[2] । तत्सख्येवान्तिक नीतस्तस्याः करुणया प्रिय ॥१६७॥
त्रस्तसारङ्गकान्ताक्षी दृष्ट्वा त परमोत्सवम् । जानुद्वयासकृन्न्यस्तस्रस्तपाणिसरोरुहा ॥१६८॥
स्तम्भवत्प्रसृताकाण्डा[3] वेपथुश्रितविग्रहा । शनैरुत्थातुमारब्धा शयनस्था प्रयासिनी ॥१६९॥
अथालमलमेतेन देवि क्लेशविधायिना । सम्भ्रमेणेति वचन विमुञ्चन्नमृतोपमम् ॥१७०॥
समुत्थितां प्रिया कृच्छ्रादञ्जलि बद्धुमुद्यताम् । गृहीत्वा दयित पाणौ शयने समुपाविशत् ॥१७१॥
[4]स्वेदी पाणिरसौ तस्या. परम पुलक वहन् । प्रियस्पर्शामृतेनेव सिक्तो व्यामुञ्चदङ्कुरान् ॥१७२॥
नत्वा वसन्तमाला त कृत्वा भाषणमादरात् । साक प्रहसितेनास्थाद्रम्ये कक्षान्तरे सुखम् ॥१७३॥
अथानादरत. पूर्वं त्रपमाणः स्वयकृतात् । पवन कुशल प्रष्टु न प्रावर्तत चेतसा ॥१७४॥
विलक्षस्तु प्रिये मृष्य[5] मया कर्मानुभावत । निकार कृतमित्यूचे तत्क्षणाकुलमानस ॥१७५॥
आद्यसभाषणात्सापि वहन्ती नतमाननम् । जगाद मन्दया वाचा निश्चलाखिलविग्रहा ॥१७६॥

तदनन्तर अञ्जनासुन्दरी क्षण भरके लिए चुप हो रही। उसके बाद उसने सखीके द्वारा अनूदित वचनोंके द्वारा उत्तर दिया। सखी जो वचन कह रही थी वे अञ्जनाकी प्रतिध्वनिके समान जान पड़ते थे ॥१६४॥ उसने कहा कि हे भद्र! जिस प्रकार जलसे रहित वर्षाका होना असम्भव है उसी प्रकार उनका आना भी असम्भव है। अथवा इस समय मेरे किसी शुभ-कार्यका उदय हुआ हो जिससे तुम्हारा कहना सम्भव भी हो सकता है ॥१६५॥ अस्तु, यदि प्राणनाथ आये है तो मै उनका स्वागत करती हूँ। मेरा पूर्वोपार्जित पुण्यकर्मरूपी वृक्ष आज फलीभूत हुआ है ॥१६६॥ इस प्रकार नेत्रोंमे हर्षके आँसू भरे हुई अञ्जनासुन्दरी यह कह ही रही थी कि सखीके समान करुणा प्राणनाथको उसके समीप ले आई ॥१६७॥ उस समय अञ्जना शय्यापर बैठी थी। ज्यो ही उसने परम आनन्दके देनेवाले प्राणनाथको समीप आते देखा त्योंही वह उठनेका प्रयास करने लगी। उसके नेत्र भयभीत हरिणके समान सुन्दर थे, वह खड़ी होनेके लिए अपने घुटनोपर बार-बार हस्त-कमल रखती थी पर वे दुर्बलताके कारण नीचे खिसक जाते थे। उसकी जाँघे खम्भेके समान अकड़ गई थी और सारा शरीर काँपने लगा था ॥१६८-१६९॥ यह देख पवनञ्जयने अमृततुल्य निम्न वचन कहे कि हे देवि! रहने दो, क्लेश उत्पन्न करनेवाले इस सम्भ्रमसे क्या प्रयोजन है? ॥१७०॥ इतना कहनेपर भी अञ्जना बड़े कष्टसे खड़ी होकर हाथ जोड़नेका उद्यम करने लगी कि पवनञ्जयने उसका हाथ पकड़कर उसे शय्यापर बैठा दिया ॥१७१॥ अञ्जनाका वह हाथ पसीनासे युक्त होगया और रोमाञ्च धारण करने लगा था जिससे ऐसा जान पड़ता था मानो पतिके स्पर्शरूपी अमृतसे सींचा जाकर अङ्कुर ही धारण कर रहा था ॥१७२॥ वसन्तमालाने पवनञ्जयको नमस्कारकर आदरपूर्वक उसके साथ वार्तालाप किया। तदनन्तर वह प्रहसितके साथ एक दूसरे सुन्दर कमरेमे सुखसे बैठ गई ॥१७३॥

अथानन्तर चूँकि पवनञ्जय अपने द्वारा किये हुए अनादरसे लज्जित हो रहा था अतः सर्वप्रथम कुशल समाचार पूछनेके लिए वह हृदयसे प्रवृत्त नही हो सका ॥१७४॥ तदनन्तर लज्जित होते हुए उसने कहा कि हे प्रिये! मैने कर्मोदयके प्रभावसे तुम्हारा जो तिरस्कार किया है उसे क्षमा करो। यह कहते समय पवनञ्जयका मन अत्यन्त आकुल हो रहा था ॥१७५॥ अञ्जनाका पतिके साथ वार्तालाप करनेका प्रथम अवसर था इसलिए वह भी लज्जाके कारण मुख

१. क्षणस्थिता ख० । २. -मानन्दात्यास्तचक्षुषि म० । ३. जङ्घाकाण्डा । ४. स्वेदयुक्तः । ५. क्षमस्व ।

न कश्चिज्जनितो नाथ त्वया परिभवो मम । अधुना कुर्वता स्नेह मनोरथसुदुर्लभम् ॥१७७॥
त्वत्स्मृति[1]प्रतिबद्ध मे वहन्त्या ननु जीवितम् । त्वदायत्तो निकारोऽपि महानन्दसमोऽभवत् ॥१७८॥
[2]अथैव भाषमाणाया विधाय चिबुकेऽङ्गुलिम् । उन्नमय्य मुख पश्यन् जगाद पवनञ्जय· ॥१७९॥
देवि सर्वापराधाना विस्मृत्यै तव पादयो· । प्रणाममेष यातोऽस्मि प्रसाद परम व्रज ॥१८०॥
इत्युक्त्वा स्थापित तेन मूर्द्धान पादयो प्रिया । त्वरया करपद्माभ्यामुन्नेतु व्यापृताभवत् ॥१८१॥
तथावस्थित एवासौ ततोऽवोचत्प्रिय वच । प्रसन्नास्मीति[3] येनाहमुद्यच्छामि शिर. प्रिये ॥१८२॥
क्षान्तमित्युदितोऽथासावुन्नमय्याङ्गमुत्तमम् । चक्रे प्रियासमाश्लेष [4]सुखामीलितलोचन. ॥१८३॥
आश्लिष्टा दयितस्यासौ तथा गात्रेष्वलीयत । पुनर्वियोगभीतेव [5]गतान्तर्विग्रह यथा ॥१८४॥
आलिङ्गनविमुक्तायास्तस्या· स्तिमितलोचनम् । मुख मुक्तनिमेषाभ्या लोचनाभ्या पपौ प्रिय ॥१८५॥
पादयो करयोर्नाभ्यां स्तनयोश्चिबुकेऽलिके । गण्डयोर्नेत्रयोश्चास्याश्चुम्बन मदनातुर ॥१८६॥
पुन पुनश्चकारासौ स्वेदिना पाणिना स्पृशन् । आप्तसेवा हि सा नून क्रियते वक्त्रचुम्बने ॥१८७॥
तत प्रबुद्धराजीवगर्भच्छदसमप्रभम् । स पपात्रधर तस्या विमुञ्चन्तमिवामृतम् ॥१८८॥
नीवीविमोचनव्यग्रपाणिमस्य त्रपावती । रोद्धुमैच्छन्न[6] सा शक्ता पाणिना वेपथुश्रिता ॥१८९॥

नीचा किये थी । उसका सारा शरीर निश्चल था । इसी दिशामे उसने धीरे-धीरे उत्तर दिया ॥१७६॥ कि हे नाथ ! चूँकि इस समय आप जिसकी मुझे आशा ही नही थी ऐसा दुर्लभ स्नेह कर रहे है इसलिए यही समझना चाहिए कि आपने मेरा कुछ भी तिरस्कार नही किया है ॥१७७॥ मैने अबतक जो जीवन धारण किया है वह एक आपकी स्मृतिके आश्रय ही धारण किया है इसलिए आपके द्वारा किया हुआ तिरस्कार भी मेरे लिए महान् आनन्द स्वरूप ही रहा है ॥१७८॥

अथानन्तर ऐसा कहती हुई अञ्जनाकी चिबुकपर अँगुली रख उसके मुखको कुछ ऊँचा उठाकर उसीकी ओर देखते हुए,पवनञ्जयने कहा कि ॥१७९॥ हे देवि ! समस्त अपराध भूल जाओ इसलिए मै तुम्हारे चरणोमे प्रणाम करता हूँ, परम प्रसन्नताको प्राप्त होओ ॥१८०॥ इतना कहकर पवनञ्जयने अपना मस्तक अञ्जनाके चरणोमे रख दिया और अञ्जना उसे अपने कर-कमलोसे शीघ्र ही उठानेका प्रयत्न करने लगी ॥१८१॥ परन्तु पवनञ्जय उसी दशामे पड़े रहे । उन्होंने कहा कि हे प्रिये ! जब तुम यह कहोगी 'कि मैं प्रसन्न हूँ' तभी शिर ऊपर उठाऊँगा ॥१८२॥ तदनन्तर 'क्षमा किया' अञ्जनाके ऐसा कहते ही पवनञ्जयने शिर ऊपर उठाकर उसका आलिङ्गन किया । उस समय उसके दोनो नेत्र सुखसे निमीलित हो रहे थे ॥१८३॥ आलिङ्गित अञ्जना पतिके शरीरमे इस प्रकार लीन हो गई मानो फिरसे वियोग न हो जावे इस भयसे शरीरके भीतर ही प्रविष्ट होना चाहती थी ॥१८४॥ पवनञ्जयने अञ्जनाको आलिङ्गनसे छोड़ा तो निश्चल नेत्रोसे युक्त उसके मुखको अपने टिमकाररहित नेत्रोसे देखने लगे ॥१८५॥ तदनन्तर कामसे व्याकुल हो उन्होंने अञ्जनाके पैरो, हाथो, नाभि, स्तन, दाढी, ललाट, कपोलो और नेत्रोका चुम्बन किया ॥१८६॥ एक ही बार नहीं, किन्तु पसीनासे युक्त हाथसे स्पर्श करते हुए उन्होंने पुन. उन स्थानोका चुम्बन किया जो ठीक ही है क्योकि मुखका चुम्बन करनेके लिए वह आप्त सेवा है सो प्रेमीजनोको करना ही पड़ता है ॥१८७॥ तदनन्तर खिले हुए कमलके भीतरी दलके समान जिसकी कान्ति थी और मानो जो अमृत ही छोड़ रहा था ऐसे उसके अधरोष्ठका पान किया ॥१८८॥ नीवीकी गाँठ खोलनेके लिए उतावली करनेवाले पवनञ्जयके हाथको लज्जा

१. त्वत्स्मृतिबद्ध म० । २. अथैव म० । ३ प्रसन्नोऽस्मीति म०, ब० । ४. सुखमीलित-म० । ५. ज्ञातान्तर्विग्रह यथा ख०, म०, ब०, ज० । ६. न चाशक्ता म० ।

ततो नितम्बफलकं दृष्ट्वास्या वसनोज्झितम् । उवाह हृदयं वायुर्मनोभूवेगरङ्गितम् ॥१९०॥
अथ केनापि वेगेन परायत्तीकृतात्मना । गृहीता दयिता गाढं पवनेनाब्जकोमला ॥१९१॥
यथा ब्रवीति वैदग्ध्यं यथाज्ञापयति स्मरः । अनुरागो यथा शिक्षां प्रयच्छति महोदयः ॥१९२॥
तथा तयो रतिः प्राप्ता दम्पत्योर्वृद्धिमुत्तमाम् । काले तत्र हि यो भावो नैवाख्यातुं स पार्यते ॥१९३॥
स्तनयोः कुम्भयोरेष जघने चाङ्गनोत्तमाम् । आस्फालयन् समारूढो मनोभवमहागजम् ॥१९४॥
तिष्ठ मुञ्च गृहाणेति नानाशब्दसमाकुलम् । तयोर्युद्धमिवोदारं रतमासीत्सविभ्रमम् ॥१९५॥
अधरग्रहणे तस्याः पुरुसीत्कारपूर्वकम् । प्रविधूतः करो रेजे लतायाः इव पल्लवः ॥१९६॥
प्रियदत्ता नवास्तस्य नखाङ्का जघने बभुः । वैडूर्यजगतीभागे पद्मरागोद्गमा इव ॥१९७॥
तस्याः सेचनकत्वं[1] तु जगाम जघनस्थलम् । निमेषमुक्तनिष्ठमुकुलीभूतचक्षुषः ॥१९८॥
वलयानां रणत्कारः कलालापसमन्वितः । तदा मनोहरो जज्ञे भ्रमरौघरवोपमः ॥१९९॥
तस्यास्ते काम्यमानाया नेत्रकेकरतारके । मुकुले दधतुः शोभां चलालीन्दीवरस्थिताम्[2] ॥२००॥
प्रस्वेदबिन्दुनिकरस्तस्या मुखकुचोद्गतः । स्वच्छमुक्ताफलाकारो रतस्यान्तेऽभ्यराजत ॥२०१॥
रदग्रहारुणीभूतं साधरं बिभ्रती बभौ । पलाशवनराजीव समुद्भूतैककिंशुका[3] ॥२०२॥
प्रियभुक्ता तनुस्तस्या ऊहे कान्तिमनुत्तमाम् । कनकाद्रितटाश्लिष्टघनपङ्क्तिकृतोपमाम् ॥२०३॥

से भरी अञ्जना रोकना तो चाहती थी पर उसका हाथ इतना अधिक काँप रहा था कि उससे वह रोकनेमें समर्थ नहीं हो सकी ॥१८९॥

तदनन्तर वस्त्ररहित अञ्जनाका नितम्बफलक देखकर पवनञ्जयका हृदय कामके वेग से चञ्चल हो गया ॥१९०॥ तत्पश्चात् किसी अद्भुत वेगसे जिसकी आत्मा विवश हो रही थी ऐसे पवनञ्जयने कमलके समान कोमल अञ्जनाको कसकर पकड़ लिया ॥१९१॥ तदनन्तर चतुराई जो बात कहती थी, काम जैसी आज्ञा देता था, और बढ़ा हुआ अनुराग जैसी शिक्षा देता था 'वैसी ही उन दोनों' दम्पतियोंकी रति-क्रिया उत्तम वृद्धिको प्राप्त हुई। उस समय उन दोनोंके मनका जो भाव था वह शब्दों द्वारा नहीं कहा जा सकता ॥१९२-१९३॥ परम सुन्दरी अञ्जनाके स्तन रूपी कलश तथा नितम्ब-स्थलका आस्फालन करते हुए पवनञ्जय कामदेव रूपी मदोन्मत्त हाथीपर आरूढ़ थे ॥१९४॥ 'ठहरो', 'छोड़ो', 'पकड़ो' आदि नाना शब्दोंसे युक्त तथा हाव-भाव विभ्रमसे भरा उनका रत किसी महायुद्धके समान जान पड़ता था ॥१९५॥ अधरोष्ठको ग्रहण करते समय जोरसे सी-सी करती हुई अञ्जना जो हाथ हिलाती थी वह ऐसा जान पड़ता था मानो किसी लताका पल्लव ही हिल रहा हो ॥१९६॥ अञ्जनाके नितम्ब-स्थलपर पवनञ्जयने जो नये-नये नख क्षत दिये थे वे ऐसे जान पड़ते थे मानो नीलमणिकी भूमिमें पद्मरागमणि ही निकल रहे हों ॥१९७॥ अञ्जनाका जघन-स्थल देखते-देखते पवनञ्जयको तृप्ति ही नहीं होती थी। वह अपने टिमकाररहित नेत्र उसीपर गड़ाये बैठे थे ॥१९८॥ मधुर आलाप से सहित उसकी चूड़ियोंकी मनोहर रुनझुन ऐसी जान पड़ती थी मानो भ्रमरोंके समूह ही गुञ्जार कर रहे हों ॥१९९॥ अञ्जनाके नेत्रोंके कटाक्ष और पुतलियाँ ऐसी जान पड़ती थीं मानो चञ्चल भ्रमरोंसे युक्त नील कमलोंकी शोभा ही धारण कर रही हों ॥२००॥ संभोगके अनन्तर अञ्जनाके मुख तथा स्तनोंके ऊपर जो पसीनोंकी बूँदोंका समूह प्रकट हुआ था वह ऐसा जान पड़ता था मानो स्वच्छ मोतियोंका समूह ही हो ॥२०१॥ दन्ताघातके कारण उसका अधरोष्ठ लाल-लाल हो गया था। उसे धारण करती हुई वह ऐसी जान पड़ती थी मानो जिसमें एक फूल आया है ऐसे टेसूके वनकी पंक्ति ही हो ॥२०२॥ पतिके द्वारा उपभुक्त अञ्जनाका शरीर सुमेरु

१. अतृप्तिकरत्वम् । २. स्थिती म० । ३. किंशुकः म० ।

ततः सम्प्राप्तकृत्ये तौ समाप्ते सुरतोत्सवे । दम्पती सेवितुं निद्रां खिन्नदेहाववाञ्छताम् ॥२०४॥
परस्परगुणध्यानवशमानसयोस्तु सा । ईर्ष्ययेव तयोर्दूरं कोपात् क्वापि पलायिता ॥२०५॥
ततः प्रियांसदेशस्थदयितामूर्धदेशकम् । कृतान्योन्यभुजाश्लेषं परमप्रेमकीलितम् ॥२०६॥
महासौरभनिश्वासवासितास्यसरोरुहम् । विकटोरःपरिष्वङ्गचक्रि[1]तस्तनमण्डलम् ॥२०७॥
नरोर्वन्तरनिक्षिप्तवनितैकोरुभारकम् । यथेष्टदेशविन्यस्तनानाकारोपधानकम् ॥२०८॥
नागीयमिव तत्कान्तं मिथुनं कथमप्यगात् । निद्रां स्पर्शसुखाम्भोधिनिमग्नालीनविग्रहम् ॥२०९॥
जाते मन्दप्रभातेऽथ शयनीयात्समुत्थिता । पार्श्वासन्नस्थिता कान्तमञ्जना पर्यसेवत ॥२१०॥
दृष्ट्वा परिमलं देहे स्वस्मिन् साभूत् त्रपावती । प्रमदं च परिप्राप्ता चिराल्लब्धमनोरथा ॥२११॥
तयोरज्ञातयोरेव यथोचितविधायिनोः । अतीयाय निशानेका क्षणादर्शनभीतयोः ॥२१२॥
दोदु[2]न्दुकसुरौपम्यं प्राप्तयोरुभयोस्तदा । इन्द्रियाण्यन्यकार्येभ्यः प्राप्तानि विनिवर्तनम् ॥२१३॥
अन्यदा सौख्यसंभारविस्मृतस्वामिशासनम् । मित्रं प्रमादवद्बुद्ध्वा तद्धितध्यानतत्परः ॥२१४॥
सुधीर्वसन्तमालाया प्रविष्टाया कृतध्वनिः । प्रविश्य वासभवनं मन्दं प्रहसितोऽवदत् ॥२१५॥
सुन्दरोत्तिष्ठ किं शेषे नन्वेष[3] रजनीपतिः । जितस्त्वन्मुखकान्त्येव गतो विच्छायतां पराम् ॥२१६॥

---

पर्वतके द्वारा आलिङ्गित मेघपंक्तिके समान उत्तम कान्तिको धारण कर रहा था ॥२०३॥ तदनन्तर जिसके समस्त कार्य पूर्ण हो चुके थे ऐसे सुरतोत्सवके समाप्त होनेपर खिन्न शरीरसे युक्त दोनो दम्पति निद्रा-सेवनकी इच्छा करने लगे ॥२०४॥ परन्तु उन दोनोके मन एक दूसरेके गुणोका ध्यान करनेमे निमग्न थे इसलिए निद्रा ईर्ष्याके कारण ही मानो क्रोधवश कहीं भाग गई थी ॥२०५॥

तदनन्तर जिसमे पतिके कन्धेपर वल्लभाका शिर रक्खा था, जिसमे भुजाओका परस्पर आलिङ्गन हो रहा था, जो पारस्परिक प्रेमसे मानो कीलित था, महासुगन्धित श्वासोच्छ्वासके कारण जिसमे मुख-कमल सुवासित थे, विशाल वक्ष-स्थलकी चपेटसे जिसमे स्तन-मण्डल चक्रके आकार चपटे हो रहे थे, जिसमे पुरुषकी जाँघोके बीचमें स्त्रीकी एक जाँघका भार अवस्थित था और इच्छित स्थानोमे जहाँ नाना प्रकारके तकिया लगाये गये थे, ऐसी अवस्थामे नागकुमार देव-देवियोके युगलके समान वह अञ्जना और पवनञ्जयका युगल किसी तरह निद्राको प्राप्त हुआ। उस समय उन दोनोके शरीर स्पर्श-जन्य सुखरूपी सागरमे निमग्न होनेसे अत्यन्त निश्चल थे ॥२०६–२०९॥

अथानन्तर जब कुछ-कुछ प्रभात हुआ तब अञ्जना शय्यासे उठकर तथा बगलमे निकट बैठकर पतिकी सेवा करने लगी ॥२१०॥ अपने शरीरमे सम्भोगजन्य सुगन्धि देखकर वह लज्जित हो गई और साथ ही चूँकि उसके मनोरथ चिरकाल बाद पूर्ण हुए थे इसलिए हर्षको भी प्राप्त हुई ॥२११॥ इस प्रकार जो पहले एक दूसरेके दर्शन-मात्रसे भयभीत रहते थे ऐसे उन दम्पतियोकी अज्ञातरूपसे यथेच्छ उपभोग करते हुए अनेक रात्रियाँ व्यतीत हो गईं ॥२१२॥ दोदुन्दुक नामक देवकी उपमाको धारण करनेवाले उन दोनो दम्पतियोकी इन्द्रियाँ उस समय अन्य कार्योंसे व्यावृत्त होकर परस्पर एक दूसरेकी ओर ही लगी हुई थी ॥२१३॥

अथानन्तर सुखके सम्भारसे जिसने स्वामीका आदेश भुला दिया था ऐसे मित्रको प्रमादी जान उसके हितका चिन्तन करनेमे तत्पर रहनेवाला बुद्धिमान् प्रहसित मित्र वसन्तमालाके प्रवेश करनेपर आवाज देता हुआ महलके भीतर प्रवेश कर धीरे-धीरे बोला ॥२१४–२१५॥ कि हे सुन्दर! उठो, क्यो शयन कर रहे हो? जान पड़ता है कि मानो तुम्हारे मुखकी कान्तिसे

---

१. वक्रित ख०, ज० । २. कुतूहलधारिदेवसदृशम् । ३. न त्वेष म० ।

इति वाचास्य जातोऽसौ प्रबोध[1] श्लथविग्रह । कृत्वा विजृम्भण निद्राशेषारुणनिरीक्षण ॥२१७॥
श्रवण वामतर्जन्या कण्डूयन्मुकुलेक्षण । सकोच्य दक्षिण बाहु निक्षिपञ्जनितस्वरम् ॥२१८॥
कान्ताया निदधन्नेत्रे त्रपाविनतचक्षुषि । एहीति निगदन्मित्रमुत्तस्थौ पवनञ्जय ॥२१९॥
कृत्वा स्मितमथापृच्छय सुखरात्रिं[2] कृतस्मितम् । पृच्छन्त रात्रिकुशल तद्वेदी तन्निवेदनम्[3] ॥२२०॥
निवेश्य तत्प्रियोद्दिष्टे समासन्ने सुखासने । सुहृदेन जगादैव नयशास्त्रविशारद ॥२२१॥
उत्तिष्ठ मित्र गच्छाव साम्प्रत बहवो गता । दिवसास्ते प्रसक्तस्य प्रियासन्मानकर्मणि ॥२२२॥
यावत्कश्चिन्न जानाति प्रत्यागमनमावयो । गमन युज्यते तावदन्यथा लज्जन भवेत् ॥२२३॥
तिष्ठत्युदीक्षमाणश्च रथनूपुरकस्तव । नृप कैन्नरगीतश्च यियासु स्वामिनोऽन्तिकम् ॥२२४॥
मन्त्रिणश्च किलाजस्र पृच्छत्यादरसगत[4] । पवनो वर्तते क्वेति मरुत्वमखसूदन[5] ॥२२५॥
उपायो गमनस्याय मया विरचितस्तव । दयितासङ्गमस्तस्मादिदानी तत्र त्यज्यताम् ॥२२६॥
आज्ञेय करणीया ते स्वामिनो जनकस्य च । क्षेमादागत्य सतत दयितां मानयिष्यति ॥२२७॥
एव करोमि साधूक्त सुहृदेत्यभिधाय स । कृत्वा तनुगत कर्म सन्निधापितमङ्गलम् ॥२२८॥
रहस्यालिङ्गय दयिता चुम्बित्वा स्फुरिताधरम् । जगाद देवि माकार्षीरुद्वेग त्व व्रजाम्यहम् ॥२२९॥
अचिरेणैव कालेन विधाय स्वामिशासनम् । आगमिष्यामि निर्वृत्या[6] तिष्ठेति मधुरस्वर ॥२३०॥

---

पराजित होकर ही यह चन्द्रमा अत्यन्त निष्प्रभताको प्राप्त हुआ है ॥२१६॥ मित्रके यह वचन सुनते ही पवनञ्जय जाग उठा। उस समय उसका शरीर शिथिल था, निद्राके शेष रहनेसे उसके नेत्र लाल थे तथा जमुहाई आ रही थी ॥२१७॥ उसने नेत्र बन्द किये ही वाम हस्तकी तर्जनी नामा अङ्गुलीसे कान खुजाया तथा दाहिनी भुजाको पहले सङ्कोचकर फिर जोरसे फैलाया जिससे चटाकका शब्द हुआ ॥२१८॥ तदनन्तर लज्जासे जिसके नेत्र नीचे हो रहे थे ऐसे कान्ताके मुख पर दृष्टि डालता हुआ पवनञ्जय 'आओ मित्र' ऐसा कहता हुआ शय्यासे उठ खड़ा हुआ ॥२१९॥ तदनन्तर प्रहसितने हँसकर पूछा कि रात्रि सुखसे व्यतीत हुई ? इसके उत्तरमे पवनञ्जयने भी हँसते हुए प्रहसितसे पूछा कि तुम्हारी भी रात्रि कुशलतासे बीती ? इस प्रकार वार्तालापके अनन्तर समस्त वृत्तान्तको जाननेवाला एवं नीतिशास्त्रका पण्डित प्रहसित अञ्जना के द्वारा बतलाये हुए निकटवर्त्ती सुखासनपर बैठकर पवनञ्जयसे इस प्रकार बोला कि हे मित्र ! उठो, अब चले, प्रियाके सम्मान-कार्यमे लगे हुए आपके बहुत दिन निकल गये ॥२२०–२२२॥ जब तक हम लोगोका वापिस आना कोई जान नहीं पाता है तब तक चला जाना ठीक है अन्यथा लज्जाकी बात हो जावेगी ॥२२३॥ तुम्हारा सेनापति रथनूपुरक तथा स्वामीके समीप जानेका इच्छुक राजा कैन्नरगीत तुम्हारी प्रतीक्षा करते हुए ठहरे है ॥२२४॥ आदरसे भरा रावण निरन्तर मन्त्रियोसे पूछता रहता है कि पवनञ्जय कहाँ है ? ॥२२५॥ मैंने तुम्हारे जानेका यह उपाय रचा था सो इस समय वल्लभाका समागम छोड़ दिया जाय ॥२२६॥ तुम्हें स्वामी रावण और पिता प्रह्लादकी यह आज्ञा माननी चाहिए। तदनन्तर कुशलतापूर्वक वापिस आकर निरन्तर वल्लभाका सम्मान करते रहना ॥२२७॥

इसके उत्तरमे पवनञ्जयने कहा कि हे मित्र ! ऐसा ही करता हूँ तुमने बहुत ठीक कहा है। ऐसा कहकर उसने मङ्गलाचारपूर्वक शरीरसम्बन्धी क्रियाएँ कीं ॥२२८॥ एकान्तमे वल्लभाका आलिङ्गन किया, उसके फड़कते हुए अधरोष्ठका चुम्बन किया और कहा कि हे देवि ! तुम उद्वेग नहीं करना, मै जाता हूँ और शीघ्र ही स्वामीकी आज्ञाका पालनकर वापिस आ जाऊँगा। तुम

---

१. प्रबुध्य । २. सुखरात्रिकृतस्मितम् म० । ३. तन्निवेदिनम् ब० । ४. पृच्छन्त्यादर म० । ५. रावणः । ६. सतोषेण

ततो विरहतो भीता तद्वक्त्रगतलोचना । कृत्वा करयुगाम्भोजा जगादाञ्जनसुन्दरी ॥२३१॥
आर्यपुत्रर्तुमत्यस्मि[1] भवता कृतसगमा । ततस्त्वद्विरहे गर्भो ममावाच्यो[2] भविष्यति ॥२३२॥
तस्मान्निवेद्य गच्छ त्व गुरुभ्यो गर्भसभवम् । क्षेमाय दीर्घदर्शित्व कैल्पते[3] प्राणधारिणाम् ॥२३३॥
एवमुक्तो जगादासौ देवि पूर्वं त्वया विना । निष्क्रान्तो निश्चितो गेहाद् गुरूणा सन्निधावहम् ॥२३४॥
अधुना गमन तेभ्यस्तदर्थं गदितु त्रपे । चित्रचेष्ट च विज्ञाय मा जन स्मेरता व्रजेत् ॥२३५॥
तस्माद्यावदय गर्भस्तव नैति प्रकाशताम् । तावदेवागमिष्यामि मा व्राजीर्विमनस्कताम् ॥२३६॥
इम प्रमादनोदार्थं मन्नामकृतलक्षणम् । गृहाण वलय भद्रे शान्तिस्तेऽतो भविष्यति ॥२३७॥
इत्युक्त्वा वलय दत्वा सान्त्वयित्वा मुहु. प्रियाम् । उक्त्वा वसन्तमालाञ्च तदर्थं समुपासनम् ॥२३८॥
रतव्यतिकरच्छिन्नहारमुक्ताफलाचितात् । पुष्पगन्धपरागोरुसौरभाकृष्टषट्पदात् ॥२३९॥
तरङ्गिप्रच्छदपटाद् दुग्धाब्धिद्वीपसन्निभात् । शयनीयात् समुत्तस्थौ प्रियावस्थितमानस ॥२४०॥
मङ्गलध्वसभीत्या च प्रियया साश्रुनेत्रया । अदृष्टिगोचर दृष्ट समित्रो वियदुद्ययौ ॥२४१॥

## पृथिवीच्छन्दः

कदाचिदिह जायते स्वकृतकर्मपाकोदयात्
सुख जगति सगमादभिमतस्य सद्वस्तुन ।
कदाचिदपि सभवत्यसुभृतामसौख्यं पर
भवे भवति न स्थिति समगुणा यत सर्वदा ॥२४२॥

---

सुखसे रहो। पवनञ्जयने यह शब्द बडी मधुर आवाजसे कहे थे ॥२२९–२३०॥ तदनन्तर जो विरहसे भयभीत थी तथा जिसके नेत्र पवनञ्जयके मुखपर लग रहे थे ऐसी अञ्जनासुन्दरी दोनो हस्तकमल जोड़कर बोली कि हे आर्य पुत्र ! ऋतु कालके बाद ही मैने आपके साथ समागम किया है इसलिए यदि मेरे गर्भ रह गया तो वह आपके विरह-कालमे निन्दाका पात्र होगा ॥२३१–२३२॥ अत. आप गुरुजनोको गर्भ सम्भवताकी सूचना देकर जाइए। दीर्घदर्शिता मनुष्योके कल्याणका कारण है ॥२३३॥

अञ्जनाके ऐसा कहनेपर पवनञ्जयने कहा कि हे देवि ! मै पहले गुरुजनोके समीप तुम्हारे बिना घरसे निकला था और ऐसा ही सबको निश्चय है। इसलिए इस समय उनके पास जाने और यह सब समाचार कहनेमे मुझे लज्जा आती है। इसकी चेष्टाएँ विचित्र है ऐसा जानकर लोग मेरी हँसी करेंगे ॥२३४–२३५॥ अत. जबतक तुम्हारा यह गर्भ प्रकट नहीं हो पाता है तबतक मैं वापिस आ जाऊँगा। विषाद मत करो ॥२३६॥ हे भद्रे ! प्रमाद दूर करनेके लिए मेरे नामसे चिह्नित यह कड़ा ले लो इसमे तुम्हें शान्ति रहेगी ॥२३७॥ ऐसा कहकर, कड़ा देकर, बार-बार सान्त्वना देकर और वसन्तमालाको ठीक-ठीक सेवा करनेका आदेश देकर पवनञ्जय शय्यासे उठा। उस समय उसकी वह शय्या सुरतकालीन सम्मर्दसे टूटे हुए हारके मोतियोसे व्याप्त थी, फूलोकी सुगन्धित पराग सम्बन्धी भारी सुगन्धिसे भौरे खिंचकर उसपर इकट्ठे हो रहे थे, उसके ऊपर बिछा हुआ चद्दर लहरा रहा था, और वह क्षीरसमुद्रके मध्यमे स्थित क्षीर द्वीपके समान ज्ञान पड़ती थी। पवनञ्जय उठा तो सही पर उसका मन अपनी प्रियामे ही लग रहा था ॥२३८–२४०॥ पृथ्वीपर अश्रु गिरनेसे कहीं मङ्गलाचारमे बाधा न आ जाय इस भयसे अञ्जनाने अपने अश्रु नेत्रोंमे ही समेटकर रक्खे थे और इसलिए जाते समय वह पवनञ्जयको आँख खोलकर नहीं देख सकती थी फिर भी मित्रके साथ वह आकाशकी ओर उड़ गया ॥२४१॥

गौतमस्वामी राजा श्रेणिकसे कहते हैं कि इस ससारमें प्राणियोंको कभी तो अपने पूर्वो-

---

१. -मत्यस्मिन् म० । २. निन्दनीयः । ३. कल्प्यते प्राणधारणम् म० ।

अथापि जननात्प्रभृत्यविरतं सुखं प्राणिनां
मृतेरविरतो भवेन्ननु[1] तथाप्यमुत्रासुखम् ।
ततो भजत भो जना[2] सततभूरिसौख्यावहं
भवासुखतमश्छिदं जिनवरोक्तधर्मं रविम् ॥२४३॥

*इत्यार्षे रविषेणाचार्यप्रोक्ते पद्मचरिते पवनाञ्जनासंभोगाभिधानं नाम षोडशं पर्व ॥१६॥*

---

पार्जित पुण्य-कर्मके उदयसे इष्ट वस्तुका समागम होनेसे सुख होता है और कभी पाप कर्मके उदयसे परम दुःख प्राप्त होता है क्योंकि इस संसारमें सदा किसीकी स्थिति एक-सी नहीं रहती ॥२४२॥ फिर भी धर्मके प्रसादसे कितने ही जीवोंको जन्मसे लेकर मरण-पर्यन्त निरन्तर सुख प्राप्त होता रहता है और मरनेके बाद परलोकमें भी उन्हें सुख मिलता रहता है। इसलिए हे भव्य जीवो ! निरन्तर अत्यधिक सुख देनेवाले एवं संसारके दुःखरूपी अन्धकारको छेदनेवाले जिनेन्द्रोक्त धर्मरूपी सूर्यकी सेवा करो ॥२४३॥

*इस प्रकार आर्ष नामसे प्रसिद्ध रविषेणाचार्य विरचित पद्मचरितमें पवनञ्जय और अञ्जनाके संभोगका वर्णन करनेवाला सोलहवाँ पर्व समाप्त हुआ ॥१६॥*

---

१. भवेत्तनु म० । २. जनः म० ।

# सप्तदशं पर्व

कियत्यपि प्रयातेऽथ काले गर्भस्य सूचका । विशेषा प्रादुरभवन्महेन्द्रतनयातनौ ॥१॥
इयाय पाण्डुता छाया यशसेव हनूमत. । गतिर्मन्दतरत्व च मत्तदिग्नागविभ्रमा ॥२॥
स्तनावत्युन्नति प्राप्तौ श्यामलीभूतचूचुकौ । आलस्याद् भ्रूसमुत्क्षेप चकार विषये गिर ॥३॥
ततस्ता लक्षणैरेभि श्वश्रूर्विज्ञाय गर्भिणीम् । पप्रच्छ तव केनेद कृत कर्मेत्यसूयिका ॥४॥
साञ्जलि सा प्रणम्योचे निखिल पूर्वचेष्टितम् । प्रतिषिद्धापि कान्तेन गतिमन्यामविन्दती ॥५॥
तत केतुमती क्रुद्धा जगादेति सुनिष्ठुरम् । वाणीभिर्ग्रावदेहाभिस्ताडयन्तीव यष्टिभि ॥६॥
यो न त्वत्सदृश पापे द्रष्टुमाकारमिच्छति । शब्द वा श्रवणे कर्तुमतिद्वेषपरायण ॥७॥
स कथ स्वजनापृच्छ्य कृत्वा गेहाद्विनिर्गत' । भवत्या सगम धीर कुर्वीत विगतत्रपे ॥८॥
धिक् त्वां पापा शशाङ्काशुशुभ्रसन्तानदूषिणीम् । आचरन्ती क्रियामेता लोकद्वितयनिन्दिताम् ॥९॥
सखी वसन्तमाला ते साध्वीमेता मति ददौ । वेश्यायाः कुलटानां कि कुर्वन्ति परिचारिका ॥१०॥
दर्शितेऽपि तदा तस्मिन्कटके क्रूरमानसा । प्रतीयाय न सा श्वश्रूश्चुकोपात्यन्तमुग्रवाक् ॥११॥

---

अथानन्तर कितना ही समय बीतने पर राजा महेन्द्रकी पुत्री अञ्जनाके शरीरमे गर्भको सूचित करने वाले विशेष चिह्न प्रकट हुए ॥१॥ उसकी कान्ति सफेदीको प्राप्त हो गई सो मानो गर्भमे स्थित हनुमान्के यशसे ही प्राप्त हुई थी। मदोन्मत्त दिग्गजके समान विभ्रमसे भरी उसकी मन्द चाल और भी अधिक मन्द हो गई ॥२॥ जिनका अग्रभाग श्यामल पड़ गया था ऐसे स्तन अत्यन्त उन्नत हो गये और आलस्यके कारण वह जहाँ बात करना आवश्यक था वहाँ केवल भौंह ऊपर उठाकर सकेत करने लगी ॥३॥ तदनन्तर इन लक्षणोसे उसे गर्भवती जान ईर्ष्यासे भरी सासने उससे पूछा कि तेरे साथ यह कार्य किसने किया है ? ॥४॥ इसके उत्तरमे अंजनाने हाथ जोड प्रणाम कर पहलेका समस्त वृत्तान्त कह सुनाया। यद्यपि पवनंजयने यह वृत्तान्त प्रकट करने के लिए उसे मना कर दिया था तथापि जब उसने कोई दूसरा उपाय नही देखा तब विवश हो सकोच छोड सब समाचार प्रकट कर दिया ॥५॥

तदनन्तर केतुमतीने कुपित होकर बड़ी निष्ठुरताके साथ पत्थर जैसी कठोर वाणीमे उससे कहा। जब केतुमती अजनासे कठोर शब्द बोल रही थी तब ऐसा जान पड़ता था मानो वह लाठियोसे उसे ताड़ित कर रही थी ॥६॥ उसने कहा कि अरी पापिन् ! अत्यन्त द्वेषसे भरा होनेके कारण जो तुझ जैसा आकार भी नही देखना चाहता और तेरा शब्द भी कानमे नही पड़ने देना चाहता वह धीर-वीर पवनञ्जय तो आत्मीय जनोसे पूछकर घरसे बाहर गया हुआ है। हे निर्लज्जे ! वह तेरे साथ समागम कैसे कर सकता है ? ॥७-८॥ चन्द्रमाकी किरणोके समान उज्ज्वल संतानको दूषित करने वाली तथा दोनो लोकोमे निन्दनीय इस क्रियाको करनेवाली तुझ पापिनको धिक्कार है ॥९॥ जान पड़ता है कि सखी वसन्तमालाने ही तेरे लिए यह उत्तम बुद्धि दी है सो ठीक ही है क्योकि वेश्या और कुलटा स्त्रियोकी सेविकाएँ इसके सिवाय करती ही क्या हैं ॥१०॥ उस समय अञ्जनाने यद्यपि पवनञ्जयका दिया कड़ा भी दिखाया पर उस दुष्ट हृदयाने उसका विश्वास नही किया। विश्वास तो दूर रहा तीक्ष्ण शब्द कहती हुई अत्यन्त

---

१. मतिर्मन्द म० । २ मतिर्दिग्नाग म० । ३. विषयो गिरः म० । ४. भवत्या म० । ५. वेश्या वा । ६. परिचारिका म० । ७. श्वश्रूकोपात्यन्त म० ।

इत्युक्त्वा क्रूरनामानं क्रूरमाहूय किङ्करम् । कृतप्रणाममित्यूचे कोपारुणनिरीक्षणा ॥१२॥
अयि क्रूराशु नीत्वेमां महेन्द्रपुरगोचरम् । यानेन सहिता सख्या निक्षिप्यैहि निरन्तरम् ॥१३॥
ततस्तद्वचनाद्देता पृथुवेपथुविग्रहाम् । महापवननिर्धूतां लतामिव निराश्रयाम् ॥१४॥
ध्यायन्तीमाकुलं भूरिदुःखमागामि निष्प्रभाम् । विलीनमिव बिभ्राणां हृदयं दुःखवह्निना ॥१५॥
भीत्या निरुत्तरीभूतां सखीनिहितलोचनाम् । निन्दन्तीमशुभं कर्म मनसा पुनरुद्गतम् ॥१६॥
अश्रुधारां विमुञ्चन्तीं शलाकां[1] स्फटिकीमिव । स्तनमध्ये क्षणं न्यस्तपर्यन्तामनवस्थिताम् ॥१७॥
सख्या समं समारोप्य यानं तत्कर्मदक्षिणः । क्रूरः प्रववृते गन्तुं महेन्द्रनगरं प्रति ॥१८॥
दिनान्ते तत्पुरस्यान्तं सम्प्राप्योवाच सुन्दरीम् । एवं मधुरया वाचा क्रूरः कृतनमस्कृतिः ॥१९॥
स्वामिनीशासनाद्देवि कृतमेतन्मया तव । दुःखस्य कारणं कर्म ततो न क्रोद्धुमर्हसि ॥२०॥
एवमुक्त्वावतार्यैतां यानात्सख्या समन्विताम् । स्वामिन्यै द्रुतमागत्य कृतामाज्ञां न्यवेदयत् ॥२१॥
ततोऽञ्जनां[2] समालोक्य दुःखभारादिवोत्तमाम् । मन्दीभूतप्रभाचक्रो[3] रविरस्तमुपागमत् ॥२२॥
लोचनच्छाययेवास्या रोदनात्यन्तशोणया । [4]रविं त्राणाय पश्यन्त्याः[5] पश्चिमाशारुणाऽभवत् ॥२३॥
ततस्तद्दुःखतो[6] मुक्तैर्बाष्पैरिव घनैरलम् । दिग्भिर्निरन्तरं चक्रे श्यामलं नभसस्तलम् ॥२४॥

---

कुपित हो उठी ॥११॥ उसने उसी समय क्रूर नामधारी दुष्ट सेवकको बुलाया। सेवकने आकर उसे प्रणाम किया। तदनन्तर क्रोधसे जिसके नेत्र लाल हो रहे थे ऐसी केतुमतीने सेवकसे कहा कि हे क्रूर ! तू सखीके साथ इस अञ्जनाको शीघ्र ही ले जाकर राजा महेन्द्रके नगरके समीप छोड़कर बिना किसी विलम्बके वापिस आ जा ॥१२–१३॥

तदनन्तर आज्ञा पालनमें तत्पर रहनेवाला क्रूर केतुमतीके वचन सुन अञ्जनाको वसन्तमालाके साथ गाड़ीपर सवारकर राजा महेन्द्रके नगरकी ओर चला। उस समय अञ्जनाका शरीर भयसे अत्यन्त कम्पित हो रहा था, वह प्रचण्ड वायुके द्वारा झकझोरकर नीचे गिराई हुई निराश्रय लताके समान जान पड़ती थी, आगामी कालमें प्राप्त होनेवाले भारी दुःखका वह बड़ी व्याकुलतासे चिन्तन कर रही थी, उसका हृदय दुःखरूपी अग्निसे मानो पिघल गया था, भयके कारण वह निरुत्तर थी, सखी वसन्तमालापर उसके नेत्र लग रहे थे, वह पुनः उदयमें आये अशुभ कर्मकी मन-ही-मन निन्दा कर रही थी, और जिसका एक छोर स्तनोंके बीचमें रक्खा हुआ था ऐसी स्फटिककी चञ्चल शलाकाके समान आँसुओंकी धारा छोड़ रही थी ॥१४–१८॥

तदनन्तर जब दिन समाप्त होनेको आया तब क्रूर राजा महेन्द्रके नगरके समीप पहुँचा। वहाँ पहुँचकर उसने अञ्जना सुन्दरीको नमस्कार कर निम्नाङ्कित मधुर वचन कहे ॥१९॥ उसने कहा कि हे देवि ! मैंने तुम्हारे लिए दुःख देनेवाला यह कार्य स्वामिनीकी आज्ञासे किया है अतः मुझपर क्रोध करना योग्य नहीं है ॥२०॥ ऐसा कहकर उसने सखीसहित अंजनाको गाड़ीसे उतारकर तथा शीघ्र ही वापिस आकर स्वामिनीके लिए सूचित कर दिया कि मैं आपकी आज्ञाका पालन कर चुका ॥२१॥ तदनन्तर उत्तम नारी अञ्जनाको देखकर ही मानो दुःखके भारसे जिसका प्रभामण्डल फीका पड़ गया था ऐसा सूर्य अस्त हो गया ॥२२॥ पश्चिम दिशा लाल हो गई सो, ऐसा जान पड़ता था मानो अञ्जना सुन्दरी, निरन्तर रोती रहनेके कारण अत्यन्त लाल दिखनेवाले नेत्रोंसे रक्षा करनेके उद्देश्यसे सूर्यकी ओर देख रही थी सो उन्हींकी लालीसे लाल हो गई थी ॥२३॥ तदनन्तर दिशाओंने आकाशको श्यामल कर दिया सो ऐसा जान पड़ता था मानो अञ्जनाके दुःखसे दुःखी होकर उन्होंने अत्यधिक वाष्प ही छोड़े थे, उन्हींसे आकाश श्यामल

---

१. शलाका म० । शिलाङ्कां ख० । २. ततोऽञ्जना म० । ३. प्रभाचक्ररवि म० । ४ रवित्राणाय म० । ५. पश्यन्त्या म० । ६ दुःखितो म० ।

तद्दु खादिव सम्प्राप्ता [1]दु खं सघातकारिण । कुलायेष्वाकुलाश्चक्रुर्वय' कोलाहल परम् ॥२५॥
ततो दु.खमविज्ञाय सा क्षुदादिसमुद्भवम् । अभ्याख्यानमहादु खसागरप्लवकारिणी ॥२६॥
भीतान्तर्वदन साश्रु कुर्वती परिदेवनम् । सख्या विरचिते तस्थौ [2]पल्लवैः स्रस्तरेऽञ्जना ॥२७॥
न तस्या नयने निद्रा तस्यां रात्रावढौकत । दाहादिव भय प्राप्ता सततोष्णाश्रुसभवात् ॥२८॥
पाणिसवाहनात् सख्या विनिर्धूतपरिश्रमा । [3]सान्त्व्यमाना निशा निन्ये कृच्छ्रेणासौ [4]समंसमम् ॥२९॥
ततो दीर्घोष्णनिश्वासनितान्तम्लानपल्लवम् । प्रभाते शयन त्यक्त्वा नानाशङ्कातिविक्लवा ॥३०॥
कृतानुगमना सख्या छाययेवानुकूलया । [5]ऐत्पितुर्मन्दिरद्वार सकृप वीक्षिता जनै. ॥३१॥
ततस्तत्प्रविशन्ती सा निरुद्धा द्वाररक्षिणा । प्राप्ता रूपान्तर दु खादविज्ञाता[6] व्यवस्थिता ॥३२॥
ततो निखिलमेतस्या. सख्या कृतनिवेदितम् । विज्ञाय स्थापयित्वान्य[7] नर द्वारे ससभ्रम ॥३३॥
गत्वा शिलाकवाटाख्यो द्वारपालः कृतानति' । सुतागम महीपाणिरुपांश्वीश व्यजिज्ञपत् ॥३४॥
तत प्रसन्नकीर्त्याख्य[8] महेन्द्र' पार्श्वग सुतम् । आज्ञापयन् महाभूत्या तस्या शीघ्र प्रवेशनम् ॥३५॥
पुरस्य क्रियतां शोभा साधनं परिसज्ज्यताम्[9] । स्वय प्रवेशयामीति पुनरूचे नराधिपः ॥३६॥
जगादासौ ततस्तस्मै द्वारपालो यथास्थितम् । सुतायाश्चरित कृत्वा वदने पाणिपल्लवम् ॥३७॥

हो गया था ॥२४॥ घोसलोमे इकट्ठे होनेवाले पक्षी बड़ी आकुलतासे अत्यधिक कोलाहल करने लगे सो ऐसा मालूम होता था मानो अञ्जनाके दु'खसे दु खी होकर ही वे चिल्ला रहे हो ॥२५॥ तदनन्तर वह अञ्जना भूख-प्यास आदिसे उत्पन्न होनेवाला दु ख तो भूल गई और अपवाद-जन्य महादु खरूपी सागरमे उतराने लगी ॥२६॥ वह भयभीत होनेके कारण जोरसे तो नहीं चिल्लाती थी पर मुखके भीतर-ही-भीतर अश्रु ढालती हुई विलाप कर रही थी । तत्पश्चात् सखीने वृक्षोके पल्लवोसे एक आसन बनाया सो वह उसीपर बैठ गई ॥२७॥ उस रात्रिमे अञ्जनाके नेत्रोमे निद्रा नही आई सो ऐसा जान पड़ता था मानो निरन्तर निकलनेवाले उष्ण आँसुओसे समुत्पन्न दाहसे डरकर ही नहीं आई थी ॥२८॥ सखीने हाथसे दाबकर जिसकी थकावट दूर कर दी थी तथा जिसे निरन्तर सान्त्वना दी थी ऐसी अञ्जनाने बड़े कष्टके साथ पूर्ण रात्रि बितायी अथवा 'समा समा निशां कृच्छ्रेण निन्ये' एक वर्षके समान रात्रि बड़े कष्टसे व्यतीत की ॥२९॥

तदनन्तर प्रभात हुआ सो लम्बी और गरम-गरम साँसोसे जिसके पल्लव अत्यन्त मुरझा गये थे ऐसी शय्या छोड़कर अञ्जना पिताके महलके द्वारपर पहुँची । छायाकी तरह अनुकूल चलनेवाली सखी उसके पीछे-पीछे चल रही थी और लोग उसे दयाभरी दृष्टिसे देख रहे थे ॥३०-३१॥ दु'खके कारण अञ्जनाका रूप बदल गया था सो द्वारपालकी पहिचानमे नहीं आयी। अतः द्वारमें प्रवेश करते समय उसने उसे रोक दिया। जिससे वह वहीं खड़ी हो गई॥३२॥ तदनन्तर सखीने सब समाचार सुनाया सो उसे जानकर शिलाकपाट नामका द्वारपाल द्वारपर किसी दूसरे मनुष्यको खड़ाकर भीतर गया और राजाको नमस्कार कर हाथसे पृथिवीको छूता हुआ एकान्तमे पुत्रीके आनेका समाचार कहने लगा ॥३३-३४॥ तत्पश्चात् राजा महेन्द्रने समीपमे बैठे हुए प्रसन्नकीर्ति नामक पुत्रको आज्ञा दी कि पुत्रीका बड़े वैभवके साथ शीघ्र ही प्रवेश कराओ ॥३५॥ तदनन्तर राजाने फिर कहा कि नगरकी शोभा करायी जाय तथा सेना सजायी जाय मै स्वयं ही पुत्रीका प्रवेश कराऊँगा ॥३६॥ तत्पश्चात् द्वारपालने पुत्रीका जैसा चरित्र सुन रक्खा था वैसा मुँहपर हाथ लगाकर राजाके लिए कह सुनाया ॥३७॥

---

१. दुःखसघात म०, ब० । २ पल्लवे म० । ३. सान्त्वमाना म० । ४. समा समम् म०, ब०, ज० । कृच्छ्रेण समं साक समा पूर्णां निशां निन्ये । ५. अगच्छत् । ६. अविज्ञाता व्यवस्थितौ ब० । ७. न्यद्वर म० । ८. प्रसन्नकीर्त्याख्य म० । ९. परिसजताम् म० ।

तत श्रुत्वा त्रपाहेतु पिता तस्या विचेष्टितम् । प्रसन्नकीर्तिमित्यूचे परम कोपमागत ॥३८॥
निर्वास्यता पुरादस्मादर सा पापकारिणी । यस्या मे चरित श्रुत्वा वज्रेणेवाहते श्रुती ॥३९॥
ततो नाम्ना महोत्साह सामन्तोऽस्यातिवल्लभ᾽ । जगाद नाथ नो कर्तुमेव कर्तुमिमा प्रति ॥४०॥
वसन्तमालया ख्यात यथास्मै द्वाररक्षिणे । एवमेव न युक्ता तु विचिकित्सा[1] विकारणा[2] ॥४१॥
श्वश्रू केतुमती क्रूरा लौकिकश्रुतिभाविता । अत्यन्तमविचारास्या विना दोषात्कृतोज्झिता[3] ॥४२॥
क्रूरयेय यथा त्यक्ता कल्याणाचारतत्परा । भवतापि विनिर्धूता शरण क प्रपद्यताम् ॥४३॥
व्याघ्रदृष्टमृगीवेय मुग्धास्या त्रासमागता । श्वश्रूतस्त्वा महाकक्षसम शरणमागता ॥४४॥
सेय निदाघसूर्यांशुसतापादिव दु खिता । महातरूपम बाला विदित्वा त्वां समागता ॥४५॥
श्रीवत् स्वर्गात् परिभ्रष्टा वराकी विह्वलात्मिका । अभ्याख्यानातयालीढा[4] कल्पवल्लीव कम्पिनी ॥४६॥
द्वारपालनिरोधेन सुतरामागता त्रपाम् । वैलक्ष्यादशुकेनाङ्गमवगुण्ठ्य समूर्द्धकम् ॥४७॥
पितृस्नेहान्वित द्वारे सदा दुर्लडितात्मिका । तिष्ठतीत्यमुनाख्यात द्वारपालेन पार्थिव ॥४८॥
स त्व कुरु दयामस्या निर्दोषेय प्रवेश्यताम् । ननु केतुमती ज्ञाता क्रूरा कस्य न विष्टपे ॥४९॥
तस्य तद्वचन श्रोत्रे राज्ञश्चक्रे न सश्रयम् । नलिनीदलविन्यस्त बिन्दुजालमिवाम्भस ॥५०॥
जगाद च सखी स्नेहात् कदाचित् सत्यमप्यद । अन्यथाकथयत्केन निश्चयोऽत्रावधार्यते ॥५१॥

तदनन्तर पिता पुत्रीकी लज्जाजनक चेष्टा सुनकर परम क्रोधको प्राप्त हुआ और प्रसन्नकीर्ति नामक पुत्रसे बोला ॥३८॥ कि उस पापकारिणीको इस नगरसे शीघ्र ही निकाल दो। उसका चरित्र सुनकर मेरे कान मानो वज्रसे ही ताड़ित हुए हैं ॥३९॥ तदनन्तर महोत्साह नामका सामन्त जो राजा महेन्द्रको अत्यन्त प्यारा था बोला, हे नाथ! इसके प्रति ऐसा करना योग्य नही है ॥४०॥ वसन्तमालाने द्वारपालके लिए जैसी बात कही है कदाचित् वह वैसी ही हो तो अकारण घृणा करना उचित नहीं है ॥४१॥ इसकी सास केतुमती अत्यन्त क्रूर है, लौकिक श्रुतियोंसे प्रभावित होनेवाली है और बिलकुल ही विचाररहित है। उसने बिना दोषके ही इसका परित्याग किया है ॥४२॥ कल्याण रूप आचारका पालन करनेमे तत्पर रहनेवाली इस पुत्रीका जिस प्रकार उस दुष्ट सासने परित्याग किया है उसी प्रकार यदि आप भी तिरस्कार कर त्याग करते है तो फिर यह किसकी शरणमे जावेगी? ॥४३॥ जिस प्रकार व्याघ्रके द्वारा देखी हुई हरिणी भयभीत होकर किसी महा वनकी शरणमें पहुँचती है उसी प्रकार यह मुग्ध-वदना साससे भयभीत होकर महावनके समान जो तुम हो सो तुम्हारी शरणमे आई है ॥४४॥ यह बाला मानो ग्रीष्मऋतुके सूर्यकी किरणोंके सन्तापसे ही दु.खी हो रही है और तुम्हें महावृक्षके समान जानकर तुम्हारे पास आई है ॥४५॥ यह बेचारी स्वर्गसे परिभ्रष्ट लक्ष्मीके समान अत्यन्त विह्वल हो रही है और अपवादरूपी घामसे युक्त हो कल्पलताके समान काँप रही है ॥४६॥ द्वारपालके रोकनेसे यह अत्यन्त लज्जाको प्राप्त हुई है। इसीलिए इसने लज्जावश मस्तकके साथ-साथ अपना सारा शरीर वस्त्रसे ढँक लिया है ॥४७॥ पिताके स्नेहसे युक्त होकर जो सदा लाड-प्यारसे भरी रहती थी वही अञ्जना आज दरवाजेपर रुकी खड़ी है। हे राजन्! इस द्वारपालने यह समाचार आपसे कहा है ॥४८॥ सो तुम इस पर दया करो, यह निर्दोष है, इसलिए इसका भीतर प्रवेश कराओ। यथार्थमें केतुमती दुष्ट है यह लोकमे कौन नहीं जानता? ॥४९॥ जिस प्रकार कमलिनीके पत्र पर स्थित पानीके बूँदोंका समूह उसपर स्थान नही पाता है उसी प्रकार महोत्साह नामक सामन्तके वचन राजाके कानोंमें स्थान नहीं पा सके ॥५०॥ राजाने कहा कि कदाचित् सखीने स्नेहके कारण इस

१. ग्लानिः। २ अकारणा। विकारिणा म०, ज०। ३. कृतोज्झिता म०। ४. अभ्याख्यानतया लीढा म०।

तस्मात् सदिग्धशीलेयमाशु निर्वास्यतामत । नगराद्यावदमले कुले नो जायते मलम् ॥५२॥
विशुद्धविनया चार्वी चारुचेष्टाविधायिनी । भवेदभ्यहितात्यन्त कस्य नो कुलबालिका ॥५३॥
पुण्यवन्तो महासत्त्वा पुरुषास्तेऽतिनिर्मला । यै कृतो दोषमूलाना दाराणा न परिग्रह ॥५४॥
परिग्रहे तु दाराणा भवत्येवविध फलम् । यस्मिन् गते सति ख्याति [1]भूप्रवेशोऽभिवाञ्छ्यते ॥५५॥
दु खप्रत्यायनस्वान्तस्तावल्लोकोऽवतिष्ठताम् । जातमेव ममाप्यत्र मनोऽद्य कृतशङ्कनम् ॥५६॥
एषा भर्तुरक्षुष्या श्रुता पूर्वं मयाऽसकृत् । ततस्तेन न सभूतिरस्या गर्भस्य निश्चिता ॥५७॥
तस्मादन्योऽपि यस्तस्मै प्रयच्छति समाश्रयम् । वियोज्य स मया प्राणैरित्येष मम सगर ॥५८॥
कुपितेनेति सा तेन द्वाराद्विदिता परै । निर्घाटिता सम सख्या दु खपूरितविग्रहा ॥५९॥
यद्यत्स्वजनगेह सा जगामाश्रयकाङ्क्षया । तत्र तत्र[2]प्यधीयन्त द्वाराणि नृपशासनात्[3] ॥६०॥
यत्रैव जनक क्रुद्धो विदधाति निराकृतिम् । तत्र शेषजने काऽऽस्था तच्छन्दकृतचेष्टिते ॥६१॥
एव निर्धाट्यमाना[4] सा सर्वत्रात्यन्तविक्लवा । सखी जगाद बाष्पौघसमार्द्रीकृतदेहिका ॥६२॥
[5]अम्बे इहात्र किं भ्रान्तिं कुर्वन्त्यावास्वहे सखि । पाषाणहृदयो लोको जातोऽद्य न कुकर्मभि· ॥६३॥
वन तदेव गच्छावस्तत्रैवास्तु यथोचितम् । अपमानात्ततो दुःखान्मरणं परम सुखम् ॥६४॥

---

सत्य बातको भी अन्यथा कह दिया हो तो इसका निश्चय कैसे किया जाय ? ॥५१॥ इसलिए यह संदिग्धशीला है अर्थात् इसके शीलमे सन्देह है अत जब तक हमारे निर्मल कुलमे कलङ्क नही लगता है उसके पहले ही इसे नगरसे शीघ्र निकाल दिया जाय ॥५२॥ निर्दोष, विनयको धारण करनेवाली, सुन्दर और उत्तम चेष्टाओसे युक्त घरकी लड़की किसे अत्यन्त प्रिय नही होती ? पर ये सब गुण इसमे कहाँ रहे ? ॥५३॥ वे महान् धैर्यको धारण करनेवाले अत्यन्त निर्मल पुरुष बड़े पुण्यात्मा है जिन्होंने दोषोंके मूल कारणभूत स्त्रियोका परिग्रह ही नही किया अर्थात् उन्हें स्वीकृत ही नहीं किया ॥५४॥ स्त्रियोंके स्वीकार करनेमे ऐसा ही फल होता है। यदि कदाचित् स्त्री अपवादको प्राप्त होती है तो पृथिवीमे प्रवेश करनेकी इच्छा होने लगती है ॥५५॥ जिनके हृदयमे बडे दु.खसे विश्वास उत्पन्न कराया जाता है ऐसे अन्य मनुष्य तो दूर रहें आज मेरा हृदय ही इस विषयमे शङ्काशील हो गया है ॥५६॥ यह अपने पतिकी द्वेषपात्र है अर्थात् इसका पति इसे आँखसे भी नहीं देखना चाहता। यह मैने कई बार सुना है। इसलिए यह तो निश्चित है कि इसके गर्भकी उत्पत्ति पतिसे नहीं है ॥५७॥ इस दशामे यदि और कोई भी इसके लिए आश्रय देगा तो मै उसे प्राणरहित कर दूँगा ऐसी मेरी प्रतिज्ञा है ॥५८॥ इस प्रकार कुपित हुए राजाने जब तक दूसरोंको पता नहीं चल पाया उसके पहले ही अञ्जनाको सखीके साथ द्वारसे बाहर निकलवा दिया। उस समय अञ्जनाका शरीर दु खसे भरा हुआ था ॥५९॥ आश्रय पानेकी इच्छासे वह जिस-जिस आत्मीयजनके घर जाती थी राजाकी आज्ञासे वह वहीं-वहींके द्वार बन्द पाती थी ॥६०॥ जो ठीक ही है क्योकि जहाँ पिता ही क्रुद्ध होकर तिरस्कार करता है वहाँ उसीके अभिप्रायके अनुसार कार्य करनेवाले दूसरे लोगोंका क्या विश्वास किया जा सकता है ?—उनमे क्या आशा रक्खी जा सकती है ? ॥६१॥ इस तरह सब जगहसे निकाली गई अञ्जना अत्यन्त अधीर हो गई। अश्रुओंके समूहसे उसका शरीर गीला हो गया। उसने सखीसे कहा कि हे माता! हम दोनो यहाँ भटकती हुई क्यों पड़ी हैं? हे सखि! हमारे पापोदयके कारण यह समस्त संसार पाषाणहृदय हो गया है अर्थात् सबका हृदय पत्थरके समान कड़ा हो गया है ॥६२–६३॥ इसलिए हम लोग उसी वनमें चलें। जो कुछ होना होगा सो वही हो लेगा।

---

१. भूप्रदेशोऽभि- म० । २. तत्राप्यधीयन्त म० । ३ नृपशासनान् म० । ४. निर्द्धार्यमाणा क०, ख, ब०, ज० । अम्बाशब्दस्य सम्बुद्धौ 'अम्ब' इति रूप भवति । अत्र 'अम्बे' इति प्रयोगश्चिन्त्यः ।

इत्युक्त्वासौ समं सख्या तदेव प्राविशद्वनम् । मृगीव मोहसंप्राप्ता मृगराजविभीषिता ॥६५॥
वातातपपरिश्रान्ता दुःखसंभारपीडिता । उपविश्य वनस्यान्त सा चक्रे परिदेवनम् ॥६६॥
हा हता मन्दभाग्यास्मि विधिना दुःखदायिना । अहेतुवैरिणा कष्टं क परित्राणमाश्रये ॥६७॥
दौर्भाग्यसागरस्यान्ते प्रसादं कथमप्यगात् । नाथो मे स गतस्त्यक्त्वा दुष्कर्मपरिचोदितः ॥६८॥
श्वश्र्वादिकृतदुःखाना नारीणा पितुरालये । अवस्थानं ममापुण्यैरिदमप्यवसारितम् ॥६९॥
मात्रापि न कृतं किंचित्परित्राणं कथं मम । भर्तृच्छन्दानुवर्तिन्यो जायन्ते च कुलाङ्गनाः ॥७०॥
त्वय्यविज्ञातगर्भायामेष्यामीति[1] त्वयोदितम् । हा नाथ वचनं कस्मात्स्मर्यते न कृपाव्रता ॥७१॥
अपरीक्ष्य कथं श्वश्रु त्यक्तु मामुचितं तव । ननु संदिग्धशीलानां सन्त्युपाया[2] परीक्षणे ॥७२॥
उत्सङ्गलालिता[3] बाल्ये सदा दुर्ललितात्मिकाम् । निष्परीक्ष्य पितस्त्यक्तु मा कथं तेऽभवन्मतिः ॥७३॥
हा मातः साधु वाक्यं ते न कथं निर्गतं मुखात् । सकृदप्युत्तमा प्रीतिरधुना सा किमुज्झिता ॥७४॥
एकोदरोषितां भ्रातस्त्रातु ते मां सुदुःखिताम् । कथं न काचिदुद्भूता चेष्टा निष्ठुरचेतसः ॥७५॥
यत्र यूयमिदंचेष्टाः प्रधाना बन्धुसंहतेः[4] । तत्र कुर्वन्तु किं शेषा वराका दूरबान्धवाः ॥७६॥
अथवा कोऽत्र वो[5] दोषः पुण्यतौ मम निष्ठिते । फलितोऽपुण्यवृक्षोऽयं निषेव्योऽवशया मया ॥७७॥
प्रतिशब्दसमं तस्या विलापमकरोत् सखी । तदाक्रन्दविनिर्धूतधैर्यदूरितमानसा ॥७८॥

इस अपमानसे तथा तज्जन्य दुःखसे तो मर जाना ही परम सुख है ॥६४॥ इतना कहकर अञ्जना सखीके साथ उसी वनमे प्रविष्ट हो गई जिसमे केतुमतीका सेवक उसे छोड गया था। जिस प्रकार कोई मृगी सिंहसे भयभीत हो वनसे भागे और कुछ समय बाद भ्रान्तिवश उसी वनमे फिर जा पहुँचे उसी प्रकार फिरसे अञ्जनाका वनमे जाना हुआ ॥६५॥ दुःखके भारसे पीड़ित अंजना जब वायु और घामसे थक गई तब वनके समीप बैठकर विलाप करने लगी ॥६६॥ हाय-हाय! मै बड़ी अभागिनी हूँ, अकारण वैर रखनेवाले दुःखदायी विधाताने मुझे योंही नष्ट कर डाला। बड़े दुःखकी बात है, मै किसकी शरण गहूँ ॥६७॥ दौर्भाग्यरूपी सागरको पार करनेके बाद मेरा नाथ किसी तरह प्रसन्नताको प्राप्त हुआ सो दुष्कर्मसे प्रेरित हो अन्यत्र चला गया ॥६८॥ जिन्हें सास आदि दुःख पहुँचाती है ऐसी स्त्रियाँ जाकर पिताके घर रहने लगती हैं पर मेरे दुर्भाग्यने पिताके घर रहना भी छुडा दिया ॥६९॥ माताने भी मेरी कुछ भी रक्षा नही की सो ठीक ही है क्योंकि कुलवती स्त्रियाँ अपने भर्तारके अभिप्रायानुसार ही चलती है ॥७०॥ हे नाथ! तुमने कहा था कि मै तुम्हारा गर्भ प्रकट नहीं हो पायगा और मै आ जाऊँगा सो वह वचन याद क्यो नही रखा? तुम तो बडे दयालु थे ॥७१॥ हे सास! बिना परीक्षा किये ही क्या मेरा त्याग करना तुम्हें उचित था? जिनके शीलमे संशय होता है उनकी परीक्षा करनेके भी तो बहुत उपाय हैं ॥७२॥ हे पिता! आपने मुझे बाल्यकालमे गोदमे खिलाया है और सदा बड़े लाड-प्यारसे रक्खा है फिर परीक्षा किये बिना ही मेरा परित्याग करनेकी बुद्धि आपकी कैसे हो गई? ॥७३॥ हाय माता! इस समय तेरे मुखसे एकबार भी उत्तम वचन क्यो नहीं निकला? तूने वह अनुपम प्रीति इस समय क्यों छोड़ दी? ॥७४॥ हे भाई! मैं तेरी एक ही माताके उदरमे वास करनेवाली अत्यन्त दुःखिनी बहिन हूँ सो मेरी रक्षा करनेके लिए तेरी कुछ भी चेष्टा क्यों नहीं हुई? तू बड़ा निष्ठुर हृदय है ॥७५॥ जब बन्धुजनोमे प्रधानता रखनेवाले तुम लोगोकी यह दशा है तब जो बेचारे दूरके बन्धु हैं वे तो कर ही क्या सकते हैं? ॥७६॥ अथवा इसमे तुम सबका क्या दोष है? पुण्यरूपी ऋतुके समाप्त होनेपर अब मेरा यह पापरूपी वृक्ष फलीभूत हुआ है सो विवश होकर मुझे इसकी सेवा करनी ही है ॥७७॥ अञ्जनाका विलाप सुनकर जिसके हृदयका धैर्य दूर हो

१. त्वया विज्ञात- म० । २. सन्त्यपायाः म० । ३. उत्सङ्गलालिता म० । ४. बन्धुसहतिः म० । ५. वा दोषः ब०, ज० ।

अत्यन्तदीनमेतस्या रुदन्त्यां तारनिस्वनम् । मृगीभिरपि निर्मुक्ता सुस्थूला वाष्पबिन्दव ॥७९॥
ततश्चिर रुदित्वैनामरुणीभूतलोचनाम् । सखी दोर्भ्यां समालिङ्ग्य जगादैव विचक्षणा ॥८०॥
स्वामिन्यल रुदित्वा ते नन्ववश्य पुराकृतम् । नेत्रे निमील्य सोढव्य कर्म पाकमुपागतम् ॥८१॥
सर्वेषामेव जन्तूनां पृष्ठत पार्श्वतोऽग्रत. । कर्म तिष्ठति यद्देवि तत्र कोऽवसर शुच ॥८२॥
अप्सर शतनेत्रालीनिलयीभूतविग्रहा । प्राप्नुवन्ति पर दु ख सुकृतान्ते सुरा अपि ॥८३॥
चिन्तयत्यन्यथा लोक. प्राप्नोति फलमन्यथा । लोकव्यापारसक्तात्मा[1] परमो हि गुरुर्विधिः ॥८४॥
हितङ्करमपि प्राप्त विधिर्नाशयति क्षणात् । कदाचिदन्यदा धत्ते मानसस्याप्यगोचरम् ॥८५॥
गतय कर्मणा कस्य विचित्रा परिनिश्चिता । तस्मात्त्वमस्य मा कार्षीर्व्यथां गर्भस्य दु खिता[2] ॥८६॥
आक्रम्य दशनैर्दन्तान्कृत्वा ग्रावसमं मन । कर्म स्वय कृत देवि सहस्वाशक्यवर्जनम् ॥८७॥
ननु स्वय विशुद्धाया मया ते शिक्षण कृतम् । अधिक्षेप इवाभाति वद ज्ञात न कि तव ॥८८॥
अभिधायेति सा तस्या नयने शोणरोचिषी । न्यमार्ष्ट वेपथुयुतपाणिना[3] सान्त्वतत्परा ॥८९॥
भूयश्चोचे प्रदेशोऽय देवि सश्रयवर्जित. । तस्मादुत्तिष्ठ गच्छाव पार्श्वमस्य महीभृत ॥९०॥
गुहायामत्र कस्याञ्चिदगम्यायां कुजन्तुभि. । सूतिकल्याणसप्राप्त्यै समय [4]कञ्चिदास्वहे ॥९१॥
ततस्तयोपदिष्टा सा पदवी पादचारिणी । गर्भभाराद् वियच्चारमसमर्था निषेवितुम् ॥९२॥

गया था ऐसी सखी वसन्तमाला भी प्रतिध्वनिके समान विलाप कर रही थी ॥७८॥ यह अञ्जना बड़ी दीनताके साथ इतने जोर-जोरसे विलाप कर रही थी कि उसे सुनकर वनकी हरिणियोने भी ऑसुओकी बड़ी-बड़ी बूँदे छोड़ी थीं ॥७९॥

तदनन्तर चिरकाल तक रोनेसे जिसके नेत्र लाल हो गये थे ऐसी अञ्जनाका दोनो भुजाओसे आलिङ्गन कर बुद्धिमती सखीने कहा कि हे स्वामिनि ! रोना व्यर्थ है। पूर्वोपार्जित कर्म उदयमे आया है सो उसे ऑख बन्दकर सहन करना ही योग्य है ॥८०-८१॥ हे देवि ! समस्त प्राणियोके पीछे आगे तथा बगलमे कर्म विद्यमान है इसलिए यहॉ शोकका अवसर ही क्या है ? ॥८२॥ जिनके शरीरपर सैकड़ो अप्सराओके नेत्र विलीन रहते है ऐसे देव भी पुण्यका अन्त होनेपर परम दुःख प्राप्त करते है ॥८३॥ लोक अन्यथा सोचते हैं और अन्यथा ही फल प्राप्त करते हैं। यथार्थमे लोगोके कार्यपर दृष्टि रखनेवाला विधाता ही परम गुरु है ॥८४॥ कभी तो यह विधाता प्राप्त हुई हितकारी वस्तुको क्षण भरमे नष्ट कर देता है और कभी ऐसी वस्तु लाकर सामने रख देता है जिसकी मनमे कल्पना ही नहीं थी ॥८५॥ कर्मोंकी दशाएँ बड़ी विचित्र हैं। उनका पूर्ण निश्चय कौन कर पाया है ? इसलिए तुम दु.खी होकर गर्भको पीड़ा मत पहुँचाओ ॥८६॥ हे देवि ! दॉतो-से-दॉतोको दबाकर और मनको पत्थरके समान बनाकर जिसका छूटना अशक्य है ऐसा स्वोपार्जित कर्मका फल सहन करो ॥८७॥ वास्तवमे आप स्वयं विशुद्ध है अतः आपके लिए मेरा शिक्षा देना निन्दाके समान जान पड़ता है। तुम्हीं कहो कि आप क्या नही जानती है ? ॥८८॥ इतना कहकर सान्त्वना देनेमे तत्पर रहनेवाली सखीने अपने कॉपते हुए हाथोंसे उसके लाल-लाल नेत्र पोछ दिये ॥८९॥ फिर कहा कि हे देवि ! यह प्रदेश आश्रय से रहित है अर्थात् यहाँ ठहरने योग्य स्थान नहीं है इसलिए उठो इस पर्वतके पास चले ॥९०॥ यहॉ किसी ऐसी गुफामें जिसमे दुष्ट जीव नहीं पहुँच सकेगे गर्भके कल्याणके लिए कुछ समय तक निवास करेंगी ॥९१॥

तदनन्तर सखीका उपदेश पाकर वह पैदल ही मार्ग चलने लगी। क्योकि गर्भके भार

१. शक्तात्मा म० । २. दुःखिता: म० । दुःखितः ब० । ३. वेपथोर्युक्ता म० । वेपथुर्युक्ता ब० । ४. किञ्चिदा- म० ।

अनुयान्ती महारण्यधरणी समयागिरिम् । व्यालजालसमाकीर्णां तन्नादात्यन्तभीषणाम् ॥९३॥
महानोकहसरुद्धदिवाकरकरोत्कराम् । महीभृत्पादसकीर्णां दर्भसूचीसुदुश्चराम् ॥९४॥
युक्ता मातङ्गमालाभिर्न्यस्यन्ती कृच्छ्रत. पदम् । मातङ्गमालिनी नाम प्राप मानसदुर्गमाम् ॥९५॥
शक्तापि गगने गन्तु पद्भ्या तस्या सखी ययौ । प्रेमबन्धनसबद्धा छायावृत्तिमुपाश्रिता ॥९६॥
भयानका तत प्राप्य तामसौ सकटाटवीम् । वेपमानसमस्ताङ्गा [1]कादिशीकत्वमागमत् ॥९७॥
ततस्तामाकुलां ज्ञात्वा गृहीत्वा करपल्लवे । आली जगाद मा भैषी स्वामिन्येहीति सादरात् ॥९८॥
तत सख्यसविन्यस्तविस्रसिकरपल्लवा । दर्भसूचीमुखस्पर्श[2]कूणितेक्षणकोणिका ॥९९॥
तत्र तत्रैव भूदेशे न्यस्यन्ती चरणौ पुन । स्तनन्ती दु.खसभाराद्देह कृच्छ्रेण बिभ्रती ॥१००॥
उत्तरन्ती प्रयासेन निर्झरान् वेगवाहिन । स्मरन्ती स्वजन सर्वं निष्ठुराचारकारिणम् ॥१०१॥
निन्दन्ती स्वमुपालम्भ प्रयच्छन्ती मुहुर्विधे । कारुण्यादिव वल्लीभि श्लिष्यमाणाखिलाङ्गिका ॥१०२॥
त्रस्तसारङ्गजायाक्षी श्रमजस्वेदवाहिनी । सक्त[3]कण्टकिगुच्छेषु मोचयन्त्यशुक चिरात् ॥१०३॥
क्षतजेनाचितौ पादौ लाक्षिताविव बिभ्रती । शोकाग्निदाहसभूता श्यामता [4]दधती पराम् ॥१०४॥
दलेऽपि चलिते त्रास व्रजन्ती चलविग्रहा । सत्रासस्तम्भितावूरू वहन्ती खेददुर्वहौ ॥१०५॥

के कारण वह आकाशमे चलनेके लिए समर्थ नहीं थी ।।९२।। वह पर्वतकी समीपवर्त्तिनी महावनकी भूमिमे चलती-चलती मातङ्गमालिनी नामकी उस भूमिमे पहुँची जो हिसक जन्तुओसे व्याप्त थी और उनके शब्दोंसे भय उत्पन्न कर रही थी । बडे-बड़े वृक्षोने जहाँ सूर्यकी किरणोंका समूह रोक लिया था, जो छोटी-छोटी पहाड़ियोसे व्याप्त थी, डाभकी अनियोके कारण जहाँ चलना कठिन था, जो हाथियोंकी श्रेणियोसे युक्त थी तथा शरीरकी बात तो दूर रही मनसे भी जहाँ पहुँचना कठिन था । अञ्जना बड़े कष्टसे एक-एक डग रखकर चल रही थी ।।९३–९५।। यद्यपि उसकी सखी आकाशमे चलनेमे समर्थ थी तो भी वह प्रेमरूपी बन्धनमे बँधी होनेसे छायाके समान पैदल ही उसके साथ-साथ चल रही थी ।।९६।। उस भयानक सघन अटवीको देखकर अञ्जनाका समस्त शरीर काँप उठा । वह अत्यन्त भयभीत हो गई ।।९७।।

तदनन्तर उसे व्यग्र देख सखीने हाथ पकड़कर बड़े आदरसे कहा कि स्वामिनि ! डरो मत, इधर आओ ।।९८।। अञ्जना सहारा पानेकी इच्छासे सखीके कन्धेपर हाथ रखकर चल रही थी पर उसका हाथ सखीके कन्धेसे बार-बार खिसककर नीचे आ जाता था । चलते-चलते जब कभी डाभकी अनी पैरमे चुभ जाती थी तब बेचारी आँख मींचकर खडी रह जाती थी ।।९९।। वह जहाँसे पैर उठाती थी दु:खके भारसे चीखती हुई वही फिर पैर रख देती थी । वह अपना शरीर बड़ी कठिनतासे धारण कर रही थी ।।१००।। वेगसे बहते हुए झरनोको वह बड़ी कठिनाईसे पार कर पाती थी । उसे निष्ठुर व्यवहार करनेवाले अपने समस्त आत्मीयजनोंका बार-बार स्मरण हो आता था ।।१०१।। वह कभी अपनी निन्दा करती थी तो कभी भाग्यको बार-बार दोष देती थी । लताएँ उसके शरीरमे लिपट जाती थीं सो ऐसा जान पड़ता था कि दयासे वशीभूत होकर मानो उसका आलिङ्गन ही करने लगती थीं ।।१०२।। उसके नेत्र भयभीत हरिणीके समान चञ्चल थे, थकावटके कारण उसके शरीरमे पसीना निकल आया था, काँटेदार वृक्षोंमे वस्त्र उलझ जाता था तो देर तक उसे ही सुलझाती खड़ी रहती थी ।।१०३।। उसके पैर रुधिरसे लाल-लाल हो गये थे, सो ऐसे जान पड़ते थे मानो लाखका महावर ही उनमे लगाया गया हो । शोकरूपी अग्निकी दाहसे उसका शरीर अत्यन्त साँवला हो गया था ।।१०४।। पत्ता भी हिलता था तो वह भयभीत हो जाती थी, उसका शरीर काँपने लगता था, भयके कारण

१. कादिशीत्वमुपागमत् म० । २. क्वणितेक्षण- म० । ३. कण्टकगुच्छेषु म० । ४. दधतीम् म० ।

मुहुर्विश्रम्यमानाल्या[1] नितान्तप्रियवाक्यया। गिरे प्रापाञ्जना मूलं शनकैरिति दु खिता[2] ॥१०६॥
तत्र धारयितु देहमसक्ता साश्रुलोचना। अपकर्ण्य सखीवाक्य महाखेदादुपाविशत् ॥१०७॥
जगाद च न शक्नोमि प्रयातु पदमप्यत.। तिष्ठाम्यत्रैव देशेऽह प्राप्नोमि मरण वरम् ॥१०८॥
सान्त्वयित्वा ततो वाक्यै. कुशला हृदयङ्गमै। विश्रमय्य प्रणम्योचे सख्येव प्रेमतत्परा ॥१०९॥
पश्य पश्य गुहामेतां देवि नेदीयसी पराम्। कुरु प्रसादमुत्तिष्ठ स्थास्यावोऽत्र यथासुखम् ॥११०॥
प्रदेशे सचरन्तीह प्राणिन क्रूरचेष्टिता। ननु ते रक्षणीयोऽय गर्भ स्वामिनि मा मुह ॥१११॥
इत्युक्ता[3] सानुरोधेन सख्या वनभयेन च। गमनाय समुत्तस्थौ भूयोऽपि परितापिनी ॥११२॥
महानुभावतायोगादनुज्ञातेरभावत[4]। ह्रीतश्च नान्तिक वायोरयासिष्टामिमे तदा ॥११३॥
हस्तावलम्बदानेन ततस्तां विषमा भुवम्। लङ्घयित्वा सखी कृच्छ्राद् गुहाद्वारमुपाहरत् ॥११४॥
प्रवेष्टु सहसा भीते तत्र ते तस्थतु. क्षणम्। विषमग्रावसक्रान्तिसजातविपुलश्रमे ॥११५॥
विश्रान्ताभ्या चिराद् दृष्टिस्तत्राभ्यां न्यासि मन्दगा। [5]म्लानरक्तशितिश्वेतनीरजस्रक्समप्रभा ॥११६॥
अपश्यता तत. शुद्धसमामलशिलातले। पर्यङ्कसुस्थित साधु चारणातिशयान्वितम् ॥११७॥
निभृतोच्छ्वासनिश्वास नासिकाग्राहितेक्षणम्। ऋजुश्लथवपुर्यष्टि स्थाणुवच्चलनोज्झितम् ॥११८॥

उसकी दोनो जाँघे अकड़ जातीं थी और खेदके कारण उनका उठाना कठिन हो जाता था ॥१०५॥ अत्यन्त प्रिय वचन बोलनेवाली सखी उसे बार-बार बैठाकर विश्राम कराती थी। इस प्रकार दु:खसे भरी अञ्जना धीरे-धीरे पहाड़के समीप पहुँची ॥१०६॥ वहाँ तक पहुँचनेमे वह इतनी अधिक थक गई कि शरीर सम्भालना भी दूभर हो गया। उसके नेत्रोसे आँसू बहने लगे और वह बहुत भारी खेदके कारण सखीकी बात अनसुनी कर बैठ गई ॥१०७॥ कहने लगी कि अब तो मैं एक डग भी चलनेके लिए समर्थ नहीं हूँ अत यहीं ठहरी जाती हूँ। यदि यहाँ मरण भी हो जाय तो अच्छा है ॥१०८॥

तदनन्तर प्रेमसे भरी चतुर सखी हृदयको प्रिय लगने वाले वचनोसे उसे सान्त्वना देकर तथा कुछ देर विश्राम कराकर प्रणामपूर्वक इस प्रकार बोली ॥१०९॥ हे देवि! देखो-देखो यह पास ही उत्तम गुफा दिखाई दे रही है। प्रसन्न होओ, उठो, हम दोनो उस गुफामे ही सुखसे ठहरेंगी ॥११०॥ यहाँ क्रूर चेष्टाओको धारण करने वाले अनेक जीव बिचर रहे है और तुम्हें गर्भकी भी रक्षा करनी है। इसलिए हे स्वामिनि! गलती न करो ॥१११॥ ऐसा कहने पर संतापसे भरी अंजना सखीके अनुरोधसे तथा वनके भयसे पुन चलने के लिए उठी ॥११२॥ उस समय ये दोनों स्त्रियाँ वनमे कष्ट तो उठाती रहीं पर पवनंजयके पास नहीं गईं सो इसमे उनकी महानुभावता, आज्ञाका अभाव अथवा लज्जा ही कारण समझना चाहिए ॥११३॥ तदनन्तर सखी वसन्तमाला हाथका सहारा देकर जिस किसी तरह उस ऊँची-नीची भूमिको पार कराकर बड़े कष्टसे अञ्जनाको गुफाके द्वार तक ले गई ॥११४॥ ऊँचे-नीचे पत्थरोमे चलनेके कारण वे दोनो ही बहुत थक गई थीं और साथ ही उस गुफामे सहसा प्रवेश करनेके लिए डर भी रही थीं इसलिए क्षण भरके लिए बाहर ही बैठ गईं ॥११५॥ बहुत देरतक विश्राम करनेके बाद उन्होंने अपनी मन्दगामिनी दृष्टि गुफापर डाली। उनकी वह दृष्टि मुरझाये हुए लाल, नीले और सफेद कमलोंकी मालाके समान जान पड़ती थी ॥११६॥

तदनन्तर उन्होंने शुद्ध सम और निर्मल शीला-तलपर पर्यङ्कासनसे विराजमान चारण-ऋद्धिके धारक मुनिराजको देखा ॥११७॥ उन मुनिराजका श्वासोच्छ्वास निश्चल अथवा नियमित था। उन्होंने अपने नेत्र नासिकाके अग्रभागपर लगा रक्खे थे, उनकी शारीरयष्टि शिथिल होनेपर

१. विश्रम्यमानात्मा म०। २. दःखिताः म०। ३ इत्यक्त्वा म०। ४ आज्ञाया'। ५ म्लान-रक्तासितश्वेतरजतस्रक्समप्रभा ख०।

अङ्कस्थवामपाण्यङ्कन्यस्तान्योत्तानपाणिकम् । निष्प्रकम्प नदीनाथगाम्भीर्यस्थितमानसम् ॥११९॥
ध्यायन्त वस्तुयाथात्म्य यथाशासनभावनम् । नि शेषसङ्गनिर्मुक्त वायुवद्गगनामलम् ॥१२०॥
शैलकूटगताशङ्क वीक्ष्य ताभ्या चिरादसौ । निरचायि महासत्त्व सौम्यभासुरविग्रह ॥१२१॥
तत पूर्वकृतानेकश्रवणासेवने मुदा । समीप जग्मतुस्तस्या क्षणात्ते विस्मृतासुखे ॥१२२॥
त्रि परीत्य च भावेन नेमतुर्विहिताञ्जली । मुनि परमिव प्राप्ते बान्धव विकचेक्षणे ॥१२३॥
काले यदृच्छया तत्र तेन योग समाप्यत[2] । भवत्येव हि भव्याना क्रिया प्रस्तावसङ्गता ॥१२४॥
ते ततोऽवदतामेवमविभक्तकरद्वये । अनगाराङ्घ्रिविन्यस्तनिरश्रुस्थिरलोचने[3] ॥१२५॥
भगवन्नपि[4,5] ते देहे कुशल कुशलाशय । मूलमेष हि सर्वेषा साधनाना सुचेष्टित ॥१२६॥
उपर्युपरिसवृद्ध[6] तप. कच्चिद्[7] गुणाम्बुधे । विहारोऽपि दमोद्दाहव्युपसर्गो महाक्षम ॥१२७॥
आचार इति पृच्छावो भवन्तमिदमीदृशम् । अन्यथा कस्य नो योग्या कुशलस्य भवद्विधा. ॥१२८॥
भवन्ति क्षेमताभाजो भवद्विधसमाश्रिता । स्वस्मिंस्तु कैव भावाना कथा साध्वितरात्मनाम् ॥१२९॥
इत्युक्त्वा ते व्यरसिष्टा विनयानतविग्रहे । नि.शेषभयनिर्मुक्ते तद् दृष्टे च बभूवतु ॥१३०॥

---

भी सीधी थी, और वे स्वयं स्थाणु अर्थात् ठूँठके समान हलन चलनसे रहित थे ॥११८॥ उन्होने अपनी गोदमे स्थित वाम हाथकी हथेलीपर दाहिनी हाथ उत्तान रूपसे रख छोड़ा था, वे स्वय निश्चल थे और उनका मन समुद्रके समान गम्भीर था ॥११९॥ वे जिनागमके अनुसार वस्तुके यथार्थ स्वरूपका ध्यान कर रहे थे, वायुके समान सर्व-परिग्रहसे रहित थे और आकाशके समान निर्मल थे ॥१२०॥ उन्हें देखकर किसी पर्वतके शिखरकी आशङ्का उत्पन्न होती थी। वे महान् धैर्यके धारक थे तथा उनका शरीर सौम्य होनेपर भी देदीप्यमान था। बहुत देरतक देखनेके बाद उन्होने निश्चय कर लिया कि यह उत्तम मुनिराज है ॥१२१॥

तदनन्तर जिन्होने पहले अनेक बार मुनियोकी सेवा की थी ऐसी वे दोनो स्त्रियाँ हर्षसे मुनिराजके समीप गईं और क्षण भरमे अपना सब दु.ख भूल गईं ॥१२२॥ उन्होंने भावपूर्वक तीन प्रदक्षिणाएँ दी, हाथ जोड़कर नमस्कार किया और परम बन्धुके समान मुनिराजको पाकर उनके नेत्र खिल उठे ॥१२३॥ जिस समय ये पहुँचीं उसी समय मुनिराजने स्वेच्छासे ध्यान समाप्त किया सो ठीक ही है क्योकि भव्य जीवोकी क्रिया अवसरके अनुसार ही होती है ॥१२४॥ तत्पश्चात् जिनके दोनो हाथ जुड़े हुए थे और जिन्होने अपने अश्रुरहित निश्चल नेत्र मुनिराजके चरणोमे लगा रक्खे थे ऐसी दोनो सखियोने कहा कि हे भगवन्! हे कुशल अभिप्रायके धारक! हे उत्तम चेष्टाओसे सम्पन्न! आपके शरीरमे कुशलता तो है? क्योकि समस्त साधनोंका मूल कारण यह शरीर ही है ॥१२५-१२६॥ हे गुणोंके सागर! आपका तप उत्तरोत्तर बढ़ तो रहा है? इसी प्रकार हे इन्द्रियविजयके धारक! आपका विहार उपसर्गरहित तथा महा क्षमासे युक्त तो है? ॥१२७॥ हे प्रभो! हम आपसे जो इस तरह कुशल पूछ रही है सो ऐसी पद्धति है यही ध्यान रखकर पूँछ रही है अन्यथा आप जैसे मनुष्य किस कुशलके योग्य नही है? अर्थात् आप समस्त कुशलताके भण्डार है ॥१२८॥ आप जैसे पुरुषोकी शरणमे पहुँचे हुए लोग कुशलतासे युक्त हो जाते हैं, किन्तु स्वयं अपने-आपके विषयमे अच्छे और बुरे पदार्थोंकी चर्चा ही क्या है? ॥१२९॥ इस प्रकार कहकर वे दोनो चुप हो रहीं। उस समय उनके शरीर विनयसे नम्रीभूत थे। मुनिराजने जब उनकी ओर देखा तो वे सर्व प्रकारके भयसे रहित हो गईं ॥१३०॥

---

१. नरवापि ब०, ज० । २. समाप्यते म०, ख०, ज० । ३. निरश्रुस्थिर म० । ४ भगवन्नथि म०, ख० । ५. अपिशब्दः प्रश्नार्थः । ६. सबद्ध म० । ७. 'कच्चित्कामप्रवेदने' इत्यमरः ।

अथ प्रशान्तया वाचा श्रमणोऽमृतकल्पया । गम्भीरया जगादैव पाणिमुत्क्षिप्य दक्षिणम् ॥१३१॥
कल्याणि कुशलं सर्वं मम कर्मानुभावत । ननु सर्वमिदं बाले नैजकर्मविचेष्टितम् ॥१३२॥
पश्यता कर्मणां लीला यदिहागोविवर्जिता । बन्धुनिर्वास्यता याता महेन्द्रस्येयमात्मजा ॥१३३॥
ततोऽकथितविज्ञाततद्वृत्तान्तं महामुनिम् । कुतूहलसमाक्रान्तमानसा सुमहादरा ॥१३४॥
नत्वा वसन्तमालोचे स्वामिनीप्रियतत्परा । पादयोर्नेत्रकान्त्यास्य कुर्वतीवाभिषेचनम् ॥१३५॥
विज्ञापयामि नाथ त्वां कृपया वक्तुमर्हसि । परोपकारभूयस्यो ननु युष्मादृशां क्रिया ॥१३६॥
हेतुना केन भर्तास्या[1]श्चिरं कालं व्यरज्यत । अरज्यत पुनर्दुःखं प्राप्ता चैषा महावने ॥१३७॥
[2]को वातिमन्दभाग्योऽथ जीवोऽस्याः कुक्षिमाश्रयत् । सुखोचितेयमानीता येन जीवितसंशयम् ॥१३८॥
ततः सोऽमितगत्याख्यो ज्ञानत्रयविशारदः । यथावृत्तं जगादास्या वृत्तिरेषा हि धीमताम् ॥१३९॥
वत्से शृणु यतः प्राप्ता भव्येयं दुःखमीदृशम् । पूर्वमाचरितात् पापात् सम्प्राप्तपरिपाकतः ॥१४०॥
इह जम्बूमति द्वीपे वास्ये भरतनामनि । नगरे मन्दराभिख्ये प्रियनन्दीति सद्गृही ॥१४१॥
[3]जाया [4]जायास्य तत्राभूद्दमयन्ताभिधः सुतः । [5]महासौभाग्यसम्पन्नः कल्याणगुणभूषणः ॥१४२॥
अथान्यदा मधौ क्रीडा परमा तत्पुरेऽभवत् । नन्दनप्रतिमोद्याने पौरलोकसमाकुले ॥१४३॥

---

अथानन्तर मुनिराज दाहिना हाथ ऊपर उठाकर अमृतके समान प्रशान्त एवं गम्भीर वाणीमे इस प्रकार कहने लगे कि हे कल्याणि ! कर्मोंके प्रभावसे मेरा सर्वप्रकार कुशल है। हे बाले ! निश्चयसे यह सब अपने-अपने कर्मोंकी चेष्टा है ॥१३१-१३२॥ कर्मोंकी लीला देखो जो राजा महेन्द्रकी यह निरपराधिनी पुत्री भाइयो द्वारा निर्वासितपनाको प्राप्त हुई अर्थात् घरसे निकाली जाकर अत्यन्त अनादरको प्राप्त हुई ॥१३३॥ तदनन्तर बिना कहे ही जिन्होंने सब वृत्तान्त जान लिया था ऐसे महामुनिराजको नमस्कार कर बड़े आदरसे वसन्तमाला बोली। उस समय वसन्तमालाका मन कुतूहलसे भर रहा था, वह स्वामिनीका भला करनेमे तत्पर थी। और अपने नेत्रोंकी कान्तिसे मानो मुनिराजके चरणोका अभिषेक कर रही थी ॥१३४-१३५॥ उसने कहा कि हे नाथ ! मै कुछ प्रार्थना कर रही हूँ सो कृपाकर उसका उत्तर कहिये। क्योकि आप जैसे पुरुषोकी क्रियाएँ परोपकार-बहुल ही होती है ॥१३६॥ इस अञ्जनाका भर्ता किस कारणसे चिर काल तक विरक्त रहा और अब किस कारणसे अनुरक्त हुआ है ? यह अञ्जना महावनमे किस कारणसे दुःखको प्राप्त हुई है ? और मन्द भाग्यका धारक कौन-सा जीव इसकी कुक्षिमें आया है जिसने कि सुख भोगनेवाली इस बेचारीको प्राणोके संशयमें डाल दिया है ॥१३७-१३८॥

तदनन्तर मति, श्रुत और अवधि इन तीन ज्ञानोमे निपुण अमितगति नामक मुनिराज अञ्जनाका यथावत् वृत्तान्त कहने लगे। सो ठीक ही है क्योकि बुद्धिमानोकी यही वृत्ति है ॥१३९॥ उन्होंने कहा कि हे बेटी ! सुन, इस अञ्जनाने अपने पूर्वोपार्जित पाप कर्मके उदयसे जिस कारण यह ऐसा दुःख पाया है उसे मैं कहता हूँ ॥१४०॥

इसी जम्बूद्वीप सम्बन्धी भरत क्षेत्रके मन्दर नामक नगरमें एक प्रियनन्दी नामका सद्-गृहस्थ रहता था ॥१४१॥ उसकी स्त्रीका नाम जाया था। उस स्त्रीसे प्रियनन्दीके दमयन्त नामका ऐसा पुत्र उत्पन्न हुआ था जो महासौभाग्यसे सम्पन्न तथा कल्याणकारी गुणरूपी आभूषणोंसे विभूषित था ॥१४२॥ तदनन्तर वसन्त ऋतु आनेपर नगरमें बड़ा भारी उत्सव हुआ सो नगर-वासी लोगोंसे व्याप्त नन्दनवनके समान सुन्दर उद्यानमे दमयन्त भी अपने मित्रोंके साथ सुख-

---

१. भर्तास्य म० । २. कोवास्य म० । ३. एतन्नाम्नी । ४. स्त्री । ५. महीसौभाग्य ।

चिक्रीड[1] दमयन्तोऽपि तत्र मित्रैः सम सुखम् । पटवासवलक्षाङ्ग कुण्डलादिविभूषित ॥१४४॥
अथ तेन स्थितेनाराक्रीडता गगनाम्बरा । दृष्टास्तपोधना ध्यानस्वाध्यायादिक्रियोदिता·[2] ॥१४५॥
निस्सृत्य मण्डलान्मित्राद् रश्मिवत् सोऽतिभासुर । जगाम मुनिसघात मेरुश्रृङ्गौघसन्निभम् ॥१४६॥
तत साधु स वन्दित्वा श्रुत्वा धर्मं यथाविधि । सम्यग्दर्शनसपन्नो बभूव नियमस्थित ॥१४७॥
दत्वा सप्तगुणोपेतामन्यदा पारणामसौ । साधुभ्यः[3] पञ्चता प्राप्य कल्पवासमशिश्रियत् ॥१४८॥
नियमाद्दानतश्चात्र भोगमन्वभवत् परम् । देवीशतेक्षणच्छायानीलाब्जस्रग्विभूषित ॥१४९॥
च्युतस्तस्मादिह द्वीपे मृगाङ्कनगरेऽभवत् । प्रियङ्गुलक्ष्मीसभूतो हरिचन्द्रनृपात्मज ॥१५०॥
सिहचन्द्र इति ख्यात कलागुणविशारद । स्थित प्रत्येकमेकोऽपि चेत सु प्राणधारिणाम् ॥१५१॥
तत्रापि मुक्तसङ्गोग साधुभ्योऽवाप्य सन्मतिम् । कालधर्मेण सयुक्तो जगाम त्रिदशालयम् ॥१५२॥
तत्रोदार सुख प्राप सकल्पकृतकल्पनम् । देवीवदनराजीवमहाखण्डदिवाकर ॥१५३॥
च्युत्वात्रैव ततो वास्थे[4] विजयार्धमहीधरे । नगरेऽरुणसज्ञाके सुकण्ठस्य नरप्रभोः ॥१५४॥
जायाया कनकोदर्यां सिंहवाहनशब्दित. । उदपादिगुणाकृष्टसमस्तजनमानस ॥१५५॥
तत्र देव इवोदारसभोगमनुभूतवान् । अप्सरोविभ्रमस्तेन[5] कान्तालिङ्गनलालित· ॥१५६॥
तीर्थे विमलनाथस्य सोऽन्यदा जातसन्मति । निक्षिप्य तनये लक्ष्मी वनवाहननामनि ॥१५७॥

पूर्वक क्रीड़ा कर रहा था। उस समय उसका शरीर सुगन्धित चूर्णसे सफेद था तथा कुण्डलादि आभूषण उसकी शोभा बढा रहे थे ॥१४३-१४४॥

तदनन्तर वहाँ ठहरकर क्रीड़ा करते हुए दमयन्तने समीपमे ही विद्यमान ध्यान, स्वाध्याय आदि क्रियाओंमें तत्पर दिगम्बर मुनिराज देखे ॥१४५॥ उन्हें देखते ही जिस प्रकार सूर्यसे देदीप्यमान किरण निकलती है उसी प्रकार अपनी गोष्ठीसे निकलकर अतिशय देदीप्यमान दमयन्त मुनिसमूहके पास पहुँचा। वह मुनियोंका समूह मेरुके शिखरोंके समूहके समान निश्चल था ॥१४६॥ तदनन्तर दमयन्तने मुनिराजकी वन्दनाकर उनसे विधि-पूर्वक धर्मका उपदेश सुना और सम्यग्दर्शनसे सम्पन्न होकर नियम आदि धारण किये ॥१४७॥ किसी एक समय उसने साधुओंके लिए सप्तगुणोंसे युक्त पारणा कराई और अन्तमे मरकर स्वर्गमे देवपर्याय पाया ॥१४८॥ वहाँ वह पूर्वाचरित नियम और दानके प्रभावसे उत्तम भोग भोगने लगा। सैकड़ो देवियोके नेत्रोंके समान कान्तिवाले नील कमलोकी मालासे वह वहाँ सदा अलकृत रहता था ॥१४९॥ वहाँसे च्युत होकर वह इसी जम्बूद्वीपके मृगाङ्कनामा नगरमे राजा हरिचन्द्र और प्रियङ्गुलक्ष्मी नामक रानीसे सिहचन्द्र नामका कला और गुणोमें निपुण पुत्र हुआ। सिंहचन्द्र यद्यपि एक था तो भी समस्त प्राणियोके हृदयोमे विद्यमान था ॥१५०-१५१॥ उस पर्यायमे भी उसने साधुओंसे सद्बोध पाकर भोगोका त्याग कर दिया था जिससे आयुके अन्तमे मरकर स्वर्ग गया ॥१५२॥ वहाँ वह देवियोके मुखरूपी कमल-वनको विकसित करनेके लिए सूर्यके समान था और सङ्कल्प मात्रसे प्राप्त होनेवाले उत्तम सुखका उपभोग करता था ॥१५३॥ वहाँसे च्युत होकर इसी भरतक्षेत्रके विजयार्ध पर्वतपर अरुण नामक नगरमे राजा सुकण्ठकी कनकोदरी नामा रानीसे सिहवाहन नामका पुत्र हुआ। इस सिहवाहनने गुणोके द्वारा समस्त लोगोका मन अपनी ओर आकर्षित कर लिया था ॥१५४-१५५॥ अप्सराओके विभ्रमको चुरानेवाली स्त्रियोंके आलिङ्गनसे परमाह्लादको प्राप्त हुआ सिहवाहन वहाँ देवोंके समान उदार भोगोका अनुभव करने लगा ॥१५६॥ किसी एक समय श्रीविमलनाथ भगवान्‌के तीर्थमे उसे सद्बोध प्राप्त हुआ सो मेघवाहन नामक पुत्रके लिए राज्य-लक्ष्मी सौप संसारसे विरक्त हो गया। तदनन्तर जो बहुत भारी संवेगसे युक्त था और

१. चिक्रीडे म० । २. क्रियोदिता म० । ३. मृत्युम् । ४. वास्थो (?) म० । ५. विभ्रमस्तेनः कान्ता- म० ।

पुरुसवेगसम्पन्नो विदितासारसस्तृति । लक्ष्मीतिलकसञ्ज्ञस्य मुनेरानच्छं शिष्यताम् ॥१५८॥
अनुपाल्य समीचीन व्रत जिनवरोदितम् । अनित्यत्वादिभि. कृत्वा चेतनां भावनामयीम् ॥१५९॥
तप कापुरुषाचिन्त्य तप्त्वा तन्वादरोज्झितम्[1] । रत्नत्रितयतो जातां दधान परमार्थताम् ॥१६०॥
नानालब्धिसमुत्पत्ते[3] शक्तोऽप्यहितवारणे । परीषहरिपून् घोरानधिसह्य सुमानस ॥१६१॥
आयुर्विराममासाद्य ध्यानमास्थाय निर्मलम् । ज्योतिषा पटल भित्त्वा लान्तवेऽभूत् सुरो महान् ॥१६२॥
इच्छानुरूपमासाद्य तत्र भोग परस्थिति[4] । छद्मस्थजनधीवाचा स्थित सवंच्य[5][सत्यज्य]गोचरम् ॥१६३॥
च्युत्वा पुण्यावशेषेण प्रेरितः परमोदय । कुक्षिमस्या विवेशाय जीव सौख्यस्य भाजनम् ॥१६४॥
एव तावदय गर्भ स्वामिन्यास्ते तनुं श्रित । हेतु विरहदु खस्य शृणु कल्याणचेष्टिते ॥१६५॥
भवेऽस्या कनकोदर्या लक्ष्मीर्नाम सपत्न्यभूत् । सम्यग्दर्शनपूतात्मा साधुपूजनतत्परा ॥१६६॥
प्रतिमा देवदेवाना प्रतीके सद्मनस्तया । स्थापयित्वार्चिता भक्त्या स्तुतिमङ्गलवक्त्रया ॥१६७॥
महादेव्यभिमानेन सपत्न्यै क्रुद्धया तया । चक्रे बाह्यावकाशेऽसौ[6] जिनेन्द्रप्रतियातना ॥१६८॥
अत्रान्तरेऽविशद् गेहमस्या भिक्षार्थमार्यिका । सयमश्रीरिति ख्याता तपसा विष्टपेऽखिले ॥१६९॥
तत परिभव दृष्ट्वा साप्यर्हत्प्रतियातनम् । ययावतिपर दुख पारणापेतमानसा ॥१७०॥

संसारकी असारताको जिसने अच्छी तरह समझ लिया था ऐसा सिहवाहन लक्ष्मीतिलक नामक मुनिका शिष्य हो गया अर्थात् उनके पास उसने दीक्षा धारण कर ली ॥१५७–१५८॥ जिनेन्द्र भगवान्के द्वारा कहे हुए उत्तम व्रतका अच्छी तरह पालनकर उसने अनित्य आदि भावनाओंके चिन्तवनसे अपनी आत्माको प्रभावित किया ॥१५९॥ शरीरका आदर छोड़कर उसने ऐसा कठिन तपश्चरण किया कि कायर मनुष्य जिसका विचार भी नहीं कर सकते थे। वह सदा रत्नत्रयके प्रभावसे उत्पन्न होनेवाली परमार्थताको धारण करता था ॥१६०॥ नाना प्रकारकी ऋद्धियाँ उत्पन्न होनेसे यद्यपि वह अनिष्ट पदार्थोंका निवारण करनेमें समर्थ था तो भी शान्त हृदयसे उसने परीषहरूपी घोर शत्रुओंका कष्ट सहन किया था ॥१६१॥ आयुका अन्त आनेपर वह निर्मल ध्यानमे लीन हो गया और ज्योतिषी देवोंका पटल भेदनकर अर्थात् उससे ऊपर जाकर लान्तव स्वर्गमे उत्कृष्ट देव हुआ ॥१६२॥ वहाँ वह उत्कृष्ट स्थितिका धारी हुआ और छद्मस्थ जीवोंके ज्ञान तथा वचन दोनोसे परे रहनेवाले इच्छानुकूल भोगोका उपभोग करने लगा ॥१६३॥ परम अभ्युदयसे सहित तथा सुखका पात्र भूत, इसी देवका जीव लान्तव स्वर्गसे च्युत होकर बाकी बचे पुण्यसे प्रेरित होता हुआ इस अञ्जनाके गर्भमे प्रविष्ट हुआ है ॥१६४॥ इस प्रकार जो गर्भ तेरी स्वामिनीके शरीरमे प्रविष्ट हुआ है उसका वर्णन किया। अब हे शुभ चेष्टाकी धारक वसन्त-माले! इसके विरह-जन्य दु.खका कारण कहता हूँ सो सुन ॥१६५॥ जब यह अञ्जना कनकोदरीके भवमे थी तब इसकी लक्ष्मी नामक सौत थी। उसकी आत्मा सम्यग्दर्शनसे पवित्र थी और वह सदा मुनियोकी पूजा करनेमे तत्पर रहती थी ॥१६६॥ उसने घरके एक भागमे देवाधिदेव जिनेन्द्र देवकी प्रतिमा स्थापित कराकर भक्तिपूर्वक मुखसे स्तुतियाँ पढती हुई उसकी पूजा की थी ॥१६७॥ कनकोदरी महादेवी थी इसलिए उसने अभिमानवश सौतके प्रति बहुत ही क्रोध प्रकट किया। इतना ही नहीं जिनेन्द्रदेवकी प्रतिमाको घरके बाहरी भागमे फिकवा दिया ॥१६८॥ इसी बीचमे संयमश्री नामक आर्यिकाने भिक्षाके लिए इसके घरमे प्रवेश किया। संयमश्री अपने तपके कारण समस्त संसारमे प्रसिद्ध थी ॥१६९॥ तदनन्तर जिनेन्द्रदेवकी प्रतिमाका अनादर देख

१. तन्वादरो- क० । तप्त्वा ब०, ज० । २. जातं म० । ३. समुत्पन्नः म० । ४. परिस्थिति ख०, ब० । ५. सवञ्च्य ज० । उल्लङ्घ्य इति ब० पुस्तके टिप्पणम् । ६. वाप्यावकाशे ।

इमा च मोहिनी[1] दृष्ट्वा पर कारुण्यमागता । साधुवर्गो हि सर्वेभ्य प्राणिभ्य शुभमिच्छति ॥१७१॥
अपृष्टोऽपि जन साधुर्गुरुभक्तिप्रचोदित । अज्ञप्राणिहितार्थं च धर्मवाक्ये प्रवर्तते ॥१७२॥
अवोचत ततः सैव शीलभूषणधारिणी । [3]तदेमामितया वाचा माधुर्यमुपमोज्झितम् ॥१७३॥
भद्रे शृणु मन कृत्वा परम परमद्युते । नरेन्द्रकृतसन्माने भोगायतनविग्रहे ॥१७४॥
भवे चतुर्गतौ भ्राम्यन् जीवो दुःखैश्रित सदा । सुमानुषत्वमायाति शमे कटुककर्मण ॥१७५॥
मनुष्यजातिमापन्ना सा त्व पुण्येन शोभने । माभूज्जुगुप्सिताचारा कर्तुं योग्यासि सत्क्रियाम् ॥१७६॥
लब्ध्वा मनुष्यता कर्म यो नादत्ते जन शुभम् । रत्न करगत तस्य प्रशममायाति मोहिन ॥१७७॥
कायवाक्चेतसा वृत्ति शुभा हितविधायिनी । सैवेतरेतराधानकारिणी प्राणधारिणाम् ॥१७८॥
स्वस्य ये हितमुद्दिश्य प्रवर्तन्ते सुकर्मणि । उत्तमास्ते जना लोके निन्दिताचारभूयसि ॥१७९॥
कृतार्था अपि ये सन्तो भवदु खमहार्णवात् । तारयन्ति जनान् भव्यानुपदेशविधानत ॥१८०॥
उत्तमोत्तमता तेषा बिभ्रता[4] धर्मचक्रिणाम् । [5]अर्हतां ये तिरस्कार प्रतिबिम्बस्य कुर्वते ॥१८१॥
जन्तूना मोहिना तेषां यदनेकभवानुगम् । दु ख सजायते कस्तद्वक्तु शक्नोति कात्स्र्न्यत ॥१८२॥
यद्यप्येषा [6]प्रपन्नेषु प्रासादो नोपजायते । न चापकारनिष्ठेषु द्वेषो माध्यस्थ्यमीयुषाम् ॥१८३॥
स्वस्मात्तथापि जन्तूना परिणामाच्छुभाशुभात् । तदुद्देशेन सजातात् सुखदु खसमुद्भव ॥१८४॥
यथाग्ने. सेवनाच्छीतदु ख जन्तुरपोहते । [7]क्षुत्तृष्णापरिपीडां च भक्तशीताम्बुसेवनात् ॥१८५॥

उन्हें बहुत दु ख हुआ । पारणा करनेसे उनका मन हट गया ॥१७०॥ तथा इस अञ्जनाका जीव जो कनकोदरी था उसे मिथ्यात्व-ग्रस्त देख उन्हें परम करुणा उत्पन्न हुई सो ठीक ही है क्योंकि साधुवर्ग सभी प्राणियोका कल्याण चाहता है ॥१७१॥ गुरु-भक्तिसे प्रेरित हुए साधुजन बिना पूछे भी अज्ञानी प्राणियोका हित करनेके लिए धर्मोपदेश देने लगते है ॥१७२॥

तदनन्तर शील रूप आभूषणको धारण करनेवाली संयमश्री आर्यिका अत्यन्त मधुर वाणीमे कनकोदरीसे बोलीं कि हे भद्रे ! मनको उदारकर सुन । तू परम कान्तिको धारण करनेवाली है, राजा तेरा सन्मान करता है, तथा तेरा शरीर भोगोंका आयतन है ॥१७३–१७४॥ चतुर्गति रूप संसारमे भ्रमण करता हुआ यह जीव सदा दुःखी रहता है। जब अशुभ कर्मका उदय शान्त होता है तभी यह उत्तम मनुष्यपर्यायको प्राप्त होता है ॥१७५॥ हे शोभने ! तू पुण्योदयसे मनुष्य योनिको प्राप्त हुई है अत घृणित आचार करनेवाली न हो। तू उत्तम क्रिया करने योग्य है अर्थात् अच्छे कार्य करना ही तुझे उचित है ॥१७६॥ जो प्राणी मनुष्यपर्याय पाकर भी शुभ कार्य नही करता है उस मोहीके हाथमे आया हुआ रत्न योंही नष्ट हो जाता है ॥१७७॥ मन, वचन, कायकी शुभ प्रवृत्ति ही प्राणियोका हित करती है और अशुभ प्रवृत्ति अहित करती है ॥१७८॥ इस संसारमे निन्दित आचारके धारक मनुष्योकी ही बहुलता है पर जो आत्महितका लक्ष्यकर शुभ कार्यमे प्रवृत्त होते है वे उत्तम कहलाते हैं ॥१७९॥ जो स्वयं कृतकृत्य होकर भी उपदेश देकर भव्य प्राणियोको संसार रूपी महासागरसे तारते है, जो सर्वोत्कृष्ट हैं तथा धर्मचक्रके प्रवर्तक हैं ऐसे अरहन्त भगवान्‌की प्रतिमाका जो तिरस्कार करते है उन मोही जीवोको अनेक भवो तक साथ जानेवाला जो दुःख प्राप्त होता है उसे पूर्ण रूपसे कहनेके लिए कौन समर्थ हो सकता है ? ॥१८०–१८२॥ अरहन्त भगवान् तो माध्यस्थ्य भावको प्राप्त है इसलिए यद्यपि इन्हें शरणागत जीवोमे न प्रसन्नता होती है और न अपकार करनेवालों पर द्वेष ही होता है ॥१८३॥ तो भी जीवोंको उपकार और अपकारके निमित्तसे होनेवाले अपने शुभ-अशुभ परिणामसे सुख-दुःखकी उत्पत्ति होती है ॥१८४॥ जिस प्रकार यह जीव अग्निकी

१. मोहनीं ज०, ख० । मेहिनीं क० । २. सुख-म० । ३. तदिमा मितया म० । तदा + इमाम् + इतया इतिच्छेदः । ४. विकृता म० । ५. अर्हतो म० । ६. प्रयत्नेषु क०, ख० । ७. क्षुत्तृष्णा परिपीडा च म० ।

निसर्गोऽयं तथा येन जिनानामर्चनात्सुखम् । जायते प्राणिनां दुःखं परमं च तिरस्कृते ॥१८६॥
यन्नाम दृश्यते लोके दुःखं तत्पापसंभवम् । सुखञ्च चरितात्पूर्वंसुकृतादिति विद्यताम्[1] ॥१८७॥
सा त्वं पुण्यैरिमां वृद्धिं भर्तारं[2] पुरुषाधिपम् । पुत्रं चाद्भुतकर्माणं प्राप्ता श्लाघ्यासुधारिणाम्[3] ॥१८८॥
तथा कुरु यथा भूयो लप्स्यसे सुखमात्मनः । मद्वाक्यादवटे[4] भव्ये ! मा पप्त सति भास्करे ॥१८९॥
अभविष्यत्तवावासो[5] नरके घोरवेदने । अहं नाबोधयिष्यं चेत्प्रमादोऽयमहो महान् ॥१९०॥
इत्युक्ता सा परित्रस्ता दुःखतो नरकोद्भवात् । प्रत्ययादिति शुद्धात्मा सम्यग्दर्शनमुत्तमम् ॥१९१॥
अगृह्णाद् गृहिधर्मं च शक्तेश्च सदृशं तपः । जन्मान्यदिव मेने च साम्प्रतं धर्मसंगमात् ॥१९२॥
प्रतिमां च प्रवेश्यैनां[6] पूर्वदेशे व्यतिष्ठपत् । आनर्च च विचित्राभिः सुमनोभिः सुगन्धिभिः ॥१९३॥
कृतार्थं मन्यमाना स्वं तस्या धर्मनियोजनात् । जगाम स्वोचितं स्थानं संयमश्रीः[7] प्रमोदिनी ॥१९४॥
कनकोदर्यपि श्रेयः समुपार्ज्य गृहे रता[8] । कृत्वा कालं दिवं गत्वा भुक्त्वा भोगं महागुणम् ॥१९५॥
च्युत्वा महेन्द्रराजस्य महेन्द्रपुटभेदने । मनोवेगासमाख्यायामञ्जनेति सुताभवत् ॥१९६॥
सेयं पुण्यावशेषेण कृतेन जनमान्तरे । जातेहाढ्यकुले शुद्धे प्राप्ता च वरमुत्तमम् ॥१९७॥
प्रतिमां च जिनेन्द्रस्य त्रिकालार्च्यस्य यद्बहिः । अकार्षीत्समयं कंचित्तेनातो दुःखमागतम् ॥१९८॥
विद्युत्प्रभगुणस्तोत्रं क्रियमाणं पुरस्तव । मिश्रकेश्या स्वनिन्दां च समित्र पवनञ्जय[9] ॥१९९॥

सेवासे अपना शीत-जन्य दुःख दूर कर लेता है और भोजन तथा शीतल जलका सेवनकर भूख-प्यासकी पीड़ासे छुट्टी पा जाता है यह स्वाभाविक बात है उसी प्रकार जिनेन्द्र भगवान्‌की पूजा करनेसे प्राणियोंको सुख उत्पन्न होता है और उनका तिरस्कार करनेसे परम दुःख प्राप्त होता है यह भी स्वाभाविक बात है ॥१८५-१८६॥ यह निश्चित जानो कि संसारमें जो भी दुःख दिखाई देता है वह पापसे उत्पन्न हुआ है और जो भी सुख दृष्टिगोचर है वह पूर्वोपार्जित पुण्य कर्मसे उपलब्ध है ॥१८७॥ तूने जो यह वैभव, राजा पति और आश्चर्यजनक कार्य करनेवाला पुत्र पाया है सो पुण्यके द्वारा ही पाया है। तू प्राणियोंमें प्रशंसनीय है ॥१८८॥ इसलिए ऐसा कार्य कर जिससे फिर भी तुझे सुख प्राप्त हो। हे भव्ये ! तू मेरे कहनेसे सूर्यके रहते हुए गड्ढेमें मत गिर ॥१८९॥ इस पापके कारण घोर वेदनासे युक्त नरकमें तेरा निवास हो और मैं तुझे संबोधित न करूँ यह मेरा बड़ा प्रमाद कहलावेगा ॥१९०॥

आर्यिकाके ऐसा कहनेपर कनकोदरी नरकोंमें उत्पन्न होनेवाले दुःखसे भयभीत हो गई। उसने उसी समय शुद्ध हृदयसे उत्तम सम्यग्दर्शन धारण किया ॥१९१॥ गृहस्थका धर्म और शक्ति अनुसार तप भी उसने स्वीकृत किया। उसे ऐसा लगने लगा मानो धर्मका समागम होनेसे मैंने दूसरा ही जन्म पाया हो ॥१९२॥ अर्हन्त भगवान्‌की प्रतिमाको उसने पूर्व स्थानपर विराजमान कराया और नाना प्रकारके सुगन्धित फूलोंसे उसकी पूजा की ॥१९३॥ कनकोदरीको धर्ममें लगाकर अपने आपको कृतकृत्य मानती हुई संयमश्री आर्यिका हर्षित हो अपने योग्य स्थानपर चली गई ॥१९४॥ धरमें अनुराग रखनेवाली कनकोदरी भी पुण्योपार्जनकर आयुके अन्तमें स्वर्ग गई और वहाँ उत्तमोत्तम भोग भोगकर वहाँसे च्युत हो महेन्द्र नगरमें राजा महेन्द्रकी मनोवेगा नामा रानीसे यह अञ्जना नामक पुत्री हुई है ॥१९५-१९६॥ इसने जन्मान्तरमें जो पुण्य किया था उसके अवशिष्ट अंशसे यह यहाँ सम्पन्न एवं विशुद्ध कुलमें उत्पन्न हुई है तथा उत्तम वरको प्राप्त हुई है ॥१९७॥ इसने त्रिकालमें पूजनीय जिनेन्द्र भगवान्‌की प्रतिमाको कुछ समय तक घरसे बाहर किया था उसीसे इसे यह दुःख प्राप्त हुआ है ॥१९८॥ विवाहके पूर्व जब इसके आगे मिश्रकेशी विद्युत्प्रभके गुणोंकी प्रशंसा और पवनञ्जयकी निन्दा कर रही थी तब पवनञ्जय

१. जानातु । २. भर्तारं म० । ३. श्लाघ्या सुधारिणम् म० । ४. गर्ते । ५. अभविष्यं म० । ६. प्रविश्येना म० । ७. एतन्नाम्नी आर्यिका । ८. रताः म० । ९. श्रुत्वा म० ।

श्रुत्वा गवाक्षजालेन त्रियामाया तिरोहित । द्वेषमस्यै परिप्राप्तो वैधुर्यमकरोत् पुर ॥२००॥
युद्धाय प्रस्थितो दृष्ट्वा सोऽन्यदा चक्रवाकिकाम् । विरहाद्दीपिता रम्ये मानसे सरसि द्रुतम् ॥२०१॥
सख्येव कृपया नीत समये ता मनोहराम् । गतश्च गर्भमादाय कर्तुं जनकशासनम् ॥२०२॥
[1]इत्युक्त्वा पुनरूचेऽसावञ्जना मुनिपुङ्गव । महाकारुण्यसम्पन्न. क्षरन्निव गिरामृतम् ॥२०३॥
[2]सा त्व कर्मानुभावेन बाले दु खमिद श्रिता । ततो भूयोऽपि मा कार्षीरीदृश कर्म निन्दितम् ॥२०४॥
यानि यानि च सौख्यानि जायन्ते चात्र भूतले । तानि तानि हि सर्वाणि जिनभक्ते विशेषत ॥२०५॥
भक्ता भव जिनेन्द्राणा ससारोत्तारकारिणाम् । गृहाण नियम शक्त्या[3] कुरु श्रमणपूजनम् ॥२०६॥
दिष्ट्या बोधि प्रपन्नासि तदा दत्ता तदार्यया । उदहार्षीत् करालम्बात् सा त्वा[4] यान्तीमधोगतिम् ॥२०७॥
अय च ते महाभाग्य. कुक्षि गर्भ. समाश्रित । पुरा [5]निर्लोठते सम्यग्बहुकल्याणभाजनम् ॥२०८॥
परमां भूतिमेतस्मात् सुतात् प्राप्स्यसि शोभने । अखण्डनीयवीर्योऽय गीर्वाणै सकलैरपि ॥२०९॥
अल्पैरेव च तेऽहोभि प्रियसङ्गो भविष्यति । ततो भव सुखस्वान्ता [6]प्रमादरहिता शुभे ॥२१०॥
इत्युक्ताभ्यां ततस्ताभ्या तुष्टाभ्या मुनिसत्तम । प्रणतो विकसन्नेत्रराजीवाभ्या पुन पुन ॥२११॥
सोऽपि दत्त्वाशिष ताभ्या समुत्पत्य नभस्तलम् । सयमस्योचित देश जगामामलमानस ॥२१२॥
पर्यङ्कासनयोगेन यस्मात्तस्या स सन्मुनि· । तस्थौ जगाम पर्यङ्कगुहाख्या सा ततो भुवि ॥२१३॥
इत्थ निजभवान् श्रुत्वाभवद् विस्मितमानसा । निन्दन्ती दुष्कृत कर्म पूर्वं यदधम कृतम् ॥२१४॥

अपने मित्रके साथ रात्रिके समय झरोखेसे छिपा खड़ा था सो यह सब सुनकर इससे रोषको प्राप्त हो गया और उस रोषके कारण ही उसने पहले इसे दु ख उपजाया है ॥१९९–२००॥ जब वह युद्धके लिए गया तो अत्यन्त मनोहर मानसरोवरपर ठहरा । वहाँ विरहसे छटपटाती हुई चकवीको देखकर अञ्जनापर दयालु हो गया ॥२०१॥ उसके हृदयमे जो दया उत्पन्न हुई थी वह सखीके समान उसे शीघ्र ही समयपर इस सुन्दरीके पास ले आई और वह गर्भाधान कराकर पिताकी आज्ञा पूर्ण करनेके लिए चला गया ॥२०२॥ महादयालु मुनिराज इतना कहकर वाणीसे अमृत झराते हुएके समान अञ्जनासे फिर कहने लगे कि हे बेटी ! कर्मके प्रभावसे ही तूने यह दु'ख पाया है इसलिए फिर कभी ऐसा निन्द्य कार्य नही करना ॥२०३–२०४॥ इस पृथ्वी तलपर जो-जो सुख उत्पन्न होते है वे सब विशेषकर जिनेन्द्र देवकी भक्तिसे ही उत्पन्न होते हैं ॥२०५॥ इसलिए तू ससारसे पार करनेवाले जिनेन्द्र देवकी भक्त हो, शक्तिके अनुसार नियम ग्रहण कर और मुनियोकी पूजा कर ॥२०६॥ भाग्यसे तू उस समय सयमश्री आर्याके द्वारा प्रदत्त बोधिको प्राप्त हुई थी । आर्याने तुझे बोधि क्या दी थी मानो अधोगतिमे जाती हुई तुझे हाथका सहारा देकर ऊपर खींच लिया था ॥२०७॥ यह महाभाग्यशाली गर्भ तेरे उदरमे आया है सो आगे चलकर अनेक उत्तमोत्तम कल्याणोका पात्र होगा ॥२०८॥ हे शोभने ! तू इस पुत्रसे परम विभूतिको प्राप्त होगी । सब देव मिलकर भी इसका पराक्रम खण्डित नही कर सकेंगे ॥२०९॥ थोड़े ही दिनोमे तुम्हारा पतिके साथ समागम होगा । इसलिए हे शुभे ! चित्तको सुखी रखो और प्रमादरहित होओ ॥२१०॥ मुनिराजके ऐसा कहनेपर जो अत्यन्त हर्षित हो रही थी तथा जिनके नेत्रकमल खिल रहे थे ऐसी दोनो सखियोंने मुनिराजको बार-बार प्रणाम किया ॥२११॥ तदनन्तर निर्मल हृदयके धारक मुनिराज उन दोनोके लिए आशीर्वाद देकर आकाश-मार्गसे सयमके योग्य स्थानपर चले गये ॥२१२॥ वे उत्तम मुनिराज उस गुहामे पर्यङ्कासनसे विराजमान थे । इसलिए आगे चलकर वह गुहा पृथिवीमे 'पर्यङ्क गुहा' इस नामको प्राप्त हो गई ॥२१३॥ इस प्रकार राजा महेन्द्रकी पुत्री अञ्जना अपने भवान्तर सुन आश्चर्यसे चकित हो गई । उसने पूर्वभवमे जो निन्द्य

१. इत्युक्ता म० । २. स त्वं म० । ३. भक्त्या म० । ४. त्वा क० । ५. निर्लोठिते म० । ६. प्रमोदरहिता ब० ।

महेन्द्रदुहिता तस्या सूतिकालव्यपेक्षया । तस्थौ मगधराजेन्द्रपूतायां मुनिसङ्गमात् ॥२१५॥
वसन्तमालया तस्या विद्याबलसमृद्धया । पानाशनविधिश्चक्रे मनसा विषयीकृतः ॥२१६॥
अथ प्रियविमुक्तां ता कारुण्येनेव भूयसा । असमर्थो रविर्द्रष्टुमस्तमैच्छन्निषेवितुम् ॥२१७॥
तद्दु.खादिव मन्दत्व भास्करस्य करा ययु । चित्रकर्मार्पितादित्यकरोत्करकृतोपमा ॥२१८॥
शोकादिव रवेर्बिम्ब सहसा पातमागतम् । गिरिवृक्षाग्रसंसक्त करजाल समाहरन् ॥२१९॥
अथागन्तुकसिंहस्य दृष्ट्येव क्रोधताम्रया । सध्यया पिहित सर्वं क्षणेन नभसस्तलम् ॥२२०॥
ततो भाव्युपसर्गेण प्रेरितेव त्वरावती । उदियाय तमोलेखा वेतालीव रसातलात् ॥२२१॥
कृतकोलाहला पूर्वं दृष्ट्वा तामिव भीतितः । नि शब्दा गहने तस्थुर्वृक्षाग्रेषु पतत्रिण ॥२२२॥
प्रावर्तन्त शिवारावा महानिर्घातभीषणा । वादिता उपसर्गेण प्रकटा पटहा इव ॥२२३॥
अथ धूतेभकीलालशोणकेसरसचय । मृत्युपत्राङ्गुलिच्छाया भृकुटि कुटिला दधत् ॥२२४॥
विमुञ्चन्विषमच्छेदान्नादान् सप्रतिशब्दकान् । वेगिन. सकल व्योम कुर्वाण इव खण्डश. ॥२२५॥
प्रलयज्वलनज्वालाविलासाञ्चलयन्मुहु' । महास्यगह्वरे जिह्वा प्रह्वां भूरिजनक्षये ॥२२६॥

कार्य किया था उसकी वह बार-बार निन्दा करती रहती थी ॥२१४॥ गौतम स्वामी राजा श्रेणिकसे कहते है कि हे राजन्! मुनिराजके सगमसे जो अत्यन्त पवित्र हो चुकी थी ऐसी उस गुफामे अञ्जना प्रसव-कालकी प्रतीक्षा करती हुई रहने लगी ॥२१५॥ विद्या-बलसे समृद्ध वसन्तमाला उसकी इच्छानुसार आहार-पानकी विधि मिलाती रहती थी ॥२१६॥

अथानन्तर सूर्य अस्ताचलके सेवनकी इच्छा करने लगा अर्थात् अस्त होनेके सम्मुख हुआ। सो ऐसा जान पडता था मानो अत्यधिक करुणाके कारण भर्तारसे वियुक्त अञ्जनाको देखनेके लिए असमर्थ हो गया हो ॥२१७॥ सूर्यकी किरणे भी चित्रलिखित सूर्यकी किरणोके समान मन्दपनेको प्राप्त हो गई थीं सो ऐसा जान पड़ता था मानो अञ्जनाका दु'ख देखकर ही मन्द पड़ गई हो ॥२१८॥ पर्वत और वृक्षोके अग्रभागपर स्थित किरणोके समूहको समेटता हुआ सूर्यका बिम्ब सहसा पतनको प्राप्त हो गया सो ऐसा जान पड़ता था मानो अञ्जनाके शोकके कारण ही पतनको प्राप्त हुआ हो ॥२१९॥ तदनन्तर आगे आनेवाले सिहकी कुपित दृष्टिके समान लालवर्णकी संध्यासे समस्त आकाश क्षण भरमे व्याप्त हो गया ॥२२०॥ तत्पश्चात् भावी उपसर्गसे प्रेरित होकर ही मानो शीघ्रता करनेवाली अन्धकारकी रेखा उत्पन्न हो गई। वह अन्धकारकी रेखा ऐसी जान पड़ती थी मानो पातालसे वेताली ही निकल रही हो ॥२२१॥ उस वनमे पक्षी पहले तो कोलाहल कर रहे थे पर उन्होने जब अन्धकारकी रेखा देखी तो मानो उसके भयसे ही नि.शब्द होकर वृक्षोके अग्रभागपर बैठ रहे ॥२२२॥ महावज्रपातके समान भयङ्कर शृगालोंके शब्द होने लगे सो ऐसा जान पड़ता था मानो आनेवाले उपसर्गने अपने नगाड़े ही बजाना शुरू कर दिया हो ॥२२३॥

अथानन्तर वहाँ क्षण भरमे एक ऐसा विकराल सिंह प्रकट हुआ जो हाथियोके रुधिरसे लाल-लाल दिखनेवाले जटाओके समूहको बार-बार हिला रहा था, मृत्युके द्वारा भेजे हुए पत्रपर पड़ी अङ्गुलीकी रेखाके समान कुटिल भौंहको धारण कर रहा था। बीच-बीचमें प्रतिध्वनिसे युक्त वेगशाली भयङ्कर शब्द छोड़ रहा था और उससे ऐसा जान पड़ता था मानो समस्त आकाशके खण्ड-खण्ड ही कर रहा हो। जो प्रलयकालीन अग्निकी ज्वालाके समान चञ्चल एवं अनेक प्राणियोंका क्षय करनेमे निपुण जिह्वाको मुखरूपी महागर्तमे बार-बार चला रहा था। जो जीवको

१. कृतोपमात् ख०, क०, म० । २. समाहरत् ख०, ब० । ३. आच्छादितम् । विहित म० । ४. शीघ्रतोपेता । ५. शृगालीशब्दाः ।

जीवाकर्षां कुशाकारा दंष्ट्रा तीक्ष्णाग्रसकटाम् । कुटिला धारयन् रौद्रां मृत्योरपि भयङ्कराम् ॥२२७॥
उद्यत्प्रलयतीव्रांशुमण्डलप्रतिमे वहन् । छुरयन्ती दिशा चक्र नेत्रे वित्रासकारिणी ॥२२८॥
मस्तकन्यस्तपुच्छाग्रो नखकोटिक्षतक्षिति[1] । अष्टापदतटोरस्को जघन घनमुद्वहन् ॥२२९॥
मृत्युर्दैत्य[2] कृतान्तो नु प्रेतेशो नु कलि. क्षय. । अन्तकस्यान्तको नु स्याद्भास्करो नु तनूनपात् ॥२३०॥
इति[3] सजनिताशङ्कं जन्तुभिर्वीक्षितोऽखिलै । आविर्बभूव तद्देशे केसरी विकट क्षणात् ॥२३१॥
तस्य प्रतिनिनादेन पूरतोदारकन्दरा. । भीता इवातिगम्भीर[4] रुरुदुर्धरणीधरा ॥२३२॥
मुद्गरेणेव घोरेण शब्देनास्य तरस्विना । श्रोत्रयोस्ताडिताश्चक्रुरिति चेष्टा शरीरिण. ॥२३३॥
लोचने मुकुलीकुर्वन्नभिदुर्गे महीभृति । शार्दूलो दर्पनिर्मुक्त. सञ्चुकोप सवेपथु ॥२३४॥
शरपुष्पसमाकारहृष्टरोमाञ्चसभ्रम[5] । बभ्रूतरलगुञ्जाक्षो[6] विवेश विविर गिरे ॥२३५॥
सारङ्गामुखविभ्रसिदूर्वाकोमलपल्लवा । यथापूर्वक्षयास्तस्थुर्भयस्तम्भितविग्रहाः ॥२३६॥
सम्भ्रान्तबभ्रुनेत्राणामुत्कर्णानां विचेतसाम् । [7]दानौघा निश्चलाङ्गाना मातङ्गानां विचिच्छिदु[8] ॥२३७॥
मण्डलस्यान्तरे कृत्वा शावकान् भयवेपितान् । तस्थु पशवङ्गना सङ्घा[9] यूथपन्यस्तलोचना. ॥२३८॥
केसरिध्वनिवित्रस्ता कम्पमानशरीरिका । वपुराहारयोस्त्याग चक्रे सालम्बमञ्जना ॥२३९॥

---

खीचनेवाली कुशाके समान तीक्ष्ण, नुकीली, सघन, कुटिल, रौद्र और मृत्युको भी भय उत्पन्न करनेवाली डाढको धारण कर रहा था । जो उदित होते हुए प्रलयकालीन सूर्य-बिम्बके समान लाल वर्ण एव दिशाओको व्याप्त करनेवाले भयङ्कर नेत्रोंसे युक्त था । जिसकी पूँछका अग्रभाग मस्तकपर रक्खा हुआ था, जो अपने नखाग्रसे पृथ्वीको खोद रहा था, जिसका वक्ष स्थल कैलाशके तटके समान चौड़ा था, जो स्थूल नितम्ब-मण्डलको धारण कर रहा था । और जिसे सब प्राणी ऐसी आशंका करते हुए देखते थे कि क्या यह साक्षात् मृत्यु है ? अथवा दैत्य है अथवा कृतान्त है, अथवा प्रेतराज है, अथवा कलिकाल है अथवा प्रलय है ? अथवा अन्तक ( यमराज ) का भी अन्त करनेवाला है ? अथवा सूर्य है ? अथवा अग्नि है ? ॥२२४–२३१॥ उसकी गर्जनाकी प्रतिध्वनिसे जिनकी बड़ी-बड़ी गुफाएँ भर गई थी ऐसे पर्वत, ऐसे जान पड़ते थे मानो भयभीत हो अत्यन्त गम्भीर रुदन ही कर रहे हो ॥२३२॥ उसके मुद्गरके समान भयकर वेगशाली शब्दसे कानोमे ताड़ित हुए प्राणी नाना प्रकारकी चेष्टाएँ करने लगते थे ॥२३३॥ जो सामने खड़े हुए दुर्गम पहाड़पर अपने दोनो नेत्र लगाये हुए था तथा अत्यन्त अहंकारसे युक्त था ऐसे उस सिहने अगड़ाई लेते हुए बहुत ही कोप प्रकट किया ॥२३४॥ जिसके शरीरमे तृण-पुष्पके समान रोमाञ्च निकल रहे थे तथा जिसके नेत्र गुमचीके समान लाल-पीले एवं चंचल थे ऐसे सिहने पर्वतकी गुफामे प्रवेश किया ॥२३५॥ उसे देख जिनके मुखसे दूर्वा और कोमल पल्लवोके ग्रास नीचे गिर गये थे तथा भयसे जिनका शरीर अकड़ गया था ऐसे हरिण ज्यो-के-त्यो खड़े रह गये ॥२३६॥ जिनके पीले-पीले नेत्र घूम रहे थे, कान खड़े हो गये थे, मनकी गति बन्द हो गई थी और शरीर निश्चल हो गया था ऐसे हाथियोके मदके प्रवाह रुक गये ॥२३७॥ हरिणी आदि पशु-स्त्रियोके जो समूह थे वे भयसे काँपते हुए बच्चोको घेरेके भीतर कर खड़े हो गये । उन सबके नेत्र अपने झुण्डके मुखिया पर लगे हुए थे ॥२३८॥ जो सिंहकी गर्जनासे भयभीत हो रही थी तथा जिसका शरीर काँप रहा था ऐसी अञ्जनाने 'यदि उपसर्गसे जीती बचूँगी तो शरीर और आहार ग्रहण करूँगी अन्यथा नही' इस आलम्बनके साथ शरीर और आहारका त्याग कर

---

१. क्षतिः म० । २. दैत्यकृतोऽनुस्यात्प्रेतसोऽनु ( ? ) म० । ३ इतीरा जनिता म० । ४. रुरुधु. म० । ५. शरत्पुष्प समाकारो म० । ६. बभ्रूस्तरल म० । ७. दानौघनिश्चला- म० । ८. पुरुखगासधा म० । ९. यूथविन्यस्त -ज० ।

उत्पत्य त्वरिता व्योम्नि सख्यस्यास्तद्ग्रहाक्षमा । बभ्राम पत्त्रिणीवाल मण्डलेनाकुलात्मिका ॥२४०॥
भूय समीपमाकाशमेति प्रेमगुणाहृता । पुनश्च तीव्रवित्रासात् प्रयाति नभस शिर ॥२४१॥
अथ ते सभये दृष्ट्वा विशीर्णहृदये शुभे । गन्धर्वस्तद्गुहावासी कारुण्याश्लेषमीयिवान् ॥२४२॥
तमूचे मणिचूलाख्य रत्नचूला निजाङ्गना । कारुण्येनोरुणा साध्वी चोदिता द्रुतभाषिणी ॥२४३॥
पश्य पश्य प्रिय ! त्रस्ता ता मृगेन्द्रादिह स्त्रियम् । एतत्प्रति समादिष्टां द्वितीया च नभोऽङ्गणे ॥२४४॥
कुरु नाथ प्रसाद मे रक्षैतामतिविह्वलाम् । अभिजातां वरा नारी कुतोऽपि विषमश्रिताम् ॥२४५॥
एवमुक्तोऽथ गन्धर्वो विकृत्य शरभाकृतिम् । त्रैलोक्यभीषणद्रव्यसभारेणेव निर्मिताम् ॥२४६॥
हस्तत्रितयमात्रस्थामञ्जनामसमागतम् । सिंह पुरोऽकरोद्देहछन्नसानुकदम्बक ॥२४७॥
तयोस्तत्राभवद्भीम सघट्टो रवपकुल । विद्युद्द्योतितप्रावृड्घनसङ्घ हसन्निव ॥२४८॥
एवविधेऽपि सप्राप्ते काले वीरभयावहे । अञ्जनासुन्दरी चक्रे हृदये जिनपुङ्गवान् ॥२४९॥
इत्थ वसन्तमाला च मण्डलेन कृतभ्रमा । विललाप महादु खा कुररीव नभस्तले ॥२५०॥
हा भर्तृदारिके पूर्व दौर्भाग्यमसि सगता । तस्मिन्नपि गते कृच्छ्राद् वर्जिता सर्वबन्धुभि ॥२५१॥
सप्राप्तासि वन भीम कथमप्यागतां गुहाम् । मुनिनाश्वासितासन्नप्रियावाप्तिनिवेदनात् ॥२५२॥

दिया ॥२३९॥ इसकी सखी वसन्तमाला इसे उठानेमे समर्थ नहीं थी इसलिए शीघ्रतासे आकाशमे उडकर पत्त्रिणीकी तरह व्याकुल होती हुई मण्डलाकार भ्रमण कर रही थी—चक्कर लगा रही थी ॥२४०॥ वह अञ्जनाके प्रेम और गुणोसे आकर्षित होकर बार-बार उसके पास आती थी पर तीव्र भयके कारण पुन आकाशमे ऊपर चली जाती थी ॥२४१॥

अथानन्तर जिनके हृदय विशीर्ण हो रहे थे ऐसी उन दोनो स्त्रियोको भयभीत देख उस गुफामे रहनेवाला गन्धर्व दयाके आलिङ्गनको प्राप्त हुआ अर्थात् उसे दया उत्पन्न हुई ॥२४२॥ उस गन्धर्वकी स्त्रीका नाम रत्नचूला था। सो बहुत भारी दयासे प्रेरित एवं शीघ्रतासे भाषण करनेवाली उस साध्वी रत्नचूलाने अपने पति मणिचूल नामा गन्धर्वसे कहा ॥२४३॥ कि हे प्रिय ! देखो देखो, सिहसे भयभीत हुई एक स्त्री यहीं स्थित है और उससे सम्बन्ध रखनेवाली दूसरी स्त्री आकाशाङ्गणमे चक्कर काट रही है ॥२४४॥ हे नाथ ! मेरे ऊपर प्रसाद करो और इस अत्यन्त विह्वल स्त्रीकी रक्षा करो। यह कुलवती उत्तम नारी किसी कारण इस विषम स्थानमे आ पड़ी है ॥२४५॥ इस प्रकार कहनेपर गन्धर्व देवने विक्रियासे अष्टापदका रूप बनाया। उसका वह रूप ऐसा जान पडता था मानो तीनों लोकोमे जितने भयंकर पदार्थ है उन सबको इकट्ठाकर ही उसकी रचना की गई हो ॥२४६॥ अञ्जना और सिहके बीचमे सिर्फ तीन हाथका अन्तर रह गया था कि इतनेमे ही अपने शरीरसे शिखरोके समूहको आच्छादित करनेवाला अष्टापद सिहके सामने आकर खड़ा हो गया ॥२४७॥ तदनन्तर वहाँ सिह और अष्टापदके बीच भयंकर युद्ध हुआ। उनका वह युद्ध भयकर गर्जनासे युक्त था और बिजलीसे प्रकाशित वर्षाकालिक मेघोंके समूहको मानो हँसी ही उड़ा रहा था ॥२४८॥ इस प्रकार वहाँ शूरवीर मनुष्योको भी भय उत्पन्न करनेवाला समय यद्यपि आया था तो भी अञ्जना निर्भय रहकर हृदयमे जिनेन्द्र देवका ध्यान करती रही ॥२४९॥ आकाशमे मण्डलाकार भ्रमण करती तथा महा दु:खसे भरी वसन्तमाला कुररीकी तरह इस प्रकार विलाप कर रही थी ॥२५०॥ हाय राजपुत्रि ! तुम पहले दौर्भाग्यको प्राप्त रही फिर जिस-किसी तरह कष्टसे दौर्भाग्य समाप्त हुआ तो समस्त बन्धुजनोंने तुम्हारा त्याग कर दिया ॥२५१॥ भयंकर वनमे आकर किसी तरह इस गुफामें आई और 'निकट कालमें

१. वालमण्डलेन्न म० । २. चोदिताद्भुतभाषिणी ब० । ३. एतद्भीतिसमा- म० । ४. आपद्गताम् । विषमाश्रिताम् म० । ५. विक्रिया कृत्वा । ६. -णैव निर्मितम् म० । ७. गताम् म० । ८. सिंहरिपुरकरोद्देहं म० । ९. कुटुम्बकम् क० ।

सा त्वं केसरिणो वक्त्रमधुना देवि यास्यसि । दंष्ट्राकरालमुद्वृत्तद्विरदक्षयकारणम्[1] ॥२५३॥
हा देवि ते गतः कालो दुर्जनस्य विधेर्वशात् । उपर्युपरि दुःखेन मम दुर्मतिकारणात्[2] ॥२५४॥
परित्रायस्व हा नाथ ! पवनञ्जय ! गेहिनीम् । हा महेन्द्र ! कथं नेमां तनयां परिरक्षसि ॥२५५॥
हा किं केतुमति क्रूरे मुधास्या[3] त्वयका कृतम् । हा करुणे मनोवेगे तनयां किं न रक्षसि ॥२५६॥
मरणं राजपुत्रीयं प्राप्नोति विजने वने । कुरुत त्राणमेतस्याः कृपया वनदेवताः ॥२५७॥
मुनेरपि तथा तस्य लोकतत्त्वावबोधिनः । शुभार्थसूचनं वाक्यं संभवेदन्यथा किमु ॥२५८॥
आक्रन्दमिति कुर्वाणा दोलारूढेव विह्वला । चक्रे वसन्तमालाशु[4] स्वामिन्यन्तं गतागतम् ॥२५९॥
अथ भङ्गं[5] गतः सिंहः शरभेण तलाहतः । अन्तर्दधे कृतार्थश्च शरभो निलये निजे ॥२६०॥
ततः स्वप्नोपमं दृष्ट्वा विरतं युद्धमेतयोः । द्रुतं वसन्तमालागात् स्वेदिगात्रा पुनर्गुहाम् ॥२६१॥
अन्तः पल्लवकान्ताभ्यां हस्ताभ्यां कृतमार्गणा । क्वासि क्वासीति भीशेषात्कृतगद्गदनिस्वना ॥२६२॥
ज्ञात्वा वसन्तमाला तां स्पर्शेनात्यन्तनिश्चलाम् । तां प्रतिप्राणनाशङ्कासमाकुलितमानसा ॥२६३॥
म्रियसे देवि देवीति चालयन्ती पुनः पुनः । जगाद स्वामिनीवक्षोविन्यस्तकरपल्लवा ॥२६४॥
ततोऽसौ तत्करस्पर्शादागतस्पष्टचेतना । चिरात्सखीयमस्मीति जगादास्पष्टया गिरा ॥२६५॥
ततस्ते सङ्गमात्प्राप्य कियतीमपि निर्वृतिम् । पुनर्जन्मेव मेनाते लब्धसंभाषणोद्यते ॥२६६॥

ही पतिका समागम प्राप्त होगा' यह कहकर मुनिराजने आश्वासन दिया पर अब हे देवि ! तुम सिंहके उस मुखमें जा रही हो जो डाढोंसे भयंकर है तथा उद्दण्ड हाथियोंके क्षयका कारण है ॥२५२-२५३॥ हाय देवि ! दुष्ट विधाताके वश और मेरी दुर्बुद्धिके कारण तुम्हारा समय उत्तरोत्तर दुःखसे ही व्यतीत हुआ ॥२५४॥ हा नाथ पवनञ्जय ! अपनी गृहिणीकी रक्षा करो। हा महेन्द्र ! तुम इस पुत्रीकी रक्षा क्यों नहीं करते हो ? ॥२५५॥ हा दुष्टा केतुमति ! तूने व्यर्थ ही इसके विषयमें क्या अनर्थ किया ? हा दयावती मनोवेगे ! अपनी पुत्रीकी रक्षा क्यों नहीं कर रही हो ? ॥२५६॥ यह राजपुत्री निर्जन वनमें मरणको प्राप्त हो रही है। हे वनदेवताओ ! कृपा कर इसकी रक्षा करो ॥२५७॥ लोकके यथार्थ स्वरूपको जाननेवाले उन मुनिके शुभसूचक वचन भी क्या अन्यथा हो जावेंगे ? ॥२५८॥ इस प्रकार रुदन करती तथा झूला पर चढी हुईके समान विह्वल वसन्तमाला जल्दी-जल्दी स्वामिनीके समीप गमन तथा आगमन कर रही थी अर्थात् साहस कर समीप आती थी फिर भयकी तीव्रतासे दूर हट जाती थी ॥२५९॥

अथानन्तर अष्टापदकी चपेटसे आहत होकर सिंह नष्ट हो गया और कृतकृत्य होकर अष्टापद अपने स्थानमें अन्तर्हित हो गया ॥२६०॥ तदनन्तर स्वप्नके समान दोनोंका युद्ध समाप्त हुआ देख पसीनासे लथ-पथ वसन्तमाला शीघ्र ही गुहामें आई ॥२६१॥ गुहाके भीतर पल्लवके समान कोमल हाथोंसे अञ्जनाको खोजती हुई वसन्तमाला कह रही थी कि कहाँ हो ? कहाँ हो ? उस समय भी उसका पूरा भय नष्ट नहीं हुआ था इसलिए आवाज गद्गद निकल रही थी ॥२६२॥ वसन्तमालाने हाथके स्पर्शसे जाना कि यह बिलकुल निश्चल पड़ी हुई है। इसलिए उसका मन 'यह जीवित है या नहीं' इस आशङ्कासे व्याकुल हो उठा ॥२६३॥ वह उसके वक्षःस्थल पर हाथ रखकर बार-बार उकसाती हुई कह रही थी कि हे देवि ! देवि ! जिन्दा हो ? ॥२६४॥ तदनन्तर वसन्तमालाके हाथके स्पर्शसे जब अञ्जनाको चेतना आई और कुछ देर बाद उसने समझ लिया कि यह सखी है तब अस्पष्ट वाणीमें उसने कहा कि 'मैं हूँ' ॥२६५॥ तत्पश्चात् वे दोनों सखियाँ परस्पर मिलकर अनिर्वचनीय सुखको प्राप्त हुईं और अवसरके अनुसार वार्त्तालाप करनेमें उद्यत

१. कारिणम् ख० । २. दुर्गतिकारणात् म० । ३. मुद्धास्या त्वयि का कृता म० । ४ माला तु म० ।
५. भङ्गगतः म०, ख० ।

भयशेषेण चार्भीला मुग्धे ता जग्मतुर्निशाम् । समासमा कृताशेषबन्धुनैष्ठुर्यसंकथे ॥२६७॥
ततो विध्वस्य नागारि[1] नागारिरिव[2] पन्नगम् । प्रमोदवानसौ मद्य पीतवान् सुमहागुणम्[3] ॥२६८॥
गन्धर्वकान्तयावाचि गन्धर्वो लब्धवर्णया । तदूरौ बाहुमाधाय[4] तरत्तारकनेत्रया ॥२६९॥
स्थानक[5] यच्छ मे नाथ [6]जिगासाम्यधुनोचितम् । उपदेशो[7] हि गातव्य कादम्बर्यामनुत्तमम् ॥२७०॥
शेष साध्वसमेते च वनिते परिमुञ्चत । श्रुत्वा नौ मधुर गीत देवीय हृदयगमम् ॥२७१॥
अर्धरात्रे ततस्तस्मिन्नन्यशब्दविवर्जिते । संस्कृत्यावीवदद्वीणा गन्धर्व श्रोत्रहारिणीम् ॥२७२॥
कांसिके वादयन्ती च प्रियवक्त्राहितेक्षणा । रत्नचूला जगौ मन्द मुनिक्षोभणकारणम् ॥२७३॥
तयोर्घन कृत वाद्य सुषिर च कृत ततम् । परिवर्गेण गम्भीरकरतलक्रमोचितम् ॥२७४॥
पाणिघैरेकतानेन मन्द्रध्वनिसमन्वितम् । तथा वैणविकैर्वाद प्रवीणैर्भ्रूविलासिभि[8] ॥२७५॥
प्रवीणाभ प्रवालाभा वीणा चारूपमानिकाम् । कोणेनाताडयद्यक्षो गन्धर्व काकलीबुध ॥२७६॥
मध्यमर्षभगान्धारषड्जपञ्चमधैवतान् । निषादसप्तमांश्चक्रे स स्वरान्क्रममत्यजन् ॥२७७॥
भेजे वृत्तीर्यथास्थान द्रुतमध्यविलम्बिता । एकविंशतिसंख्याश्च मूर्च्छना नर्तितेक्षणा ॥२७८॥
हाहाहूहूसमान स गान चक्रेऽथवाधिकम् । प्रायो गन्धर्वदेवाना प्रसिद्धिमिदमागतम् ॥२७९॥

हो ऐसा समझने लगी मानो हम लोगोंका दूसरा ही जन्म हुआ है ॥२६६॥ भय शेष रहनेसे उन भोलीभाली स्त्रियोंने उस भयावनी रात्रिको वर्षके बराबर भारी समझा। वे सारी रात जागकर समस्त बन्धुजनोंकी निष्ठुरताकी चर्चा करती रही ॥२६७॥

तदनन्तर जिस प्रकार गरुड साँपको नष्ट कर देता है उसी प्रकार गन्धर्व सिंहको नष्ट कर बडा हर्षित हुआ और हर्षित होकर उसने महागुणकारी मद्यका पान किया ॥२६८॥ जिसके नेत्र चञ्चल हो रहे थे ऐसी गन्धर्वकी विदुषी स्त्रीने उसकी जाँघ पर अपनी भुजा रख गन्धर्वसे कहा कि ॥२६९॥ हे नाथ! मुझे अवसर दीजिए मै इस समय कुछ गाना चाहती हूँ क्योंकि मद्यपानके अनन्तर उत्तम गाना गाना चाहिए ऐसा उपदेश है ॥२७०॥ साथ ही हम दोनोका मधुर दिव्य एवं हृदयहारी संगीत सुनकर ये दोनो स्त्रियाँ अवशिष्ट भयको भी छोड देगी ॥२७१॥ तदनन्तर जब अर्धरात्रि हो गई और किसी दूसरेका शब्द भी सुनाई नही पड़ने लगा तब गन्धर्वने कानोंको हरनेवाली वीणा ठीककर बजाना शुरू किया ॥२७२॥ और उसकी स्त्री रत्नचूला पतिके मुखपर नेत्र धारण कर मंजीरा बजाती हुई धीरे-धीरे गाने लगी। उसका वह गाना मुनियोंको भी क्षोभ उत्पन्न करनेका कारण था ॥२७३॥ उस समय उन दोनोंके बीच घन, वाद्य, सुषिर और तत इन चारो प्रकारके बाजोंका प्रयोग चल रहा था और परिजनके अन्य लोग गम्भीर हाथोंसे क्रमानुसार योग्य ताल दे रहे थे ॥२७४॥ तबला बजानेमे निपुण देव एकचित्त होकर गम्भीर ध्वनिके साथ तबला बजा रहे थे तो बाँसुरी बजानेमे चतुर देव भौंह चलाते हुए अच्छी तरह बाँसुरी बजा रहे थे ॥२७५॥ उत्तम आभाको धारण करनेवाला यक्ष प्रवालके समान कान्तिवाली तथा सुन्दर उपमासे युक्त वीणाको तमूरेसे बजा रहा था। तो स्वरोकी सूक्ष्मताको जाननेवाला गन्धर्व, क्रमको नहीं छोड़ता हुआ मध्यम, ऋषभ, गान्धार, षड्ज, पञ्चम, धैवत और निषाद इन सात स्वरोंको निकाल रहा था ॥२७६–२७७॥ गाते समय वह गन्धर्व द्रुता, मध्या और विलम्बिता इन तीन वृत्तियोंका यथास्थान प्रयोग करता था और जिनसे नेत्र नाच उठते है, ऐसी इक्कीस मूर्च्छनाओं का भी यथावसर उपयोग करता था ॥२७८॥ वह देवोंके गवैया जो हाहा हूहू हैं उनके समान अथवा उनसे भी अधिक उत्तम गान गा रहा था और प्राय.कर गन्धर्व देवोंमे यही गान

---

१. सिंहम् । २. गरुड इव । ३. सद्य. प्रीतवान् सुमहागुणम् । ४. -मादाय म० । ५. स्वनक म० । ६ जिगासाम्य म० । ७. उपदशा ब०, ज० । उपदशो ख० । ८ विलासिनः म० ।

स्वनान्येकोनपञ्चाशत्स[1] जगौ परिनिष्ठितम् । जिनेन्द्रगुणसबद्धैर्वचनैर्ललिताक्षरै ॥२८०॥

विद्युन्मालावृत्तम्

[2]देवादेवैर्भक्तिप्रह्वै पुष्पैरर्घैर्नानागन्धै । अर्चामुच्चैर्नीत वन्द्य देव भक्त्या त्वामर्हन्तम् ॥२८१॥

आर्यागीतिच्छन्दः

त्रिभुवनकुशलमतिशय-पूत [ नित्य ] नमामि भक्त्या परया ।
मुनिसुव्रतचरणयुग सुरपतिमुकुटप्रवृत्तनखमणिकिरणम् ॥२८२॥

अनुष्टुप्

ततो वसन्तमाला तद्गेयमत्यन्तशोभनम् । प्रशशसाश्रुतपूर्वं विस्मयव्याप्तमानसा ॥२८३॥
अहो गीतमहो गीत केनाप्येतन्मनोहरम् । आर्द्रीकृतमिवानेन हृदय मे सुधामुचा ॥२८४॥
स्वामिनी च जगादैव देवि कोऽप्यनुकम्पक । देवोऽय येन नौ रक्षा कृता केसरिनोदनात् ॥२८५॥
मन्येऽस्मद्वृत्तयेऽनेन गीतमेतच्छ्[3]रुतिप्रियम् । [4]श्रुताबलाकलध्वानमन्तरे सकलाङ्गकम् ॥२८६॥
देवि शीलवती कस्य नानुकम्प्यासि शोभने । महारण्येऽपि भव्याना भवन्ति सुहृदो जना ॥२८७॥
उपसर्गस्य विध्वसादेतस्मात्ते सुनिश्चित । भविता प्रियसपर्क कि वा वक्त्यन्यथा मुनि ॥२८८॥
तस्मात्साधुमिम देव समाश्रित्य कृतोचितम् । मुनिपर्यङ्कपूताया गुहायामत्र[5] सत्त्वयात् ॥२८९॥
मुनिसुव्रतनाथस्य विन्यस्य प्रतियातनाम् । अर्चयन्त्यौ सुखप्राप्त्यै [6]स्वामोदै कुसुमैरलम् ॥२९०॥
सुखप्रसूतिमेतस्य गर्भस्याध्यायचेतसि । विस्मृत्य वैरह दु ख समय किञ्चिदास्वहे ॥२९१॥

प्रसिद्धिको प्राप्त है ॥२७९॥ वह उच्छ्वास ध्वनियोमे गा रहा था तथा उसका वह समस्त गान जिनेन्द्र भगवान्के गुणोसे सम्बन्ध रखनेवाले मनोहर अक्षरोसे युक्त वचनावलीसे निर्मित था ॥२८०॥ वह गा रहा था कि भक्तिसे नम्रीभूत सुर-असुर पुष्प, अर्घ तथा नाना प्रकारकी गन्धसे जिनकी उत्तम पूजा करते है ऐसे देवाधिदेव वन्दनीय अरहन्त भगवान्को मै भक्तिपूर्वक नमस्कार करता हूँ ॥२८१॥ उसने यह भी गाया कि मै श्री मुनिसुव्रतभगवान्के उस चरण युगलको उत्कट भक्तिसे नमस्कार करता हूँ जो त्रिभुवनकी कुशल करनेवाला है, अत्यन्त पवित्र है और इन्द्रके मुकुटका सम्बन्ध पाकर जिसके नखरूपी मणियोसे किरणे फूट पड़ती है ॥२८२॥

तदनन्तर जिसका मन आश्चर्यसे व्याप्त था ऐसी वसन्तमालाने उस अश्रुतपूर्व तथा अत्यन्त सुन्दर संगीतकी बहुत प्रशंसा की ॥२८३॥ वह कहने लगी कि वाह ! वाह ! यह मनोहर गान किसने गाया है। इस अमृतवर्षी गवैयाने तो मेरा हृदय मानो गीला ही कर दिया है ॥२८४॥ उसने स्वामिनीसे कहा कि हे देवि ! यह कोई देव है जिसने सिंह भगाकर हम लोगोकी रक्षा की है ॥२८५॥ जिसके बीचमे स्त्रीका मधुर शब्द सुनाई देता था तथा जो सगीतके समस्त अङ्गोसे सहित था ऐसा यह कर्णप्रिय गाना, जान पड़ता है इसने हम लोगोके लिए ही गाया है ॥२८६॥ हे देवि ! हे शोभने ! उत्तम शीलको धारण करनेवाली ! तू किसकी दया-पात्र नहीं है ? भव्य जीवोको महा अटवीमे भी मित्र मिल जाते है ॥२८७॥ इस उपसर्गके दूर होनेसे यह सुनिश्चित है कि तुम्हारा पतिके साथ समागम होगा। अथवा क्या मुनि भी अन्यथा कहते है ? ॥२८८॥ इसलिए इस उत्तम देवका यथोचित आश्रय लेकर मुनिराजकी पद्मासनसे पवित्र इस गुफामे श्री मुनिसुव्रत भगवान्की प्रतिमा विराजमान कर सुख-प्राप्तिके लिए अत्यन्त सुगन्धित फूलोसे उसकी पूजा करती हुई हम दोनो कुछ समय तक यहीं रहें। इस गर्भकी सुखसे

१. स जगौ म० । २. सुरासुरैः । ३ -च्छ्रुतप्रियम् म० । ४. कृत्वा कलकलध्वानमन्तरे म० । श्रुत्वाबलाव- ब० । ५. -मथसत्वयात् म० । ६. सुष्ठु आमोदो येषा तै. । स्वमोदैः म० ।

त्वत्सङ्गम समासाद्य प्रमोद परमागतः । नैर्झरैः शीकरैरेष हसतीव महीधर ॥२९२॥
फलभारविनम्राग्रा लसत्कोमलपल्लवाः । पुष्पहासकृतो वृक्षा इमे तोषमुपागता ॥२९३॥
मयूरसारिकाकीरकोकिलादिकलस्वनैः । कृतजल्पा इवैतस्य वनाभोगा महीभृत ॥२९४॥
नानाधातुकृतच्छायास्तरुसघातवासस । अस्मिन् गुहा विराजन्ते कुसुमामोदवासिता ॥२९५॥
जिनपूजनयोग्यानि पङ्कजानि सरस्सु हि । विद्यन्ते तव वक्त्रस्य धारयन्ति समानताम् ॥२९६॥
विधत्स्व धृतिमत्रेशे माभूश्चिन्तावशात्मिका[1] । कल्याणमत्र ते सर्वं जनयिष्यन्ति देवता ॥२९७॥
अधुना दिनवक्त्रे ते विज्ञायेवानघ वपु । कोलाहलकृतो[2] जाता प्रमोदेन पतत्रिण ॥२९८॥
पलाशाग्रस्थितानेते वृक्षा मन्दानिलेरितान् । मुञ्चन्त्यानन्दवाष्पाभानवश्यायकणान् जडान् ॥२९९॥
सप्रेष्य प्रथम सध्या दूतीमिव सरागिकाम् । उदन्त ते परिज्ञातुमेष भानु समुद्गत ॥३००॥
एवमुक्ताञ्जनावोचत्सखि मे सर्वबान्धवा । त्वमेव त्वयि सत्या च ममेद विपिन पुरम् ॥३०१॥
आपन्मध्योत्सवावस्था सेवते यस्य यो जन । स तस्य बान्धवो बन्धुरपि शत्रुरसौख्यद ॥३०२॥
इत्युक्त्वा देवदेवस्य विन्यस्य प्रतियातनाम् । पूजयन्त्यौ स्थिते तत्र ते विद्याकृतवर्तने[3] ॥३०३॥
गन्धर्वोऽप्यनयोश्चक्रे सर्वत परिरक्षणम् । आतोद्य प्रत्यह कुर्वन् कारुण्याज्जिनभक्तित ॥३०४॥

प्रसूति हो जाय चित्तमे इसी बातका ध्यान रखे और विरह-सम्बन्धी सब दु ख भूल जावे ॥२८६-२९१॥ तुम्हारा समागम पाकर परम हर्षको प्राप्त हुआ। यह पर्वत झरनोके जल-कणोके बहाने मानो हँस ही रहा है ॥२९२॥ जिनके अग्रभाग फलोके भारसे झुक रहे हैं, जिनके कोमल पल्लव लहलहा रहे है और जो पुष्पोंके बहाने हँसी प्रकट कर रहे हैं ऐसे ये वृक्ष तुम्हारे समागमसे ही मानो परम सतोषको प्राप्त हो रहे है ॥२९३॥ इस पर्वतके जङ्गली मैदान मोर, मैना, तोता तथा कोयल आदिकी मधुर ध्वनिसे ऐसे जान पडते है मानो वार्त्तालाप ही कर रहे हो ॥२९४॥ जिनमें गेरू आदि नाना धातुओकी कान्ति छाई हुई है, जिनपर वृक्षोंके समूह वस्त्रके समान आवरण किये हुए है और जो फूलोंकी सुगन्धिसे सुवासित है ऐसी इस पर्वतकी गुफाएँ स्त्रियोंके समान सुशोभित हो रही है ॥२९५॥ तालाबोंमे जिनेन्द्र देवकी पूजा करनेके योग्य जो कमल फूल रहे है वे तुम्हारे मुखकी समानता धारण करते है ॥२९६॥ हे स्वामिनि ! यहाँ धैर्य धारण करो, चिन्ताकी वशीभूत मत होओ। यहाँ देवता तुम्हारा सब प्रकारका कल्याण करेंगे ॥२९७॥ अब दिनके प्रारम्भमें पक्षी चिहक रहे हैं सो ऐसा जान पड़ता है कि तुम्हारे शरीरकी स्वस्थता जानकर हर्षसे मानो कोलाहल ही कर रहे हैं ॥२९८॥ ये वृक्ष पत्तोके अग्रभागमे स्थित तथा मन्द-मन्द वायुसे प्रेरित शीतल ओसके कणोको छोड रहे है सो ऐसे जान पड़ते है मानो हर्षके आँसू ही छोड़ रहे हो ॥२९९॥ तुम्हारा वृत्तान्त जाननेके लिए सर्व-प्रथम दूतीके समान रागवती ( लालिमासे युक्त ) सन्ध्याको भेजकर अब पीछेसे यह सूर्य स्वयं उदित हो रहा है ॥३००॥

वसन्तमालाके ऐसा कहनेपर अञ्जनाने उत्तर दिया कि हे सखि ! मेरे समस्त बान्धव तुम्हीं हो। तेरे रहते हुए मुझे यह वन नगरके समान है ॥३०१॥ जो मनुष्य जिसके आपत्तिकाल, मध्यकाल और उत्सवकाल अर्थात् सभी अवस्थाओंमें सेवा करता है वही उसका बन्धु है तथा जो दु ख देता है वह बन्धु होकर भी शत्रु है ॥३०२॥ इतना कहकर वे दोनों गुफामे देवाधिदेव मुनि सुव्रतनाथकी प्रतिमा विराजमान कर उसकी पूजा करती हुई रहने लगीं। विद्याके बलसे उनके भोजनकी व्यवस्था होती थी ॥३०३॥ जिनेन्द्र भगवान्‌की भक्तिसे प्रतिदिन सङ्गीत करता हुआ गन्धर्वदेव भी करुणा भावसे इन दोनो स्त्रियोंकी सबसे रक्षा करता था ॥३०४॥

१. माभूश्चिन्ता म० । २. किबन्तप्रयोगः । ३. विद्याकृतभोजने ।

अथान्यदाञ्जनावोचत् कुक्षिर्मे चलति सखि । आकुलेव च जातास्मि किमिदं नु भविष्यति ॥३०५॥
ततो वसन्तमालोचे समयः शोभने तव । अवश्य प्रसवस्यैष प्राप्तो भव सुखस्थिता ॥३०६॥
ततो विरचिते तल्पे तया कोमलपल्लवैः । असूत सा सुतं चार्वी प्राचीवाशा विरोचनम् ॥३०७॥
जातेन सा गुहा तेन तेजसा गात्रजन्मना । हिरण्मयीव संजाता निर्धूतध्वान्तसंचया ॥३०८॥
ततस्तमङ्कमारोप्य प्रमोदस्यापि गोचरे[1] । स्मृतोभयकुला दैन्य[2] प्राप्ता प्ररुदिताभवत् ॥३०९॥
विललाप महावत्स ! कथं ते जननोत्सवः । क्रियतां मयकैतस्मिञ्जनस्य गहने वने ॥३१०॥
स्थानेऽजनिष्यथाश्चेत्त्वं पितुर्मातामहस्य वा । अभविष्यन्महानन्दो जननोन्मत्तकारकः ॥३११॥
मुखचन्द्रमिमं दृष्ट्वा तव चारुविलोचनम् । न भवेद्विस्मयः कस्य भुवने शुभचेतसः ॥३१२॥
करोमि मन्दभाग्या किं सर्ववस्तुविवर्जिता । विधिनाहं दशामेतां प्रापिता दुःखदायिनीम् ॥३१३॥
जन्तुना सर्ववस्तुभ्यो वाञ्छ्यते दीर्घजीविता । यस्मात्त्वं जीविताात्तस्मान्मम वत्स परां स्थितिम् ॥३१४॥
ईदृशे पतितारण्ये सद्यः प्राणापनोदिनि । यज्जीवामि तवैवायमनुभावः सुकर्मणः ॥३१५॥
मुञ्चन्तीमिति तां वाचं जगादैवं हिता सखी । देवि कल्याणपूर्णा त्वं या प्राप्तासीदृशं सुतम् ॥३१६॥
चारुलक्षणपूर्णोऽयं दृश्यतेऽस्य शुभा तनुः । अत्यन्तमहतीमृद्धिं वहत्येषा मनोहरा ॥३१७॥
षट्पदैः कृतसंगीताश्चलत्कोमलपल्लवा । तव पुत्रोत्सवादेता नृत्यन्तीव लताङ्गनाः ॥३१८॥
तवास्य चानुभावेन बालस्याबालतेजसः । भविष्यत्यखिलं भद्रं मोन्मनीभूरनर्थकम् ॥३१९॥

---

अथानन्तर किसी दिन अञ्जना बोली कि हे सखि ! मेरी कूख चञ्चल हो रही है और मैं व्याकुल-सी हुई जा रही हूँ, यह क्या होगा ? ॥३०५॥ तब वसन्तमालाने कहा कि हे शोभने ! अवश्य ही तेरे प्रसवका समय आ पहुँचा है इसलिए सुखसे बैठ जाओ ॥३०६॥ तदनन्तर वसन्तमालाने कोमल पल्लवोंसे शय्या बनाई सो उसपर, जिस प्रकार पूर्वदिशा सूर्यको उत्पन्न करती है उसी प्रकार अञ्जनासुन्दरीने पुत्र उत्पन्न किया ॥३०७॥ पुत्र उत्पन्न होते ही उसके शरीर सम्बन्धी तेजसे गुफाका समस्त अन्धकार नष्ट हो गया और गुफा ऐसी हो गई मानो सुवर्णकी ही बनी हो ॥३०८॥ यद्यपि वह हर्षका समय था तो भी अञ्जना दोनों कुलोंका स्मरणकर दीनताको प्राप्त हो रही थी और इसीलिए वह पुत्रको गोदमें ले रोने लगी ॥३०९॥ वह विलाप करने लगी कि हे वत्स ! मनुष्यके लिए भय उत्पन्न करनेवाले इस सघन वनमें मैं तेरा जन्मोत्सव कैसे करूँ ? ॥३१०॥ यदि तू पिता अथवा नानाके घर उत्पन्न हुआ होता तो मनुष्योंको उन्मत्त बना देनेवाला महा-आनन्द मनाया जाता ॥३११॥ सुन्दर नेत्रोंसे सुशोभित तेरे इस मुखचन्द्रको देखकर संसारमें किस सहृदय मनुष्यको आश्चर्य उत्पन्न नहीं होगा ॥३१२॥ क्या करूँ ? मैं मन्दभागिनी सब वस्तुओंसे रहित हूँ । विधाताने मुझे यह सर्वदुःख-दायिनी अवस्था प्राप्त कराई है ३१३॥ चूँकि संसारके प्राणी सब वस्तुओंसे पहले दीर्घायुष्यकी ही इच्छा रखते हैं इसलिए हे वत्स ! मेरा आशीर्वाद है कि तू उत्कृष्ट स्थिति पर्यन्त जीवित रहे ॥३१४॥ तत्काल प्राण हरण करनेवाले ऐसे जङ्गलमें पड़ी रहकर भी जो मैं जीवित हूँ यह तुम्हारे पुण्य कर्मका ही प्रभाव है ॥३१५॥ इस प्रकार वचन बोलती हुई अञ्जनासे हितकारिणी सखीने कहा कि हे देवि ! चूँकि तुमने ऐसा पुत्र प्राप्त किया है इसलिए तुम कल्याणोंसे परिपूर्ण हो ॥३१६॥ यह पुत्र उत्तम लक्षणोंसे युक्त दिखाई देता है । इसका यह शुभ सुन्दर शरीर अत्यधिक सम्पदाको धारण कर रहा है ॥३१७॥ जिनपर भ्रमर सङ्गीत कर रहे हैं और जिनके कोमल पल्लव हिल रहे हैं ऐसी ये लताएँ तुम्हारे पुत्रके जन्मोत्सवसे मानो नृत्य ही कर रही है ॥३१८॥ उत्कट तेजको धारण करनेवाले इस बालकके प्रभावसे सब कुछ ठीक होगा । तुम व्यर्थ ही खेद-खिन्न न हो ॥३१९॥

---

१. गोचरम् म० । २ दैन्यप्राप्ता म०, ज०, क०, ख० । ३. किं मयैतस्मिन् म० ।

एव तयो· समालापे वर्तमाने नभस्तले । क्षणेनाविरभूत्तुङ्ग विमान भास्करप्रभम् ॥३२०॥
ततो वसन्तमाला त दृष्ट्वा देव्यै न्यवेदयद् । विप्रलाप ततो भूय सैवमाशङ्कयाकरोत् ॥३२१॥
कोऽप्यकारणवैरी मे [1]किमेषोऽपनयेत् सुतम् । उताहो बान्धव कश्चिन्नवेदेष समागत ॥३२२॥
विप्रलाप तत श्रुत्वा तद्विमान चिर स्थितम् । अवातरत्कृपायुक्तो विद्याभृद्वियदङ्गणात् ॥३२३॥
स्थापयित्वा गुहाद्वारि विमान स ततोऽविशत् । पत्नीभिः सहित शङ्का वहमानो महानयम् ॥३२४॥
वसन्तमालया दत्ते स्वागतेऽसौ सुमानस । उपाविशत्स्वभृत्येन प्रापिते च समासने ॥३२५॥
तत क्षणमिव स्थित्वा स भारत्या गभीरया । सारङ्गानुत्सुका[2] कुर्वन् घनगर्जितशङ्किन ॥३२६॥
ऊचे ता विनय बिभ्रत्पर स्वागतदायिनीम् । दशनज्योत्स्नया कुर्वन् बालभास विमिश्रिताम्[3] ॥३२७॥
सुमर्यादे वदेय का दुहिता कस्य वा शुभा । पत्नी वा कस्य कस्माद्वा महारण्यमिद श्रिता ॥३२८॥
घटते नाकृतेरस्या समाचारो विनिन्दित । तत कथमिम प्राप्ता विरह सर्वबन्धुभि ॥३२९॥
भवन्त्येवाथवा लोके प्रायोऽकारणवैरिण । माध्यस्थ्येऽपि निषण्णाना प्रेरिता· पूर्वकर्मभि· ॥३३०॥
ततो दु खभरोद्वेलवाष्पसरुद्धकण्ठिका । कृच्छ्रेणोवाच [4]सा मन्द भूतलन्यस्तवीक्षणा ॥३३१॥
महानुभाव वाचैव ते विशिष्ट मन· शुभम् । रोगमूलस्य हिच्छाया न स्निग्धा जायते तरो ॥३३२॥
भावप्रवेदनस्थान गुणिनस्त्वादृशा यतः । निवेदयामि ते तेन शृणु जिज्ञासित पदम् ॥३३३॥
दुख हि नाशमायाति सज्जनाय निवेदितम् । महता ननु शैलीय यदापद्गततारणम् ॥३३४॥

---

इस प्रकार उन दोनो सखियोमे वार्तालाप चल ही रहा था कि उसी क्षण आकाशमे सूर्यके समान प्रभा वाला एक ऊँचा विमान प्रकट हुआ ॥३२०॥ तदनन्तर वसन्तमालाने वह विमान देखकर अञ्जनाको दिखलाया सो अञ्जना आशङ्कासे पुन· ऐसा विप्रलाप करने लगी कि ॥३२१॥ क्या यह मेरा कोई अकारण वैरी है जो पुत्रको छीन ले जायगा ? अथवा कोई मेरा भाई ही आया है ॥३२२॥ तदनन्तर अञ्जनाका उक्त विप्रलाप सुनकर वह विमान देरतक खड़ा रहा फिर कुछ देर बाद एक दयालु विद्याधर आकाशाङ्गणसे नीचे उतरा ॥३२३॥ गुफाके द्वारपर विमान खड़ाकर वह विद्याधर भीतर घुसा । उसकी पत्नियाँ उसके साथ थीं और वह मन-ही-मन शङ्कित हो रहा था ॥३२४॥ वसन्तमालाने उसका स्वागत किया । तदनन्तर अपने सेवकके द्वारा दिये हुए सम आसनपर वह सहृदय विद्याधर बैठ गया ॥३२५॥ तत्पश्चात् क्षणभर ठहरकर अपनी गम्भीर वाणीसे मेघगर्जनाकी शङ्का करनेवाले चातकोको उत्सुक करता हुआ बड़ी विनयसे स्वागत करनेवाली वसन्तमालासे बोला । बोलते समय वह अपने दाँतोकी कान्तिसे बालककी कान्तिको मिश्रित कर रहा था ॥३२६–३२७॥ उसने कहा कि हे सुमर्यादे ! बता यह किसकी लड़की है ? किसकी शुभपत्नी है और किस कारण इस महावनमे आ पड़ी है ? ॥३२८॥ इसकी आकृतिसे निन्दित आचारका मेल नहीं घटित होता। फिर यह समस्त बन्धुजनोके साथ इस विरह को कैसे प्राप्त होगई ? ॥३२९॥ अथवा यह संसार है इसमे माध्यस्थ्यभावसे रहनेवाले लोगोके भी पूर्व कर्मोसे प्रेरित अकारण वैरी हुआ ही करते है ॥३३०॥

तदनन्तर दुःखके भारसे अत्यधिक निकलते हुए वाष्पोसे जिसका कण्ठ रुक गया था ऐसी वसन्तमाला पृथ्वीपर दृष्टि डालकर धीरे-धीरे बोली ॥३३१॥ कि हे महानुभाव ! आपके वचनसे ही आपके विशिष्ट शुभ हृदयका पता चलता है क्योंकि जो वृक्ष रोगका कारण होता है उसकी छाया स्निग्ध अथवा आनन्ददायिनी· नहीं होती है ॥३३२॥ चूँकि आप जैसे गुणी मनुष्य अभिप्राय प्रकट करनेके पात्र है अतः आपके लिए जिसे आप जानना चाहते हैं वह कहती हूँ, सुनिए ॥३३३॥ यह नीति है कि सज्जनके लिए बताया हुआ दुःख नष्ट हो जाता है क्योंकि

---

१. किमथोपनयेत्सुतम् म० । २. -नुत्सुखीकुर्वन् म० । ३. विमिश्रितम् म० । ४. सानन्दं ख०, ज०, म०, ब० ।

शृण्वेषा विष्टपव्यापियशसो विमलात्मन । सुता महेन्द्रराजस्य नामतः प्रथिताञ्जना ॥३३५॥
प्रह्लादराजपुत्रस्य गुणाकूपारचेतस । पत्नी पवनवेगस्य प्राणेभ्योऽपि गरीयसी ॥३३६॥
सोऽन्यदा स्वैरविज्ञात कृत्वास्या गर्भसंभवम् । शासनाज्जनकस्यागाद्रावणस्य सुहृद्युधे ॥३३७॥
दु स्वभावतया श्वश्र्वा तत कारुण्यमुक्तया । मूढया जा[1]नक गेह प्रेषितेय मलोज्झिता ॥३३८॥
ततो नादात्पिताप्यस्या [2]स्थान भीतेरकीर्तित । अलीकादपि हि प्रायो दोषाद्बिभ्यति सज्जना ॥३३९॥
सेयमालम्बनैर्मुक्ता सकलैः कुलबालिका । मृगीसामान्य[3]मध्यस्थान्महारण्य सम मया ॥३४०॥
एतत्कुलक्रमायाता भृ[4]त्यास्म्यस्या सुचेतस । विश्रम्भपदता नीता प्रसादपरयानया ॥३४१॥
सेयमद्य प्रसूता तु वने नानोपसर्गके । न जानामि कथ साध्वी भविष्यति सुखाश्रया ॥३४२॥
निवेदितमिद साधोर्वृत्तमस्या पुलाक[5]त । सकल तु न शक्नोमि कर्तुं दु खनिवेदनम् ॥३४३॥
अथैतदीयसंता[6]पविलीनस्नेहपूरितात् । अमान्तीव निरैदस्य हृदयात्साधु भारती ॥३४४॥
स्वस्रीया मम साध्वि त्व चिरकालवियोगत । प्रायेण नाभिजानामि रूपान्तरपरिग्रहात् ॥३४५॥
पिता विचित्रभानुर्मे माता सुन्दरमालिनी । नामत. प्रतिसूर्योऽह द्वीपे हनूरुहाभिधे ॥३४६॥
इत्युक्त्वा वस्तु यद्वृत्त कौमारे सकल स तत् । अञ्जनायै पतद्बाष्पनयनस्तमवादयत् ॥३४७॥
निर्ज्ञातमातुलाथासौ पूर्ववृत्तनिवेदनात् । तस्य कण्ठ [7]समासज्य रुरोद [8]चिरमध्वनि ॥३४८॥
तस्यास्तत्सकल दु ख वाष्पेण सह निर्गतम् । स्वजनस्य हि सप्राप्तावेषैव जगत स्थिति ॥३४९॥

---

आपत्तिमे पड़े हुए का उद्धार करना यह महापुरुषोकी शैली है ॥३३४॥ सुनिए, यह लोकव्यापी यशसे युक्त, निर्मल हृदयके धारक राजा महेन्द्रकी पुत्री है, अञ्जना नामसे प्रसिद्ध है और जिसका चित्त गुणोका सागर है ऐसे राजा प्रह्लादके पुत्र पवनवेगकी प्राणोसे अधिक प्यारी पत्नी है ॥३३५-३३६॥ किसी एक समय वह आत्मीयजनोकी अनजानमे इसके गर्भ धारणकर पिताकी आज्ञासे युद्धके लिए चला गया। वह रावणका मित्र जो था ॥३३७॥ यद्यपि यह अञ्जना निर्दोष थी तो भी स्वभावकी दुष्टताके कारण दयाशून्य मूर्ख सासने इसे पिताके घर भेज दिया ॥३३८॥ परन्तु अपकीर्तिके भयसे पिताने भी इसके लिए स्थान नहीं दिया सो ठीक ही है क्योकि प्राय' कर सज्जन पुरुष मिथ्यादोषसे भी डरते रहते है ॥३३९॥ अन्तमे इस कुलवती बालाको जब सब सहारोने छोड़ दिया तब यह निराश्रय हो मेरे साथ हरिणीके समान इस महावनमे रहने लगी ॥३४०॥ इस सुहृदयाकी मै कुल-परम्परासे चली आई सेविका हूँ सो सदा प्रसन्न रहनेवाली इसने मुझे अपना विश्वासपात्र बनाया है ॥३४१॥ इसी अञ्जनाने आज नाना उपसर्गोसे भरे वनमे पुत्र उत्पन्न किया है। मै नही जानती कि यह साध्वी पतिव्रता सुखका आश्रय कैसे होगी ॥३४२॥ आप सत्पुरुष है इसलिए संक्षेपसे मैने इसका यह वृत्तान्त कहा है इसने जो दु ख भोगा है उसे सम्पूर्ण रूपमे कहनेके लिए समर्थ नही हूँ ॥३४३॥

अथानन्तर उस विद्याधरके हृदयसे वाणी निकली सो ऐसी जान पड़ती थी मानो अञ्जनाके सन्तापसे पिघले हुए स्नेहसे उसका हृदय पूर्णरूपसे भर गया था अत' वाणीको भीतर ठहरनेके लिए स्थान ही नहीं बचा हो ॥३४४॥ उसने कहा कि हे पतिव्रते! तू मेरी भानजी है। चिरकालके वियोगसे प्रायः तेरा रूप बदल गया है इसलिए मै पहिचान नहीं सका हूँ ॥३४५॥ मेरे पिता विचित्रभानु और माता सुन्दरमालिनी है। मेरा नाम प्रतिसूर्य है और हनूरुह नामक द्वीपका रहनेवाला हूँ ॥३४६॥ इतना कहकर जो-जो घटनाएँ कुमारकालमे हुई थीं वे सब उसने रोते-रोते अञ्जनासे कहलाई ॥३४७॥ तदनन्तर जब पूर्ववृत्तान्त कहनेसे अञ्जनाने मामाको पहिचान लिया तब वह उसके गलेसे लगकर चिरकाल तक सिसक-सिसककर रोती रही ॥३४८॥ अञ्जनाका वह

---

१. जनकस्येद जानकम् । जनक म०, ब० । २. स्थानभीतेः म० । ३. सामान्यम् + अधि + अस्थात् । ४. भूत्यास्म्यस्या म० । ५. सङ्क्षेपतः । ६. सतापो म० । ७. समारुह्य म० । ८. मूर्धनि म०, ब० ।

तयो स्नेहभरेणैव कुर्वतोरथ रोदनम् । वसन्तमालयाप्युच्चैरुदित पार्श्वयातया ॥३५०॥
रुदत्सु तेषु कारुण्यादरुदत्तद्योषितः । कृतरोदास्वथैतासु रुरुदू रुरुयोषित [1] ॥३५१॥
गुहावदनमुक्तेन प्रतिनादेन भूयसा । पर्वतोऽपि रुरोदैव सततैर्निर्झराश्रुभि ॥३५२॥
तत शब्दमय सर्व तद्बभूव तदा वनम् । शकुन्तैरपि कारुण्यादाकुलै कृतनिस्वनम् ॥३५३॥
सान्त्वयित्वा ततस्तस्या दत्तेनोदकवाहिना । वारिणाक्षालयद्वक्त्र स्वस्य च प्रतिभास्कर [2] ॥३५४॥
पारम्पर्येण तेनैव ततस्तत्पुनरप्यभूत् । वन मुक्तमहाशब्द श्रोतु वार्तामिवानयो ॥३५५॥
तत क्षणमिव स्थित्वा निष्क्रान्तौ दु खगह्वरात् । अपृच्छता मिथो वार्ता कुलेऽकथयता च तौ ॥३५६॥
सभाषण ततश्चक्रे तत्स्त्रीणामञ्जना क्रमात् । स्खलन्ति न विधातव्ये वनेऽपि गुणिनो जना ॥३५७॥
जगाद मातुल चैव पूज्य जातस्य मेऽखिलम् । निवेदय यथावस्थ दिनद्योति.कदम्बकम् ॥३५८॥
इत्युक्ते पार्श्वग नाम्ना द्योतिर्गर्भविशारदम् । सावत्सरमपृच्छत्स जातकर्म यथास्थितम् ॥३५९॥
तत. सांवत्सरोऽवोचत्कल्याणस्य निवेदय । जन्मसम्बन्धिनी वेलामित्युक्ते चाख्यदञ्जना ॥३६०॥
अर्धयामावशेषाया रजन्यामद्य बालक । प्रजात इति सख्या च कथित निष्प्रमादया ॥३६१॥
मौहूर्तेन ततोऽवाचि यथास्य वपुराचितम् । सुलक्षणैस्तथा मन्ये दारक सिद्धिभाजनम् ॥३६२॥
तथापि यद्यसतोष क्रियेयं लौकिकीति वा । तत. शृणु पुत्राकेन कथयाम्यस्य जीवनम् ॥३६३॥
वर्तते तिथिरद्येय चैत्रस्य बहुलाष्टमी । नक्षत्र श्रवण. स्वामी वासरस्य विभावसु ॥३६४॥

समस्त दु.ख आँसुओके साथ निकल गया सो ठीक ही है क्योकि आत्मीयजनोके मिलने पर संसारकी ऐसी ही स्थिति होती है ॥३४९॥ इस तरह स्नेहके भारसे जब दोनो रो रहे थे तब पासमे बैठी वसन्तमाला भी जोरसे रो पड़ी ॥३५०॥ उन सबके रोनेपर विद्याधरकी स्त्रियॉ भी करुणावश रोने लगीं और इन सबको रोते देख हरिणियॉ भी रोने लगी ॥३५१॥ उस समय गुफारूपी मुखसे जोरकी प्रतिध्वनि निकल रही थी इसलिए ऐसा जान पड़ता था मानो पर्वत भी झरनोके बहाने बड़े-बड़े ऑसू डालता हुआ रो रहा था ॥३५२॥ और पक्षी भी दयावश आकुल होकर शब्द कर रहे थे इसलिए वह सम्पूर्ण वन उस समय शब्दमय हो गया था ॥३५३॥

तदनन्तर प्रतिसूर्य विद्याधरने सान्त्वना देनेके बाद जल लानेवाले नौकरके द्वारा दिये हुए जलसे अञ्जनाका और अपना मुँह धोया ॥३५४॥ पहले जिस क्रमसे वन शब्दायमान हो गया था उसी क्रमसे अब पुन. शब्दरहित हो गया सो ऐसा जान पडता था मानो इन दोनोकी वार्ता सुननेके लिए ही चुप हो रहा हो ॥३५५॥ तदनन्तर क्षण भर ठहरकर जब दोनो दु ख रूपी गर्तसे बाहर निकले तब उन्होने परस्पर कुशल-वार्ता पूछी और अपने अपने कुलका हाल एक दूसरेको बताया॥३५६॥इसके बाद अञ्जनाने प्रतिसूर्यकी स्त्रियोके साथ क्रमसे संभाषण किया सो ठीक ही है क्योकि गुणीजन करने योग्य कार्यमे कभी नहीं चूकते है ॥३५७॥ अंजनाने मामासे कहा कि पूज्य ! मेरे पुत्रके समस्त ग्रह कैसी दशामे है सो बताइए ॥३५८॥ ऐसा कहनेपर मामाने ज्योतिष विद्यामे निपुण पार्श्वग नामक ज्योतिषीसे पुत्रके यथावस्थित जातकर्मको पूछा अर्थात् पुत्रकी ग्रह-स्थिति पूछी ॥३५९॥ तब ज्योतिषीने कहा कि इस कल्याणस्वरूप पुत्रका जन्म-समय बताओ । ज्योतिषीके ऐसा पूछनेपर अञ्जनाने समय बताया ॥३६०॥ साथ ही प्रमादको दूर करनेवाली सखी वसन्तमालाने भी कहा कि आज रात्रिमे जब अर्धप्रहर बाकी था तब बालक उत्पन्न हुआ था ॥३६१॥ तदनन्तर मुहूर्तके जाननेवाले ज्योतिषीने कहा कि इसका शरीर जैसा शुभलक्षणोंसे युक्त है उससे जान पड़ता है कि बालक सब प्रकारकी सिद्धियोका भाजन होगा ॥३६२॥ फिर भी यदि सन्तोष नहीं है अथवा ऐसा ख्याल है कि यह क्रिया लौकिकी है तो सुनो मैं संक्षेपसे इसका जीवन कहता हूँ ॥३६३॥ आज यह चैत्रके कृष्ण पक्षकी अष्टमी तिथि है, श्रवण नक्षत्र है,

१. मृग्य. । २. प्रतिसूर्यः । ३. पुत्रस्य । ४. यथास्य च पुराचितम् म० ।

आदित्यो वर्तते मेषे भवन तुङ्गमाश्रित । चन्द्रमा मकरे मध्ये भवने समवस्थित ॥३६५॥
लोहिताङ्गो वृषमध्ये मध्ये मीने विधो. सुत । कुलीरे धिषणोऽत्युच्चैरध्यास्य भवन स्थित ॥३६६॥
मीने दैत्यगुरुस्तुङ्गस्तस्मिन्नेव शनैश्चर । मीनस्यैवोदयोऽप्यासीत्तदा नृपतिपुङ्गव[1] ॥३६७॥
शनैश्चर समग्राक्षस्तिग्मभानुर्निरीक्षते[2] । अर्धदृष्ट्या महीपुत्रो[3] दिवसस्य पतिं तथा ॥३६८॥
[4]गुरुः पादोनया दृष्ट्या पतिमह्नोऽवलोकते । अर्धदृष्ट्या गिरामीश वासरस्येक्षते विभु ॥३६९॥
[5]चन्द्र समस्तया दृष्ट्या [6]वचसा पतिरीक्षते । असावप्येवमेवास्य [7]विदधात्यवलोकनम् ॥३७०॥
गुरु शनैश्चर पादन्यूनया वीक्षते दृशा । अर्धावलोकनेनासौ भजते बृहतां पतिम् ॥३७१॥
गुरुर्दैत्यगुरु दृष्ट्वा [8]वीक्षते पादहीनया । दृष्टि तथाविधामेव पातयत्येष तत्र च ॥३७२॥
ग्रहाणां परिशिष्टाना नास्त्यपेक्षा परस्परम् । उदयक्षेत्रकालाना बल चास्ति पर तदा ॥३७३॥
[9]राज्य निवेदयत्यस्य रविभौमो गुरुस्तथा । शनैश्चर सुयोगित्व निवेदयति सिद्धिदम् ॥३७४॥
एकोऽपि भारतीनाथस्तुङ्गस्थानस्थितो भवन् । सर्वकल्याणसप्राप्तौ कारणत्व प्रपद्यते ॥३७५॥
ब्राह्मो नाम तदा योगो मुहूर्तश्च शुभश्रुति. । एतौ कथयतो ब्राह्मस्थानसौख्यसमागमम् ॥३७६॥
एवमेतस्य जातस्य ज्योतिश्चक्रमिद स्थितम् । सूचयत्यखिल वस्तु सर्वदोषविवर्जितम् ॥३७७॥
[10]रैशतानां सहस्रेण कालज्ञ पूजितं तत । प्रतिसूर्यो विधायोचे भागिनेयी ससंमद ॥३७८॥
एहीदानी पुर यामो वत्से हनूरुह मम । जातकर्मास्य बालस्य तत्र सर्व भविष्यति ॥३७९॥
एवमुक्ता विधायाङ्के[11] पृथुक जिनवन्दनाम् । कृत्वा स्थानपति देव क्षमयित्वा पुन पुन· ॥३८०॥

सूर्य दिनका स्वामी है ॥३६४॥ सूर्य मेषका है सो उच्च स्थानमे बैठा है और चन्द्रमा मकरका है सो मध्यगृहमे स्थित है ॥३६५॥ मङ्गल वृषका है सो मध्य स्थानमे बैठा है। बुध मीनका है सो भी मध्य स्थानमे स्थित है और बृहस्पति कर्कका है सो भी अत्यन्त उच्च स्थानमे बैठा है ॥३६६॥ शुक्र और शनि दोनो ही मीनके है तथा उच्च स्थानमे आरूढ़ है। हे राजाधिराज! उस समय मीनका ही उदय था ॥३६७॥ सूर्य पूर्ण दृष्टिसे शनिको देखता है और मङ्गल सूर्यको अर्ध-दृष्टिसे देखता है ॥३६८॥ बृहस्पति पौन दृष्टिसे सूर्यको देखता है और सूर्य बृहस्पतिको अर्धदृष्टिसे देखता है ॥३६९॥ बृहस्पति चन्द्रमाको पूर्ण दृष्टिसे देखता है और चन्द्रमा भी अर्धदृष्टिसे बृहस्पतिको देखता है ॥३७०॥ बृहस्पति शनिको पौन दृष्टिसे देखता है और शनि बृहस्पतिको अर्धदृष्टिसे देखता है ॥३७१॥ बृहस्पति शुक्रको पौन दृष्टिसे देखता है और शुक्र भी बृहस्पतिपर पौन दृष्टि डालता है ॥३७२॥ अवशिष्ट ग्रहोकी पारस्परिक अपेक्षा नही है। उस समय इसके ग्रहोके उदय-क्षेत्र और कालका अत्यधिक बल है ॥३७३॥ सूर्य मङ्गल और बृहस्पति इसके राज्य-योगको सूचित कर रहे हैं और शनि मुक्तिदायी योगको प्रकट कर रहा है ॥३७४॥ यदि एक बृहस्पति ही उच्च स्थानमे स्थित हो तो समस्त कल्याणकी प्राप्तिका कारण होता है फिर इसके तो समस्त शुभग्रह उच्च स्थानमे स्थित हैं ॥३७५॥ उस समय ब्राह्मनामक योग और शुभ नामका मुहूर्त था सो ये दोनो ही ब्राह्मस्थान अर्थात् मोक्ष सम्बन्धी सुखके समागमको सूचित करते है ॥३७६॥ इस प्रकार इस पुत्रका यह ज्योतिश्चक्र सर्व वस्तुको सर्व दोषोंसे रहित सूचित करता है ॥३७७॥ तदनन्तर राजाने हजार मुद्रा द्वारा ज्योतिषीका सम्मान कर हर्षित हो अञ्जनासे कहा कि ॥३७८॥ आओ बेटी! अब हमलोग हनूरुह नगर चले। वहीं इस बालकका सब जन्मोत्सव होगा ॥३७९॥ मामाके ऐसा कहनेपर अञ्जना पुत्रको गोदमें लेकर जिनेन्द्र देवकी वन्दना कर और

१. नृपपुङ्गवः म०। २. निरीक्षितः म०। ३. मङ्गलग्रहः।४. गुरुपादनया म०। ५. चन्द्रसमस्तया म०। ६. बृहस्पति.। ७. विदधत्यवलोकनम्। ८. वीक्ष्यते म०, ज०। ९. राज्य निवेदयस्तस्य रविभूमौ गुरुस्तथा म०, ब०, क०, ज०। १०. गुरुः। ११. धनशातानाम्।

निष्क्रान्ता सा गुहावासात् स्वजनौघसमन्विता । वनश्रीरिव जाता च विमानस्यान्तिके स्थिता ॥३८१॥
ततस्तत्किङ्किणीजालैः प्रक्वणत्पवनेरितैः । सनिर्झरमिवोदारैर्मुक्ताहारैः सुनिर्मलैः ॥३८२॥
ललल्लम्बूषकं काचकदलीवनराजितम् । दिवाकरकरस्पर्शस्फुरत्कनकबुद्बुदम् ॥३८३॥
नानारत्नकरासङ्गजातानेकसुरायुधम् । वैजयन्तीशतैर्नानावर्णैः कल्पतरूपमम् ॥३८४॥
चित्ररत्नविनिर्माणं नानारत्नसमाचितम् । दिव्यं परिवृतं स्वर्गलोकेनेव समन्ततः ॥३८५॥
दृष्ट्वासौ पृथुको मातुरङ्कात् कौतुकसस्मितः । उत्पत्य प्रविविक्षुः सन्नपतद्गिरिगह्वरे ॥३८६॥
हाहाकारं ततः कृत्वा लोकस्तस्य समातृकः । स गतोऽनुपदं ज्ञातुमुदन्तमिति विह्वलः ॥३८७॥
चकार विप्रलापं च सुदीनमिममञ्जना । तिरश्चामपि कुर्वाणा करुणाकोमलं मनः ॥३८८॥
हा पुत्र किमिदं वृत्तं दैवेन किमनुष्ठितम् । प्रदर्श्य रत्नसंपूर्णं निधानं हरता पुनः ॥३८९॥
पत्यसङ्गमदुःखेन ग्रस्ताया मे भवानभूत् । जीवितालम्बनं छिन्नं कथं तदपि कर्मणा ॥३९०॥
ततः सहस्रशः खण्डैर्नीताया[4] सुमहास्वनम् । शिलाया पातवेगेन ददृशैव सुखस्थितम् ॥३९१॥
अन्तरास्यकृताङ्गुष्ठं क्रीडन्तं स्मितशोभितम् । उत्तानं प्रचलत्पाणिचरणं शुभविग्रहम् ॥३९२॥
मन्दमारुतसंपृक्तरक्तोत्पलवनप्रभम् । कुर्वाणं सकलं पिङ्गं तेजसा गिरिगह्वरम् ॥३९३॥
ततोऽनघशरीरं तं जननी पृथुविस्मया । गृहीत्वा शिरसि घ्रात्वा चक्रे वक्षःस्थलस्थितम् ॥३९४॥

---

गुहाके स्वामी गन्धर्वदेवसे बार-बार क्षमा कराकर आत्मीयजनोंके साथ गुहासे बाहर निकली। विमानके पास खड़ी अञ्जना वनलक्ष्मीके समान जान पड़ती थी ॥३८०-३८१॥

तदनन्तर जो वायुसे प्रेरित क्षुद्रघण्टिकाओंके समूहसे शब्दायमान था, जो लटकते हुए अतिशय निर्मल मोतियोंके उत्तम हारोंसे ऐसा जान पड़ता था मानो झरनोंसे सहित ही हो, जिसमें गोले फन्नूस लटक रहे थे, जो काचनिर्मित केलोंके वनोंसे सुशोभित था, जिसमें लगे हुए सुवर्णके गोले सूर्यकी किरणोंका सम्पर्क पाकर चमक रहे थे, नाना रत्नोंकी किरणोंके सङ्गमसे जिसमें इन्द्रधनुष उठ रहा था, रङ्ग-विरङ्गी सैकड़ों पताकाओंसे जो कल्पवृक्षके समान जान पड़ता था, चित्र-विचित्र रत्नोंसे जिसकी रचना हुई थी, जो नाना प्रकारके रत्नोंसे खचित था, दिव्य था और ऐसा जान पड़ता था मानो सब ओरसे स्वर्गलोकसे घिरा हुआ ही हो ऐसे विमानको देखकर कौतुकसे मुसकराता हुआ बालक उछलकर स्वयं प्रवेश करनेकी इच्छा करता मानो माताकी गोदसे छूटकर पर्वतकी गुफामें जा पड़ा ॥३८२-३८६॥ तदनन्तर माता अञ्जनाके साथ-साथ सब लोग हाहाकार कर उस बालकका समाचार जाननेके लिए शीघ्र ही विह्वल होते हुए वहाँ गये ॥३८७॥ अञ्जनाने दीनतासे ऐसा विलाप किया कि जिसे सुनकर तिर्यञ्चों के भी मन करुणासे कोमल हो गये ॥३८८॥ वह कह रही थी कि हाय पुत्र! यह क्या हुआ? रत्नोंसे परिपूर्ण खजाना दिखाकर फिर उसे हरते हुए विधाताने यह क्या किया? ॥३८९॥ पतिके वियोग दुःखसे ग्रसित जो मैं हूँ सो मेरे जीवनका अवलम्बन एक तू ही था पर दैवने उसे भी छीन लिया ॥३९०॥

तदनन्तर सब लोगोंने देखा कि पतन सम्बन्धी वेगसे हजार टुकड़े हो जानेके कारण जो महाशब्द कर रही थी ऐसी शिलापर बालक सुखसे पड़ा है ॥३९१॥ वह मुखके भीतर अंगूठा देकर खेल रहा है, मन्द मुसकानसे सुशोभित है, चित्त पड़ा है, हाथ पैर हिला रहा है, शुभ शरीरका धारक है, मन्द-मन्द वायुसे हिलते हुए लाल तथा नीले कमलवनके समान उसकी कान्ति है, और अपने तेजसे पर्वतकी समस्त गुफाको पीत वर्ण कर रहा है ॥३९२-३९३॥ तदनन्तर निर्दोष शरीरके धारक बालकको आश्चर्यसे भरी माताने उठाकर तथा शिरपर सूँघकर

---

१. विधायाङ्कपृथुक म० । २ जाले म० । ३.-मुदन्त-म० । ४. नीयते म० ।

प्रतिसूर्यस्ततोऽवोचदहो चित्रमिद परम् । वज्रेणेवं[1] यदेतेन शिलाजात विचूर्णितम् ॥३९५॥
अर्भकस्य सतोऽप्येषा शक्ति सुरवरातिगा । यौवनस्थस्य कि वाच्य चरमेय ध्रुव तनु. ॥३९६॥
इति ज्ञात्वा परीत्य त्रि. शिर.पाणिसरोरुहः । सहाङ्गनासमूहेन चकारास्या नमस्कृतिम् ॥३९७॥
असौ तस्य वरस्त्रीभिर्नेत्रभाभि कृतस्मितम् सितासितारुणाम्भोजमालभिरिव पूजितम् ॥३९८॥
सपुत्रा यानमारोप्य भागिनेयी ततोऽगमत् । प्रतिसूर्यो निज स्थान ध्वजतोरणभूषितम् ॥३९९॥
तत प्रत्युद्गत पौरैर्नानामङ्गलधारिभि । स विवेश पुर तूर्यनादव्याप्तनभस्तलम् ॥४००॥
तत्र जन्मोत्सवस्तस्य महान् विद्याधरै कृत । आखण्डलसमुत्पत्तौ गीर्वाणैस्त्रिदशैर्यथा ॥४०१॥
जन्म लेभे यत. शैले शैल चाचूर्णयत्तत । श्रीशैल इति नामास्य चक्रे मात्रा ससूर्यया ॥४०२॥
पुरे हनूरुहे यस्माज्जात सस्कारमाप्तवान् । हनूमानिति तेनागात्प्रसिद्धिं स महीतले ॥४०३॥
सर्वलोकमनोनेत्रमहोत्सववपु क्रिय । तस्मिन् सुरकुमाराभ' पुरे रेमे सुकान्तिमान् ॥४०४॥

सभवतीह भूधररिपु पविरपि कुसुमं वह्निरपीन्दुवादशिशिर पृथु कमलवनम् ।
खड्गलतापि चारुवनितासुमृदुभुजलता प्राणिषु पूर्वजन्मजनितात्सुचरितबलत ॥४०५॥

छातीसे लगा लिया ।।३९४।। राजा प्रतिसूर्यने कहा कि अहो ! यह बड़ा आश्चर्य है कि बालकने वज्रकी तरह शिलाओका समूह चूर्ण कर दिया ।।३९५।। जब बालक होनेपर भी इसकी यह देवातिशायिनी शक्ति है तब तरुण होनेपर तो कहना ही क्या है ? निश्चित ही इसका यह शरीर अन्तिम शरीर है ।।३९६।। ऐसा जानकर उसने, हस्त-कमल शिरसे लगा, तथा तीन प्रदक्षिणाएँ देकर अपनी स्त्रियोके साथ बालकके उस चरम शरीरको नमस्कार किया ।।३९७।। प्रतिसूर्यकी स्त्रियोने अपने सफेद काले, तथा लाल नेत्रोकी कान्तिसे उसे हँसते हुए देखा सो ऐसा जान पड़ता था मानो उन्होने सफेद, नीले और लाल कमलोकी मालाओसे उसकी पूजा ही की हो ।।३९८।।

तदनन्तर प्रतिसूर्य पुत्रसहित अञ्जनाको विमानमे बैठाकर ध्वजाओ और तोरणोसे सुशोभित अपने नगरकी ओर चला ।।३९९।। तत्पश्चात् नाना मङ्गलद्रव्योको धारण करनेवाले नगरवासी लोगोने जिसकी अगवानी की थी ऐसे राजा प्रतिसूर्यने नगरमे प्रवेश किया । उस समय नगरका आकाश तुरही आदि वादित्रोके शब्दसे व्याप्त हो रहा था ।।४००।। जिस प्रकार इन्द्रका जन्म होनेपर स्वर्गमे देव लोग महान् उत्सव करते हैं उसी प्रकार हनूरुह नगरमे विद्याधरोने उस बालकका बहुत भारी जन्मोत्सव किया ।।४०१।। चूँकि बालकने शैल अर्थात् पर्वतमे जन्म प्राप्त किया था और उसके बाद शैल अर्थात् शिलाओके समूहको चूर्ण किया था इसलिए माताने मामाके साथ मिलकर उसका 'श्रीशैल' नाम रक्खा था ।।४०२।। चूँकि उस बालकने हनूरुह नगरमे जन्म संस्कार प्राप्त किये थे इसलिए वह पृथिवीतलपर 'हनूमान्' इस नामसे भी प्रसिद्धिको प्राप्त हुआ ।।४०३।। जिसके शरीरकी क्रियाएँ समस्त मनुष्योके मन और नेत्रोको महोत्सव उत्पन्न करनेवाली थीं, तथा जिसकी आभा देवकुमारके समान थी ऐसा वह उत्तम कान्तिका धारी बालक उस नगरमे क्रीडा करता था ।।४०४।।

गौतमस्वामी राजा श्रेणिकसे कहते हैं कि हे राजन् ! पूर्व जन्ममे संचित पुण्य कर्मके बलसे प्राणियोके लिए पर्वतोको चूर्ण करनेवाला वज्र भी फूलके समान कोमल हो जाता है । अग्नि भी चन्द्रमाकी किरणोके समान शीतल विशाल कमलवन हो जाती है, और खड्गरूपी

१. वज्रेणैव म० ।

इत्यवगम्य दु खकुशलाद्विरमत दुरितात् सजत सारशर्मचतुरे जिनवरचरिते ।
एष तपत्यहो परिदृढ जगदनवरत व्याधिसहस्रश्मिनिकरो ननु जननरवि ॥४०६॥

*इत्यार्षे रविषेणाचार्यप्रोक्ते पद्मचरिते हनूमत्सभवाभिधानं*
*नाम सप्तदश पर्व ॥१७॥*

---

लता भी सुन्दर स्त्रियोकी सुकोमल भुजलता बन जाती है ॥४०५॥ ऐसा जानकर दुःख देनेमे निपुण जो पापकर्म है उससे विरत होओ और श्रेष्ठ सुख देनेमे चतुर जो जिनेन्द्र देवका चरित है उसमे लीन होओ। अहो! हजारो रोगरूपी किरणोसे युक्त यह जन्मरूपी सूर्य समस्त संसारको निरन्तर बड़ी दृढ़ताके साथ संतप्त कर रहा है ॥४०६॥

*इस प्रकार आर्ष नामसे प्रसिद्ध रविषेणाचार्य द्वारा कथित पद्मचरितमे हनूमानके*
*जन्मका वर्णन करनेवाला सत्रहवाँ पर्व समाप्त हुआ ॥१७॥*

# अष्टादशं पर्व

इद ते कथित जन्म श्रीशैलस्य महात्मन । शृणु सम्प्रति वृत्तान्त वायोर्मगधमण्डन ॥१॥
[1]वायुना वायुनेवाशु गत्वाभ्याश खगेशिन[2] । लब्धादेशेन सयुध्य नानाशस्त्राकुले रणे ॥२॥
कृतयुद्धश्चिर खिन्नो [3]जलकान्तोऽप[4]वर्तित । जातस्तस्य [5]निमानोऽसौ पुष्कल खरदूषण. ॥३॥
भूयश्च जलकान्तेन निनाय[6] खरदूषण[7] । कृत्वा [8]सन्धिमह प्राप्य परम राक्षसाधिपात् ॥४॥
अनुज्ञातोऽवहन् कान्ता हृदयेन त्वरान्वितः । जगामाभिजन स्थान महासामन्तमध्यग ॥५॥
प्रविष्टश्च पुर पौरैरभियात' सुमङ्गलै. । ध्वजतोरणमालाभिर्भासुराभिर्विभूषितम् ॥६॥
जगाम च निज वेश्म दृष्टो वातायनस्थितै. । मुक्तप्रस्तुतकर्तव्यै पौरनारीकदम्बकै ॥७॥
विवेश च कृतार्घादिसन्मानो मानिनां वर । वाग्भिर्मङ्गलसाराभि' स्वजनैरभिनन्दित ॥८॥
विधाय प्रणतिं तत्र गुरूणामितरैर्जनै । नमस्कृत क्षण तस्थौ वार्ताभिर्वरमण्डपे ॥९॥
तत प्रासादमारुक्षदञ्जनायाः समुन्मना । युक्त प्रहसितेनैव पूर्वभावनयान्वित ॥१०॥
रिक्तक तस्य त दृष्ट्वा प्रासाद प्राणतुल्यया । चेतनामुक्तदेहाभ पपातेव मन क्षणात् ॥११॥
ऊचे प्रहसित चैव वयस्य किमिद भवेत् । अञ्जनासुन्दरी नात्र दृश्यते पुष्करेक्षणा ॥१२॥

---

अथानन्तर गौतमस्वामी राजा श्रेणिकसे कहते है कि हे मगध देशके मण्डपस्वरूप श्रेणिक ! यह तो मैने तुम्हारे लिए महात्मा श्रीशैलके जन्मका वृत्तान्त कहा । अब पवनञ्जयका वृत्तान्त सुनो ॥१॥ पवनञ्जय वायुके समान शीघ्र ही रावणके पास गया और उसकी आज्ञा पाकर नानाशस्त्रोसे व्याप्त युद्ध-क्षेत्रमे वरुणके साथ युद्ध करने लगा ॥२॥ चिरकाल तक युद्ध करने के वाद वरुण खेद-खिन्न हो गया सो पवञ्जनयने उसे पकड लिया । खर-दूषणको वरुणने पहले पकड़ रक्खा था सो उसे छुड़ाया और वरुणको रावणके समीप ले जाकर तथा सन्धि कराकर उसका आज्ञाकारी किया । रावणने पवनञ्जयका बड़ा सन्मान किया ॥३-४॥ तदनन्तर रावणकी आज्ञा लेकर हृदयमे कान्ताको धारण करता हुआ पवनञ्जय महा सामन्तोंके साथ शीघ्र ही अपने नगरमे वापिस आ गया ॥५॥ उत्तमोत्तम मङ्गल द्रव्योको धारण करने वाले नगरवासी जनोंने जिसकी अगवानी की थी ऐसा पवनञ्जय देदीप्यमान ध्वजाओ, तोरणो तथा मालाओसे अलंकृत नगरमें प्रविष्ट हुआ ॥६॥ तदनन्तर अपना प्रारम्भ किया हुआ कर्म छोड़ झरोखोंमे आकर खड़ी हुई नगरवासिनी स्त्रियोंके समूह जिसे बड़े हर्षसे देख रही थी ऐसा पवनञ्जय अपने महलकी ओर चला ॥७॥ तत्पश्चात् जिसका अर्घ आदिके द्वारा सन्मान किया गया था और आत्मीयजनो ने मङ्गलमय वचनोंसे जिसका अभिनन्दन किया था ऐसे पवनञ्जयने महलमे प्रवेश किया ॥८॥ वहाँ जाकर इसने गुरुजनोंको नमस्कार किया और अन्य जनोने इसे नमस्कार किया । फिर कुशल-वार्ता करता हुआ क्षणभरके लिए सभामण्डपमे बैठा ॥९॥

तदनन्तर उत्कण्ठित होता हुआ अञ्जनाके महलमें चढ़ा । उस समय वह पहलेकी भावना से युक्त था और अकेला प्रहसित मित्र ही उसके साथ था ॥१०॥ वहाँ जाकर जब उसने महल को प्राण-वल्लभासे रहित देखा तो उसका मन क्षण एकमे ही निर्जीव शरीरकी तरह नीचे गिर गया ॥११॥ उसने प्रहसितसे कहा कि मित्र ! यह क्या है ? यहाँ कमल-नयना अञ्जना सुन्दरी

---

१. पवनञ्जयेन । २. रावणस्य । ३. वरुणः । ४. गृहीतः । ५. मूल्यभूतः- प्रतिभूः ( जमानतदार इति हिन्दी ) । ६. निमाय क०, ख०, ज०, । निनाय्य म० । ७. खरदूषणम् ब० । ८. सन्ध्येमह म० ।

गृहमेतत्तया शून्य वन मे प्रतिभासते । आकाशमेव वा क्षिप्र तस्या वार्ताधिगम्यताम् ॥१३॥
आप्तवर्गात् परिज्ञाय वार्ता प्रहसितोऽवदत् । यथावत् सकला तस्मै हृदये क्षोदकारिणीम् ॥१४॥
वञ्चित्वा स्वजन सोऽथ सम मित्रेण तत्क्षणम् । महेन्द्रनगर तेन प्रवृत्तो गन्तुमुन्मना ॥१५॥
तस्यासन्नभुव प्राप्य मित्रमेवमभाषत । मन्यमानोऽङ्कसप्राप्ता दयिता प्रमदान्वित ॥१६॥
पश्य पश्य पुरस्यास्य वयस्य रमणीयताम् । अञ्जनासुन्दरी यत्र वर्तते चारुविभ्रमा ॥१७॥
कैलासकूटसकाशा यत्र प्रासादपङ्क्तय । उद्यानपादपैर्गुप्ता प्रावृषेण्यघनप्रभै ॥१८॥
ब्रुवन्नेव स सप्राप्त पुर पुरुषसत्तम । सुहृदाद्वैतचित्तेन विहितप्रतिभाषण. ॥१९॥
ततो जनौघत श्रुत्वा सप्राप्त पवनञ्जयम् । । अर्घादिनोपचारेण श्वसुरोऽस्य समागमत् ॥२०॥
पुरस्सरेण तेनासौ प्रीतियुक्तेन चेतसा । निज प्रवेशित स्थान पौरै सादरमीक्षित ॥२१॥
विवेश भवन चास्य कान्तादर्शनलालस । सकथाभिर्मुहूर्तं च तस्थौ [1]सवर्गेण भजन् ॥२२॥
ततस्तत्राप्यसौ कान्तामपश्यद् विरहातुर । अपृच्छद् बालिकां काञ्चिदन्तर्भवनगोचराम् [2] ॥२३॥
अपि बालेऽत्र जानासि मत्प्रिया वर्ततेऽञ्जना । सावोचदेव नास्त्यत्र त्वत्प्रियेत्यसुखावहम् ॥२४॥
वज्रेणेव ततस्तस्य तेन वाक्येन चूर्णितम् । हृदय पूरितौ कर्णौ तप्तक्षाराम्बुनेव च ॥२५॥
वियुक्त इव जीवेन क्षण चाभूत् स [3]निश्चल । शोकप्रालेयसपर्कविच्छायमुखपङ्कज. ॥२६॥
निर्गत्यासौ ततस्तस्माच्छद्मना [4]श्वासुरात् पुरात् । बभ्राम धरणी वार्तामधिगन्तु [5]स्वयोषितः ॥२७॥

नही दिख रही है ॥१२॥ उसके बिना यह घर मुझे वन अथवा आकाशके समान जान पड़ता है। अत॰ शीघ्र ही उसका समाचार मालूम किया जाय ॥१३॥ तदनन्तर आप्तवर्गसे सब समाचार जानकर प्रहसितने हृदयको क्षुभित करनेवाला सब समाचार ज्योका त्यो पवनञ्जयको सुना दिया ॥१४॥ उसे सुन, पवनञ्जय आत्मीयजनोको छोड़ उसी क्षण मित्रके साथ उत्कंठित होता हुआ महेन्द्रनगर जानेके लिए उद्यत हुआ॥१५॥महेन्द्रनगरके निकट पहुँच कर पवनञ्जय, प्रियाको गोदमे आई समझ हर्षित होता हुआ मित्रसे बोला कि हे मित्र! देखो, इस नगरकी सुन्दरता देखो जहाँ सुन्दर विभ्रमोको धारण करने वाली प्रिया विद्यमान है ॥१६–१७॥ और जहाँ वर्षाऋतुके मेघोके समान कान्तिके धारक उद्यानके वृक्षोसे घिरी महलोकी पंक्तियाँ कैलास पर्वतके शिखरोके समान जान पड़ती है ॥१८॥ इस प्रकार कहता और अभिन्न चित्तके धारक मित्रके साथ वार्त्तालाप करता हुआ वह महेन्द्रनगरमे पहुँचा ॥१९॥

तदनन्तर लोगोके समूहसे पवनञ्जयको आया सुन इसका श्वसुर अर्घादिकी भेट लेकर आया ॥२०॥ आगे चलते हुए श्वसुरने प्रेमपूर्ण मनसे उसे अपने स्थानमें प्रविष्ट किया और नगरवासी लोगोने उसे बड़े आदरसे देखा ॥२१॥ प्रियाके दर्शनकी लालसासे इसने श्वसुरके घरमे प्रवेश किया। वहाँ यह परस्पर वार्तालाप करता हुआ मुहूर्त भर बैठा ॥२२॥ परन्तु वहाँ भी जब इसने कान्ताको नहीं देखा तब विरहसे आतुर होकर इसने महलके भीतर रहनेवाली किसी बालिकासे पूछा कि हे बाले! क्या तू जानती है कि यहाँ मेरी प्रिया अञ्जना है? बालिकाने यही दुःखदायी उत्तर दिया कि यहाँ तुम्हारी प्रिया नही है ॥२३–२४॥ तदनन्तर इस उत्तरसे पवनञ्जयका हृदय मानो वज्रसे ही चूर्ण हो गया, कान तपाये हुए खारे पानीसे मानो भर गये और वह स्वयं निर्जीवकी भाँति निश्चल रह गया। शोकरूपी तुषारके संपर्कसे उसका मुख-कमल कान्तिरहित हो गया ॥२५–२६॥ तदनन्तर वह किसी छलसे श्वसुरके नगरसे निकलकर अपनी प्रियाका समाचार जाननेके लिए पृथिवीमे भ्रमण करने लगा ॥२७॥

---

१. सभाषणाम्। २. गोचरम् म०। ३. सुनिश्चलः म०, ब०, ख०, ज०। ४. श्वसुरात् म०। ५. सुयोषित म०, ख०, ज०, ब०।

ज्ञात्वा वायुकुमारं च वायुनेवातुरीकृतम् । ऊचे प्रहसितः [1]सान्त्वं तद्दुःखाद्भिदुःखितः ॥२८॥
किं वयस्य विषण्णोऽसि कुरुचित्तमनाकुलम् । द्रक्ष्यसे दयितां [2]द्राक्तेकियद्वेदं महीतलम् ॥२९॥
सोऽवोचद् गच्छ गच्छ त्वं सखे रविपुरं द्रुतम् । इदं ज्ञापय वृत्तान्तं गुरूणां मदनुष्ठितम् ॥३०॥
अहं पुनरसंप्राप्य दयितां क्षितिसुन्दरीम् । न मन्ये जीवितं तस्मात्पर्यटाम्यखिलां भुवम् ॥३१॥
इत्युक्तस्तेन दुःखेन विमुच्य कथमप्यमुम् । आदित्यनगरीं दीनः क्षिप्रं प्रहसितो ययौ ॥३२॥
पवनोऽपि समारुह्य नागमम्बरगोचरम् । विचरन् धरणीं सर्वामेव चिन्तामुपागतः ॥३३॥
शोकातपपरिम्लानै[3]पद्मकोमलविग्रहा । क्व गता मे भवेत् कान्ता वहन्ती हृदयेन माम् ॥३४॥
वैधुर्यारण्यमध्यस्था विरहानलदीपिता[4] । वराकी कादिशीकासौ दिशं स्यात् कामुपाश्रिता ॥३५॥
सत्यार्जवसमेतासौ गर्भगौरवधारिणी । वसन्तमालया त्यक्ता भवेत् किन्नु महावने ॥३६॥
शोकान्धनयना किं नु व्रजन्ती विषमे पथि । पतिता स्याज्जरत्कूपे क्षुधिताजगरान्विते ॥३७॥
किं नु गर्भपरिक्लिष्टा श्वापदानां च भीषणम् । श्रुत्वा शब्दं परित्रस्ता प्राणान्मुक्तवती भवेत् ॥३८॥
अहो तृष्णार्दिता शुष्कतालुकण्ठा जलोज्झिते । विन्ध्यारण्ये विमुक्ता स्यात् प्राणैः प्राणसमा मम ॥३९॥
किं वा मन्दाकिनीं मुग्धा विविधग्राहसंकुलाम् । अवतीर्णा भवेद् व्यूढा वारिणा तीव्ररंहसा ॥४०॥
दर्भसूचीविनिर्भिन्नचरण[5]स्रुतशोणिता । अशक्ता पदमप्येकं गन्तुं किं नु[6] मृता भवेत् ॥४१॥

---

इधर जब प्रहसित मित्रको मालूम हुआ कि पवनञ्जय मानो वायुकी बीमारीसे ही दुःखी हो रहा है तब उसके दुःखसे अत्यन्त दुःखी होते हुए उसने सान्त्वनाके साथ कहा कि हे मित्र ! खिन्न क्यों होते हो ? चित्तको निराकुल करो । तुम्हें शीघ्र ही प्रिया दिखलाई देगी, अथवा यह पृथिवी है ही कितनी सी ? ॥२८-२९॥ पवनञ्जयने कहा कि हे मित्र ! तुम शीघ्र ही सूर्यपुर जाओ और वहाँ गुरुजनोंको मेरा यह समाचार बतला दो ॥३०॥ मैं पृथिवीकी अनन्य सुन्दरी प्रियाको प्राप्त किये बिना अपना जीवन नहीं मानता इसलिए उसे खोजनेके लिए समस्त पृथिवीमें भ्रमण करूँगा ॥३१॥ यह कहनेपर प्रहसित बड़े दुःखसे किसी तरह पवनञ्जयको छोड़कर दीन होता हुआ सूर्यपुरकी ओर गया ॥३२॥

इधर पवनञ्जय भी अम्बरगोचर हाथीपर सवार होकर समस्त पृथिवीमें विचरण करता हुआ ऐसा विचार करने लगा कि जिसका कमलके समान कोमल शरीर शोकरूपी आतापसे मुरझा गया होगा ऐसी मेरी प्रिया हृदयसे मुझे धारण करती हुई कहाँ गई होगी ? ॥३३-३४॥ जो विधुरतारूपी अटवीके मध्यमें स्थित थी, विरहाग्निसे जल रही थी और निरन्तर भयभीत रहती थी ऐसी वह बेचारी किस दिशामें गई होगी ? ॥३५॥ वह सती थी, सरलतासे सहित थी तथा गर्भका भार धारण करनेवाली थी । ऐसा न हुआ हो कि वसन्तमालाने उसे महावनमें अकेली छोड़ दी हो ॥३६॥ जिसके नेत्र शोकसे अन्धे हो रहे होंगे ऐसी वह प्रिया विषम मार्गमें जाती हुई कदाचित् किसी पुराने कुँएमें गिर गई हो अथवा किसी भूखे अजगरके मुँहमें जा पड़ी हो ॥३७॥ अथवा गर्भके भारसे क्लेशित तो थी ही जङ्गली जानवरोंका भयंकर शब्द सुन भयभीत हो उसने प्राण छोड़ दिये हो ॥३८॥ अथवा विन्ध्याचलके निर्जल वनमें प्याससे पीड़ित होनेके कारण जिसके तालु और कण्ठ सूख रहे होंगे ऐसी मेरी प्राणतुल्य प्रिया प्राणरहित हो गई होगी ॥३९॥ अथवा वह बड़ी भोली थी कदाचित् अनेक मगरमच्छोंसे भरी गङ्गामें उतरी हो और तीव्र वेगवाला पानी उसे बहा ले गया हो ॥४०॥ अथवा डाभकी अनियोंसे विदीर्ण हुए जिसके पैरोंसे रुधिर बह रहा होगा ऐसी प्रिया एक डग भी चलनेके लिए असमर्थ हो मर गई

---

१. सत्वम् म० । स्वान्तं ख० । २. दयिता सा ते म०, ज०, ख० । ३. परिम्लानापद्म- म० । ४. दीपिका म० । ५. श्रुत- म० । ६. तु म० ।

किं वा दुष्टेन केनापि नीता स्यात् खविचारिणा । कष्टं वार्तापि नो तस्याः केनचिन्मे निवेद्यते[1] ॥४२॥
किं वा दुःखाच्च्युते[2] गर्भे निर्वेदं परमागता । आर्यिकाणां पदं प्राप्ता भवेद्धर्मानुसेविनी ॥४३॥
चिन्तयन्निति पर्यट्य[3] धरणीं मतिविह्वलः । ददर्श न यदा कान्तां सर्वेन्द्रियमनोहराम् ॥४४॥
तदापश्यज्जगत्कृत्स्नं[3] शून्यं विरहदीपितः । विनिश्चितमसौ चेतश्चकार मरणं प्रति ॥४५॥
न शैलेषु न वृक्षेषु न रम्यासु नदीष्वभूत् । धृतिरस्य वियुक्तस्य[4] तया सर्वस्वभूतया ॥४६॥
तस्या वार्तासु मुग्धेन तेन पृष्टा नगा अपि । विवेकेन हि निर्युक्ता जायन्ते दुःखिनो जनाः ॥४७॥
अथ भूतरवाभिख्यं वनं प्राप्य गजादसौ । अवतीर्य क्षणं स्थित्वा ध्यायन्मुनिरिव प्रियाम् ॥४८॥
अनादरेण निक्षिप्य धरण्यामस्त्रकङ्कटम्[5] । घनपादपशाखाग्रतिरोहितमहातपः ॥४९॥
जगाद गजनाथं तं विनयेन पुरःस्थितम् । गिरा मधुरयात्यर्थं श्रमेण गुरुणान्वितः ॥५०॥
व्रजेदानीं गजेन्द्र त्वं भव स्वच्छन्दविभ्रमः । तस्या वार्तासु मुग्धेन क्षमस्व च पराभवम् ॥५१॥
तीरेऽस्याः सरितः शष्पं[6] शल्लकीनां च पल्लवान् । चरन् विहर यूथेन[7] करिणीनां समन्वितः ॥५२॥
इत्युक्तः सुकृतज्ञोऽसौ स्वामिवात्सल्यदक्षिणः । न मुमोचान्तिकं तस्य शोकार्तस्य सुबन्धुवत् ॥५३॥
लप्स्ये यदि न तां रामामभिरामामहं ततः । यास्याम्यत्र वने मृत्युमिति वायुर्विनिश्चितः ॥५४॥
प्रियागतमनस्कस्य तस्य रात्रिरभूद्वने । शरच्चतुष्टयोदारा[8] नानासंकल्पसंकुला ॥५५॥

होगी ॥४१॥ अथवा कोई आकाशगामी दुष्ट विद्याधर हर ले गया हो। बड़े खेदकी बात है कि कोई मेरे लिए उसका समाचार भी नहीं बतलाता ॥४२॥ अथवा दुःखके कारण गर्भ-भ्रष्ट हो आर्यिकाओंके स्थानमें चली गई हो ? धर्मानुगामिनी तो वह थी ही ॥४३॥ इस प्रकार विचार करते हुए बुद्धि-विह्वल पवनञ्जयने पृथिवीमें विहार कर जब समस्त इन्द्रियों और मनको हरनेवाली प्रियाको नहीं देखा ॥४४॥ तब विरहसे जलते हुए उसने समस्त संसारको सूना देख चित्तमें मरनेका दृढ़ निश्चय किया ॥४५॥ अञ्जना ही पवनञ्जयकी सर्वस्वभूत थी अतः उसके बिना उसे न पर्वतोंमें आनन्द आता था, न वृक्षोंमें और न मनोहर नदियोंमें ही ॥४६॥ योंही पवनञ्जयने उसका समाचार जाननेके लिए वृक्षोंसे भी पूछा सो ठीक ही है क्योंकि दुःखीजन विवेकसे रहित हो ही जाते हैं ॥४७॥

अथानन्तर भूतरव नामक वनमें जाकर वह हाथीसे उतरा और प्रियाका ध्यान करता हुआ क्षण भरके लिए मुनिके समान स्थिर बैठ गया ॥४८॥ सघन वृक्षोंकी शाखाओंके अग्रभाग उसपर पड़ते हुए घामको रोके हुए थे। वहाँ उसने शस्त्र तथा कवच उतारकर अनादरसे पृथिवी पर फेंक दिये ॥४९॥ अम्बरगोचर नामका हाथी बड़ी विनयसे उसके सामने बैठा था और पवनञ्जय अत्यधिक थकावटसे युक्त थे। उन्होंने अत्यन्त मधुर वाणीमें हाथीसे कहा कि ॥५०॥ हे गजराज ! अब तुम जाओ, जहाँ तुम्हारी इच्छा चाहे भ्रमण करो, अञ्जनाका समाचार जाननेके लिए मोहसे युक्त होकर मैंने तुम्हारा जो पराभव किया है उसे क्षमा करो ॥५१॥ इस नदीके किनारे हरी-हरी घास और शल्लकी वृक्षके पल्लवोंको खाते हुए तुम हस्तिनियोंके झुण्डके साथ यथेच्छ भ्रमण करो ॥५२॥ पवनञ्जयने हाथीसे यह सब कहा अवश्य पर वह किये हुए उपकारको जाननेवाला था और स्वामीके साथ स्नेह करनेमें उदार था इसलिए उसने उत्तम बन्धुकी तरह शोकपीड़ित स्वामीका सामीप्य नहीं छोड़ा ॥५३॥ पवनञ्जयने यह निश्चय कर लिया था कि यदि मैं उस मनोहारिणी प्रियाको नहीं पाऊँगा तो इस वनमें मर जाऊँगा ॥५४॥ जिसका मन प्रियामें लग रहा था ऐसे पवनञ्जयकी नाना संकल्पोंसे युक्त एक रात्रि वनमें चार वर्षसे भी

१. मे न विद्यते म०, ख०, ब०, ज० । २. दुःखात्स्रुते ख० । ३. कृष्णं म० । ४. विप्रयुक्तस्य म० । ५. 'उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम्' इत्यमरः । -मस्त्रकण्टकम् म० । ६. शस्यं म० । ७. सार्थेन क० । ८. वर्षचतुष्टयादप्यधिका । 'हायनोऽस्त्री शरत्समा' इत्यमरः ।

एवं तावदिदं वृत्तं शृणु श्रेणिक ते परम् । कथयामि गते तस्मिन् यत् पितृभ्यां विचेष्टितम् ॥५६॥
पवनञ्जय वृत्तान्ते [1]तन्मित्रेण निवेदिते । समस्ता बान्धवा वायो परम शोकमागता ॥५७॥
अथ केतुमती पुत्रशोकेनाभ्याहता[2] भृशम् । ऊचे प्रहसितं वाष्पधाराजनितदुर्दिना ॥५८॥
युक्तं प्रहसितेदं ते कर्तुमीदृग्विचेष्टितम् । मम पुत्र परित्यज्य यदेकाकी समागत ॥५९॥
सोऽवोचदम्ब तेनैव प्रेषितोऽहं प्रयत्नत । न मे केनापि भावेन दत्तं स्थातुमुपान्तिके ॥६०॥
उवाच सा गत क्वासौ सोऽवोचद्यत्र साञ्जना । क्वाञ्जनेति च पृष्टेन को वेत्तीति निवेदितम् ॥६१॥
अपरीक्षणशीलाना सहसा कार्यकारिणाम् । पश्चात्तापो भवत्येव जनाना प्राणधारिणाम् ॥६२॥
कान्ता यदि न पश्यामि मृत्युमेमि ततो ध्रुवम् । प्रतिज्ञैव कृतानेन त्वत्पुत्रेण सुनिश्चिता ॥६३॥
इति श्रुत्वा विलाप सा चकारेति सुदु खिता[3] । वेष्टिता स्त्रीसमूहेन स्रवल्लोचनवारिणा ॥६४॥
अज्ञातसत्यया कष्टं पापया किं मया कृतम् । येन पुत्र परिप्राप्तो जीवनस्य तु सशयम् ॥६५॥
[4]क्रूरसधानधारिण्या वक्रमानसया मया । असमीक्षितकारिण्या मन्दया किमनुष्ठितम् ॥६६॥
मुक्तं वायुकुमारेण पुरमेतन्न शोभते । विजयार्धगिरीशो वा सेवा वा रक्षसा विभो ॥६७॥
दुष्करो रावणस्यापि सन्धिर्येन रणे कृत । कस्तस्य मम पुत्रस्य सदृशोऽत्र नरो भुवि ॥६८॥
हा वत्स ! विनयाधार ! गुरुपूजनतत्पर ! । जगत्सुन्दर ! विख्यातगुण ! क्वासि गतो मम ॥६९॥
भवद्दु खाग्निसतप्ता मातर मातृवत्सल ! । प्रतिवाक्यप्रदानेन कुरु शोकविवर्जिताम् ॥७०॥

अधिक बड़ी मालूम हुई थी ॥५५॥ गौतमस्वामी राजा श्रेणिकसे कहते हैं कि हे राजन् ! यह वृत्तान्त तो मैंने तुझसे कहा । अब पवनञ्जयके घरसे चले जानेपर माता-पिताकी क्या चेष्टा हुई यह कहता हूँ सो सुन ॥५६॥

मित्रने जाकर जब पवनञ्जयका वृत्तान्तका कहा तब उसके समस्त भाई-बन्धु परम शोकको प्राप्त हुए ॥५७॥ अथानन्तर पुत्रके शोकसे पीड़ित केतुमती अश्रुओंकी धारासे दुर्दिन उपजाती हुई प्रहसितसे बोली कि हे प्रहसित ! क्या तुझे ऐसा करना उचित था जो तू मेरे पुत्रको छोड़कर अकेला आ गया ॥५८-५९॥ इसके उत्तरमे प्रहसितने कहा कि हे अम्ब ! उसीने प्रयत्नकर मुझे भेजा है । उसने मुझे किसी भी भावसे वहाँ नहीं ठहरने दिया ॥६०॥ केतुमतीने कहा कि वह कहाँ गया है ? प्रहसितने कहा कि जहाँ अञ्जना है । अञ्जना कहाँ है ? ऐसा केतुमतीने पुन. पूछा तो प्रहसितने उत्तर दिया कि मै नही जानता हूँ । जो मनुष्य बिना परीक्षा किये सहसा कार्य कर बैठते हैं उन्हें पश्चात्ताप होता ही है ॥६१-६२॥ प्रहसितने केतुमतीसे यह भी कहा कि तुम्हारे पुत्रने यह निश्चित प्रतिज्ञा की है कि यदि मै प्रियाको नहीं देखूँगा तो अवश्य ही मृत्युको प्राप्त होऊँगा ॥६३॥ यह सुनकर केतुमती अत्यन्त दु खी होकर विलाप करने लगी । उस समय जिनके नेत्रोसे अश्रु झर रहे थे ऐसी स्त्रियोका समूह उसे घेरकर बैठा था ॥६४॥ वह कहने लगी कि सत्यको जाने बिना मुझ पापिनीने क्या कर डाला जिससे पुत्र जीवनके सशयको प्राप्त हो गया ॥६५॥ क्रूर अभिप्रायको धारण करनेवाली कुटिल चित्त तथा बिना विचारे कार्य करनेवाली मुझ मूर्खाने क्या कर डाला ? ॥६६॥ वायुकुमारके द्वारा छोडा हुआ यह नगर शोभा नहीं देता । यही नगर क्यो ? विजयार्द्ध पर्वत ही शोभा नही देता और न रावणकी सेना ही उसके बिना सुशोभित है ॥६७॥ जो रावणके लिए भी कठिन थी ऐसी सन्धि युद्धमें जिसने करा दी मेरे उस पुत्रके समान पृथ्वीपर दूसरा मनुष्य है ही कौन ? ॥६८॥ हाय बेटा ! तू तो विनयका आधार था, गुरुजनोकी पूजा करनेमे सदा तत्पर रहता था, जगत् भरमे अद्वितीय सुन्दर था, और तेरे गुण सर्वत्र प्रसिद्ध थे फिर भी तू कहाँ चला गया ॥६९॥ हे मातृवत्सल ! जो तेरे दु ख रूपी अग्निसे

१. तद्विप्रेण म० । २. नाभ्याहृता म० । नाभ्याहता ज० । ३. सदुस्सहा म० । ४. क्रूरसाधन -ख०, ज०, म० । क्रूरयाधान- क० ।

विलापमपि कुर्वाणां ताडयन्तीमुरो[1] भृशम् । सान्त्वयन्वनिता कृच्छ्रात्प्रह्लादः साश्रुलोचन ॥७१॥
सर्वबन्धुजनाकीर्णं कृत्वा प्रहसित पुर । निर्यात. स्वपुरात् पुत्रमुपलब्धु समुत्सुक ॥७२॥
सर्वे चाह्वायिता तेन खगा द्विश्रेणिवासिनः । प्रीत्या ते तु समायाता परिवारसमन्विता ॥७३॥
रवे.[2] पन्थानमाश्रित्य भास्वद्विविधवाहना । अन्वेष्यस्ते मही यत्नाद् गह्वरन्यस्तलोचना ॥७४॥
प्रतिभानुरुदन्त त ज्ञात्वा प्रह्लाददूतत । [3]उद्वहन्मनसा शोकमञ्जनायै न्यवेदयत् ॥७५॥
प्रथमादपि सा दुःखात्ततो दुःखेन भूयसा । अश्रुधौतमुखा चक्रे [4]करुण परिदेवनम् ॥७६॥
हा नाथ प्राणसर्वस्व मम मानसबन्धन । क्व मा त्यक्त्वा प्रयातोऽसि क्लेशसन्ततिभागिनीम् ॥७७॥
किं वाद्यापि न त कोप विमुञ्चसि पुरातनम् । अदृश्यत्व यदेतोऽसि[5] सर्वविद्याभृतामपि ॥७८॥
अप्येक प्रतिवाक्य मे नाथ यच्छामृतोपमम् । नृत्वापन्नहितोन्मुक्ता महात्मानो भवन्ति हि ॥७९॥
इयन्त धारिता. काल भवद्दर्शनकाङ्क्षया । प्राणा मयाधुना कार्यं किमेतै पापकर्मभि ॥८०॥
समागममवाप्स्यामि[6] प्रियेणेति सम कृताः । कथ मनोरथा भग्ना दैवेनाफलिता मम ॥८१॥
कृते मे मन्दभाग्याया. प्रियोऽवस्थां गतो भवेत् । तामिद हृदय क्रूर या समाशङ्कते मुहु ॥८२॥
वसन्तमालिके पश्य किमिद वर्तते मम । असह्यविरहाङ्गारपल्यङ्कपरिवर्तनम् ॥८३॥
वसन्दमालया चोक्ता देवि मैवममङ्गलम् । [7]व्यरटी सर्वथासौ ते भर्ता गोचरमेष्यति ॥८४॥

सन्तप्त हो रही है ऐसी अपनी माताको प्रत्युत्तर देकर शोकरहित कर ॥७०॥ इस प्रकार विलाप करती और अत्यधिक छाती कूटती हुई केतुमतिको राजा प्रह्लाद सान्त्वना दे रहे थे पर शोकके कारण उनके नेत्रोसे भी टप-टप आँसू गिरते जाते थे ॥७१॥ तदनन्तर पुत्रको पानेके लिए उत्सुक राजा प्रह्लाद समस्त बन्धुजनोके साथ प्रहसितको आगेकर अपने नगरसे निकले ॥७२॥ उन्होने दोनो श्रेणियोमे रहनेवाले समस्त विद्याधरोको बुलवाया सो अपने-अपने परिवारसहित समस्त विद्याधर प्रेमपूर्वक आ गये ॥७३॥ जिनके नाना प्रकारके वाहन आकाशमें देदीप्यमान हो रहे थे और जिनके नेत्र नीचे गुफाओमे पड़ रहे थे ऐसे वे समस्त विद्याधर बड़े यत्नसे पृथ्वीकी खोज करने लगे ॥७४॥

ईधर प्रह्लादके दूतसे राजा प्रतिसूर्यको जब यह समाचार मालूम हुआ तो हृदयसे शोक धारण करते हुए उसने यह समाचार अञ्जनासे कहा ॥७५॥ अञ्जना पहलेसे ही दुःखी थी अब इस भारी दुःखसे और भी अधिक दुःखी होकर वह करुण विलाप करने लगी। विलाप करते समय उसका मुख अश्रुओसे धुल रहा था ॥७६॥ वह कहने लगी कि हाय नाथ! आप ही तो मेरे हृदयके बन्धन थे फिर निरन्तर क्लेश भोगनेवाली अबलाको छोड़कर आप कहाँ चले गये? ॥७७॥ क्या आज भी आप उस पुरातन क्रोधको नहीं छोड़ रहे है जिससे समस्त विद्याधरोके लिए अदृश्य हो गये है ॥७८॥ हे नाथ! मेरे लिए अमृत तुल्य एक भी प्रत्युत्तर दीजिए क्योंकि महापुरुष आपत्तिमें पड़े हुए प्राणियोका हित करना कभी नही छोडते ॥७९॥ मैने अब-तक आपके दर्शनकी आकाङ्क्षासे ही प्राण धारण किये हैं। अब मुझे इन पापी प्राणोसे क्या प्रयोजन है? ॥८०॥ मैं पतिके साथ समागमको प्राप्त होऊँगी, ऐसे जो मनोरथ मैंने किये थे वे आज दैवके द्वारा निष्फल कर दिये गये ॥८१॥ मुझ मन्द-भागिनीके लिए प्रिय उस अवस्थाको प्राप्त हुए होंगे जिसकी कि यह क्रूर हृदय बार-बार आशङ्का करता रहा है ॥८२॥ वसन्तमाले! देख तो यह क्या हो रहा है? मुझे असह्य विरहके अङ्गाररूपी शय्यापर कैसे लोटना पड़ रहा है? ॥८३॥ वसन्तमालाने कहा कि हे देवि! ऐसी अमाङ्गलिक रट मत लगाओ। मै निश्चित कहती

१. मुखे म० । २. रवें म० । ३. उद्वहत महाशोक- म० । तद्वहत महाशोक- क० । ४. करणं म० । ५. यदेतासि ब० । ६. मवाप्स्यामि (?) म० । ७. व्युपसर्गपूर्वकरटधातोर्लुङ्मध्यमपुरुषैकवचने रूपम् । व्यरटीः म०, ब०, ।

एष कल्याणि ते नाथमानयाम्यचिरादिति । प्रतिसूर्य समाश्वास्य कृच्छ्रेणाञ्जनसुन्दरीम् ॥८५॥
मनोहरं समारुह्य[1] खगयान मनोजवम् । नभोमूर्धानमुत्पत्य वीक्षमाण क्षितिं ययौ ॥८६॥
प्रतिभानुसमेतास्ते वैजयार्द्धा नभश्चरा. । त्रैकूटाश्च प्रयत्नेन निरैक्षन्त महीतलम् ॥८७॥
अथ भूतरवाटव्या ददृशुस्ते[2] महाद्विपम् । प्रावृषेण्यघनोदारसघाताकारधारिणम्[3] ॥८८॥
अथ स कालमेघाख्य[4] पवनद्विप इत्यमी । अभ्यज्ञासिषुरेनञ्च[5] पूर्वदृष्टैरनेकश ॥८९॥
अयमेष स हस्तीति जगदुश्च परस्परम् । सर्वे विद्याधरा हृष्टा सम कृतमहारवा[6] ॥९०॥
नीलाञ्जनगिरिच्छाय कुन्दराशिसितद्विज । युक्तप्रमाणहस्तोऽयं हस्ती यत्रावतिष्ठते ॥९१॥
पवनञ्जयवीरेण देशेऽत्र गतसशयम् । भवितव्यमय तस्य मित्रवत्पार्श्वगोचर ॥९२॥
वदन्त इति ते याता समीप तस्य दन्तिन । निरङ्कुशतया तस्य मनाग्वित्रस्तमानसा ॥९३॥
रवेण महता तेषा चुक्षोभ स महागज । दुर्निवारश्चलद्भीमसमस्ताङ्गो महाजव. ॥९४॥
मदक्लिन्नकपोलोऽसौ स्तब्धकर्ण सुगर्जित । दिश पश्यति यामेव तत्र क्षुभ्यन्ति खेचराः ॥९५॥
दृष्ट्वा जनसमूह त स्वामिरक्षणतत्पर. । पवनञ्जयसामीप्य न जहाति स वारणः ॥९६॥
मण्डलेन भ्रमत्यस्य सलील भ्रमयन् करम् । दर्शनेनैव चण्डेन त्रासयन् सर्वखेचरान्[7] ॥९७॥
करिणीभिरथावृत्य द्विप यत्नेन खेचरा । वशीकृत्य तमुद्देशमवतीर्णा. समुत्सुका ॥९८॥

हूँ कि भर्ता तुम्हारे समीप आवेगा ॥८४॥ 'हे कल्याणि ! मै तेरे भर्ताको अभी हाल ले आता हूँ' इस प्रकार अञ्जनाको बडे दु खसे आश्वासन देकर राजा प्रतिसूर्य मनके समान तीव्रवेग वाले सुन्दर विमानमे चढ़कर आकाशमे उड़ गया । वह पृथिवीको अच्छी तरह देखता हुआ जा रहा था ॥८५-८६॥ इस प्रकार विजयार्धवासी विद्याधर और त्रिकूटाचलवासी राक्षस राजा प्रतिसूर्यके साथ मिलकर बडे प्रयत्नसे पृथिवीका अवलोकन करने लगे ॥८७॥

अथानन्तर उन्होने भूतरव नामक अटवीमे वर्षा ऋतुके मेघके समान विशाल आकारको धारण करने वाला एक बडा हाथी देखा ॥८८॥ उस हाथीको उन्होने पहले अनेक वार देखा था इसलिए 'यह पवनकुमारका कालमेघ नामक हाथी है' इस प्रकार पहिचान लिया ॥८९॥ 'यह वही हाथी है' इस प्रकार सब विद्याधर हर्षित हो जोरसे हल्ला करते हुए परस्पर एक दूसरेसे कहने लगे ॥९०॥ जो नीलगिरि अथवा अञ्जनगिरिके समान सफेद हैं तथा जिसकी सूँड़ योग्य प्रमाणसे सहित है ऐसा यह हाथी जिस स्थानमें है नि सन्देह उसी स्थानमे पवनञ्जयको होना चाहिए क्योकि यह हाथी मित्रके समान सदा उसके समीप ही रहता है ॥९१-९२॥ इस प्रकार कहते हुए सब विद्याधर उस हाथीके पास गये । चूँकि वह हाथी निरङ्कुश था इसलिए विद्याधरों का मन कुछ-कुछ भयभीत हो रहा था ॥९३॥ उन विद्याधरोके महा शब्दसे वह महान् हाथी सचमुच ही क्षुभित हो गया । उस समय उसका रोकना कठिन था, उसका समस्त भयंकर शरीर चञ्चल हो रहा था और वेग अत्यन्त तीव्र था ॥९४॥ उसके दोनो कपोल मदसे भींगे हुए थे, कान खड़े थे और वह जोर-जोरसे गर्जना कर रहा था । वह जिस दिशामे देखता था उसी दिशा के विद्याधर क्षुभित हो जाते थे—भयसे भागने लगते थे ॥९५॥ उस जनसमूहको देखकर स्वामीकी रक्षा करनेमे तत्पर हाथी पवनञ्जयकी समीपताको नहीं छोड़ रहा था ॥९६॥ वह लीलासहित सूँड़को घुमाता और अपने तीक्ष्ण दर्शनसे ही समस्त विद्याधरोको भयभीत करता हुआ पवनञ्जयके चारो ओर मण्डलाकार भ्रमण कर रहा था ॥९७॥

तदनन्तर विद्याधर यत्नपूर्वक हस्तिनियोसे उस हाथीको घेरकर तथा वशमे कर उत्सुक

१ समासह्य म० । २. ददृशी म० । ३. धारिणाम् म० । ४. मेघाख्यपवन म० । ५. अभ्यसासिषु म० । ६. महारवः म० । ७. भययत्करम् म० ।

उपायेभ्यो हि सर्वेभ्यो वशीकरणवस्तुनि । कामिनीसङ्गमुज्झित्वा नापरं विद्यते परम् ॥९९॥
अथेक्षाञ्चक्रिरे वायुं विस्रस्ताङ्गं नभश्चराः । पुस्तकर्मसमाकारं वाचयमतया स्थितम् ॥१००॥
यथार्हमुपचारं ते चक्रुरस्य तथाप्यसौ । न प्रयच्छति चिन्तास्थः प्रतिवाक्यं मुनिर्यथा ॥१०१॥
पुत्रप्रीत्या तमाघ्राय पितरौ मस्तके मुहुः । आलिङ्ग्य च प्रमोदेन बाष्पस्थगितलोचनौ ॥१०२॥
ऊचतुर्वत्स सत्यज्य पितरौ कथमीदृशम् । चेष्टितं क्रियते त्वं हि विनीतानां धुरि स्थितः ॥१०३॥
वरशय्योचितः कायस्त्वयाद्य विजने वने । सवाहितः कथं भीमे रात्रौ पादपगह्वरे ॥१०४॥
इति सभाष्यमाणोऽपि नासौ वाचमुदाहरत् । मरणे निश्चितोऽस्मीति सञ्ज्ञयैव न्यवेदयत् ॥१०५॥
व्रतमेतन्मयोपात्तं यदप्राप्य महेन्द्रजाम् । न भुञ्जे न वदामीति तत्कथं भज्यतेऽधुना ॥१०६॥
आस्तां तावत्प्रिया सत्यव्रतं सरक्षता मया । गुरू [1]प्रश्वासितावेतौ कथमित्याकुलोऽभवत् ॥१०७॥
ततस्तं नतमूर्धानं मौनव्रतसमाश्रितम् । मरणे निश्चितं ज्ञात्वा जग्मुर्विद्याधराः शुचम् ॥१०८॥
समेतास्तत्पितृभ्यां ते विलेपुर्दीनमानसाः । संस्पृशन्तः करैरस्य शरीरं स्वेदधारिभिः ॥१०९॥
ततः स्मितमुखोऽवोचत् प्रतिसूर्यो नभश्चरान् । मा भूत विक्लवा वायुमेष वो भाषयाम्यहम् ॥११०॥
पवनं च परिष्वज्य जगादानुक्रमान्वितम् । कुमार शृणु यद्वृत्तं कथयामि तवाखिलम् ॥१११॥
सन्ध्याभ्रपर्वते रम्ये मुनेः कैवल्यमुद्गतम् । अनङ्गवीचिसञ्ज्ञस्य देवेन्द्रक्षोभकारणम् ॥११२॥
वन्दित्वा तं प्रदीपेन रात्रावागच्छता मया । रुदितध्वनिरश्रावि क्षीणस्तन्त्रीस्वनोपमः ॥११३॥

होते हुए उस स्थान पर उतरे ॥९८॥ वशीकरणके समस्त उपायोंमें स्त्रीसमागमको छोड़कर और दूसरा उत्तम उपाय नहीं है ॥९९॥ अथानन्तर जिसका समस्त शरीर ढीला हो रहा था, चित्रलिखितके समान जिसका आकार था और जो मौनसे बैठा था ऐसे पवनञ्जयको विद्याधरोंने देखा ॥१००॥ यद्यपि सब विद्याधरोंने उसका यथायोग्य उपचार किया तो भी वह मुनिके समान चिन्तामें निमग्न बैठा रहा—किसीसे कुछ नहीं कहा ॥१०१॥ माता पिताने पुत्रकी प्रीतिसे उसका मस्तक सूँघा, बार बार आलिङ्गन किया और इस हर्षसे उनके नेत्र आँसुओंसे आच्छादित हो गये ॥१०२॥ उन्होंने कहा भी कि हे बेटा ! तुम माता-पिताको छोड़कर ऐसी चेष्टा क्यों करते हो ? तुम तो विनीत मनुष्योंमें सबसे आगे थे ॥१०३॥ तुम्हारा शरीर उत्कृष्ट शय्या पर पड़ने के योग्य है पर तुमने आज इसे भयंकर एवं निर्जन वनके बीच वृक्षकी कोटरमें क्यों डाल रक्खा है ? ॥१०४॥ माता-पिताके इस प्रकार कहने पर भी उसने एक शब्द नहीं कहा। केवल इशारेसे यह बता दिया कि मैं मरनेका निश्चय कर चुका हूँ ॥१०५॥ मैंने यह व्रत कर रक्खा है कि अञ्जना को पाये बिना मैं न भोजन करूँगा और न बोलूँगा। फिर इस समय वह व्रत कैसे तोड़ दूँ ? ॥१०६॥ अथवा प्रियाकी बात जाने दो, सत्य-व्रतकी रक्षा करता हुआ मैं इन माता-पिताको किस प्रकार संतुष्ट करूँ यह सोचता हुआ वह कुछ व्याकुल हुआ ॥१०७॥ तदनन्तर जिसका मस्तक नीचेकी ओर झुक रहा था और जो मौनसे चुपचाप बैठा था ऐसे पवनञ्जयको मरनेके लिए कृतनिश्चय जानकर विद्याधर शोकको प्राप्त हुए ॥१०८॥ जिनके हृदय अत्यन्त दीन थे और जो स्वेदको धारण करने वाले हाथोंसे पवनञ्जयके शरीरका स्पर्श कर रहे थे ऐसे सब विद्याधर उसके माता-पिताके साथ विलाप करने लगे ॥१०९॥

तदनन्तर हँसते हुए प्रतिसूर्यने सब विद्याधरोंसे कहा कि आपलोग दुःखी न हों। मैं आप लोगोंसे पवन कुमारको बुलवाता हूँ ॥११०॥ तथा पवनञ्जयका आलिङ्गन कर क्रमानुसार उससे कहा कि हे कुमार ! सुनो, जो कुछ भी वृत्तान्त हुआ है वह सब मैं कहता हूँ ॥१११॥ संध्याभ्र नामक मनोहर पर्वतपर अनङ्गवीचि नामक मुनिराजको इन्द्रोंमें क्षोभ उत्पन्न करने वाला केवलज्ञान उत्पन्न हुआ था ॥११२॥ मैं उनकी वन्दना कर दीपकके सहारे रात्रिको चला आ रहा था

१. प्रशासितावेतौ म० ।

[1]अढौकिषि तमुद्देश गिरे प्रस्थ समुन्नतम् । पर्यङ्कनाम्नि दृष्टा च गुहायामञ्जना मया ॥११४॥
निर्वासकारण चास्या विज्ञाय विनिवेदितम् । मया प्राश्वासिता बाला [2]रुदती शोकविह्वला ॥११५॥
तस्यामसूत सा पुत्रमन्वित लक्षणै शुभै । यस्य भासा गुहा सासीत् सुवर्णेनेव निर्मिता ॥११६॥
[3]स तोष परम प्राप्त श्रुत्वा ता जातपुत्रिकाम् । ततस्तत इति क्षिप्रमपृच्छच्च समीरण ॥११७॥
अवोचत् स ततस्तस्या सुतोऽसौ चारुचेष्टित । विमाने स्थाप्यमान सन् पतित शैलगह्वरे ॥११८॥
अत्रान्तरे पुन प्राप्तो विषाद पवनञ्जय । हाकारमुखर सार्द्धं तया खेचरसेनया ॥११९॥
प्रतिभानु पुनश्चोचे मा गा शोक तत शृणु । यद्वृत्त तत्समस्त ते [4]वायो दु ख हरिष्यति ॥१२०॥
ततो हाकारशब्देन मुखरीकृतदिङ्मुखा । अवतीर्यानघ बालमैक्षिष्महि नगान्तरे ॥१२१॥
चूर्णितश्च तत शैलस्तेनासौ पतनात्तदा । श्रीशैल इति तेनासावस्माभिर्विस्मितै स्तुत ॥१२२॥
वसन्तमालया साक तत पुत्रेण सयुता । विमानमञ्जनारोप्य मया नीता निज पुरम् ॥१२३॥
ततो हनूरुहाभिख्ये पुरे सवर्द्धित शिशु । हनूमानिति तेनास्य द्वितीय नाम निर्मितम् ॥१२४॥
एषा ते कथिता साक पुत्रेणाद्भुतकर्मणा । मत्पुरे शीलसम्पन्ना तिष्ठतीति विबुध्यताम् ॥१२५॥
पुरस्कृत्य ततो वायु हृष्टा गगनचारिण । क्षिप्र हनूरुह जग्मुरञ्जनादर्शनोत्सुका ॥१२६॥
तेषा महोत्सवस्तत्र समागमकृतोऽभवत् । सुम्वेद्यस्तु दम्पत्योर्दुराख्यानो विशेषत ॥१२७॥
तत्र मासद्वय नीत्वा खेचराः प्रीतमानसा । आमन्त्र्य लब्धसन्माना ययुः स्थान यथायथम् ॥१२८॥

कि मैने वीणाके शब्दके समान किसी स्त्रीके रोनेका शब्द सुना ॥११३॥ मै उस शब्दको लक्ष्यकर पर्वतकी ऊँची चोटी पर गया। वहाँ मुझे पर्यङ्कनामकी गुफामे अञ्जना दिखी ॥११४॥ इसके निर्वासका कारण जो बताया गया था उसे जानकर शोकसे विह्वल होकर रोती हुई उस बालाको मैने सान्त्वना दी ॥११५॥ उसी गुफामें उसने शुभ लक्षणोसे युक्त ऐसा पुत्र उत्पन्न किया कि जिसकी प्रभासे वह गुफा सुवर्णसे बनी हुई के समान हो गई ॥११६॥ अञ्जनाके पुत्र हो चुका है यह जानकर पवनञ्जय परम सतोषको प्राप्त हुआ और फिर क्या हुआ ? फिर क्या हुआ ? यह शीघ्रतासे पूछने लगा ॥११७॥ प्रतिसूर्यने कहा कि उसके बाद अञ्जनाके उस सुन्दर चेष्टाओके धारक पुत्रको विमानमे बैठाया जा रहा था कि वह पर्वतकी गुफामे गिर गया ॥११८॥ यह सुनकर हाहाकार करता हुआ पवनञ्जय विद्याधरोंकी सेनाके साथ पुन. विषादको प्राप्त हुआ ॥११९॥ तब प्रतिसूर्यने कहा कि शोकको प्राप्त मत होओ। जो कुछ वृत्तान्त हुआ वह सब सुनो। हे पवन ! पूरा वृत्तान्त तुम्हारे दु खको दूर कर देगा ॥१२०॥ प्रतिसूर्य कहता जाता है कि तदनन्तर हाहाकारसे दिशाओको शब्दायमान करते हुए हम लोगोने नीचे उतरकर पर्वतके बीच उस निर्दोष बालकको देखा ॥१२१॥ चूँकि उस बालकने गिरकर पर्वतको चूर-चूर कर डाला था इसलिए हम लोगोने विस्मित होकर उसकी 'श्रीशैल' इस नामसे स्तुति की ॥१२२॥ तदनन्तर पुत्रसहित अञ्जनाको वसन्तमालाके साथ विमानमे बैठाकर मैं अपने नगर ले गया ॥१२३॥ आगे चलकर चूँकि उसका हनूरुह द्वीपमे संवर्धन हुआ है इसलिए हनुमान् यह दूसरा नाम भी रखा गया है ॥१२४॥ इस तरह आपने जिसका कथन किया है वह शीलवती अञ्जना आश्चर्य-जनक कार्य करनेवाले पुत्रके साथ मेरे नगरमे रह रही है सो ज्ञात कीजिए ॥१२५॥ तदनन्तर हर्षसे भरे विद्याधर अञ्जनाके देखनेके लिए उत्सुक हो पवनञ्जयको आगेकर शीघ्र ही हनूरुह नगर गये ॥१२६॥ वहाँ अञ्जना और पवनञ्जयका समागम हो जानेसे विद्याधरोंको महान् उत्सव हुआ। दोनों दम्पतियोंको जो उत्सव हुआ था वह स्वसंवेदनसे ही जाना जा सकता था विशेषकर उसका कहना अशक्य था ॥१२७॥ वहाँ विद्याधरोंने प्रसन्नचित्तसे दो महीने व्यतीत किये।

१. अढौकत म० । २. रुदन्ती क० । ३. तोषं च म०, ज०, ब०, क० । ४. वायोर्दुःख म०, क०, ज० ।

चिरात्सम्प्राप्तपत्नीक पवनोऽपि सुचेष्टित । तत्र गीर्वाणवद्रेमे सुतचेष्टाभिनन्दित ॥१२९॥
हनूमांस्तत्र सम्प्राप्य यौवनश्रियमुत्तमाम् । मेरुकूटसमानाङ्गः स्तेनक सर्वचेतसाम् ॥१३०॥
सिद्धविद्य प्रभावाढ्यो विनयज्ञो महाबल । सर्वशास्त्रार्थकुशल परोपकृतिदक्षिण ॥१३१॥
नाकोपभुक्तपाकस्य पुण्यशेषस्य भोजक[1] । रमते स्म पुरे तत्र गुरुपूजनतत्पर ॥१३२॥

## शार्दूलविक्रीडितम्

श्रीशैलस्य समुद्भवेन सहित वायो सम कान्तया
यो भावेन शृणोति सङ्गममिम नानारसैरद्भुतम् ।
जन्तोस्तस्य समस्तससृतिविधिज्ञानेन लब्धात्मनो
बुद्धिर्नाशुभकर्मणि प्रभवति प्रारब्धसत्कर्मण ॥१३३॥
आयुर्दीर्घमुदारविभ्रमयुत कान्तं वपुर्नीरुज[2]
मेधा सर्वकृतान्तपारविषया[3] कीर्तिं च चन्द्रामलाम् ।
पुण्य स्वर्गसुखोपभोगचतुर लोके च यद्दुर्लभ
तत्सर्वं सकृदश्नुते रविरिव स्फीतप्रभामण्डलम् ॥१३४॥

*इत्यार्षे रविषेणाचार्यप्रोक्ते पद्मचरिते पवनाञ्जनासमागमाभिधानं नामाष्टादशं पर्व ॥१८॥*

---

धैवत्यथार्षभीषड्जषड्जोदीच्या निषादिनी । गान्धारी चापरा षड्जकैकशी षड्जमध्यमा ॥१२॥
गान्धारोदीच्यसज्ञाभ्यां तथा मध्यमपञ्चमी । गान्धारपञ्चमी रक्तगान्धारी मध्यमा तथा ॥१३॥

अथानन्तर गौतमस्वामी कहते हैं कि हे श्रेणिक ! प्राण-रक्षाके लिए भ्रमण करते समय राजा दशरथका जो आश्चर्यकारी वृत्तान्त हुआ वह मै तेरे लिए कहता हूँ सो सुन । यहाँसे उत्तर दिशामे पर्वतके समान ऊँचे कोटसे सुशोभित कौतुकमङ्गल नामका नगर है ॥१-२॥ वहाँ सार्थक नामको धारण करनेवाला शुभमति नामका राजा राज्य करता था। उसकी पृथुश्री नामकी स्त्री थी जो कि स्त्रियोंके योग्य गुणरूपी आभूषणसे विभूषित थी ॥३॥ उन दोनोके केकया नामकी पुत्री और द्रोणमेघका नामका पुत्र ये दो सन्ताने हुईं। ये दोनो ही अपने अत्यन्त निर्मल गुणोके द्वारा आकाश तथा पृथिवीके अन्तरालको व्याप्त कर स्थित थे ॥४॥ उनमे जिसके सर्व अङ्ग सुन्दर थे. जो उत्तम लक्षणोको धारण करनेवाली तथा समस्त कलाओंकी पारगामिनी थी, ऐसी केकया नामकी पुत्री अत्यन्त सुशोभित हो रही थी ॥५॥ अङ्गहाराश्रय, अभिनयाश्रय और व्यायामिकके भेदसे नृत्यके तीन भेद है तथा इनके अन्य अनेक अवान्तर भेद है सो वह इन सबको जानती थी ॥६॥ वह उस संगीतको अच्छी तरह जानती थी जो कण्ठ शिर और उरस्थल इन तीन स्थानोसे अभिव्यक्त होता था, तथा नीचे लिखे सात स्वरोमे समवेत रहता था ॥७॥ षड्ज, ऋषभ, गान्धार, मध्यम, पञ्चम, धैवत और निषाद ये सात स्वर कहलाते है ॥८॥ जो द्रुत, मध्य और विलम्बित इन तीन लयोसे सहित था, तथा अस्र और चतुरस्र इन तालकी दो योनियोको धारण करता था ॥९॥ स्थायी, सचारी, आरोही और अवरोही इन चार प्रकारके वर्णोंसे सहित होनेके कारण जो चार प्रकारके पदोसे स्थित था ॥१०॥ प्रातपदिक, तिङन्त, उपसर्ग, और निपातोमें संस्कारको प्राप्त संस्कृत, प्राकृत और शौरसेनी यह तीन प्रकारकी भाषा जिसमें स्थित थी ॥११॥ धैवती, आर्षभी, षड्ज-षड्जा, उदीच्या, निषादिनी, गान्धारी, षड्जकैकशी और षड्जमध्यमा ये आठ जातियाँ है अथवा गान्धारोदीच्या, मध्यमपञ्चमी, गान्धारपञ्चमी,

---

१. यदर्थं ज० । २. यत्रा म० । ३. परमागता म०, ख० । ४. शिरसोदसा म०, ज० । ५. तथारोहावरोहिभिः म० । ६. पदास्थितम् म० ।

आन्ध्री च मध्यमोदीच्या स्मृता कर्मारवीति च । प्रोक्ताथ नन्दनी चान्या कैशिकी चेति जातय ॥१४॥
इमाभिर्जातिभिर्युक्तमष्टाभिर्दशभिस्तथा । अलकारैरमीभिश्च त्रयोदशभिरन्वितम्[1] ॥१५॥
प्रसन्नादि· प्रसन्नान्तस्तथा मध्यप्रसादवान् । प्रसन्नाद्यवसानश्च चतुर्धा स्थायिभूषणम् ॥१६॥
निर्वृत्त प्रस्थितो बिन्दुस्तथा प्रेङ्खोलित स्मृत । तारो मन्द्र· प्रसन्नश्च षोढा सचारिभूषणम् ॥१७॥
आरोहिण· प्रसन्नादिरेकमेव विभूषणम् । प्रसन्नान्तस्तथा तुल्य कुहरश्चावरोहिण· ॥१८॥
गदितौ द्वावलङ्काराविन्यलङ्कारयोजनम् । अवागात् साधुगीत च लक्षणैरेभिरन्वितम् ॥१९॥
तत तन्त्रीसमुत्थानमवनद्ध मृदङ्गजम् । शुषिर वशसभूत घन तालसमुत्थितम् ॥२०॥
चतुर्विधमिद वाद्य नानाभेदै समन्वितम् । जानाति स्म नितान्त सा यथैव विरलोऽपर ॥२१॥
कलाना तिसृणामासा नाट्यमेकीक्रियोच्यते । श्रृङ्गारहास्यकरुण[2]वीराद्भुतभयानका ॥२२॥
रौद्रबीभत्सशान्ताश्च रसास्तत्र नवोदिता । वेत्ति स्म तद्सो बाला स[3]प्रभेदमनुत्तमम् ॥२३॥
अ[4]नुवृत्त लिपिज्ञान यत्स्वदेशे प्रवर्तते । द्वितीय विकृत ज्ञेय कल्पित यत्स्वसज्ञया ॥२४॥
प्र[5]त्यङ्गादिषु वर्णेषु तत्त्व सामयिक स्मृतम् । नैमित्तिक च पुष्पादिद्रव्यविन्यासतोऽपरम् ॥२५॥
प्राच्यमध्यमयौधेयसमाद्रादिभिरन्वितम् । लिपिज्ञानमसौ बाला किल ज्ञातवती परम् ॥२६॥
अ[6]स्त्युक्तिकौशल नाम भिन्न[7]स्थानादिभि कला । स्थान स्वरोऽथ सस्कारो विन्यास काकुना सह ॥२७॥
समुदायो विरामश्च सामान्याभिहितस्तथा । समानार्थत्वभाषा च जातयश्च प्रकीर्तिता ॥२८॥
उर· कण्ठ शिरश्चेति स्थान तत्र त्रिधा स्मृतम् । उक्त एव स्वर पूर्व षड्जादि सप्तभेदक ॥२९॥

रक्तगान्धारी, मध्यमा, आन्ध्री, मध्यमोदीच्या, कर्मारवी, नन्दिनी और कैशिकी ये दश जातियाँ है । सो जो सगीत इन आठ अथवा दश जातियोसे युक्त था तथा इन्हीं और आगे कहे जानेवाले तेरह अलंकारोसे सहित था ॥१२–१५॥ प्रसन्नादि, प्रसन्नान्त, मध्यप्रसाद और प्रसन्नाद्यवसान ये चार स्थायी पदके अलंकार हैं ॥१६॥ निर्वृत्त, प्रस्थित, बिन्दु, प्रेङ्खोलित, तार-मन्द्र, और प्रसन्न ये छह संचारी पदके अलंकार है ॥१७॥ आरोही पदका प्रसन्नादि नामका एक ही अलकार है और अवरोही पदके प्रसन्नान्त तथा कुहर ये दो अलकार है । इस प्रकार तेरह अलकार है सो इन सब लक्षणोंसे सहित उत्तम संगीतको वह अच्छी तरह जानती थी ॥१८–१९॥ तन्त्री अर्थात् वीणासे उत्पन्न होनेवाला तत, मृदङ्गसे उत्पन्न होनेवाला अवनद्ध, बाँसुरीसे उत्पन्न होनेवाला शुषिर और तालसे उत्पन्न होनेवाला घन ये चार प्रकारके वाद्य है, ये सभी वाद्य नाना भेदोसे सहित हैं । वह केकया इन सबको इस तरह जानती थी कि उसकी समानता करनेवाला दूसरा व्यक्ति विरला ही था ॥२०–२१॥ गीत, नृत्य और वादित्र इन तीनोंका एक साथ होना सो नाट्य कहलाता है । श्रृङ्गार, हास्य, करुणा, वीर, अद्भुत, भयानक, रौद्र, बीभत्स, और शान्त ये नौ रस कहे गये है सो बाला केकया उन्हें अनेक अवान्तर भेदोंके साथ उत्कृष्टतासे जानती थी ॥२२–२३॥ जो लिपि अपने देशमे आमतौरसे चलती है उसे अनुवृत्त कहते है । लोग अपने-अपने संकेतानुसार जिसकी कल्पना कर लेते है उसे विकृत कहते है । प्रत्यङ्ग आदि वर्णोंमे जिसका प्रयोग होता है उसे सामयिक कहते हैं और वर्णोंके बदले पुष्पादि पदार्थ रखकर जो लिपिका ज्ञान किया जाता है उसे नैमित्तिक कहते है । इस लिपिके प्राच्य, मध्यम, यौधेय, समाद्र आदि देशोंकी अपेक्षा अनेक अवान्तर भेद होते है सो केकया उन सबको अच्छी तरह जानती थी ॥२४–२६॥ जिसके स्थान आदिके अपेक्षा अनेक भेद है ऐसी उक्तिकौशल नामकी कला है । स्थान, स्वर, संस्कार, विन्यास, काकु, समुदाय, विराम, सामान्याभिहित, समानार्थत्व, और भाषा ये जातियाँ कही गई हैं ॥२७–२८॥ इनमेसे उरस्थल, कण्ठ और मूर्द्धाके भेदसे स्थान

१. रन्विता । २. कारुण्य ब०, म० । ३. सतभेद- म० । ४. अनुवृत्तिलिपि ब० । ५. अत्यङ्गादिषु म० । ६. अस्युक्ति म० । ७. भिन्न स्थानादिभिः म० ।

सस्कारो द्विविध. प्रोक्तो लक्षणोद्देशतस्तथा । विन्यासस्तु सखण्डा स्यु पदवाक्यास्तदुत्तरा ॥३०॥
सापेक्षा निरपेक्षा च काकुर्भेदद्वयान्विता । गद्य पद्यश्च मिश्रश्च समुदायस्त्रिधोदित ॥३१॥
सक्षिप्तता विरामस्तु सामान्याभिहित पुन । शब्दानामेकवाच्याना प्रयोग परिकीर्तित ॥३२॥
तुल्यार्थतैकशब्देन बह्वर्थप्रतिपादनम् । [1]भाषार्यलक्षणम्लेच्छनियमात्त्रिविधा स्मृता ॥३३॥
पद्यव्यवहृतिर्लेख एवमाद्यास्तु जातय । व्यक्तवाग्लोकवाग्मार्गव्यवहारश्च मातर ॥३४॥
एतेषामपि भेदाना ये भेदा बुधगोचरा [2] । सर्वैरेभि समायुक्त सात्यवैदुक्तिकौशलम् ॥३५॥
शुष्कचित्र द्विधा प्रोक्त नानाशुष्क च वर्जितम् । आर्द्रचित्र पुनर्नाना चन्दनादिद्रवोद्भवम् ॥३६॥
कृत्रिमाकृत्रिमैरङ्गैर्भूजलाम्बरगोचरम् । वर्णकै[3]श्लेषसयुक्त सा विवेदाखिलं शुभा ॥३७॥
पुस्तकर्म त्रिधा प्रोक्त क्षयोपचयसक्रमै । तक्षणादिक्रमोद्भूत काष्ठादौ [4]क्षयज स्मृतम् ॥३८॥
उपचित्या मृदादीनामुपचेय तु कथ्यते । सक्रान्त तु यदाहृत्य प्रतिबिम्ब विभाव्यते ॥३९॥
यन्त्रनिर्यन्त्रसच्छिद्रनिश्छिद्रादिभिरन्वितम् । सा जज्ञे तद्यथा भद्रा लोकेभ्यो दुर्लभस्तथा ॥४०॥
त्रुष्किम छिन्नमछिन्न पत्रच्छेद्य त्रिधोदितम् । सूचीदन्तादिभिस्तत्र निर्मित त्रुष्किम स्मृतम् ॥४१॥

तीन प्रकारका माना गया है। स्वरके षड्ज आदि सात भेद पहले कह ही आये है ॥२९॥ लक्षण और उद्देश अथवा लक्षणा और अभिधाकी अपेक्षा सस्कार दो प्रकारका कहा गया है। पदवाक्य महावाक्य आदिके विभागसहित जो कथन है वह विन्यास कहलाता है ॥३०॥ सापेक्षा और निरपेक्षाकी अपेक्षा काकु दो भेदोसे सहित है। गद्य, पद्य और मिश्र अर्थात् चम्पूकी अपेक्षा समुदाय तीन प्रकारका कहा गया है ॥३१॥ किसी विषयका सक्षेपसे उल्लेख करना विराम कहलाता है। एकार्थक अर्थात् पर्यायवाची शब्दोका प्रयोग करना सामान्याभिहित कहा गया है ॥३२॥ एक शब्दके द्वारा बहुत अर्थका प्रतिपादन करना समानार्थता है। आर्य, लक्षण और म्लेच्छके नियमसे भाषा तीन प्रकारकी कही गई है ॥३३॥ इनके सिवाय जिसका पद्यरूप व्यवहार होता है उसे लेख कहते है। ये सब जातियाँ कहलाती हैं। व्यक्तवाक्, लोकवाक् और मार्गव्यवहार ये मातृकाएँ कहलाती है। इन सब भेदोके भी अनेक भेद हैं जिन्हें विद्वज्जन जानते है। इन सबसे सहित जो भाषण चातुर्य है उसे उक्ति-कौशल कहते है। केकया इस उक्ति-कौशलको अच्छी तरह जानती थी ॥३४–३५॥

नानाशुष्क और वर्जितके भेदसे शुष्कचित्र दो प्रकारका कहा गया है तथा चन्दनादिके द्रवसे उत्पन्न होनेवाला आर्द्रचित्र अनेक प्रकारका है ॥३६॥ कृत्रिम और अकृत्रिम रङ्गोके द्वारा पृथ्वी, जल तथा वस्त्र आदिके ऊपर इसकी रचना होती है। यह अनेक रङ्गोके सम्बन्धसे संयुक्त होता है। शुभ लक्षणोवाली केकया इस समस्त चित्रकलाको जानती थी ॥३७॥ क्षय, उपचय और संक्रमके भेदसे पुस्तकर्म तीन प्रकारका कहा गया है। लकड़ी आदिको छील-छालकर जो खिलौना आदि बनाये जाते है उसे क्षयजन्य पुस्तकर्म कहते है। ऊपरसे मिट्टी आदि लगाकर जो खिलौना आदि बनाये जाते हैं उसे उपचयजन्य पुस्तकर्म कहते हैं तथा जो प्रतिबिम्ब अर्थात् साँचे आदि गड़ाकर बनाये जाते है उसे संक्रमजन्य पुस्तकर्म कहते हैं ॥३८–३९॥ यह पुस्तकर्म, यन्त्र, निर्यन्त्र, सच्छिद्र तथा निश्छिद्र आदिके भेदोसे सहित है, अर्थात् कोई खिलौना यन्त्रचालित होते है, और कोई बिना यन्त्रके होते हैं, कोई छिद्रसहित होते है, कोई छिद्ररहित। वह केकया पुस्तकर्मको ऐसा जानती थी जैसा दूसरोंके लिए दुर्लभ था ॥४०॥ पत्रच्छेदके तीन भेद है त्रुष्किम छिन्न और अच्छिन्न। सुई अथवा दन्त आदिके द्वारा जो बनाया जाता है उसे त्रुष्किम कहते हैं। जो कैंचीसे काटकर बनाया जाता है तथा जो अन्य अवयवोंके सम्बन्धसे युक्त होता है उसे

१. भाषापलक्षण- म० । २. बुद्धयगोचराः म० । ३. वर्णकैः श्लेषम- म० । ४. क्षयसम्भृतम् म० ।

कर्तरीच्छेदनोद्भूत छिन्न सम्बन्धसंयुतम् । विच्छिन्न तु तदुद्भूत सम्बन्धपरिवर्जितम् ॥४२॥
पत्रवस्त्रसुवर्णादिसभव स्थिरचञ्चलम् । निर्णिन्ये सा पर चार्वी सवृतासवृतादिजम् ॥४३॥
आर्द्र शुष्क तदुन्मुक्त मिश्र चेति चतुर्विधम् । माल्य तत्रार्द्रपुष्पादिसभव प्रथम मतम् ॥४४॥
शुष्कपत्रादिसभूत शुष्कमुक्त तदुज्झितम् । सिक्थकादिसमुद्भूत सकीर्ण तु त्रिसंकरात् ॥४५॥
रणप्रबोधनव्यूहसयोगादिभिरन्वितम् । तद्विधातुमल प्राज्ञा साज्ञासीत् पूरणादिजम् ॥४६॥
योनिद्रव्यमधिष्ठान रसो वीर्यं च कल्पना । परिकर्म गुणा दोषा युक्तिरेषा तु कौशलम् ॥४७॥
योनिर्विशिष्टमूलादिद्रव्य तु तगरादिकम् । यद्वर्णवर्तिकाद्येतदधिष्ठान प्रकीर्तितम् ॥४८॥
कषायो मधुरस्तिक्त कटुकाम्लश्च कीर्तित । रस पञ्चविधो यस्य निर्हारेण विनिश्चय ॥४९॥
द्रव्याणां शीतमुष्ण च वीर्यं तत्र द्विधा स्मृतम् । कल्पनात्र विवादानुवादसवादयोजनम् ॥५०॥
परिकर्म पुन स्नेहशोधनक्षालनादिकम् । ज्ञान च गुणदोषाणा पाटवादीतरात्मनाम् ॥५१॥
स्वतन्त्रानुगताख्येन ता भेदेन समन्विताम् । गन्धयुक्तिमसौ सर्वामजानाद्युक्तविभ्रमा ॥५२॥
भक्ष्य भोज्य[1] च पेय च लेह्य चूष्य च पञ्चधा । आसाद्य तत्र भक्ष्य तु कृत्रिमाकृत्रिम स्मृतम् ॥५३॥
[2]भोज्य द्विधा यवाग्वादिविशेषाश्चौदनादय । शीतयोगो जल मद्यमिति पेय त्रिधोदितम् ॥५४॥
रागखाण्डवलेह्याख्य लेह्य त्रिविधमुच्यते । कृत्रिमाकृत्रिम चूष्य द्विविध परिकीर्तितम् ॥५५॥

---

छिन्न कहते है । जो कैंची आदिसे काटकर बनाया जाता है तथा अन्य अवयवोके सम्बन्धसे रहित होता है उसे अच्छिन्न कहते है ॥४१-४२॥ यह पत्रच्छेद्यक्रिया पत्र, वस्त्र तथा सुवर्णादिके ऊपर की जाती है तथा स्थिर और चञ्चल दोनो प्रकारकी होती है । सुन्दरी केकयाने इस कलाका अच्छी तरह निर्णय किया था ॥४३॥

आर्द्र, शुष्क, तदुन्मुक्त और मिश्रके भेदसे मालानिर्माणकी कला चार प्रकारकी है । इनमेसे गीले अर्थात् ताजे पुष्पादिसे जो माला बनाई जाती है उसे आर्द्र कहते है, सूखे पत्र आदिसे जो बनाई जाती है उसे शुष्क कहते है । चावलोके सीथ अथवा जवा आदिसे जो बनाई जाती है उसे तदुज्झित कहते है और जो उक्त तीनो चीजोके मेलसे बनाई जाती है उसे मिश्र कहते है ॥४४-४५॥ यह माल्यकर्म रणप्रबोधन, व्यूहसंयोग आदि भेदोसे सहित होता है वह बुद्धिमती केकया इस समस्त कार्यको करना अच्छी तरह जानती थी ॥४६॥ योनिद्रव्य, अधिष्ठान, रस, वीर्य, कल्पना, परिकर्म, गुण दोष विज्ञान तथा कौशल ये गन्धयोजना अर्थात् सुगन्धित पदार्थ निर्माणरूप कलाके अङ्ग है । जिनसे सुगन्धित पदार्थोंका निर्माण होता है ऐसे तगर आदि योनिद्रव्य है, जो धूपबत्ती आदिका आश्रय है उसे अधिष्ठान कहते है, कषायला, मधुर, चिरपरा, कड़आ और खट्टा यह पॉच प्रकारका रस कहा गया है जिसका सुगन्धित द्रव्यमे खासकर निश्चय करना पड़ता है ॥४७-४९॥ पदार्थोंकी जो शीतता अथवा उष्णता है वह दो प्रकारका वीर्य है । अनुकूल प्रतिकूल पदार्थोका मिलाना कल्पना है ॥५०॥ तेल आदि पदार्थोंका शोधना तथा धोना आदि परिकर्म कहलाता है, गुण अथवा दोषका जानना सो गुण-दोष विज्ञान है और परकीय तथा स्वकीय वस्तुकी विशिष्टता जानना कौशल है ॥५१॥ यह गन्धयोजनाकी कला स्वतन्त्र और अनुगतके भेदसे सहित है । केकया इस सबको अच्छी तरह जानती थी ॥५२॥ भक्ष्य, भोज्य, पेय, लेह्य और चूष्यके भेदसे भोजन सम्बन्धी पदार्थोंके पॉच भेद है । इनमेसे जो स्वादके लिए खाया जाता है उसे भक्ष्य कहते है । यह कृत्रिम तथा अकृत्रिमके भेदसे दो प्रकारका है ॥५३॥ जो क्षुधा निवृत्तिके लिए खाया जाता है उसे भोज्य कहते है, इसके भी मुख्य और साधककी अपेक्षा दो भेद है । ओदन रोटी आदि मुख्य भोज्य हैं और लप्सी दाल शाक आदि साधक भोज्य है ॥५४॥ शीतयोग ( शर्बत ) जल और मद्य के भेदसे पेय

---

१. २. भोग्य म० ।

पाचनच्छेदनोष्णत्वशीतत्वकरणादिभि । युक्तमास्वाद्यविज्ञानमासीत्तस्या मनोहरम् ॥५६॥
वज्रमौक्तिकवैडूर्यसुवर्णं रजतायुधम् । वस्त्रसखादि[1] चावेदीत् सा रत्न लक्षणादिभि ॥५७॥
तन्तुसन्तानयोग च वस्त्रस्य बहुवर्णकम् । रागाधान च सा चारु विवेदातिशयान्वितम् ॥५८॥
लोहदन्तजतुक्षारशिला[2]सूत्रादिसभवम् । तथोपकरण कर्तुं ज्ञातमत्यन्तमुद्धया ॥५९॥
मेयदेशतुलाका[3]लभेदान्मान चतुर्विधम् । तत्र प्रस्थादिभिर्भिन्न मेयमान प्रकीर्तितम् ॥६०॥
देशमान वितस्त्यादि तुलामान पलादिकम् । समयादि तु यन्मान तत्कालस्य प्रकीर्तितम् ॥६१॥
तच्चारोहपरीणाहतिर्यग्गौरवभेदत । क्रियातश्च समुत्पन्न साध्यगान्मानमुत्तमम् ॥६२॥
भूतिकर्म [4]निधिज्ञान रूपज्ञान वणिग्विधि[5] । अन्यथा जीवविज्ञानमासीत्तस्या विशेषवत् ॥६३॥
मानुषद्विपगोवाजिप्रभृतीना चिकित्सितम् । सा निदानादिभिर्भेदयुक्त ज्ञातवती परम् ॥६४॥
मायाकृत त्रिधा पीडाशक्रजाल विमोहनम् । मन्त्रौषधादिभिर्जात तच्च सर्वं विवेद सा ॥६५॥
समय च समीच्यादि पाखण्डपरिकल्पितम् । चारित्रेण पदार्थैश्च विवेद विविधैर्युतम् ॥६६॥
चेष्टोपकरण[6] वाणी कलाव्यत्यसन तथा । क्रीडा चतुर्विधा प्रोक्ता तत्र चेष्टा शरीरजा ॥६७॥
[7]कन्दुकादि तु विज्ञेय तत्रोपकरण बहु । वाक्क्रीडन पुनर्नाना सुभाषितसमुद्भवम् ॥६८॥
नानादुरोदरन्यास. कलाव्यत्यसन स्मृतम् । क्रीडायां बहुभेदायामस्या सात्यन्तकोविदा ॥६९॥

---

तीन प्रकारका कहा गया है ॥५५॥ इन सबका ज्ञान होना आस्वाद्यविज्ञान है। यह आस्वाद्यविज्ञान पाचन, छेदन, उष्णत्वकरण तथा शीतत्वकरण आदिके भेदसे सहित है, केकयाको इस सबका सुन्दर ज्ञान था ॥५६॥

वह वज्र अर्थात् हीरा, मोती, वैडूर्य ( नीलम ), सुवर्ण, रजतायुध, तथा वस्त्र-शङ्खादि रत्नोको उनके लक्षण आदिसे अच्छी तरह जानती थी ॥५७॥ वस्त्रपर धागेसे कढ़ाईका काम करना तथा वस्त्रको अनेक रङ्गोमे रँगना इन कार्योंको वह बड़ी सुन्दरता और उत्कृष्टताके साथ जानती थी ॥५८॥ वह लोहा, दन्त, लाख, क्षार, पत्थर तथा सूत आदिसे बननेवाले नाना उपकरणोको बनाना बहुत अच्छी तरह जानती थी ॥५९॥ मेय, देश, तुला और कालके भेदसे मान चार प्रकारका है। इसमेसे प्रस्थ आदिके भेदसे जिसके अनेक भेद हैं उसे मेय कहते है ॥६०॥ वितस्ति हाथ देशमान कहलाता है, पल छटाक सेर आदि तुलामान कहलाता है और समय घडी घण्टा आदि कालमान कहा गया है ॥६१॥ यह मान आरोह, परीणाह, तिर्यग्गौरव और क्रियासे उत्पन्न होता है। इस सबको वह अच्छी तरह जानती थी ॥६२॥ भूतिकर्म अर्थात् बेलबूटा खींचनेका ज्ञान, निधिज्ञान अर्थात् गड़े हुए धनका ज्ञान, रूप ज्ञान, वणिग्विधि अर्थात् व्यापार कला, तथा जीवविज्ञान अर्थात् जन्तुविज्ञान इन सबको वह विशेष रूपसे जानती थी ॥६३॥ वह मनुष्य, हाथी, गौ तथा घोड़ा आदिकी चिकित्साको निदान आदिके साथ अच्छी तरह जानती थी ॥६४॥ विमोहन अर्थात् मूर्च्छाके तीन भेद है मायाकृत, पीडा अथवा इन्द्रजालकृत और मन्त्र तथा ओषधि आदि द्वारा कृत। सो इस सबको वह अच्छी तरह जानती थी ॥६५॥ पाखण्डीजनोके द्वारा कल्पित सांख्य आदि मतोको वह उनमे वर्णित चारित्र तथा नाना प्रकारके पदार्थोंके साथ अच्छी तरह जानती थी ॥६६॥

चेष्टा, उपकरण, वाणी और कला व्यासङ्गके भेदसे क्रीड़ा चार प्रकारकी कही गई है उनमे शरीरसे उत्पन्न होनेवाली क्रीड़ाको चेष्टा कहा है ॥६७॥ गेंद आदि खेलना उपकरण है, नाना प्रकारके सुभाषित आदि कहना वाणी-क्रीडा है और जुआ आदि खेलना कलाव्यासंग नामक

---

१. वस्त्र संखादिवावेदीत् ब० । २. शिलास्तन्त्रादि म०, ज० । ३. कार । ४. निधिज्ञानं म०, ज० । ५. विधिम् म०, ब०, ज०, ख० । ६. करणा म० । ७. कन्दुकादिति म०, ब०, ज० ।

आश्रिताश्रयतो भिन्नो लोको द्विविध उच्यते । आश्रिता जीवनिर्जीवा पृथिव्यादिस्तदाश्रया ॥७०॥
तत्र नानाभवोत्पत्ति स्थितिर्नश्वरता तथा । ज्ञायते यदिद प्रोक्त लोकज्ञत्व सुदुर्गमम् ॥७१॥
पौर्वापर्योधरोभूर्यद्वीपदेशादिभेदत । स्वभावावस्थिते लोके बभूवास्यास्तदुत्तमम् ॥७२॥
सवाहनकला द्वेधा तत्रैका कर्मसंश्रया । शय्यौपचारिका चान्या प्रथमा तु चतुर्विधा ॥७३॥
त्वङ्मांसास्थिमन सौख्यादेते [1]त्वासामुपक्रमा । सस्पृष्ट च गृहीत च भुक्तित चलित तथा ॥७४॥
आहत भङ्गित विद्ध पीडित भिन्नपाटितम् । मृदुमध्यप्रकृष्टत्वात्तत्पुनर्भिद्यते त्रिधा ॥७५॥
त्वक्सुख सुकुमार तु मध्यम मांससौख्यकृत् । उत्कृष्टमस्थिसौख्याय मृदुगीति मन.सुखम् ॥७६॥
दोषास्तस्या [2] प्रतीप यल्लोम्नामुद्वर्तन तथा । निर्मांसपीडित बाढ केशाकर्षणमद्भुतम् ॥७७॥
भ्रष्टप्राप्तममार्गेण प्रयातमतिभुग्नकम् । आदेशाहतमत्यर्थमवसुप्तप्रतीपकम् ॥७८॥
एभिर्दोषैर्विनिर्मुक्त सुकुमारमतीव च । योग्यदेशप्रयुक्त च ज्ञाताकूत च शोभनम् ॥७९॥
करणैर्विविधैर्या तु जन्यते चित्तसौख्यदा । सवाहनावगम्या सा शय्योपचरणात्मिका ॥८०॥
सवाहनकलामेतामङ्गप्रत्यङ्गगोचराम् । अवेदसौ यथा कन्या नान्या नारी तथा घनम् ॥८१॥
शरीरवेषसस्कारकौशल च कला परा । स्नानमूर्धजवासादि निरचैषीदिमा च सा ॥८२॥

क्रीड़ा है इस प्रकार वह अनेको भेदवाली क्रीड़ामे अत्यन्त निपुण थी ॥६८–६९॥ आश्रित और आश्रयके भेदसे लोक दो प्रकारका कहा गया है। इनमेसे जीव और अजीव तो आश्रित है तथा पृथ्वी आदि उनके आश्रय है ॥७०॥ इसी लोकमे जीवको नाना पर्यायोमे उत्पत्ति हुई है उसीमे यह स्थित रहा है तथा उसीमे इसका नाश होता है यह सब जानना सो लोकज्ञता है। यह लोकज्ञता प्राप्त होना अत्यन्त कठिन है ॥७१॥ पूर्वापर पर्वत, पृथ्वी, द्वीप, देश आदि भेदोमे यह लोक स्वभावसे ही अवस्थित है। केकयाको इसका उत्तम ज्ञान था ॥७२॥

संवाहन कला दो प्रकारकी है उनमेसे एक कर्मसंश्रया है और दूसरी शय्योपचारिका। त्वचा, मांस, अस्थि और मन इन चारको सुख पहुँचानेके कारण कर्मसंश्रयाके चार भेद है अर्थात् किसी संवाहनसे केवल त्वचाको सुख मिलता है, किसीसे त्वचा और मांसको सुख मिलता है, किसीसे त्वचा मांस और हड्डीको सुख मिलता है और किसीसे त्वचा मांस हड्डी एवं मन इन चारोंको सुख प्राप्त होता है। इसके सिवाय इसके सस्पृष्ट, गृहीत, भुक्तित, चलित, आहत, भङ्गित, विद्ध, पीडित और भिन्नपीडित ये भेद भी है। ये ही नही मृदु, मध्य और प्रकृष्टके भेदसे तीन भेद और भी होते हैं ॥७३–७५॥ जिस संवाहनसे केवल त्वचाको सुख होता है वह मृदु अथवा सुकुमार कहलाता है। जो त्वचा और मांसको सुख पहुँचाता है वह मध्यम कहा जाता है और जो त्वचा मास तथा हड्डीको सुख देता है वह प्रकृष्ट कहलाता है। इसके साथ जब कोमल सङ्गीत और होता है तब वह मन'सुखसवाहन कहलाने लगता है ॥७६॥ इस संवाहन कलाके निम्नलिखित दोष भी है—शरीरके रोमोको उलटा उद्वर्तन करना, जिस स्थानमे मांस नहीं है वहाँ अधिक दबाना, केशाकर्षण, अद्भुत, भ्रष्टप्राप्त, अमार्गप्रयात, अतिभुग्नक, अदेशाहत, अत्यर्थ और अवसुप्तप्रतीपक, जो इन दोषोंसे रहित है, योग्यदेशमे प्रयुक्त है तथा अभिप्रायको जानकर किया गया है ऐसा सुकुमारसंवाहन अत्यन्त शोभास्पद होता है ॥७७–७९॥ जो संवाहन क्रिया अनेक कारण अर्थात् आसनोसे की जाती है वह चित्तको सुख देनेवाली शय्योपचारिका नामकी क्रिया जाननी चाहिए ॥८०॥ अङ्ग-प्रत्यङ्गसे सम्बन्ध रखनेवाली इस संवाहनकलाको जिस प्रकार वह कन्या जानती थी उस प्रकार अन्य स्त्री नहीं जानती थी ॥८१॥ स्नान करना, शिरके बाल गूँथना तथा उन्हें सुगन्धित आदि करना यह शरीर संस्कार

१. चासा- ख०, वासा ज० । २. दोषास्तस्याः म० ।

एवमाद्या कलाश्चारुशीला लोकमनोहरा । अदीधरत्समस्ता सा विनयोत्तमभूषणा[1] ॥८३॥
कलागुणाभिरूप च समुद्भूता त्रिविष्टपे । अद्वितीया बभौ तस्या कीर्तिराकृष्टमानसा ॥८४॥
बहुनात्र किमुक्तेन श्रृणु राजन् समासत । तस्या वर्षशतेनापि तु शक्य रूपवर्णनम् ॥८५॥
पित्रा प्रधारित तस्या योग्य कोऽस्या भवेद् वर । स्वय रुचितमेवेय गृह्णात्विति विसशयम् ॥८६॥
[2]तदर्थं पार्थिवा सर्वे वसुमत्यामुपाहृता । हरिवाहननामाद्याः पुरोविभ्रमभूषिता ॥८७॥
गतो दशरथोऽप्यस्य जनकेन सह भ्रमन् । स्थित स तादृशोऽप्येतान् लक्ष्म्या[3] प्रच्छाद्य भूपतीन् ॥८८॥
मञ्चेषु सुप्रपञ्चेषु निविष्टान् वसुधाधिपान् । प्रत्येकमैर्चतोदारान्[4]प्रतीहार्या निवेदितान् ॥८९॥
भ्राम्यन्ती सा तत साध्वी नरलक्षणपण्डिता । कण्ठे दाशरथे न्यास दृष्टिनीलोत्पलस्रजम् ॥९०॥
भूपालनिवहस्थ त सा ययौ चारुविभ्रमा । राजहस यथा हसी वकवृन्दव्यवस्थितम् ॥९१॥
भावमालागृहीतेऽस्मिन् न्यस्ता या द्रव्यमालिका । पौनरुक्त्य प्रपेदेऽसौ लोकाचारकृतास्पदा ॥९२॥
केचित्तत्र जगुस्तारं प्रसन्नमनसो नृपा । अहो योग्यो वृत कोऽपि पुरुषोऽय सुकन्यया ॥९३॥
केषाञ्चित्त्वतिवैलक्ष्यात् स्वदेशगमन प्रति । विरराभातिदूरेण मनो वैवर्ण्यमीयुषाम् ॥९४॥
केचिदत्यन्तधृष्टत्वात् परम कोपमागता । युद्ध प्रति मनश्चक्रु कृतकोलाहला भृशम् ॥९५॥
[5]जगुश्च ख्यातसद्वंशान् महाभोगसमन्वितान् । त्यक्त्वा[6] नो गृह्णतीमेतमज्ञातकुलशीलिनम् ॥९६॥

वेषकौशल नामकी कला है सो वह कन्या इसे भी अच्छी तरह जानती थी ॥८२॥ इस तरह सुन्दर शीलकी धारक तथा विनयरूपी उत्तम आभूषणसे सुशोभित वह कन्या इन्हें आदि लेकर लोगोके मनको हरण करनेवाली समस्त कलाओको धारण कर रही थी ॥८३॥

कलागुणके अनुरूप उत्पन्न तथा लोगोके मनको आकृष्ट करनेवाली उसकी कीर्ति तीनो लोकोमे अद्वितीय अर्थात् अनुपम सुशोभित हो रही थी ॥८४॥ हे राजन् ! अधिक कहनेसे क्या ? संक्षेपमे इतना ही सुनो कि उसके रूपका वर्णन सौ वर्षोंमे भी होना असंभव है ॥८५॥ पिताने विचार किया कि इसके योग्य वर कौन हो सकता है ? अच्छा हो कि यह स्वयं ही अपनी इच्छानुसार वरको ग्रहण करे ॥८६॥ ऐसा निश्चयकर उसने स्वयंवरके लिए पृथिवी पर हरिवाहन आदि समस्त राजा एकत्रित किये। वे राजा स्वयवरके पूर्व ही नाना प्रकारके विभ्रमो अर्थात् हावभावोसे सुशोभित हो रहे थे ॥८७॥ राजा जनकके साथ घूमते हुए राजा दशरथ वहाँ जा पहुँचे । राजा दशरथ यद्यपि साधारण वेषभूषामे थे तो भी वे अपनी शोभासे उपस्थित अन्य राजाओको आच्छादित कर वहाँ विराजमान थे ॥८८॥ सुसज्जित मञ्चोंके ऊपर बैठे हुए उदार राजाओका परिचय प्रतीहारी दे रही थी और मनुष्योंके लक्षण जाननेमे पण्डित वह साध्वी कन्या घूमती हुई प्रत्येक राजाको देखती जाती थी । अन्तमे उसने अपनी दृष्टिरूपी नीलकमलकी माला दशरथके कण्ठमे डाली ॥८९-९०॥ जिस प्रकार बगलोंके बीचमे स्थित राजहंसके पास हंसी पहुँच जाती है उसी प्रकार सुन्दर हाव भावको धारण करनेवाली वह कन्या राजसमूहके बीचमे स्थित राजा दशरथके पास जा पहुँची ॥९१॥ उसने दशरथको भावमालासे तो पहले ही ग्रहण कर लिया था फिर लोकाचारके अनुसार जो द्रव्यमाला डाली थी वह पुनरुक्तताको प्राप्त हुई थी ॥९२॥ उस मण्डपमें प्रसन्नचित्तके धारक कितने ही राजा जोर-जोरसे कह रहे थे कि अहो ! इस उत्तम कन्याने योग्य तथा अनुपम पुरुष वरा है ॥९३॥ और कितने ही राजा अत्यन्त धृष्टताके कारण कुपित हो अत्यधिक कोलाहल करने लगे ॥९४॥ वे कहने लगे कि अरे ! प्रसिद्ध वंशमे उत्पन्न तथा महाभोगोंसे सम्पन्न हम लोगोंको छोड़कर इस दुष्ट कन्याने जिसके कुल और

१. भूषणाः म० । २. यदर्थं म० । ३. लक्ष्म्या म० । ४. मैक्षितोदारान् म० । ५. जगुश्च ख० । ६. त्यक्त्वातो म०।

अमुं कमपि वैदेशं दुरभिप्रायकारिणीम् । गृहीत[1] मूर्धजाकृष्टा प्रसभं दुष्टकन्यकाम् ॥९७॥
इत्युक्त्वा ते सुसन्नद्धा समुद्यतमहायुधाः । नृपा दशरथान्तेन[2] चलिताः क्रुद्धचेतसः[3] ॥९८॥
ततः समाकुलीभूतो वरं शुभमतिर्जगौ । भद्र यावन्नृपानेतान् क्षुभ्धान् वारयाम्यहम् ॥९९॥
रथमारोप्य तावत्त्वं कन्यामन्तर्हितो भव । कालज्ञानं हि सर्वेषां नयानां मूर्धनि स्थितम् ॥१००॥
एवमुक्तो जगादासौ स्मितं कृत्वातिधीरधीः । विश्रब्धो भव माम त्वं पश्यैतान्कांदिशीकृतान् ॥१०१॥
इत्युक्त्वा रथमारुह्य संयुक्तं प्रौढवाजिभिः । भृशं सववृते भीमः शरन्मध्याह्नभानुभा.[4] ॥१०२॥
उत्सार्य केकया चाशु रथवाहं[5] रणाङ्गणे । तस्थौ पौरुषमालम्ब्य तोत्रप्रग्रहधारिणी ॥१०३॥
उवाच च प्रयच्छाज्ञां नाथ कस्योपरि द्रुतम् । चोदयामि रथं[6] तस्य मृत्युरद्यातिवत्सल ॥१०४॥
जगादासौ किमत्रान्यैर्वराकैर्निहतैर्नरैः । मूर्द्धानमस्य सैन्यस्य पुरुषं पातयाम्यहम्[7] ॥१०५॥
यस्यैतत्पाण्डुरं छत्रं विभाति शशिविभ्रमम् । एतस्याभिमुखं कान्ते रथं चोदय पण्डिते ॥१०६॥
एवमुक्ते तयात्यन्तं धीरया वाहितो रथः । समुच्छ्रितसितच्छत्रस्तरङ्गितमहाध्वजः ॥१०७॥
केतुच्छायामहाज्वाले तत्र दम्पतिदेवते । रथाग्नौ योधशलभा दृष्टा नष्टाः सहस्रशः ॥१०८॥
दशस्यन्दननिर्मुक्तैर्नाराचैरर्दिता नृपाः । क्षणात्पराङ्मुखीभूताः परस्परविलङ्घिनः ॥१०९॥
ततो हेमप्रभेणैते चोदिता लज्जिता जिताः[8] । निवृत्य पुनरारब्धा[9] हन्तुं दाशरथं रथम् ॥११०॥

शीलका पता नहीं ऐसे परदेशी किसी मनुष्यको वरा है सो इसका अभिप्राय दुष्ट है । इसके केश पकड़कर खींचो और इसे जबर्दस्ती पकड़ लो ॥९५–९७॥ ऐसा कहकर वे राजा बड़े-बड़े शस्त्र उठाते हुए युद्धके लिए तैयार हो गये तथा क्रुद्धचित्त होकर राजा दशरथकी ओर चल पड़े ॥९८॥

तदनन्तर कन्याके पिता शुभमतिने घबड़ा कर दशरथसे कहा कि हे भद्र! जब तक मैं इन क्षुभित राजाओंको रोकता हूँ तब तक तुम कन्याको रथपर चढ़ाकर कहीं अन्तर्हित हो जाओ—छिप जाओ क्योंकि समयका ज्ञान होना सब नयोंके शिरपर स्थित है अर्थात् सब नीतियोंमें श्रेष्ठ नीति है ॥९९–१००॥ इस प्रकार कहनेपर अत्यन्त धीर-वीर बुद्धिके धारक राजा दशरथने मुसकराकर कहा कि हे माम! निश्चिन्त रहो और अभी इन सबको भयसे भागता हुआ देखो ॥१०१॥ इतना कहकर वे प्रौढ घोड़ोंसे जुते रथपर सवार हो शरद्ऋतुके मध्याह्न काल सम्बन्धी सूर्यके समान अत्यन्त भयंकर हो गये ॥१०२॥ केकयाने रथके चालक सारथिको तो उतार दिया और स्वयं शीघ्र ही साहसके साथ चाबुक तथा घोड़ोंकी रास सँभालकर युद्धके मैदानमें जा खड़ी हुई ॥१०३॥ और बोली कि हे नाथ! आज्ञा दीजिए, किसके ऊपर रथ चलाऊँ? आज मृत्यु किसके साथ अधिक स्नेह कर रही है? ॥१०४॥ दशरथने कहा कि यहाँ अन्य क्षुद्र राजाओंके मारनेसे क्या लाभ है? अतः इस सेनाके मस्तक स्वरूप प्रधान पुरुषको ही गिराता हूँ। हे चतुर वल्लभे! जिसके ऊपर यह चन्द्रमाके समान सफेद छत्र सुशोभित हो रहा है इसीके सन्मुख रथ ले चलो ॥१०५–१०६॥ ऐसा कहते ही उस धीर वीराने जिसपर सफेद छत्र लग रहा था तथा बड़ी भारी ध्वजा फहरा रही थी ऐसा रथ आगे बढ़ा दिया ॥१०७॥ जिसमें पताकाकी कान्तिरूपी बड़ी-बड़ी ज्वालाएँ उठ रही थीं तथा दम्पती ही जिसमें देवता थे ऐसे रथरूपी अग्निमें हजारों योधारूपी पतंगे नष्ट होते हुए दिखने लगे ॥१०८॥ दशरथके द्वारा छोड़े बाणोंसे पीड़ित राजा एक दूसरेको लाँघते हुए क्षणभरमें पराङ्मुख हो गये ॥१०९॥

तदनन्तर पराजित होनेसे लज्जित हुए राजाओंको हेमप्रभने ललकारा, जिससे वे लौटकर

---

१. गृहीतमूर्द्धजा-म० । २. दशरथं तेन म०, ज०, क०, ब० । ३. क्षुद्रचेतसः म० । ४. भानुभम् म० । ५. रथवाहान् क० । ६. पश्य म० । ७. पातयाम्यथ ब० । ८. भृशम् ख० । ९. -रारब्ध म० ।

वाजिभिः स्यन्दनैर्नागैः पादातैश्च नृपा[1] वृताः । कृतशूरमहानादा घनसंघातवर्तिनः ॥१११॥
तोमराणि शरान्पाशाश्चक्राणि कनकानि च । तमेकं नृपमुद्दिश्य चिक्षिपुश्च समुद्यताः ॥११२॥
चित्रमेकरथो भूत्वा तदा दशरथो नृपः । जातः शतरथः शक्त्या निःसंख्यानरथोऽथवा ॥११३॥
विचिच्छेद स नाराचैः समं शस्त्राणि विद्विषाम् । अदृष्टाकर्षसंधानैश्चक्रीकृतशरासनः ॥११४॥
छिन्नध्वजातपत्रः सन् विह्वलीकृतवाहनः । शरैर्हेमप्रभस्तेन क्षणेन विरथीकृतः ॥११५॥
स रथान्तरमारुह्य भयावततमानसः । द्रुतं पलायनं चक्रे कृष्णीकुर्वन्निजं यशः ॥११६॥
ररक्ष स्वं च जायां च शत्रूनस्त्राणि चाच्छिनत् । एको दशरथः कर्म चक्रेऽनन्तरथोचितम् ॥११७॥
दृष्ट्वा दशरथं सिंहं विधूतशरकेसरम् । दुद्रुवुर्योधसारङ्गाः परिगृह्य दिगष्टकम् ॥११८॥
अहो शक्तिर्नरस्यास्य ही[2] चित्रं कन्यया कृतम् । इति नादः समुत्तस्थौ महान् स्वपरसेनयोः ॥११९॥
वन्दिघोषितशब्देन शक्त्या वानन्यतुल्यया । जनैर्दशरथो जज्ञे प्रतापं क्षिप्रदुन्नतम् ॥१२०॥
ततः पाणिग्रहस्तेन कृतः कौतुकमङ्गले । कन्यायाः परलोकेन [3]कृतकौतुकमङ्गले[4] ॥१२१॥
महता भूतिभारेण वृत्तोपयमनोत्सवः । ययौ दशरथोऽयोध्यां मिथिलां जनको [5]यथा ॥१२२॥
पुनर्जन्मोत्सवं तस्य तस्यां चक्रेऽतिसम्मदः । पुनर्नृपाभिषेकं च परिवर्गो महर्द्धिभिः ॥१२३॥
अशेषभयनिर्मुक्तो रेमे तत्र स पुण्यवान् । आखण्डल इव स्वर्गे प्रतिमानितशासनः ॥१२४॥

पुनः दशरथके रथको नष्ट करनेका प्रयत्न करने लगे ॥११०॥ जो घोड़ो, रथो, हाथियो तथा पैदल सैनिकोसे घिरे थे, सिंहनाद कर रहे थे तथा बहुत बड़े समूहके साथ वर्तमान थे ऐसे अनेक राजा अकेले राजा दशरथको लक्ष्यकर तोमर, बाण, पाश, चक्र और कनक आदि शस्त्र बडी तत्परतासे चला रहे थे ॥१११-११२॥ बड़े आश्चर्यकी बात थी कि राजा दशरथ एकरथ होकर भी दशरथ थे तो और उस समय तो अपने पराक्रमसे शतरथ अथवा असख्यरथ हो रहे थे ॥११३॥ चक्राकार धनुषके धारक राजा दशरथने जिनके खींचने और रखनेका पता नहीं चलता था ऐसे बाणोसे एक साथ शत्रुओके शस्त्र छेद डाले ॥११४॥ जिसका ध्वजा और छत्र कटकर नीचे गिर गया था तथा जिसका वाहन थककर अत्यन्त व्याकुल हो गया था ऐसे राजा हेमप्रभको दशरथने क्षणभरमे रथरहित कर दिया ॥११५॥ तदनन्तर जिसका मन भयसे व्याप्त था ऐसा हेमप्रभ दूसरे रथपर सवार हो अपने यशको मलिन करता हुआ शीघ्र ही भाग गया ॥११६॥ राजा दशरथने शत्रुओ तथा शस्त्रोको छेद डाला और अपनी तथा स्त्रीकी रक्षा की। उस समय एक दशरथने जो काम किया था वह अनन्तरथके योग्य था ॥११७॥ जो बाणरूपी जटाओको हिला रहा था ऐसे दशरथरूपी सिंहको देखकर योद्धारूपी हरिण आठो दिशाएँ पकड़कर भाग गये ॥११८॥ उस समय अपनी तथा शत्रुकी सेनामें यही जोरदार शब्द उठ रहा था कि अहो ! इस मनुष्यकी कैसी अद्भुत शक्ति है ? और इस कन्याने कैसा कमाल किया ? ॥११९॥ उन्नत प्रतापको धारण करनेवाले राजा दशरथको लोग पहिचान सके थे तो वन्दीजनोंके द्वारा घोषित जयनाद अथवा उनकी अनुपम शक्तिसे ही पहिचान सके थे ॥१२०॥

तदनन्तर अन्य लोगोने जहाँ कौतुक एवं मङ्गलाचार किये थे ऐसे कौतुकमङ्गल नामा नगरमे राजा दशरथने कन्याका पाणिग्रहण किया ॥१२१॥ तत्पश्चात् बड़े भारी वैभवसे जिनका विवाहोत्सव सम्पन्न हुआ था ऐसे राजा दशरथ अयोध्या गये और राजा जनक मिथिलापुरी गये ॥१२२॥ वहाँ हर्षसे भरे परिजनोंने बड़े वैभवके साथ राजा दशरथका पुनर्जन्मोत्सव और पुनर्राज्याभिषेक किया ॥१२३॥ जो सब प्रकारके भयसे रहित थे तथा जिनकी आज्ञाको सब शिरोधार्य करते थे ऐसे पुण्यवान् राजा दशरथ स्वर्गमें इन्द्रकी तरह अयोध्यामें क्रीड़ा करते थे

१. नृपाहताः म०। २. हि म०। हा ख०। ३. कृतः म०, ब०, ज०। ४ मङ्गलम् म०। ५. तथा म०।

तत्र प्रत्यक्षमन्यासां पत्नीनां भूभृतां तथा । अभ्यधायि नरेन्द्रेण केकयासन्नवर्तिनी ॥१२५॥
पूर्णेन्दुवदने ब्रूहि यत्ते वस्तु मनीषितम् । इह सपादयाम्यद्य प्रसन्नोऽस्मि तव प्रिये ॥१२६॥
चोदयेन्नातिविज्ञानाद्यदि[1] नाम तथा रथम् । कथं क्रुद्धारिसंघातं विजयेय[2] सहोत्थितम् ॥१२७॥
अवस्थितं जगद्व्याप्य[3] नुदेदर्कः कथं तमः । सव्येष्टा[4] चेन्नवेदस्य न मूर्तिररुणात्मिका ॥१२८॥
गुणग्रहणसंजात[5]व्रीडाभारनतानना । मुहुः प्रचोदितोवाच कथंचिदिति केकया ॥१२९॥
नाथ न्यासोऽयमास्तां मे त्वयि वाञ्छितयाचनम् । प्रार्थयिष्ये यदा तस्मिन् काले दास्यसि निर्वचाः ॥१३०॥

## भुजङ्गप्रयातम्

इति प्रोक्तमात्रे जगौ भूमिनाथः समग्रेन्दुनाथप्रतिस्पर्द्धिवक्त्रः ।
भवत्वेव मुग्धे पृथुश्रोणिसौम्ये त्रिवर्णातिकान्तप्रसन्नोरुनेत्रे ॥१३१॥
अहो बुद्धिरस्या [6]महागोत्रजाया नयाढ्या नितान्तं कलापारगायाः ।
समस्तोपभोगैरलं सङ्गताया कृतं न्यासभूतं [7]मतप्रार्थनं यत् ॥१३२॥
समस्तोऽपि तस्यास्तदाभीष्टवर्गः प्रयातः प्रमोदं प्रकृष्टं नितान्तम् ।
विचिन्त्य प्रधानं शुभा कञ्चिदर्थं शनैर्मार्गयिष्यत्यहो केकयेति ॥१३३॥
मतेर्गोचरत्वं मया तावदेतत्प्रणीतं सुवृत्त धरित्रीपते ते ।
समुत्पत्तिमस्मान्महामानवानां शृणु द्योतकानामुदारान्वयस्य ॥१३४॥

---

॥१२४॥ वहाँ राजा दशरथने अन्य सपत्नियों तथा राजाओंके समक्ष पास बैठी हुई केकयासे कहा कि हे पूर्णचन्द्रमुखि ! प्रिये ! जो वस्तु तुम्हें इष्ट हो वह कहो, मैं उसे पूर्ण कर दूँ। आज मैं बहुत प्रसन्न हूँ ॥१२५-१२६॥ यदि तुम उस समय बड़ी चतुराईसे उस प्रकार रथ नहीं चलातीं तो मैं एक साथ उठे हुए कुपित शत्रुओंके समूहको किस प्रकार जीतता ? ॥१२७॥ यदि अरुण सारथि नहीं होता तो समस्त जगत्में व्याप्त होकर स्थित अन्धकारको सूर्य किस प्रकार नष्ट कर सकता ? तदनन्तर गुणग्रहणसे उत्पन्न लज्जाके भारसे जिसका मुख नीचा हो रहा था ऐसी केकयाने बार-बार प्रेरित होनेपर भी किसी प्रकार यह उत्तर दिया कि हे नाथ ! मेरी इच्छित वस्तुकी याचना आपके पास धरोहरके रूपमें रहे। जब मैं माँगूँगी तब आप बिना कुछ कहे दे देंगे ॥१२८-१३०॥ केकयाके इतना कहते ही पूर्णचन्द्रमाके समान मुखको धारण करनेवाले राजा दशरथने कहा कि हे प्रिये ! हे स्थूलनितम्बे ! हे सौम्यवर्णे ! तीन रङ्गके अत्यन्त सुन्दर, स्वच्छ एवं विशाल नेत्रोंको धारण करनेवाली ! ऐसा ही हो ॥१३१॥ राजा दशरथने अन्य लोगोंसे कहा कि अहो ! महाकुलमें उत्पन्न, कलाओंकी पारगामिनी तथा महाभोगोंसे सहित इस केकयाकी बुद्धि अत्यधिक नीतिसे सम्पन्न है कि जो इसने अपने वरकी याचना धरोहररूप कर दी है ॥१३२॥ यह पुण्यशालिनी धीरे-धीरे विचारकर किसी अभिलषित उत्तम अर्थको माँग लेगी ऐसा विचारकर उसके सभी इष्ट परिजन उस समय अत्यधिक परम आनन्दको प्राप्त हुए थे ॥१३३॥

गौतमस्वामी श्रेणिकसे कहते हैं कि हे राजन् ! मैंने बुद्धिके अनुसार तेरे लिए यह राजा

---

१. -न्नादिविज्ञाना -म० । २. विजयेऽहं म० । ३. व्याप्य म० । ४. सवेष्टा म० । सव्येष्टा ख० 'सव्येष्टा सारथिः' । ५. सघात म० । ६. उच्चकुलसमुत्पन्नायाः इति ब० पुस्तके टिप्पणम् । ७. मनःप्रार्थनं म०, ब० ।

समासेन सर्वं वदाम्येष तेऽहं त्रिलोकस्य वृत्तं किमत्र प्रपञ्चैः ।
दुराचारयुक्ता परं यान्ति दुःखं सुखं साधुवृत्ता रविप्रख्यभासः ॥१३५॥

*इत्यार्षे रविषेणाचार्यप्रोक्ते पद्मचरिते केकयावरप्रदानं नाम*
*चतुर्विंशतितमं पर्व ॥२४॥*

---

दशरथका सुवृत्तान्त कहा है। अब इससे अपने उदार वंशको प्रकाशित करनेवाले महामानवोकी उत्पत्तिका वर्णन सुन ॥१३४॥ तीन लोकका वृत्तान्त जाननेके लिए विस्तारकी आवश्यकता नहीं। अतः मै संक्षेपसे ही तेरे लिए यह कहता हूँ कि दुराचारी मनुष्य अत्यन्त दुःख प्राप्त करते हैं और सूर्यके समान दीप्तिको धारण करनेवाले सदाचारी मनुष्य सुख प्राप्त करते है ॥१३५॥

*इस प्रकार आर्ष नामसे प्रसिद्ध रविषेणाचार्य कथित*
*पद्मचरितमे केकयाके वरदानका वर्णन करनेवाला*
*चौबीसवॉ पर्व समाप्त हुआ ॥२४॥*

# पञ्चविंशतितमं पर्व

अथापराजिता देवी सुखं सुप्ता वरालये । शयनीये महाकान्ते [1]रत्नोद्योतसरःस्थिते ॥१॥
रजन्याः पश्चिमे यामे महापुरुषवेदिनः । नितान्तं परमान् स्वप्नानैक्षताशयिता यथा ॥२॥
शुभ्रं स्तम्बेरमं सिंहं पद्मिनीबान्धवं विधुम् । दृष्ट्वा विबोधमायाता तूर्यमङ्गलनिस्वनैः ॥३॥
ततः प्रत्यङ्गकार्याणि कृत्वा विस्मितमानसा । दिवाकरकरालोकमण्डिते भुवने सति ॥४॥
सा विनीतान्तिकं भर्तुर्गत्वात्यन्तसमाकुला । सखीभिरावृता भद्रपीठभूषणकारिणी ॥५॥
कृताञ्जलिर्जगौ स्वप्नान् किञ्चिद्विनतविग्रहा । स्वामिने सावधानाय यथादृष्टान्मनोहरान् ॥६॥
ततो निखिलविज्ञानपारदृश्वा नराधिपः । बुधमण्डलमध्यस्थः स्वप्नानामभ्यधात् फलम् ॥७॥
परमाश्चर्यहेतुस्ते कान्ते पुत्रो भविष्यति । अन्तर्बहिश्च शत्रूणां यः करिष्यति शातनम् ॥८॥
एवमुक्ते परं तोषं [2]हस्तस्पृष्टोदरी ययौ । [3]स्मितकेसरसरुद्धमुखपद्मापराजिता ॥९॥
चकार च समं भर्त्रा परं प्रमदमीयुषा । जिनेन्द्रवेश्मसुस्फीतां पूजां पूजितभावना ॥१०॥
ततः प्रभृतिकान्त्यासौ सुतरां समावगाह्यते । बभूव चेतसश्चास्याः शान्तिः कापि महौजसः ॥११॥
सुमित्रानन्तरं तस्या ईक्षाञ्चक्रेऽतिसुन्दरी । विस्मिता पुलकोपेता स्वप्नान् साधुमनोरथा ॥१२॥

---

अथनान्तर उत्तम महलमे रत्नोके प्रकाशरूपी सरोवरके मध्यमे स्थित अत्यन्त सुन्दर शय्यापर सुखसे सोती हुई अपराजिता रानीने रात्रिके पिछले पहरमे महापुरुषके जन्मको सूचित करनेवाले अत्यन्त आश्चर्यकारक स्वप्न देखे। वे स्वप्न उसने इतनी स्पष्टतासे देखे थे जैसे मानो जाग ही रही थी ॥१–२॥ पहले स्वप्नमे उसने सफेद हाथी, दूसरेमे सिंह, तीसरेमे सूर्य और चौथेमे चन्द्रमा देखा था। इन सबको देखकर वह तुरहीके माङ्गलिक शब्दसे जाग उठी ॥३॥ तदनन्तर जिसका मन आश्चर्यसे भर रहा था ऐसी अपराजिता प्रातःकाल सम्बन्धी शारीरिक क्रियाएँ कर, जब सूर्यके प्रकाशसे समस्त संसार सुशोभित हो गया तब बड़ी विनयसे पतिके पास गई। स्वप्नोका फल जाननेके लिए उसका हृदय अत्यन्त आकुल हो रहा था तथा अनेक सखियाँ उसके साथ गई थीं। जाकर वह उत्तम सिंहासनको अलंकृत करने लगी ॥४–५॥ जिसका शरीर संकोचवश कुछ नीचेकी ओर झुक रहा था ऐसी अपराजिताने हाथ जोड़कर स्वामीके लिए सब मनोहर स्वप्न जिस क्रमसे देखे थे उसी क्रमसे सुना दिये और स्वामीने भी बड़ी सावधानीसे सुने ॥६॥ तदनन्तर समस्त ज्ञानोके पारदर्शी एवं विद्वत्समूहके बीचमे स्थित राजा दशरथने स्वप्नोका फल कहा ॥७॥ उन्होंने कहा कि हे कान्ते! तुम्हारे परम आश्चर्यका कारण ऐसा पुत्र उत्पन्न होगा जो अन्तरङ्ग और बहिरङ्ग दोनो प्रकारके शत्रुओका नाश करेगा ॥८॥ पतिके ऐसा कहनेपर अपराजिता परम सन्तोषको प्राप्त हुई। उसने हाथसे उदरका स्पर्श किया तथा उसका मुखरूपी कमल मन्द मुसकानरूपी केशरसे व्याप्त हो गया ॥९॥ प्रशस्त भावनासे युक्त अपराजिताने परम प्रसन्नताको प्राप्त पतिके साथ जिन-मन्दिरोमे भगवान्‌की महापूजा की ॥१०॥ उस समयसे दिन-प्रति-दिन उसकी कान्ति बढ़ने लगी तथा उसका चित्त यद्यपि महाप्रतापसे युक्त था तो भी उसमे अद्‌भुत शान्ति उत्पन्न हो गई थी ॥११॥

तदनन्तर अतिशय सुन्दरी सुमित्रा रानीने स्वप्न देखे। स्वप्न देखते समय वह आश्चर्यसे चकित हो गई थी, उसके समस्त शरीरमे रोमाञ्च निकल आये थे और उसका अभिप्राय अत्यन्त

---

१. रत्नोद्योतशिरस्थिते म०, ब० । २. हस्तस्पृष्टोदरा क० । ३. मुखकेसर- म० ।

सिच्यमान मृगाधीश लक्ष्म्या कीर्त्या च सादरम् । कलशैश्चावमानास्यकमलैश्चारुवारिभि ॥१३॥
आत्मान चातितुङ्गस्य भूभृतो मूर्धनि स्थितम् । पश्यन्त मेदिनी स्फीता निम्नगापतिमेखलाम् ॥१४॥
स्फुरत्किरणजाल च दिवसाधिपविभ्रमम् । नानारत्नोचित चक्र सौम्य कृतविवर्तनम् ॥१५॥
वीक्ष्य मङ्गलनादेन तथैव कृतबोधना । विनीताकथयत् पत्ये नितान्त मधुरस्वना ॥१६॥
सूनुर्युगप्रधानस्ते[1] शत्रुचक्रक्षयावह । भविष्यति महातेजाश्चित्रचेष्टो वरानने ॥१७॥
इत्युक्ता सा सती पत्या समदाक्रान्तमानसा । ययौ निजास्पद लोक पश्यन्तीवाधरस्थितम् ॥१८॥
अथानेहसि सपूर्णे पूर्णेन्दुमिव[2] पूर्वदिक् । असूत तनय कान्त्या विशालमपराजिता ॥१९॥
दिष्ट्यावर्धनकारिभ्य प्रयच्छन् वसु पार्थिवः । बभूव चामरच्छत्रपरिधानपरिच्छद ॥२०॥
जमोत्सवो महानस्य चक्रे निःशेषबान्धवैः । महाविभवसम्पन्नैरुन्मत्तीभूतविष्टप. ॥२१॥
तरुणादित्यवर्णस्य पद्मालिङ्गितवक्षस. । पद्मनेत्रस्य पद्माख्या पितृभ्या तैस्य निर्मिता ॥२२॥
सुमित्रापि तत. पुत्रमसूत परमद्युतिम् । छायादिगुणयोगेन सद्रत्न रत्नभूरिव ॥२३॥
पद्मजन्मोत्सवस्यानुसन्धानमिव कुर्वता । जनितो बन्धुवर्गेण तस्य जन्मोत्सव पर. ॥२४॥
उत्पाता जज्ञिरेऽरातिनगरेषु सहस्रश· । आपदा सूचका बन्धुनगरेषु च सपदाम् ॥२५॥

---

निर्मल हो गया था ॥१२॥ उसने देखा कि लक्ष्मी और कीर्ति आदरपूर्वक, जिनके मुखपर कमल रक्खे हुए थे तथा जिनमे सुन्दर जल भरा हुआ था ऐसे कलशोसे सिहका अभिषेक कर रही है ॥१३॥ फिर देखा कि मैं स्वयं किसी ऊँचे पर्वतके शिखरपर चढ़कर समुद्ररूपी मेखलासे सुशोभित विस्तृत पृथिवीको देख रही हूँ ॥१४॥ इसके बाद उसने देदीप्यमान किरणोसे युक्त, सूर्यके समान सुशोभित, नाना रत्नोसे खचित तथा घूमता हुआ सुन्दर चक्र देखा ॥१५॥ इन सब स्वप्नोको देखकर वह मङ्गलमय वादित्रोके शब्दसे जाग उठी । तदनन्तर उसने बड़ी विनयसे जाकर अत्यन्त मधुर शब्दो द्वारा पतिके लिए स्वप्न-दर्शनका समाचार सुनाया ॥१६॥ इसके उत्तरमे राजा दशरथने बताया कि हे उत्तम मुखको धारण करनेवाली प्रिये ! तुम्हारे ऐसा पुत्र होगा कि जो युगका प्रधान होगा, शत्रुओके समूहका क्षय करनेवाला होगा, महातेजस्वी तथा अद्भुत चेष्टाओंका धारक होगा ॥१७॥ पतिके इस प्रकार कहनेपर जिसका चित्त आनन्दसे व्याप्त हो रहा था ऐसी सुमित्रा रानी अपने स्थान पर चली गई । उस समय वह समस्त लोकको ऐसा देख रही थी मानो नीचे ही स्थित हो ॥१८॥

अथानन्तर समय पूर्ण होने पर, जिस प्रकार पूर्व दिशा पूर्ण चन्द्रमाको उत्पन्न करती है उसी प्रकार अपराजिता रानीने कान्तिमान् पुत्र उत्पन्न किया ॥१९॥ इस भाग्य-वृद्धिकी सूचना करनेवाले लोगोको जब राजा दशरथ धन देने बैठे तो उनके पास छत्र चमर तथा वस्त्र ही शेष रह, गये बाकी सब वस्तुएँ उन्होने दानमें दे दीं ॥२०॥ महा विभवसे सम्पन्न समस्त भाई-बान्धवोने इसका बड़ा भारी जन्मोत्सव किया । ऐसा जन्मोत्सव कि जिसमे सारा संसार उन्मत्त-सा हो गया था ॥२१॥ मध्याह्नके सूर्यके समान जिसका वर्ण था, जिसका वक्षःस्थल लक्ष्मीके द्वारा आलिङ्गित था तथा जिसके नेत्र कमलोके समान थे ऐसे उस पुत्रका माता-पिताने पद्म नाम रक्खा ॥२२॥ तदनन्तर जिस प्रकार रत्नोंकी भूमि अर्थात् खान छाया आदि गुणोसे सम्पन्न उत्तम रत्नको उत्पन्न करती है उसी प्रकार सुमित्राने श्रेष्ठ कान्तिके धारक पुत्रको उत्पन्न किया ॥२३॥ पद्मके जन्मोत्सवका मानो अनुसन्धान ही करते हुए बन्धु-वर्गने उसका भी बहुत भारी जन्मोत्सव किया था ॥२४॥ शत्रुओंके नगरोंमें आपत्तियोकी सूचना देनेवाले हजारों उत्पात होने लगे और बन्धुओंके नगरोंमे सम्पत्तियोंकी सूचना देनेवाले हजारों शुभ चिह्न प्रकट

---

१ प्रधान म० । २. पूर्णेन्दुरिव म० ।

प्रौढेन्दीवरगर्भाभः कान्तिवारिकृतप्लव । सुलक्षमा[1] लक्ष्मणाख्यायां पितृभ्यामेव योजित ॥२६॥
बालौ मनोज्ञरूपौ तो विद्रुमाभरदच्छदौ । रक्तोत्पलसमच्छायपाणिपादौ सुविभ्रमौ ॥२७॥
नवनीतसुखस्पर्शौ जातिसौरभधारिणौ । कुर्वाणौ शैशवीं क्रीडा चेत' कस्य न जह्रतुः ॥२८॥
चन्दनद्रवदिग्धाङ्गौ कुङ्कुमस्थासकाञ्चितौ । सुवर्णरससपृक्तरजताचलकोपमौ[2] ॥२९॥
अनेकजन्मसवृद्धस्नेहान्योन्यवशानुगौ । अन्त पुरगतौ सर्वबन्धुभि. कृतपालनौ ॥३०॥
विच्छर्दमिव कुर्वाणावमृतेन कृतस्वनौ । मुखपङ्केन[3] लिम्पन्ताविव लोक विलोकनात् ॥३१॥
छिन्दन्ताविव दारिद्र्यमाहूतागमकारिणौ । तर्पयन्ताविव स्वान्त सर्वेषामनुकूलत ॥३२॥
प्रसादसम्मदौ साक्षादिव देहमुपागतौ । रेमाते तौ सुख पुर्यां कुमारौ कृतरक्षणौ ॥३३॥
विजयश्च त्रिपृष्ठश्च यथापूर्वं बभूवतु । तत्तुल्यचेष्टितावेव कुमारौ तावशेषत ॥३४॥
तनय केकयासूत दिव्यरूपसमन्वितम् । यो जगाम महाभाग्यो भुवने भरतश्रुतिम् ॥३५॥
सुषुवे सुप्रभा पुत्र सुन्दर यस्य विष्टपे । ख्याति शत्रुघ्नशब्देन सकलेऽद्यापि वर्तते ॥३६॥
बलनामापर मात्रा पद्मस्येति विनिर्मितम् । सुमित्रया हरिर्नाम तनयस्य महेच्छया ॥३७॥
कृतोऽर्धचक्रिनामाय मात्रेति भरताभिधाम् । दृष्ट्वा चक्रिणि सपूर्णे केकया प्रापयत् सुतम् ॥३८॥
चक्रवर्तिध्वनि नीतो मात्रायमिति सुप्रभा । तनयस्याहतो नाम शत्रुघ्नमिति निर्ममे ॥३९॥

होने लगे ॥२५॥ प्रौढ नील कमलके भीतरी भागके समान जिसकी आभा थी, जो कान्तिरूपी जलमें तैर रहा था और अनेक अच्छे-अच्छे लक्षणोंसे सहित था ऐसे उस पुत्रका माता-पिताने लक्ष्मण नाम रक्खा ॥२६॥ उन दोनों बालकोंका रूप अत्यन्त मनोहर था, उनके ओठ मूँगाके समान लाल थे, हाथ और पैर लाल कमलके समान कान्तिवाले थे, उनके विभ्रम अर्थात् हाव-भाव देखते ही बनते थे, उनका स्पर्श मक्खनके समान कोमल था, तथा जन्मसे ही वे उत्तम सुगन्धिको धारण करनेवाले थे। बाल-क्रीड़ा करते हुए वे किसका मन हरण नहीं करते थे ॥२७–२८॥ चन्दनके लेपसे शरीरको लिप्त करनेके बाद जब वे ललाट पर कुङ्कुमका तिलक लगाते थे तब सुवर्ण रससे संयुक्त रजताचलकी उपमा धारण करते थे ॥२९॥ अनेक जन्मोंके संस्कारसे बढ़े हुए स्नेहसे वे दोनों ही बालक परस्पर एक दूसरेके वंशानुगामी थे, तथा अन्तःपुरमें समस्त बन्धु उनका लालन-पालन करते थे ॥३०॥ जब वे शब्द करते थे तब ऐसे जान पड़ते थे मानो अमृतका वमन ही कर रहे हों और जब किसीकी ओर देखते थे तब ऐसा जान पड़ते थे मानो उस लोकको सुखदायक पङ्कसे लिप्त ही कर रहे हों ॥३१॥ जब किसीके बुलानेपर वे उसके पास पहुँचते थे तब ऐसे जान पड़ते थे मानो दरिद्रताका छेद ही कर रहे हों। वे अपनी अनुकूलतासे सबके हृदयको मानो तृप्त ही कर रहे थे ॥३२॥ उन्हें देखनेसे ऐसा जान पड़ता था मानो प्रसाद और सम्पद् नामक गुण ही देह रखकर आये हों। जिनकी रक्षक लोग रक्षा कर रहे थे ऐसे दोनों बालक नगरीमें सुखपूर्वक जहाँ-तहाँ क्रीड़ा करते थे ॥३३॥ जिस प्रकार पहले विजय और त्रिपृष्ठ नामक बलभद्र तथा नारायण हुए थे उसी प्रकार ये दोनों बालक भी उन्हींके समान समस्त चेष्टाओंके धारक हुए थे ॥३४॥

तदनन्तर केकया रानीने सुन्दर रूपसे सहित पुत्र उत्पन्न किया जो महाभाग्यवान् था तथा संसारमें 'भरत' इस नामको प्राप्त हुआ था ॥३५॥ तत्पश्चात् सुप्रभा रानीने सुन्दर पुत्र उत्पन्न किया जिसकी समस्त संसारमें आज भी 'शत्रुघ्न' नामसे प्रसिद्धि है ॥३६॥ अपराजिताने पद्मका दूसरा नाम बल रक्खा था तथा सुमित्राने अपने पुत्रका दूसरा नाम बड़ी इच्छासे हरि घोषित किया था ॥३७॥ केकयाने देखा कि 'भरत' यह नाम सम्पूर्ण चक्रवर्ती भरतमें आया है इसलिए उसने अपने पुत्रका अर्ध-चक्रवर्ती नाम प्रकट किया ॥३८॥ सुप्रभाने विचार किया कि जब

१. सुलक्ष्म्या म० । २. -रजताञ्जनकोपमौ म० । ३ सुखपङ्केन ख०, ज० ।

समुद्रा इव चत्वार कुमारास्ते नया इव । दिग्विभागा इवोदारा बभूवुर्जगत· प्रिया ॥४०॥
तत कुमारकान् दृष्ट्वा विद्यासग्रहणोचितान् । दध्यौ योग्यमुपाध्याय पितैषां मनसाकुल· ॥४१॥
अथास्ति नगर नाम्ना काम्पिल्यमिति सुन्दरम् । भार्गवोऽत्र शिखी ख्यातस्तस्येषुरिति भामिनी ॥४२॥
ऐररूढिस्तयो पुत्रो दुर्विनीतोऽतिलालित[1] । उपालम्भसहस्राणा कारणीभूतचेष्टित ॥४३॥
द्रविणोपार्जन विद्याग्रहण धर्मसग्रह । स्वाधीनमपि तत्प्रायो विदेशे [2]सिद्धिमश्नुते ॥४४॥
पितृभ्या भवनादेष निर्विण्णाभ्या निराकृतः । ययौ राजगृह दु खी वसान कर्पटद्वयम् ॥४५॥
तत्र वैवस्वतो नाम धनुर्वेदातिपण्डित । युक्तः सहस्रमात्रेण शिष्याणामभियोगिनाम् ॥४६॥
यथावत्तस्य पार्श्वेऽसौ धनुर्विद्यामुपागमत् । जातः शिष्यसहस्राच्च दूरेणाधिककौशल ॥४७॥
श्रुत कुशाग्रराजेन मत्सुतेभ्योऽपि कौशलम् । वैदेशे क्वापि विन्यस्तमिति ज्ञात्वा रुष गत ॥४८॥
श्रुत्वा च स्वामिन क्रुद्धमस्त्राचार्येण शिक्षित·[3] । एवमैरो यथा राज्ञ· पुर कुण्ठो भविष्यति ॥४९॥
स समाह्वायित शिष्यै· सुतोऽसौ विभुना नृणाम् । शिक्षा पश्यामि सर्वेषा छात्राणामिति चोदित ॥५०॥
ततोऽन्तेवासिनस्तेन क्रमेण शरमोचनम् । कारिता [4]लक्ष्यपात च सर्वे चक्रुर्यथायथम् ॥५१॥
तथैरोऽपि स नियुक्त· शरान् चिक्षेप तादृशान् । दु शिक्षित इति ज्ञातो विभुना [5]तेन यादृशै· ॥५२॥
विदित्वा वितथा सर्वां राज्ञा सम्प्रेषितो गतः । अस्त्राचार्य स्वक धाम शिष्यमण्डलमध्यग· ॥५३॥

केकयाने अपने पुत्रका नाम चक्रवर्तीके नामपर रक्खा है तब मै अपने पुत्रका नाम इससे भी बढ़कर क्यो नहीं रक्खूँ यह विचारकर उसने अर्हन्त भगवान्के नामपर अपने पुत्रका नाम शत्रुघ्न रक्खा ॥३९॥ जगत्के जीवोको प्रिय लगनेवाले वे चारो कुमार समुद्रके समान गम्भीर थे, सम्यग् नयोके समान परस्पर अनुकूल थे तथा दिग्विभागोके समान उदार थे ॥४०॥

तदनन्तर इन कुमारोको विद्या ग्रहणके योग्य देखकर इनके पिता राजा दशरथने बड़ी व्यग्रतासे योग्य अध्यापकका विचार किया ॥४१॥ अथानन्तर एक काम्पिल्य नामका सुन्दर नगर था उसमे शिखी नामका ब्राह्मण रहता था । उसकी इषु नामकी स्त्री थी ॥४२॥ उन दोनोके एक एर नामका पुत्र था जो अत्यधिक लाड-प्यारके कारण महाअविनयी हो गया था । उसकी चेष्टाएँ हजारो उलाहनोका कारण हो रही थी ॥४३॥ धनका उपार्जन करना, विद्या ग्रहण करना और धर्मसंचय करना ये तीनो कार्य यद्यपि मनुष्यके अपने आधीन हैं फिर भी प्रायःकर विदेशमे ही इनकी सिद्धि होती है ॥४४॥ ऐसा विचारकर माता-पिताने दु.खी होकर उसे घरसे निकाल दिया जिससे केवल दो कपड़ोको धारण करता हुआ वह दुःखी अवस्थामे राजगृह नगर पहुँचा ॥४५॥ वहाँ एक वैवस्वत नामका विद्वान् था जो धनुर्विद्यामे अत्यन्त निपुण था और विद्याध्ययनमे श्रम करनेवाले एक हजार शिष्योसे सहित था ॥४६॥ ऐर उसीके पास विधिपूर्वक धनुर्विद्या सीखने लगा और कुछ ही समयमें उसके हजार शिष्योसे भी अधिक निपुण हो गया ॥४७॥ राजगृहके राजाने जब यह सुना कि वैवस्वतने किसी विदेशी बालकको हमारे पुत्रोंसे भी अधिक कुशल बनाया है तब वह यह जानकर क्रोधको प्राप्त हुआ ॥४८॥ राजाको कुपित सुनकर अस्त्रविद्याके गुरु वैवस्वतने ऐरको ऐसी शिक्षा दी कि तू राजाके सामने मूर्ख बन जाना ॥४९॥ तदनन्तर राजाने, मै तुम्हारे सब शिष्योकी शिक्षा देखूँगा, यह कहकर शिष्योके साथ वैवस्वत गुरुको बुलाया ॥५०॥ तदनन्तर राजाने सब शिष्योसे क्रमसे बाण छुड़वाये और सबने यथायोग्य निशाने बाँध दिये ॥५१॥ इसके बाद ऐरसे भी बाण छुड़वाये तो उसने इस रीतिसे बाण छोड़े कि राजाने उसे मूर्ख समझा ॥५२॥ जब राजाने यह समझ लिया कि लोगोंने इसके विषयमें जो

१. विलालितः म० । २. सिद्धमश्नुते म० । ३. शिष्यतः म० । ४. लक्ष्यपातं च म० । ५. येन तादृशैः क० ।

वैवस्वतसुतामैर स्वीकृत्य गुरुसम्मताम् । रात्रौ पलायन कृत्वा प्राप दाशरथी पुरीम् ॥५४॥
ढौकितश्चानरण्ये स्व कौशल च न्यवेदयत् । राज्ञा समर्पिता तस्मै तुष्टेन तनुसभवा ॥५५॥
तेष्वस्त्रकौशल तस्य [१]सक्रान्त स्फीतता गतम् । सर सु सुप्रसन्नेषु चन्द्रबिम्बमिवागतम् ॥५६॥
अन्यानि च गुरुप्राप्त्या विज्ञानानि [२]प्रकाशताम् । यातानि तेषु रत्नानि पिधानापगमादिव ॥५७॥

स्रग्धराच्छन्दः

दृष्ट्वा विज्ञानमेषामतिशयसहित सर्वशास्त्रेषु राजा
सप्राप्तस्तोषमग्र्य सुतनयविनयोदारचेष्टाहृतात्मा ।
चक्रे पूजासमेत गुरुषु गुणगणज्ञानपाण्डित्ययुक्तो
यातु व्युत्क्रम्य वाञ्छाविभवमतितरा दानविख्यातकीर्तिं ॥५८॥
ज्ञान सप्राप्य किंचिद् व्रजति परमता तुल्यमन्यत्र यात
तावत्त्वेनापि नैति क्वचिदपि पुरुषे कर्मवैषम्ययोगात् ।
अत्यन्त स्फीतिमेति स्फटिकगिरितटे तुल्यमन्यत्र देशे
यात्येकान्तेन नाश तिमिरवति रवेरशुवृन्द खगौघै. ॥५९॥

*इत्यार्षे रविषेणाचार्यप्रोक्ते पद्मचरिते चतुर्भ्रातृसभवाभिधानं नाम पञ्चविंशतितम पर्व ॥२५॥*

---

कहा था वह सब झूठ है तब उसने अस्त्राचार्यको सन्मानके साथ विदा किया और वह शिष्य-मण्डलके साथ अपने घर चला गया ॥५३॥ ऐर गुरुकी सम्मतिसे उसकी पुत्रीको विवाह कर रात्रिमे वहाँसे भाग आया और राजा दशरथकी राजधानी अयोध्यापुरीमे आया ॥५४॥ वहाँ उसने राजा दशरथके पास जाकर उन्हें अपना कौशल दिखाया और राजाने सन्तुष्ट होकर उसे अपने सब पुत्र सौप दिये ॥५५॥ सो जिस प्रकार निर्मल सरोवरोमे प्रतिबिम्बित चन्द्रमाका बिम्ब विस्तारको प्राप्त होता है उसी प्रकार उन शिष्योमे ऐरका अस्त्रकौशल प्रतिबिम्बित होकर विस्तारको प्राप्त हो गया ॥५६॥ इसके सिवाय अन्य-अन्य विषयोंके गुरु प्राप्त होनेसे उनके अन्य-अन्य ज्ञान भी उस तरह प्रकाशताको प्राप्त हो गये जिस तरह कि ढक्कनके दूर हो जानेसे छिपे रत्न प्रकाशताको प्राप्त हो जाते है ॥५७॥ पुत्रोके नय, विनय और उदार चेष्टाओसे जिनका हृदय हरा गया था ऐसे राजा दशरथ उन पुत्रोका सर्वशास्त्रविषयक अतिशय पूर्णज्ञान देखकर अत्यन्त सन्तोषको प्राप्त हुए। वे गुणसमूहविषयक ज्ञान और पाण्डित्यसे युक्त थे तथा दानमे उनकी कीर्ति अत्यन्त प्रसिद्ध थी, इसलिए उन्होने समस्त गुरुओका सन्मान कर उन्हें इच्छासे भी अधिक वैभव प्रदान किया था ॥५८॥

गौतमस्वामी कहते है कि हे राजन्! किसी पुरुषको प्राप्तकर थोड़ा ज्ञान भी उत्कृष्टताको प्राप्त हो जाता है, किसीको पाकर उतनाका उतना ही रह जाता है और कर्मोकी विषमतासे किसीको पाकर उतना भी नहीं रहता। सो ठीक ही है क्योंकि सूर्यकी किरणोका समूह स्फटिक-गिरिके तटको पाकर अत्यन्त विस्तारको प्राप्त हो जाता है, किसी स्थानमें तुल्यताको प्राप्त होता है अर्थात् उतनाका उतना ही रह जाता है और अन्धकारयुक्त स्थानमे बिलकुल ही नष्ट हो जाता है ॥५९॥

*इस प्रकार आर्षनामसे प्रसिद्ध रविषेणाचार्य कथित पद्मचरितमे राम आदि चार भाइयोकी उत्पत्तिका कथन करनेवाला पच्चीसवाँ पर्व समाप्त हुआ ॥२५॥*

---

१ सभ्रान्त म० । २ प्रकाशिताम् म० ।

# श्लोकानामकाराद्यनुक्रमः

[ अ ]

[ आ ]

[ ई ]



[ उ ]

[ ऐ ]



[ औ ]

[ क ]

[ छ ]

[ ज ]

[ य ]